Prakrit Text Series

No. 21

HĀLA'S

GĀHĀKOSA

(GĀTHĀSAPTAŚATĪ)

with

THE SANSKRIT COMMENTARY

of

BHUVANAPĀLA

Part I

Edited by

Prof. M. V. Patwardhan

PRAKRIT TEXT SOCIETY
AHMEDABAD-380009

1980

PRAKRIT TEXT SERIES No. 21

General Editors
(1) D. D. Malvania
(2) H. C. Bhayani

HĀLA'S

GĀHĀKOSA
(GĀTHĀSAPTAŚATĪ)

With
THE SANSKRIT COMMENTARY
OF
BHUVANAPĀLA

Part I

Edited by
Prof. M. V. Patwardhan

PRAKRIT TEXT SOCIETY
AHMEDABAD–380009.
1980

Published by
Dalsukh Malvania
Secretary,
Prakrit Text Society
Ahmedabad-9.

First Edition 1980

Price Rs. 35/-

Printed by
Mahanth Tribhuvandas Shastri
Sree Ramanand Printing Press
Kankaria Road
Ahmedabad-380022

प्राकृतग्रन्थपरिषद्, ग्रन्थाङ्क-२१

कविवत्सलहालकृतः

गाहाकोसो (गाथाकोशः)

भुवनपालविरचितया छेकोक्तिविचारलीलानाम्न्या
टीकया संवलितः

प्रा. माधव वासुदेव पटवर्धन, एम्. ए.
इत्येतेन संपादितः

प्राकृत ग्रन्थ परिषद्
अहमदाबाद
१९८०

Publisher's Note

This one more edition of Hāla's Gāhākosa does not require any apology as new mss are utilized for its critical edition and also for the first time Bhuvanapāla's commentary is printed with the text.

I have to thank Professor M. V. Patwardhan for editing the text and the Commentary for the Prakrit Text Society though he is not in good health due to old age.

I hope that he will be able to finish the Second part in which he wants to give the Translation of the text, Notes, Indices and an exhaustive Introduction.

—DALSUKH MALVANIA

PREFACE

Work on the present edition of Hāla's Gāhākosa (Gāthākośa or Gāthāsaptaśatī) was undertaken by me in 1972, at the instance of the Prakrit Text Society, Ahmedabad, as a part of the Society's plan to bring out new editions of ancient Prakrit literary works. It was decided by the Society that the Prakrit text of Hāla's Gāhākosa with Bhuvanapāla's Sanskrit Commentary (not printed so far) should be published on the same lines as the Vajjālagga published by the Society in 1969. The Prakrit Text Society feels happy in placing in the hands of scholars Part I of Hala's Gāhākosa with the Sanskrit Commentary of Bhuvanapāla and important variants from Prof. Weber's text of the *Saptaśatakam* of Hāla (Leipzig, Germany, 1881). The Roman figures with the letter W prefixed to them in the margin of the text of the *gāthās* indicate the numbers of the *gāthās* in Weber's edition of 1881, Part II will contain an Introduction, translation, alphabetical index of the *gāthās*, explanatory notes and glossary of important words occurring in the *gāthās*.

For the present edition the following published and manuscript material has been used.

(1) Prof. Weber's editions of Hāla's *Saptaśatakam*, Leipzig 1870 and 1881.

(2) Prof. A. Weber's two long articles on the *Saptaśataka* of Hāla published in Vols. 26 (1872) and 28 (1874) of ZDMG.

(3) Prof. A. Weber's monograph on Bhuvanpālaś commentary on the *Saptaśataka*, published with introduction, various indices and a concordance on pp. 1-204 of Indische Studien, Vol, 16, 1883.

(4) Deccan College (Poona) manuscript No. 245 of 1880–1881 (used by Weber for his monograph mentioned above) and now deposited in the Bhandarkar Institute, Poona.

(5) Ahmedabad manuscript No. 7118 of the L. D. Institute of Indology, Ahmedabad.

(6) Bhandarkar Institute manuscript No. 385 of 1887—1891 of the *Gāthāsaptaśatī* with *Ā*jaḍa's Sanskrit commentary (used for Stanzas 601—637 of the Seventh Cento).

(7) Baroda manuscript No. 12681 of the Oriental Institute Baroda with very probably Bhuvanapāla's commentary (used for stanzas 641—700 of the Seventh Cento).

[For (6) and (7), see the note printed on pp. 258-259 of the present edition].

I have great pleasure in recording here my sincere thanks to the BOR Institute Poona, to the L. D. Institute, Ahmedabad and the Oriental Institute, Baroda, for allowing me to make use of the manuscript material mentioned above. My gratitude is of course also due to Prof. A. Weber for the enlightenment and inspiration that I derived from his pioneering work on Hāla's anthology. I am also thankful to the Prakrit Text Society, Ahmedabad, for entrusting the present work to me.

Poona 4.
1st February, 1980.

M. V. PATWARDHAN

गाहाकोसो

पढमं सयं

W.1 १) पसुवइणो रोसारुणपडिमासंकंतगोरिमुहयंदं ।
गहियग्घपंकयं पिव संझासलिलंजलिं नमह ॥१॥

W.3 २) सत्त सयाइं कइवच्छलेण कोडीएँ मज्झयाराओ[१] ।
हालेण विरइयाइं सालंकाराण गाहाणं ॥२॥

ओं नमो जिनाय ।.... ....

इह खलु श्रीसातवाहनकृते गाथाकोशे नानाकविकल्पितासु भिन्न-विषयासु अनेकच्छेकोक्तिषु सकलकलाकौशलकुशलोऽपि न गूढप्रभाव-मुद्भावयितुमलं, किं पुनर्वयम् । तथापि सकलसूरिशास्त्रार्थप्रार्थनोपरोधेन अस्माभिरस्मिन्यथाबुद्धि विवरणं विधास्यत इति । तत्रादौ सकलविघ्न-प्रतिबन्धसिद्धिम् अवगुंते भुकामः (?अधिगन्तुकामः) कविरयं नमस्कार-मकार्षीत् ।

१) हालस्य । [पशुपते रोषारुणप्रतिमासंक्रान्तगौरीमुखचन्द्रम् । गृहीतार्धपङ्कजमिव सन्ध्यासलिलाञ्जलिं नमत ॥] पसुवइणो पशुपतेर्महे-श्वरस्य संझासलिलंजलिं नमह सन्ध्यासलिलाञ्जलिं नमत । कथंभूतम् । रोसारुणपडिमासंकंतगोरिमुहयंदं कोपपाटलप्रतिबिम्बिताम्बिकावदनेन्दुम् । अतश्च कीदृशम् । गहियग्घपङ्कयं पिव गृहीतार्धपङ्कजमिव । सन्ध्यावन्दनेन रोषारुणत्वं गौरीमुखचन्द्रस्य ज्ञेयम् । अनेनैव वस्तूपक्षेपरूपेण ईर्ष्या-विप्रलम्भश्रृङ्गारप्रायः प्रबन्धोऽयं विधास्यत इति सूचितं भवति । उत्प्रेक्षा नाम अलङ्कारः । तस्य लक्षणम्—यत्र विशिष्टे वस्तुनि सत्यसदारोप्यते समं तस्य । (वस्त्वन्तरमुपपत्त्या उत्प्रेक्षा) सा (तु) विज्ञेया ॥१॥

२) [सप्त शतानि कविवत्सलेन कोट्या मध्यात् । हालेन विर-चितानि सालंकाराणां गाथानाम् ॥] सप्त शतानि कविवत्सलेन कोट्याः

---

१ W मज्झआरम्मि

W4 ३) उय णिच्चलणिप्फंदा भिसिणीपत्तम्मि रेहइ बलाया ।
निम्मलमरगयभायणपरिट्ठिया संखसुत्ति व्व ॥३॥

W5 ४) ताव च्चिय रइसमए महिलाणं विब्भमा विरायंति ।
जाव न कुवलयदलसच्छहाइँ मउलंति नयणाइं ॥४॥

मध्यात् सातवाहनेन विरचितानि सालंकाराणां गाथानाम् । हाल इति सातवाहनस्य कुन्तलाधिपस्य नाम । कविवत्सलत्वात् सत्यामपि शक्तौ तदीया एव गाथाः प्रख्यापिताः ॥२॥

३) पोट्टिसस्स । [पश्य निश्चलनिःष्पन्दा बिसिनीपत्रे राजते बलाका । निर्मलमरकतभाजनप्रतिष्ठिता शङ्खशुक्तिरिव ॥] पश्य निश्चलनिःष्पन्दा बिसिनीपत्रे शोभते बलाका निर्मलमरकतभाजनप्रतिष्ठिता शङ्खशुक्तिरिव । निश्चला पवनादिपाताभावात् । निःष्पन्दा स्वयं निष्क्रियत्वात् । कल्पितोपमालङ्कारः । काचिज्जनाकीर्णे वक्तुमक्षमस्य संकेतं कथयति । अत्र पद्मिनीखण्डनिकटे शून्यं वर्तते, तथा च निश्चला निःष्पन्दा च बलाकीति इङ्गिताकारलक्षितत्वादर्थान्तरस्य सूक्ष्मोऽत्यत्रालंकारः ॥३॥

४) सालाहणस्स । [तावदेव रतिसमये महिलानां विभ्रमा विराजन्ति । यावन्न कुवलयदलसच्छायानि मुकुलन्ति नयनानि ॥] तावदेव रतिसमये महिलानां विभ्रमा विराजन्ति, यावन्न कुवलयदलसदृशानि मुकुलीभवन्ति नयनानि । विभ्रमा मणितसीत्कृतादयः । विभ्रमाणां मध्ये नयननिमीलितानि विशेष्यन्ते, इति भावः । अथवा नयननिमीलितेभ्यो अर्वाक् सर्वे विभ्रमा लभ्यन्ते, इत्यर्थः । अथवा नयननिमीलितेषु जातेषु अन्ये विभ्रमा न भवन्ति, सुरतसुखनिश्चेष्टत्वादबलानाम् । क्षणं रटन्ती रुदती नृत्यन्ती चातिविह्वला । निःसहत्वं तदा याति मुकुलीकृतलोचना ॥४॥

W6 ५) नोहलियमप्पणो किं न मग्गसे मग्गसे कुरुवयस्स ।
एयं तु हसइ तुह सुहये वलियमुहपंकयं जाया ॥५॥
W7 ६) ताविज्जंति असोएहि लडहविलयाउ दइयविरहम्मि ।
किं सहइ को वि कस्स वि पायपहारं पहुप्पंतो ॥६॥
W8 ७) अत्ता तह रमणिज्जं अम्हं गामस्स मंडणभूयं[2] ।
लूयतिलवाडसरिसं[3] सिसिरेण कयं भिसिणिसंडं ॥७॥

५) चुल्लोडयस्स । [नवफलिकामात्मनः किं न मार्गयसे मार्गयसे कुरुबकस्य । एवं तु हसति तव सुभग वलितमुखपङ्कजं जाया ॥] नव-फलिकामात्मनः किं न मार्गयसि मार्गयसे त्वं कुरुबकस्य, एवं तु हसति त्वां हे सुभग वलितमुखपङ्कजं जाया । अपूर्वोपायनफलं नवफलिका । संकेतस्थानात् कुरुबकं गृहीत्वा आयातः सन् कुलटायाः कुरुबकं दर्शयन् नवफलिकां याचते । न त्वं तत्र गतेति सूचनार्थम् । साऽपि तव प्रथमम् अहं गतेति वलितग्रीवं केशन्यस्तकुरुबकं दर्शितवती । अतस्तत्सखी विदिता-भिप्राया गाथामिमाम् आह । लेशोऽलङ्कारः, उत्तरं वा । नवजातकुसुमं ललना लताया नोहलियं (नवफलिकाम्) इच्छन्ति । नवफलिका स्यान्नव्ये (?) नवजातरजःस्त्रियाम् ॥५॥

६) मयरंदसेहरस्स । [ताप्यन्तेऽशोकैर्लटभवनिता दयितविरहे । किं सहते कोऽपि कस्यापि पादप्रहारं प्रभवन् ॥] ताप्यन्तेऽशो-कैर्लटभवनिता दयितविरहे, उद्दीपनविभावत्वादशोकस्य । किं सहते कोऽपि कस्यापि पादप्रहारं प्रपुष्यन् (?)। दोहददानार्थं ताभिरशोकः पादैर्हत आसीत् इति । अर्थान्तरन्यासोऽलङ्कारः ॥६॥

७) तस्सेय (मयरंदसेहरस्स) । [पितृष्वसस्तथा रमणीयमस्माकं ग्रामस्य मण्डनभूतम् । लूनतिलवाटसदृशं शिशिरेण कृतं बिसिनीषण्डम् ॥] हे अत्ता पितृष्वसः, तथा रमणीयम् अस्माकं ग्रामस्य मण्डनभूतं

१ W एअं खु सुहअ तुह हसइ २ W मडणीहूअं ३ W लुअतिलवाडसरिच्छं

W9 ८) मा रुयसु[1] ओणयमुही धवलायंतेसु सालिछित्तेसु ।
हरियालमंडियमुहा नड व्व सणवाडया[2] जाया ॥८॥
W10 ९) सहि एरिसि च्चिय गई मा रुव्वउ[3] तंसवलियमुहयंदं ।
एयाण बालवालुंकितंतुकुडिलाण पिम्माणं ॥९॥

लूनतिलवाटसदृशं शिशिरेण कृतं बिसिनीखण्डम् । लूनतिलवाटवत् संकेतस्थाननिरुपयोगित्वात् । संकेतभङ्गकथनम् । उपमासहोक्तिः (?) अलङ्कारः सूक्ष्मं च ॥७॥

८) कुमारिलस्स । [मा रुदिहि अवनतमुखी धवलायमानेषु शालिक्षेत्रेषु । हरितालमण्डितमुखा नटा इव शणवाटका जाताः ॥] काचित् सखीं समाश्वासयितुम् इदमाह । मा रुयसु ओणयमुही मा रोदीः अवनतमुखी । क्व सति । धवलायंतेसु सालिछित्तेसु धवलायमानेषु शालिक्षेत्रेषु । हरियालमंडियमुहा नड व्व सणवाडया जाया हरितालमण्डितमुखा नटा इव शणवाटका जाताः । एतदुक्तं भवति । ओषध्यः फलपाकान्ताः (मनुस्मृति, १.४६) इति नाम परिणतिवशेन शालयः शीर्यन्ते । शीर्यन्ताम् । इमानि पुष्पितानि शणवाटकानि । ततः स्वेच्छाप्रच्छन्नोपकरणानि च भविष्यन्ति इति । हरितालो धातुविशेषः । उपमासूक्ष्माभ्यां संकीर्णोऽलंकारः ॥८॥

९) महेन्द्रपालस्य । [सखि ईदृश्येव गतिर्मा रुद्यतां त्र्यस्रवलितमुखचन्द्रम् । एतेषां बालवालुङ्कीतन्तुकुटिलानां प्रेम्णाम् ॥] सहि सखि मा रुद्यताम् । कथम् । तंसवलियमुहयंदं त्र्यस्रवलितमुखचन्द्रम् । एयाण बालवालुंकितंतुकुडिलाण पिम्माणं एरिसि च्चिय गई एतेषां बालवालुङ्कीतन्तुकुटिलानां प्रेम्णाम् ईदृश्येव गतिः दुःखदायिनीत्यर्थः । त्र्यस्रशब्दस्य वक्रादित्वात् (वररुचि, ४.१५) अनुस्वारे कृते रूपम् ॥९॥

१ W किं रुअसि २ W हरिआलमंडिअमुही णडि व्व सणवाडिआ ३ W रुव्वसु

W11 १०) पायवडियस्स पइणो पट्ठिं[1] पुत्ते समारुहंतम्मि ।
दढमन्नुदूमियाएँ वि हासो घरिणीइ निक्कंतो ॥१०॥

W12 ११) सच्चं जाणइ दट्ठुं सरिसम्मि जणम्मि जुज्जए राओ ।
मरउ, न तुमं भणिस्सं मरणं पि सलाहणिज्जं से ॥११॥

१०) दुर्गस्वामिनः । [पादपतितस्य पत्युः पृष्ठं पुत्रे समारोहति । दृढमन्युदूनाया अपि हासो गृहिण्या निष्क्रान्तः ॥] हासो घरिणीइ निक्कंतो हासो गृहिण्या निष्क्रान्तः । कीदृश्याः । दढमन्नुदूमियाएँ वि दृढो यो मन्युः तेन दूनायाः पीडिताया अपि । क्व सति । पट्ठिं पुत्ते समारुहंतम्मि पृष्ठं पुत्रे समारोहति सति । पायवडियस्स पइणो पादपतितस्य पत्युः । स किलानुनयन्नपि गोत्रस्खलनं चकार । तथाभूतस्य च तस्य पशुनिर्विशेषस्य या पुत्रेण पृष्ठारोहणलक्षणविकृतचेष्टा सा अस्या हासहेतुः । हास्योऽपि हासमूलः स्फुटमुत्तममध्यमामाधमप्रकृतिः । विकृताङ्गवेषभाषाव्यापारेभ्यः समुद्भवति ॥ खण्डिता नायिका । हासेन व्याजतो मन्दम् इति खण्डिताकोपाङ्गम् । सूक्ष्ममलंकारः ॥१०॥

११) तस्यैव (दुर्गस्वामिनः) । [सत्यं जानाति द्रष्टुं सदृशे जने युज्यते रागः । म्रियतां न त्वां भणिष्यामि मरणमपि श्लाघनीयं तस्याः ॥] सच्चं जाणइ दट्ठुं सत्यं जानाति द्रष्टुम् । यतः सरिसम्मि जणम्मि जुज्जए राओ सदृशे जने रागो युज्यते । त्वं रूपवान्, सातिरूपवतीत्यर्थः । मरउ न तुमं भणिस्सं यदि च सा त्वामलभमाना म्रियते, म्रियताम् न त्वां भणिष्यामि । किं कारणम् । मरणं पि सलाहणिज्जं से मरणमपि श्लाघ्यं तस्याः, यत् त्वदर्थं संपद्यते । अन्ये अन्यथा गाथार्थं योजयन्ति । सत्यं जानाति द्रष्टुं यदसौ त्वय्यनुपमरूपे यूनि अनुरक्ता । एतदुक्तं भवति । द्रष्टुमेव जानाति न पुनरिङ्गिताकारवेदिनी । यतः सदृशे जने युज्यते रागः । अनुरागकृतमत्र सादृश्यम् । रक्ते जनेऽनुरज्यते,

[1] W पुट्ठिं

W13 १२) रंधणकम्मणिउणिए मा झूरसु[1] रत्तपाडलसुयंधं ।
मुहमारुयं पियतो विज्झाइ[2] सिही न पज्जलइ ॥१२॥

W15 १३) किं किं ते पडिहासइ सहीहि इय पुच्छियाइ मुद्धाए ।
पढमुग्गयदोहलिणीएँ नवर दइयं गया दिट्ठी ॥१३॥

त्वं तु वीतराग इत्यर्थः । अतश्च म्रियतां, न त्वां भणिष्यामि । यत ईदृश्यामविवेकिन्याम् उपेक्षापक्ष एव क्षमः । अपि च मरणमपि श्लाघ्यं तस्याः । तस्यां मृतायामपि नानुतापो भवतीति भावः । एतेन सा त्वद्वियोगेन दशमीं दशां प्राप्तकल्पा वर्तत इति प्रतिपादितं भवति । पर्यायोक्तिरलंकारः । इष्टमर्थमनाख्याय साक्षात्तस्यैव सिद्धये । यत् प्रकारान्तराख्यानं पर्यायोक्तं तदिष्यते (काव्यादर्श २.२९५) ॥११॥

१२) [रन्धनकर्मनिपुणिके मा खिद्यस्व, रक्तपाटलसुगन्धिम् । मुखमारुतं पिबन् निर्वाति शिखी, न प्रज्वलति ।।] हे रंधणकम्मणिउणिए मा झूरसु रन्धनकर्मनिपुणिके मा खिद्यस्व । यतः मुहमारुयं पियंतो विज्झाइ सिही वदनपवनं पिबन् निर्वाति शिखी, न पज्जलइ न दीप्यते इति । कथंभूतम् । रत्तपाडलसुयंधं रक्तपाटलसुगन्धम् । संधुक्षिते हि मयि रक्तपाटलसुगन्धवदनपवनपानसुखं न संपत्स्यते, इति मत्वा पावको न प्रदीप्यते, इति । अन्ये तु अधरदलदन्तव्रणवशविसूचितफूत्कारमारुताया दुर्विनयं प्रच्छादयन्ती काचिदिदमाह इत्याहुः । अत्र पक्षे लेशोऽलङ्कारः । जइ सो सोहग्गणिही दिट्ठो नयणेहि ति चिय गलंतु । अंगाइ अपावियसंगमाइँ ता कीस झिज्जंति ॥ क्षेपकः ॥१२॥

१३) [किं किं ते प्रतिभासते सखीभिरिति पृष्टाया मुग्धायाः । प्रथमोद्गतदोहदायाः केवलं दयितं गता दृष्टिः ॥] मुद्धाए नवरं दइयं गया दिट्ठी मुग्धायाः केवलं दयितं गता दृष्टिः । कथंभूतायाः । पढमुग्गयदोहलिणीएँ प्रथमोद्गतदोहदिन्याः । पुनरपि कथंभूतायाः । किं किं ते

1W जूरसु 2W धमाइ

W16 १४) अमयमय गयणसेहर रयणीमुहतिलय चंद दे छिवसु ।
छित्तो जेहिं वि पिओ[1] ममं पि तेहिं चिय करेहिं ॥१४॥
W17 १५) एइहिइ[2] सो पउत्थो अहयं कुप्पिज्ज सो वि अणुणिज्ज ।
इय कस्स वि फलइ मणोरहाण माला पिययमम्मि ॥१५॥

पडिहासइ महाडि इय पुच्छियाइ भक्ष्यभोज्यलेह्यपेयानां मध्यादिति मनस्यनुध्याय किं किं ते प्रतिभासत इति सखीभिः पृष्टायाः । दयितं गता दृष्टिः, अयं मे प्रतिभासत इति भावः । दोहददानमन्तरेण मम्मणगद्गदादिदोषदुष्टा जन्तवो जायन्त इति अन्तर्वत्नीनां दोहददानेन (?) आयुर्वेदविदो वदन्ति । नवरं इति केवलार्थो निपातः । स्वीया मुग्धा नायिका ॥१३॥

१४) रुद्रसुतस्य । [अमृतमय गगनशेखर रजनीमुखतिलक चन्द्र प्रार्थये स्पृश । स्पृष्टो यैरपि प्रियो मामपि तैरेव करैः ॥] काचिद् विरहिणी प्राणेश्वरस्य पारम्पर्यस्पर्शमपि स्पृहयन्ती शशिनमिदमाह । हे चंद जेहिं पि (करेहिं) पिओ छित्तो तेहिं चिय करेहिं ममं पि छिवसु यैरेव (करैः) प्रियः स्पृष्टः तैरेव करैर्माम् अपि स्पृशेति । सम्बोधनपरंपरापदेशेन संपत्त्यै प्रशंसां करोति । अमयमय गयणसेहर रयणीमुहतिलय अमृतमय गगनशेखर रजनीमुखतिलकेति यः किल प्रार्थ्यते स प्रशस्यते इति । दे इति प्रार्थनायां निपातः । विरहिणी नायिका । उन्मादो नाम संचारी भावः । इष्टजनविभवनाशादभिघाताद् वातपित्तकफकोपात् । मनसिजमानविकाराद् उन्मादो नाम संभवति ॥ अनिमित्तरुदितहसितैः संगीतनृत्यप्रधावितोत्क्रुष्टैः । अप्रार्थ्यप्रार्थनया चोन्मादं दर्शयेत् प्राज्ञः ॥ (नाट्यशास्त्र, ७. १२२–१२३) ॥१४॥

१५) श्रीसातवाहनस्य । [एष्यति स प्रोषितोऽहं कुप्येयं सोऽप्यनुनयेत् । इति कस्यापि फलति मनोरथानां माला प्रियतमे ॥] काचिद् वियोगिनी स्वचेतसि चिन्तयति । एइहिइ सो पउत्थो एष्यति स प्रोषितः,

---

[1]W जेहि पिअअमो [2]W एहिज्ज

W18 १६) दुग्गयकुडुंबयड्ढी कह नु मए धोविएण सोढव्वा ।
दसिओसरंतसलिलेण उयह रुन्नं व पडएण ॥१६॥
W19 १७) कोसंबकिसलवण्णय तण्णय उन्नामिएहि कण्णेहिं ।
हियइच्छियं घरं वच्चमाण धवलत्तणं पाव ॥१७॥

अहयं कुप्पिज्ज अहं चिरागमनदोषेण तस्मै कुप्येयम् । सो वि अणुणिज्ज सोऽपि मामनुनयेत् "प्रिये क्षमस्वेदं मे दूषणम्" इति । इय कस्स वि फलइ मणोरहाण माला पिययमम्मि इति कस्यापि पुण्यात्मनो मनोरथानां माला फलति निष्पद्यते, न पुनरपुण्यानां मादृशीनामिति । एइहिइ आगमिष्यति । चिन्ता संचारी भावः । स्वीया नायिका ॥१५॥

१६) श्रीवर्मणस्य । [दुर्गतकुटुम्बकृष्टिः कथं नु मया धौतेन सोढव्या । दशापसरत्सलिलेन पश्यत रुदितमिव पटेन ॥] दसिओसरंतसलिलेण उयह रुन्नं व पडएण दशापसरत्सलिलेन पश्यत रुदितमिव पटेन । अत्र कारणमाह । मए धोविएण मया धौतेन दुग्गयकुडुंबअड्ढी कह नु सोढव्वा दुर्गतकुटुम्बाकृष्टिः कथं नु सोढव्येति । धौतं किल निःस्थामसारत्वात् परस्पराकर्षणं न क्षमत इति । उत्प्रेक्षालंकारः । तस्य लक्षणम् । अन्यथैव स्थिता वृत्तिश्चेतनस्येतरस्य वा । अन्यथा वर्ण्यते यत्र तामुत्प्रेक्षां प्रचक्षते ॥ (काव्यादर्श, २.२२१) ॥१६॥

१७) तस्यैव (श्रीवर्मणस्य) । [कोशाम्ब (कोशाम्र)–किसलयवर्णक तर्णक उन्नामिताभ्यां कर्णाभ्याम् । हृदयेष्टं गृहं व्रजन् धवलत्वं प्राप्नुहि ॥] हे कोसंबकिसलवण्णय तण्णय कोशाम्बकिसलयवर्णक तर्णक, उन्नामिएहि कण्णेहिं उन्नामिताभ्यां कर्णाभ्याम् उपलक्षित । हियइच्छियं घरं वच्चमाण हृदयेप्सितं गृहं व्रजन् धवलत्तणं पाव धवलत्वं प्राप्नुहि धुरंधरो भूयास्त्वमिति । कोशाम्बो वृक्षविशेषः । तस्य पल्लवाः पाटला भवन्तीति । तर्णको वत्सः । एतदन्वेषणानुषङ्गेण (?) अहं हृदयेप्सितगृहं प्राप्ता (?) इति आशीर्वाददानम् । आशीर्वादोऽलंकारः । (काव्यादर्श २. ३५७) ॥१७॥

W20 १८) अलियपसुत्तय विणिमीलियच्छ दे सुहय अम्ह ओवासं[1]।
गंडपरिउंबणापुलइयंग न उणो चिराइस्सं ॥१८॥

W21 १९) असमत्तमंडण च्चिय वच्च घरं से सकोउहल्लस्स ।
वोलावियहलहलयस्स पुत्ति चित्ते न लग्गिहिसि ॥१९॥

W22 २०) आयरपणामिउट्ठं अघडियणासं असंगयणलाडं[2] ।
वण्णग्घयतुप्पमुहीइ तीइ[3] परिउंबियं भरिमो ॥२०॥

१८) गणस्य । [अलीकप्रसुप्त विनिमीलिताक्ष प्रार्थये देहि सुभग ममावकाशम् । गण्डपरिचुम्बनापुलकिताङ्ग न पुनश्चिरायिष्यामि ॥] हे सुहय सुभग अलियपसुत्तय विणिमीलियच्छ अलीकप्रसुप्त विनिमीलिताक्ष । दे इति प्रार्थये देहि अम्ह ओवासं देहि अस्माकमवकाशम् । कदाचित् स्वभावशयित एव स्याद् इत्याह । गंडपरिउंबणापुलइयंग न उणो चिराइस्सं गण्डपरिचुम्बनापुलकिताङ्ग न पुनश्चिरायिष्यामि । क्षम्यतां खल्विदं मे प्रमादस्खलितम् इति । पुलकः सात्त्विको भावः । स्वीया नायिका प्रगल्भा ॥१८॥

१९) वज्जर्षेः (वज्रर्षेः ?) । [असमाप्तमण्डनैव व्रज गृहं तस्य सकौतूहलस्य । अतिक्रान्त (अतिक्रामित)–औत्सुक्यस्य पुत्रि चित्ते न लगिष्यसि ॥] कांचिदवलोकनकुतूहलिनि कान्ते प्रसाधनकृतविलम्बामम्बा शिक्षयन्ती इदमाह । से तस्य सकोउहल्लस्स सकौतुकस्य असमत्तमंडण च्चिय घरं वच्च असमाप्तमण्डनैव गृहं व्रज । किं कारणम् । वोलावियहलहलयस्स अतिक्रान्तकौतुकौत्सुक्यातिशयस्य तस्य पुत्ति चित्ते न लग्गिहिसि पुत्रि चित्ते न लगिष्यसीति । साकाङ्क्ष एव कान्तो अभिगम्यते । न तु तस्योत्कण्ठा कुण्ठीकर्तुं युज्यत इत्यर्थः । कोउहल्लं कौतूहलम् । हलहलयं प्रियावलोकनौत्सुक्यम् । औत्सुक्यमिह संचारी भावः ॥१९॥

२०) कलिङ्गस्य । [आदरार्पितौष्ठम् अघटितनासम् असंगतललाटम् ।

1W मज्झ ओआसं 2W असंहयणिडालं 3W वण्णघिअलित्तमुहिए तीए

W23 २१) आणासयाइँ दिंती तह सुरए हरिसवियसियकवोला ।
गोसे य[1] ओणयमुही अह स त्ति पिया[2] न सद्दहिमो ॥२१॥

W24 २२) पियविरहो अप्पियदंसणं च गरुयाइँ दो बि दुक्खाइं ।
जीइ तुमं कारिज्जसि तीएँ नमो आहियाईए[3] ॥२२॥

वर्णधृतस्निग्धमुख्यास्तस्याः परिचुम्बितं स्मरामः ॥] कश्चित् स्वकान्ताया वक्त्रेन्दुबिम्बचुम्बनस्य स्मरन्निदमाह । वण्णग्घयतुप्पमुहीइ तीइ वर्णधृताक्तवक्त्रायास्तस्याः परिउंबियं भरिमो परिचुम्बितं स्मरामः । कथंभूतम् । आयरपणामिउट्ठं आदरार्पितष्ठौम्, अघडियणासं अघटितनासम्, असंगयणलाडं असंगतललाटम् । स्वकान्तायाश्चुम्बनकलाकौशलं प्रकाशितं भवति । अन्ये तु साचीकृतवक्त्रेन्दुचुम्बनमिदमित्याहुः । तुप्पं स्निग्धम् । पणामियं इति अर्पेः पणाम (हेमचन्द्र, प्राकृतव्याकरण, ४.३९) इति पणामादेशे रूपम् । जातिरलंकारः । स्मृतिर्नाम संचारी भावः । या खलु कुतोऽपि हेतोरनुभूतार्थस्मृतिः स्मृतिः सा स्यात् । स्वीया नायिका । वर्णधृतं यद् वर्णवैशद्याय क्रियत इति ॥२०॥

२१) बहुरागस्य । [आज्ञाशतानि ददती तथा सुरते हर्षविकसितकपोला । प्रभाते चावनतमुखी अथ (असौ) सेति प्रिया न श्रद्दधे ॥] कश्चिन्नायकः स्वकान्ताया निधुवनवैदग्ध्यम् अन्यदा तु व्रीडां वर्णयितुमिदमाह । गोसे य ओणयमुही अह स त्ति पिया न सद्दहिमो प्रभाते चावनतमुखी सैवेयं प्रियेति न श्रद्दधे । कीदृशी । तह आणासयाइँ दिंती तथा तेन अवर्णनीयेन विधिना आज्ञाशतानि ददती । कदा । सुरए सुरते । पुनरपि कीदृशी । हरिसवियसियकवोला हर्षविकसितकपोला । यैव निशायां निधुवनवैदग्ध्यं दर्शितवती सैव प्रभाते व्रीडावनतवक्त्रेन्दुबिम्बा सती सैवेयं प्रियेति न प्रत्यभिज्ञायत इत्यर्थः ॥२१॥

२२) मेघान्धकारस्य । [प्रियविरहोऽप्रियदर्शनं च गुरुके द्वे अपि दुःखे । यया त्वं कार्यसे तस्यै नमोऽभिजात्यै ॥] काचिदन्याङ्गनागोत्र-

[1] W वि [2] W पिअं [3] W आहिजाईए

W25 २३) इक्को वि कालसारो न देइ गंतुं पयाहिण वलंतो[1] ।
किं पुण वाहाउलियं लोयणजुयलं पिययमाए ॥२३॥
W26 २४) न कुणंतं[2] च्चिय माणं निसासु पासुत्तदरविउद्धाणं[3] ।
सुन्नइयपासपरिमुसणवेयणं[4] जइ सि जाणंतो ॥२४॥

ग्रहणपूर्वकम् आलपन्तं प्रतिभेत्तुम् इदमाह । तीए नमो आहियाईए तस्यै नमो अभिजात्यै ! जीइ तुमं गरुयाइँ दो वि दुक्खाइं कारिज्जसि यया त्वं गुरुणी द्वे अपि दुःखे कार्यसे । के ते । पियविरहो अप्पियदंसणं च प्रियविरहो अप्रियदर्शनं च । इदमुक्तं भवति । अहमप्रियेति तया सह वियोगो मम च दर्शनम् इति कष्टद्वयम् असह्यं यया त्वं कार्यसे सेयमभिजातिः कुलीनता नमस्कारमर्हति । अभिजातिशब्दस्य समृद्ध्यादिषु पाठात् (वररुचि १. २; हेमचन्द्र, प्रा. व्या. १.४४) आत्वं द्रष्टव्यम् । स्वीया मध्या धीरा नायिका । सा धीरा वक्ति वक्रोक्त्या प्रियं कोपात् कृतागसम् । पर्यायोक्तिरलंकारः ॥२२॥

२३) ब्रह्मचारिणः। [एकोऽपि कृष्णसारो न ददाति गन्तु प्रदक्षिणं वलमानः । किं पुनर्बाष्पाकुलितं लोचनयुगलं प्रियतमायाः ॥] इक्को वि कालसारो न देइ गंतुं एकोऽपि कृष्णसारो न ददाति गन्तुम् । कथंभूतः । पयाहिण वलंतो प्रदक्षिणं गत्वा वलमानः । किं पुण लोयणजुयलं पिययमाए किं पुनः साचिनिरीक्षणेन वलितप्रदक्षिणकृष्णतारकतया कालसारद्वयं लोचनयुगलं प्रियतमाया गमनप्रतिषेधं न विधत्ते । सर्व एव हि शकुना दक्षिणास्वरकुम्भकरादिकाश्च यतो यथातत्त्वदर्शिनं शब्दश्रवणचेष्टाकीर्तनैर्भाविफलं सूचयन्ति इति शकुनशास्त्रे श्रूयत इति । कीदृशं लोचनयुगलम् । वाहाउलियं बाष्पाकुलितम् । व्याधाकुलितम् इति च योज्यम् । स हि (कालसारः) भीतो भयाय जायते । अनुकूलो नायकः । आक्षेपोऽलंकारः ॥२३॥

२४) कालसारस्य । [नाकरिष्य एव मानं निशासु प्रसुप्तेपद्विबुद्धानाम् । शून्यितपार्श्वपरिमर्शनवेदनां यदि अज्ञास्यः ॥] कश्चित्कान्तो

---

[1] W वलंतो [2] W कुणंतो [3] W सहसुत्त [4] W विबुद्धाणं [5] W परिमूसणविअणाण

W27 २५) पणयकुवियाण दुन्हं[1] वि अलियपसुत्ताण माणइत्ताणं[2] ।
निच्चलणिरुद्धणीसासदिन्नयण्णाणं[3] को मल्लो ॥२५॥

नायिकां निशायां निर्भरशयितां दृष्ट्वा अन्यरमणीरतिसुखलाभलालसो विरहव्यग्रतां गतवान् । सा पुनः प्रबुद्धा तदीयदुर्नये मानमवलम्ब्य व्यवस्थिता । अथ सत्यनिकृतकृत्यप्रवृत्त्या (?) कृतमिथ्याशपथैस्तां प्रत्याययितुं प्रवृत्तः । यदा न कथमपि प्रत्येति तदा स एव मानमग्रहीत् । तथाभूतं च वीक्ष्य लक्षतः(?) तमेव नायकं सा निबोधयन्ती सखेदमाह । जइ निसासु सुन्नइयपासपरिमुसणवेयणं तुमं जाणंतु च्चिय यदि निशासु शून्यीकृतपार्श्वपरिमर्शनवेदनां त्वम् अज्ञास्यः तदा मानं नाकरिष्यः । केषाम् । पासुत्तदरविउद्धाणं (प्रसुप्तेषदविबुद्धानाम्) । त्वयि गतवति शून्यशय्यापार्श्वपरिमर्शनव्यथां मम त्वम् अजानन् विज्ञायसे । दुस्सहदुःखसद्भावम् आविष्करोति । पासुत्त इति प्रसुप्तशब्दस्य समृद्ध्यादिषु पाठात् (वररुचि, प्रा. प्रकाश, १.२; हेमचन्द्र, प्रा. व्या. १.४४) आत्वम् । इयमपि स्वीया प्रगल्भा धीरा च नायिका ॥२४॥

२५) वत्सराजस्य । [प्रणयकुपितयोर्द्वयोरपि अलीकप्रसुप्तयोर्मानवतोः । निश्चलनिरुद्धनिःश्वासदत्तकर्णयोः को मल्लः ॥] दुन्ह वि माणइत्ताणं को मल्लो द्वयोरपि दम्पत्योर्मानवतोः को मल्लो, न कश्चिदपीत्यर्थः । तयोरन्यतरो धीरो नास्तीति भावः । कथंभूतयोः । पणयकुवियाण प्रणयकुपितयोः । निच्चलणिरुद्धणीसासदिन्नयण्णाण निश्चलनिरुद्धनिःश्वासदत्तकर्णयोः, आलिङ्गनलालसयोः अन्योन्यनिसर्गनिष्प्रकम्पयोः । व्यलीकनिद्राकाङ्क्षया निश्चलनिरुद्धनिःश्वासवितीर्णकर्णत्वम् । सुप्तस्य हि विशृङ्खलाः श्वासा निर्यान्तीति । मानेन वित्तयोः प्रख्यातयोरित्यर्थः । अस्त्यर्थक इत्तप्रत्ययः । जातिरलंकारः ॥२५॥

१ W दोण्ह २ W माणइल्लाणं ३ W दिण्णकण्णाण

W28 २६) कुवलयपहरं[1] अंगे जहिं जहिं महइ देवरो[2] दाउं ।
रोमंचदंडराई तहिं तहिं दीसइ वहूए ॥२६॥
W29 २७) अज्ज मए तेण विणा अणुहूयसुहाइँ संभरंतीए ।
अहिणवमेहाण रवो निसामिओ वज्झपडहु[3] व्व ॥२७॥
W30 २८) निक्किव जायाभीरुय दुद्दंसण निंबकीडयसरिच्छ[4] ।
गामो गामणिणंदण तुज्झ कए तह वि तणुआइ ॥२८॥

२६) तस्यैव (वत्सराजस्य) । [कुवलयप्रहारमङ्गे यस्मिन् यस्मिन्निच्छति देवरो दातुम् । रोमाञ्चदण्डराजिस्तस्मिंस्तस्मिन् दृश्यते वध्वाः] । रोमंचदंडराई रोमाञ्चदण्डराजिः कुवलयप्रहारं यत्र यत्र अङ्गे देवरो दातुमभिलषति तत्र तत्र दृश्यते । कस्याः । वहूए वध्वाः । बद्धानुरागसूचकोऽयं रोमाञ्चः सात्त्विको भावः । सूक्ष्मो नामालंकारः । परकीया स्वीया(?) नायिका । आचार्यदण्डिनस्तु मते आकारलक्ष्यः सूक्ष्मोऽयम् ॥२६॥

२७) कूतालस्य (कुन्तलस्य ?) । [अद्य मया तेन विना, अनुभूतसुखानि संस्मरन्त्या । अभिनवमेघानां रवो निशामितो वध्यपटह इव ॥] काचिद् विरहिणी स्वदुःखं सख्यै कथयति । तेण विणा अज्ज मए अहिणवमेहाण रवो निसामिओ वज्झपडहु व्व अद्य मया तेन प्रियतमेन विना अभिनवमेघानां रवो निशामितः श्रुतः । कथंभूतया मया । अणुहूयसुहाइँ संभरंतीए अनुभूतसुखानि (सं)स्मरन्त्या । कीदृशः । वज्झपडहु व्व वध्यपटह इव । स्वनः तदुपचारः तत्संबन्धात् । प्रावृट्प्रवृत्तावपि प्रियस्याप्रत्यावृत्तौ मम मरणं शरणम् इति तात्पर्यार्थः । उपमालंकारः ॥२७॥

२८) [निष्कृप जायाभीरुक दुर्दर्शन निम्बकीटकसदृक्ष । ग्रामो ग्रामणीनन्दन तव कृते तथापि तनूयते ॥] हे गामणिणंदण ग्रामणीसुत, निक्किव निष्कृप । निष्कृपस्त्वं यद् ईदृशीं दशां प्राप्तां मामुपेक्षसे । जायाभीरुअ जायाभीरो (मां) नानुवर्तसे । भद्दमण (?) दुर्दर्शनस्त्वं यस्तस्यामा-

१W णवलअपहरं २W देअरो ३W वज्झपडहु ०व ४W णिंबईडसारिच्छ

W188 २९) नेउरकोडिविलग्गं चिहुरं दइयस्स पायवडियस्स ।
हिययं माणपउत्थं ओमोयंति च्चिय कहेइ ॥२९॥

W194 ३०) सा तइ सहत्थदिन्नं अज्ज वि ओ सुहय गंधरहियं पि ।
उव्वसियणयरघरदेवय व्व ओमालियं वहइ ॥३०॥

सक्तो न कस्यापि लोचनगोचरं गच्छसि । निम्बकीटकसदृशो निम्बकीटककल्पस्त्वं यत् तस्यामपि निकृष्टरामायां रमस इति सपत्नीदोषोद्घोषणम् । यद्यपि त्वमीदृशः तह वि तथापि गामो तुज्झ कए ग्रामस्त्वदर्थं तणुयाइ तनूयते । ग्रामशब्देनात्मानं व्यपदिशति । अहं त्वद्वियोगदुःखेन इमामवस्थां प्राप्तेति तात्पर्यार्थः । ग्रामणीर्ग्रामनायकः । विशेषोक्तिरलंकारः। गुणजातिक्रियादीनां यत्तु वैकल्यदर्शनम् । विशेषदर्शनायैव सा विशेषोक्तिरिष्यते ॥ (काव्यादर्श, २. २२३)। अन्योढा नायिका । अन्योढापि हि कन्या कर्तव्यं सर्वमुद्धतं कुरुते । दुरवस्थापि च तं तु स्वयमभियुङ्क्ते स्मरावेशात् ॥ (रुद्रट, १२ ३६–३८) ॥२८॥

२९) हरिराजस्य । [नूपुरकोटिविलग्नं चिकुरं दयितस्य पादपतितस्य । हृदयं प्रोषितमानम् उन्मोचयन्त्येव कथयति ॥] काचिन्नायिका पायवडियस्स पइणो (दइयस्स?) पादपतितस्य पत्युः दयितस्य नेउरकोडिविलग्गं चिहुरं नूपुरकोटिश्लिष्टं चिकुरं ओमोयंति च्चिय उन्मोचयन्त्येव हिययं माणपउत्थं कहेइ हृदयं प्रोषितमानं कथयति । मा खल्वयं केशाकुञ्चनव्यथाम् अनुभवतु, कथं केशान् मोचयेदिति प्रसन्ना अहम् इति कथयितुं तुलाकोटिकोटिश्लिष्टान् कलया कुन्तलान् श्लथयतीति भावः । प्रत्यावृत्तहृदया पत्युः मानावसानम् आविष्करोतीत्यर्थः । माणपउत्थं इति प्राकृते पूर्वनिपातानियमः । अनुमानालंकारः ॥२९॥

३०) अनुपरसस्य । [सा त्वया स्वहस्तदत्तम् अद्यापि हे सुभग गन्धरहितमपि । उद्वासितनगरगृहदेवतेव अवमालिकां वहति ॥] काचित्

१ W उम्मोअंति च्चिअ

W31 ३१) पहरवणमग्गविसमे जाया किच्छेण लहइ से निद्दं ।
गामणिउत्तस्स उरे पल्ली उण से सुहं सुयइ ॥३१॥

W32 ३२) अह सम्भावियमग्गो[1] सुहय तुह[2] च्चेय नवरि[3] निव्वूढो ।
इण्हिं अन्नं हियए अन्नं वायाएँ लोयस्स ॥३२॥

स्वसख्याः पत्यौ प्रेम प्रकाशयन्ती उपालम्भगर्भमिदमाह । साऽद्यापि मालिकां कुसुमजां वहति । कथंभूताम् । तइ सहत्थदिन्नं त्वया स्वहस्तदत्ताम् । पुनश्च कीदृशी । उव्वसियणयरघरदेवय व्व उद्वसनगरगृहदेवतेव । सा तथा त्वय्यनुरक्ता यथा तव स्वहस्तदानबहुमानेन कालान्तरशुष्कां सौरभरहितामपि कुसुमस्रजं स्वमूर्धनि धत्ते । त्वं तु तद्वार्तामपि न पृच्छसीति । उद्वसनगरगृहदेवता या देवतेव विशीर्णतनुं भवति (?) । तदुद्वसनगरगृहदेवतेव सा त्वया गवेष्यते (?) इत्यर्थः । प्रथमम् इति निपातः संकेते द्वितीया स्वादा (!) । उपमालंकारः ॥३०॥

३१) काटिल्लस्य । [प्रहारव्रणमार्गविषमे जाया कृच्छ्रेण लभते तस्य निद्राम् । ग्रामणीपुत्रस्योरसि पल्ली पुनस्तस्य सुखं स्वपिति ॥] हे सखि से गामणिउत्तस्स उरे जाया किच्छेण लहइ निद्दं तस्य ग्रामणीपुत्रस्योरसि शयनाज्जाया कृच्छ्रेण लभते निद्राम् । कथंभूते । पहरवणमग्गविसमे प्रहारव्रणमार्गविषमे । समे हि किल सुखं प्राप्यते, इति । पल्ली उण से सुहं सुयइ पल्ली पुनस्तस्य सुखं स्वपिति । अनेकवक्षःस्थलशस्त्रपातानुमितशौर्यशौण्डीर्यगुणस्य तस्य त्रासेन तस्करो न कोऽपि संचरतीत्यर्थः। पहर इति प्रहारशब्दस्य अदातो यथादिष्विति (वररुचि, १. १०) आतो ऽत्त्वे रूपम् । विरुद्धार्थाक्षेपोऽलंकारः ॥३१॥

३२) वाक्पतिराजस्य । [असौ स्वाभाविकमार्गः सुभग तवैव केवलं निर्व्यूढः । इदानीमन्यद् हृदयेऽन्यद् वाचि लोकस्य ॥] काचिदन्याङ्गनागोत्रेणाळपन्तं प्रियं प्रतिभिनत्ति । अह असौ सम्भावियमग्गो स्वाभा-

---

[1] W संभावियमग्गो [2] W तुए [3] W णवर

W33 ३३) उण्हाइँ नीससंतो सयणद्धे कीस मे पराहुत्ति ।
हियर्यं पलीविउं अणुसएण पट्टिं[1] पलीवेसि ॥३३॥

W189 ३४) तुज्झंगरायसेसेण सामली तह खरेण सोमाला[2] ।
सुइरं[3] गोलातूहे न्हाया जंबूकसाएण ॥३४॥

विकमार्गः तुह च्चेय नवरि निव्वूढो तवैव केवलं निर्व्यूढः । यतः इन्हिं इदानीं अन्नं हियए अन्नं वायाएँ लोयस्स अन्यच्च हृदये अन्यच्च वाचि लोकस्य । तवैव हृदये सैव वाचि (च) वर्तत इत्यर्थः । तस्यां त्वम् अनुरक्तो मयि तु शिथिलानुराग इत्युक्तं भवति । अह इत्यदसो रूपम् । स्वीया मध्या नायिका । मध्या प्रतिभिनत्त्येनं सोल्लुण्ठैः सा तु भाषितैः । पर्यायोक्तिरलंकारः ॥३२॥

३३) भोजस्य । [उष्णानि निःश्वसन् शयनार्धे कस्मान्मे पराङ्मुखम् । हृदयं प्रदीप्यानुशयेन पृष्ठं प्रदीपयसि ॥] काचिदुष्णैर्निःश्वासस्वनैरन्यासक्तं प्रियं हृदि विदित्वा परावृत्य तम् अभीहितम् (?) इदमाह । कीस कस्मात् मे हियर्यं पलीविउं मे हृदयं प्रदीप्य अणुसएण पराहुत्ति पट्टिं पलीवेसि अनुशयेन पराङ्मुखं पृष्ठं प्रदीपयसि । अनुशयः सपत्नीसङ्गजो मन्युः । क्व । सयणद्धे शयनार्धे । किं कुर्वन् । उण्हाइँ नीससंतो उष्णोष्णं निःश्वसन् । आत्मनः पराङ्मुखत्वेन पृष्ठस्य पराङ्मुखत्वम् उपचारात् । अक्षिकुक्षिपृष्ठ चास्वीया (?) । अन्ये तु 'उण्हाइँ नीससंतो सयणद्धे कीस मे पराहुत्ति (? पराहुत्ते) । हियर्यं (? हियए) पलीवियं (? पलीविउं) अणुसएण पट्टिं पलीवेसि' इति पठन्ति । तत्र तु मामनुशयेन हृदये प्रदीप्य उष्णं किमिति पृष्ठे (? पृष्ठं) प्रदीपयसीति योज्यम् ॥३३॥

३४) अनङ्गदेवस्य । [तवाङ्गरागशेषेण श्यामला तथा खरेण सुकुमारा । सुचिरं गोदातीर्थे स्नाता जम्बूकषायेण ॥] काचित् कस्याश्चित्

१W कीस मह परंमुहीअ सअणद्धे २W सोमारा ३W सा किर

W34 ३५) तुह विरहे चिरयारय तिस्सा वियलंतबाहमइलेण ।
रविरहसिहरधएण व मुहेण छाइ च्चिय न पत्ता ॥३५॥

W35 ३६) दियरस्स असुद्धमणस्स कुलवहू निययकुड्डलिहियाइं ।
दियहं कहेइ रामाणुलग्गसोमित्तिचरियाइं ॥३६॥

स्वसख्याः प्रेमातिशयं प्रकाशयितुं तत्प्रियं प्रत्याह । सा सामली श्यामा । तुज्झंगरायसेसेण जंबूकसाएण न्हाया तवाङ्गरागशेषेण जम्बूकषायेण स्नाता । तह खरेण अत्यर्थं खरेण असह्येन । सा कीदृशी । सोमाला सुकुमारा । क्व । गोलातूहे गोदावर्यास्तटे । सुकुमारमूर्तिरपि सती तथाभूतेन तीव्रजम्बूकषायेण यदसौ स्नाता तत्र त्वदङ्गरागशेषता कारणम् इति रागातिरेकः सौकुमार्यं च वर्णितम् इति । पर्यायोक्तिरलंकारः ॥३४॥

३५) तस्यैव (अनङ्गदेवस्य) । [तव विरहे चिरकारक तस्या विगलद्बाष्पमलिनेन । रविरथशिखरध्वजेनेव मुखेन च्छायैव न प्राप्ता ॥] तुह विरहे चिरयारय त्वद्विरहे चिरकारक, तिस्सा तस्याः, वियलंतबाहमइलेण मुहेण छाइ च्चिय न पत्ता विगलद्बाष्पमलिनेन मुखेन छायैव न प्राप्ता । केनेव । रविरहसिहरधएण व रविरथशिखरध्वजेनेव । रविरथशिखरध्वजो दिवाकरकरैः सर्वदा सर्वाङ्गमालिङ्गितः छायाम् आतपाविषयं न प्राप्नोति तथा मुखमपि । मुखच्छाया कान्तिर्भण्यते । वैवर्ण्यमिह सात्त्विको भावः । उपमालंकारः ॥३५॥

३६) रविराजस्य । [देवरस्याशुद्धमनसः कुलवधूर्निजकुडच-लिखितानि । दिवसं कथयति रामानुलग्नसौमित्रिचरितानि ॥] कुलवहू दियरस्स रामाणुलग्गसोमित्तिचरियाइं दियहं कहेइ कुलवधूर्देवरस्य रामानुलग्नसौमित्रिचरितानि दिनं प्रति कथयति । निययकुड्डलिहियाइं निजकुडचलिखितानि । कीदृशस्य देवरस्य । असुद्धमणस्स अशुद्धमनसः । आलेख्यलिखितसीतासौमित्रिवृत्तं दर्शयन्त्या तया इदमुक्तं भवति । पुत्र,

---

१W. छाहि

W36 ३७) चच्चरघरिणी पियदंसणा य तरुणी पउत्थवइया य ।
असई सयज्झिया दुग्गया य न य[२] खंडियं सीलं ॥३७॥
W37 ३८) ताल्रभमाडणखुडियकेसरो गिरिणईएँ पूरेण ।
दरबुड्डुब्बुड्डुणिबुड्डमहुयरो हीरइ कलंबो ॥३८॥

सौमित्रिर्यथा सीतायां मयि तथा वर्तितुमुचितं नान्यथेति । प्रगल्भा नायिका । दियरो भर्तृभ्राता अनुजः । सोमित्ती लक्ष्मणः । कुड्डं भित्तिरिति । सूक्ष्मालंकारः ॥३६॥

३७) हालस्य । [चत्वरगृहिणी प्रियदर्शना च तरुणी प्रोषितपतिका च । असती प्रतिवेशिनी दुर्गता च न च खण्डितं शीलम् ॥] न य खंडियं सीलं न च तया खण्डितं शीलम् । कदाचिद् अगोचरगृहवासिनी स्यादित्याह । चच्चरघरिणी चत्वरगृहिणी । या खलु चत्वरगृहिणी सा सकललोकलोचनगोचरं गच्छतीति । कदाचित् चत्वरगृहिण्यपि अमनोज्ञदर्शना सा स्यादित्याह । पियदंसणा प्रियदर्शना । तां सर्व एव निकामं कामयते । कदाचित् प्रियदर्शनाऽपि अनवतीर्णतारुण्या भवतीत्याह । तरुणी । या तरुणी सा मकरकेतनेन क्रोडीक्रियते । कदाचित् तरुण्यपि सभर्तृका भवतीत्याह । पउत्थवइया य प्रोषितपतिका च । या खलु प्रोषितपतिका तस्याः प्रतिबन्धकाभावात् सर्व एव युवजनो वेश्म प्रविशति । कदाचित् प्रोषितपतिकाऽपि सतीभिः समाकुला भवतीत्याह, असती प्रतिवेशिनी । सा तदनुषङ्गदोषेण दुष्यति । कदाचिदसतीप्रतिवेशिन्यपि न स्वैरा भवतीत्याह दुग्गया य दुर्गता च । या खलु दुर्गता भवति सा धनलोभेन विनश्यति । एवं सामग्र्यां सत्यामपि न खण्डितं शीलम् इति महासतीत्वं वर्णितं भवति । तत्र केवलं कौलीन्यमेव कारणम् । चच्चरं चतुष्पथम् । सयज्झिया प्रतिवेशिनी । कार्याक्षेपोऽलंकारः । प्रतिषेधोक्तिराक्षेपः (काव्यादर्श २.१२०) ॥३७॥

३८) माहिलस्य । [आवर्तभ्रमणखण्डितकेसरो गिरिनद्याः पूरेण ।

१ W. चत्तर; २ हु. १ W. भमाउल

W38 ३९) अहियायमाणिणो दुग्गयस्स छायं पइस्स[a] रक्खंती ।
नियबंधवाण जूरइ घरिणी विहवेण इंताणं ॥३९॥
W39 ४०) साहीणे वि पिययमे पत्ते वि छणे न मंडिओ अप्पा ।
दुग्गयपउत्थवइयं सयज्झियं संठवंतीए ॥४०॥

ईषन्मग्नोन्मग्ननिमग्नमधुकरो ह्रियते कदम्बः ॥] गिरिणईए पूरेण कलंबो हीरइ गिरिनद्याः पूरेण कदम्बं वहति । केचित्, नदीपूरेण कदम्बो ह्रियते देशान्तरं प्राप्यते । कीदृशः । ताल्लूरभमाडणखुडियकेसरो आवर्तभ्रमणखण्डितकेसरः । पुनरपि कीदृशः । दरबुड्डुब्बुड्डणिबुड्डमहुयरो ईषन्मग्नोन्मग्ननिमग्नमधुकरः । एवंभूतं कदम्बं ह्रियत इति । अन्योक्तिरलंकारः । ताल्लूरो आवर्तः । खुडियं खण्डितम् । बुड्डुब्बुड्डणिबुड्ड इति देशरूपाणि । कलंबो इति कदम्बः । प्रदीप्तकदम्बदोहदेषु (वररुचि, २,१२) इत्यनेन दस्य लत्वे रूपम् ॥३८॥

(३९) अदम्बकस्य । [अभिजातमानिनो दुर्गतस्य च्छायां पत्यू रक्षन्तो । निजबान्धवेभ्यः क्रुध्यति गृहिणी विभवेन आयद्भ्यः ॥] घरिणी विहवेण इंताणं नियबंधवाण जूरइ गृहिणी विभवेन आगच्छद्भ्यः प्राप्तेभ्यः स्वबान्धवेभ्यः कुप्यति । किं कुर्वती । छायं पइस्स रक्खंती छायां पत्युः रक्षन्ती । कथंभूतस्य । अहियायमाणिणो अभिजातमानिनः कुलवतश्च मानिनश्च । "अयमस्मत्पतिः एतान् सकलसंपत्संपन्नान् वीक्ष्य वैलक्ष्येण मा मलिनिमानमायातु" इति बान्धवेभ्यो असूयति इति । जूरइ इति क्रुधेः जूर इति (वररुचि, ८, ६४) जूरादेशे रूपम् । सती स्वीया नायिका ॥३९॥

४०) चुल्लोडकस्य । [स्वाधीनेऽपि प्रियतमे प्राप्तेऽपि क्षणे न मण्डित आत्मा । दुर्गतप्रोषितपतिकां प्रतिवेशिनीं संस्थापयन्त्या ॥] कयाचित् अप्पा न मंडिओ आत्मा न प्रसाधितः । सा कदाचिद् वियोगिनी

१W. अहियाइ; २W. छाहिं; ३W. पिअस्स; ४W. पत्ताणं.

W40 ४१) तुज्झ वसहि[1] त्ति हिययं, इमेहि दिट्ठो तुमं ति अच्छीइं ।
तुह विरहे किसियाइं ति तेण[2] अंगाइँ वि पियाइं ॥४७॥

W41 ४२) सब्भावणेहमइए[3] रत्ते रज्जिज्जइ त्ति जुत्तमिणं ।
अणहियए उण हिययं जं दिज्जइ तं जणो हसइ ॥४२॥

स्यादित्याह । साहीणे वि पिययमे स्वायत्तेऽपि पत्यौ । कदाचित् समय एव न भवतीत्याह । पत्ते वि छणे प्राप्तेऽप्युत्सवदिवसे । विशेषणद्वारेण कारणमाह । कथंभूतया तया । दुग्गयपउत्थवइयं सयज्झियं संठवंतीए दुर्गतां प्रोषितपतिकां प्रतिवेशिनीं संस्थापयन्त्या । मां प्रसाधिततनुं वीक्ष्य मा एषा भूषादुर्दशाम् आसादयत्विति । विशेषोक्तिरलंकारः ॥४०॥

४१) विन्ध्यस्य । [तव वसतिरिति हृदयम् आभ्यां दृष्टस्त्वमित्यक्षिणी । तव विरहे कृशितानीति तेन अङ्गान्यपि प्रियाणि ॥] तव वसतिरिति हृदयं वल्लभम् । आभ्याम् अक्षिभ्यां दृष्टस्त्वम् इति लोचने प्रिये । तुह विरहे तव विरहे कसियाइं ति तेण कृशानीति कृशीभूतानीति तेन अङ्गान्यपि प्रियाणि ममेत्यर्थादापद्यते । यदहं त्वद्विरहे न विपन्ना तत्र उक्तेन प्रकारेण प्रियाणि हृदयादीनि न परिहर्तुं पारयामीति निःस्नेहा सा (इति) मा मनसि मंस्था इति तात्पर्यार्थः । पर्यायोक्तिरलंकारः ॥४१॥

४२) मुग्धस्य । [सद्भावस्नेहमये रक्ते रज्यते, इति युक्तमिदम् । अहृदये पुनर्हृदयं यद्दीयते तज्जनो हसति ॥] सद्भावस्नेहमये रक्ते रज्यते इति युक्तमिदम् । अणहियए जं हिययं दिज्जइ अहृदये यद् हृदयं दीयते, तं जणो हसइ तज्जनो हसति । साऽहं त्वय्यहृदये रक्ता सकलजनहासास्पदं जातेति भावः । यदनुरक्तेऽपि नानुरज्यसे तेन त्वम् अहृदयो यतः, इति दोषच्छायया प्रतीतिः । पर्यायोक्तिरलंकारः, मध्या नायिका ॥४२॥

---

१ W. वसइ त्ति; २ W. तीए; ३ W. सब्भावणेहभरिए.

W42 ४३) आरंभंतस्स धुयं लच्छी मरणं व होइ पुरिसस्स ।
तं मरणमणारंभे वि होइ लच्छी उण न होइ ॥४३॥
W43 ४४) विरहाणलोऽसहिज्जइ आसाबंधेण वल्लहजणस्स ।
इक्कग्गामपवासो हु मामि[1] मरणं विसेसेइ ॥४४॥
W190 ४५) अज्जं चेय पउत्थो अज्जं चियै[2] सुन्नयाइँ जायाइं ।
रच्छामुहचच्चरदेउलाइँ[3] अम्हं च हिययाइं ॥४५॥

४३) रोहायाः [आरभमाणस्य ध्रुवं लक्ष्मीर्मरणं वा भवति पुरुषस्य । तन्मरणमनारम्भेऽपि भवति लक्ष्मीः पुनर्न भवति ॥] आरंभंतस्स धुयं प्रारभमाणस्य ध्रुवं लक्ष्मीर्मरणं वा भवति पुरुषस्य । तं मरणमणारंभे वि होइ तन् मरणमनारम्भेऽपि भवति । लच्छी उण न होइ लक्ष्मीः पुनर्न भवति । तत् लक्ष्मीलाभकामो मरणभयेन मा त्वम् उद्यमविमुखो भूरित्यर्थः । उत्थानप्रशंसापरेयमुक्तिः । आक्षेपोऽलंकारः ॥४३॥

४४) वल्लभस्य । [विरहानलः सह्यते आशाबन्धेन वल्लभजनस्य । एकग्रामप्रवासः खलु सखि मरणं विशेषयति ॥] काचित् कलहान्तरिता अनुनयपरमपि प्रियम् अवधीर्येव पश्चात्तापतप्यमाना तदानयनाय सखीमिदमाह । विरहानलः सह्यते आसाबंधेण वल्लहजणस्स आशाबन्धेन वल्लभजनस्य । इक्कग्गामपवासो हु मामि मरणं विसेसेइ एकग्रामप्रवासस्तु मामि, हुः पुनरर्थे, सखि मरणं विशेषयति,आगमनरत्यभावात् । यः खलु मयि रोषजुषि ज्ञात्वा गतः स स्वयं नागमिष्यति । तद् व्रजामि तत्र यत्रासौ, इति तात्पर्यार्थः ॥४४॥

४५) वैरसिंहस्य । [अद्यैव प्रोषितः अद्यैव शून्यानि जातानि । रथ्यामुखचत्वरदेवकुलानि, अस्माकं च हृदयानि ॥] काचित् प्रथमदिवस एव प्रोषितस्य प्रेयसः अनुपमसौभाग्यभङ्गीमभिध्याय, आत्मनश्च दुरवस्थां, प्रार्थयितुम् (?) इदमाह । स हृदयवल्लभोऽद्यैव प्रोषितः । अद्यैव रच्छा-

१ W. 'माएँ; २ W. अज्ज चिअ; ३ W. रच्छामुहदेउलच्चराइ.

W44 ४६) अक्खडइ पिया हियए अन्नं महिलायणं रमंतस्स ।
दिट्ठे सरसम्मि गुणे सरिसम्मि गुणे अईसंते[1] ॥४६॥
W45 ४७) नइपूरसच्छहे जुव्वणम्मि दियहेसु[2] निच्चपहिएसु ।
अणियत्तासु य राईसु पुत्ति किं दड्ढमाणेण ॥४७॥

मुहदेउलचच्चराइँ सुन्नयाइँ जायाइं रथ्यामुखदेवकुलचत्वराणि शून्यानि जातानि । एतदुक्तं भवति । तस्मिंस्तिष्ठति किल तदीयानुपमरूपवत्तया, आलोकनकौतूहलोत्कलिकाकुलाभिः नगरनारीभिराकीर्यन्ते स्म रथ्यापथचैत्यचत्वराणि । अद्य तु तस्मिन् प्रोषिते न काचिदिह युवजनावेक्षणनिरवेक्षा (?) निजनिलयान्निष्क्रामति, इति । अथवा युवजनाकीर्णान्यपि तेन विना शून्यानि रथ्यादीनि प्रतिभासन्त इति । न केवलमिमानि शून्यानि । अम्हं च हिययाइं अस्माकं च हृदयानि । रथ्यामुखादीनां शून्यत्वं रिक्तत्वम् । हृदयानां च शून्यत्वं तद्गतत्वम् । श्लेषदीपकच्छायोदयात् सहृदयचमत्कारिणी काऽपि उक्तिवैचित्री समुल्लसतीति । पर्यायोक्तिरलंकारः । विषादो व्यभिचारी भावः । प्रच्छन्नो (? प्रवासो) विप्रलम्भशृङ्गारः । विरहिणी नायिका ॥४५॥

४६) धर्मिणस्य । [आस्खलति प्रिया हृदयेऽन्यं महिलाजनं रमयतः । दृष्टे सदृशे गुणे सदृशे गुणे अदृश्यमाने ॥] अन्नं महिलायणं रमंतस्स पिया हियए अक्खडइ अन्यं महिलाजनं रमयतः पुंसः प्रिया हृदये स्मृतिपथमेति । क्व सति । दिट्ठे सरिसम्मि गुणे दृष्टे उपलब्धे सदृशगुणे । किमेतावदेव । नेत्याह । सरिसम्मि गुणे अईसंते सदृशे गुणे अदृश्यमाने । यदा किल कान्तो अन्या रमणी रमयन् स्वगृहिणीगुणानुगुणं सकलकलाकौशलं पश्यति तदा तद्गुणसादृश्यात् तां स्मरति । अथ न पश्यति तदापि तस्यां (? तासु) तत्संभोगसुखमनासादयन् प्रियां स्मरति, इति उभयथाऽपि स्मरणम् ॥४६॥

४७) कविराजस्य । [नदीपूरसदृशे यौवने दिवसेषु नित्यपथि-

---

१ W. अदीसंते; २ W अइपवसिएसु दिअहेसु

W46 ४८) कल्लं किर खरहियओ पवसिहिइ पिउ त्ति सुव्वइ जणम्मि ।
तह वड्ढ भयवइ निसे जइ से कल्लं चिय न होइ ॥४८॥
W47 ४९) हुंतपहियस्स जाया आउच्छणजीयधारणरहस्सं ।
पुच्छंती भमइ घरंघरेसु[1] पियविरहसहिरीओ ॥४९॥

केषु । अनिवृत्तासु च रात्रिषु पुत्रि किं दग्धमानेन ॥] काचिन् मानिनीं प्रबोधयन्तीदमाह । पुत्ति किं दड्ढमाणेण पुत्रि किं दग्धमानेन । क्व सति । नइपूरसच्छहे जुव्वणम्मि नदीपूरसदृशे यौवने । दियहेसु निच्चपहिएसु दिवसेषु नित्यपथिकेषु । अणियत्तासु य राईसु अनिवृत्तासु च रात्रिषु सतीषु । किं दड्ढमाणेण मानं मा कार्षीरिति । यदि गत्वरं तारुण्यं न भवति, यदि च निवृत्तगमनानि दिनानि भवन्ति, यदि रात्रयो दृष्टप्रत्यावृत्तयो भवन्ति तत् कदाचिद् युज्यते प्रियजने मानः । न चैतदस्ति, तत् प्रियजने किममुना कृतेन दुःखावसानेन क्रियत इति गोत्रवतीशिक्षोक्तिः । आक्षेपोऽलंकारः ॥४७॥

४८) प्रवरराजस्य । [कल्यं किल खरहृदयः प्रवत्स्यति प्रिय इति श्रूयते जने । तथा वर्धस्व भगवति निशे यथाऽस्य कल्यमेव न भवति ॥] कल्लं किर पवसिहिइ पिउ त्ति सुव्वइ श्वः किल प्रियः प्रस्थास्यत इति श्रूयते । क । जणम्मि जने लोके । कीदृशः । खरहियओ सुष्ठु निष्ठुरचित्तः । यन्मामपि ईदृशीं विहाय व्रजतीति । तह वड्ढ भयवइ निसे तथा वर्धस्व भगवति निशे जह से कल्लं चिय न होइ यथाऽस्य श्वस्तनं दिन न संपद्यते, इति । भविष्यद्विरहिणी नायिका । उन्मादो व्यभिचारी भावः ॥४८॥

४९) मेघटस्य । [भविष्यत्पथिकस्य जाया आपृच्छनजीवधारणरहस्यम् । पृच्छन्ती भ्राम्यति गृहे गृहे प्रियविरहसहनशीलाः ॥] हुंतपहियस्स जाया घरंघरेसु पुच्छंती भमइ प्रथमभविष्यत्पथिकस्य भार्या

---

१ W. घरंघरेण.

W48 ५०) अन्नमहिलापसंगं दे[1] दिव्व कुणेसु मज्झ[2] दइयस्स ।
पुरिसा इक्कंतरसा न हु दोसगुणे वियाणंति ॥५०॥
W49 ५१) थोयं पि न नोइ इमा मज्झन्हे उय सिरीसतलुक्का[3] ।
आयवभएण छाही वि पहिय ता किं न वीसमसि ॥५१॥

गृहे गृहे पृच्छन्ती भ्राम्यति । किं पृच्छन्ती । आउच्छणजोयधारणरहस्सं आउच्छणं आपृच्छनं पुनर्दर्शनाय प्रश्नः, तस्मिन् प्रणयिकृते सति जीवधारणाय रहस्यं गुह्यो मन्त्रः । काः पृच्छन्ती । पियविरहसहिरीओ प्रियविरहसहनशीलाः । सीमन्तिन्यस्ताः किल अनुभूतदयितविरहतया प्राणधारणरहस्यं जानन्तीति । प्रच्छिर्द्विकर्मकोऽयम् । मुग्धा नायिका॥४९॥

५०) सीहल्लस्य (? सिंहलस्य) । [अन्यमहिलाप्रसङ्गं प्रार्थये दैव कुरु मम दयितस्य । पुरुषा एकान्तरसा न खलु दोषगुणान् विजानन्ति ॥] दे दिव्व कुणेसु दैव कुरुष्व । अन्नमहिलापसंगं अन्यस्त्रीप्रसङ्गम् । कस्य । मज्झ दइयस्स मम दयितस्य । यतः पुरिसा इक्कंतरसा न हु दोसगुणे वियाणंति पुरुषा एकान्तरसा न खलु दोषगुणान् विजानन्ति । यदि खलु अयम् अस्मत्कान्तो अन्यरामां रमयति तद् अस्मदीयान् अशेषान् गुणान् बुध्यते, बुद्ध्वा च न मामवगणयतीति । दे इति प्रार्थनायां निपातः ॥५०॥

५१) अनिरुद्धस्य । [स्तोकमपि न निर्यातीयं मध्याह्ने पश्य शिरीषतलीना । आतपभयेन च्छायाऽपि पथिक तत् किं न विश्राम्यसि ॥] काचित् प्रपापालिका कंचिन्नरं रिरंसमाना विश्रामोक्तिव्यपदेशेन इदमाह । पहिय पथिक, ता किं न वीसमसि तत् किं न विश्राम्यसि । यतः उय पश्य मज्झन्हे छाही थोयं पि न नीइ इमा मध्याह्ने छाया स्तोकमपि न निःसरतीयम् । इयं कीदृशी । सिरीसतलुक्का शिरीषतलीना । केन । आयवभएण आतपभयेन । इदम् उक्तं भवति ।

---

१ W. हे; २ W. अम्ह; ३ W. सरीरतलुक्का.

W50 ५२) सुहउच्छयं जणं दुल्लहं पि दूराउ अम्ह आणंत[2] ।
उवयारि जरय[3] जीयं पि नंत[4] न कयावराहो सि ॥५२॥

W51 ५३) आम जरो मे मंदो अहव न मंदो जणस्स का तत्ती ।
सुहउच्छय सुहय सुयंधयंध मा गंधिरिं छिवसु ॥५३॥

मध्याह्ने अचेतना छायाऽपि न निलयात् निष्क्रामति । किं पुनर्घोरघर्म-क्लमक्लाम्यन् क्वापि कोऽपि पुमान् नो विश्राम्यतीति । इदमावयोः संघातार्हम्, अहो अस्मिन सजस्व मामिति भावः ॥५१॥

५२) सुरभिवृक्षस्य । [सुखपृच्छक जनं दुलभमपि दूरादस्मा-कमानयन् । उपकारिन् ज्वर जीवमपि नयन् न कृतापराधोऽसि ॥] काचिदभीष्टं जनमनासादयन्ती आवस्थिकेन ज्वरेण गृहीता सुखप्रस्तावा-गतं तं वीक्ष्य सुखिनी सती स्वगतमिदमाह । हे उवयारि जरय उप-कारिन् ज्वर, जीवं पि नंत न कयावराहो सि जोवमपि नयन् न कृता-पराधोऽसि । तमेव उपकारं संबोधनद्वारेणाह । सुहउच्छयं जणं दुल्लहं पि सुखपृच्छकं जनं दुर्लभमपि । जीवितादप्यधिको ममायं वल्लभ इति भावः । दूराउ अम्ह आणंत दूरादस्माकम् आनयन् । यत एवास्यान-यनेन अहं त्वया कृतकृत्या कृता इति । अतो जीवितमपि नयन् नाप-राध्यन् स जीवेति । अभिलाषतोऽनुस्मरणं गुणकीर्तनं तथोद्वेगः प्रला-पश्च । उन्मादो व्याधिरथ जडता च मरणं च ॥ (रुद्रट, १४,४--५) तन्मध्याद् व्याधिरयं प्रच्छन्नोऽपि प्रबन्धः भः (?) ॥५२॥

५३) गजवर्मणः । [आम् ज्वरो मे मन्दो अथवा न मन्दो जनस्य का चिन्ता । सुखपृच्छक सुभग सुगन्धगन्ध मा दुर्गन्धवतीं स्पृश ॥] आम जरो मे मंदो । आम इति संप्रतिपत्तौ । अस्ति मे ज्वरः किंतु मन्दो न मन्द इति जणस्स का तत्ती जनस्य का चिन्ता । यत-स्त्वम् ईदृशेन चरितेन अस्माकं सामान्यजनस्थाने वर्तसे, अतः सुहउ

१W. दूराहि, २W. आणेंत, ३W उवआरअ जर, ४W णेंत

W52 ५४) सिहिपिच्छलुलियकेसे वेवंतोरू निमीलियद्धच्छि[1]।
दरपुरिसाइयविसमिरि[2] मुणसु पुरिसाण दुक्खाइं ॥५४॥
W53 ५५) पिम्मस्स विरोहियसंहियस्स पच्चक्खदिट्ठविलियस्स ।
उययस्स यँ तावियसीयलस्स विरसो रसो होइ ॥५५॥

च्छय सुखपृच्छक, सुहय सुभग सकललनाप्रिय, सुयंवयंध सुगन्धगन्ध, मा गंधिरिं छिवसु मा मां दुर्गन्धवतीं स्पृश । न हि तवोपभोगयोग्यतां यामीत्यर्थः । सुखपृच्छक इत्यनेन औदासीन्यं सुखकृता उदासीनजन-बन्धन .... तवासीति (!) उक्तं भवति । सुहय इति अर्थान्तरच्छायया(?) अधरदले दशनदंशं शंसति (?) । सुगन्धगन्धेति अन्यनारीसंभोगसुख-लाभसंपन्नतां प्रकटयति । गंधिरिं इति निन्दायां मतुब् .... इत्यर्थः । तदुक्तम् । भूमनिन्दाप्रशंसासु नित्ययोगेऽतिशायने । संसर्गेऽस्तिविवक्षायां भवन्ति मतुबादयः ॥ माघ्याजादासर्वनं (!) खण्डितायाः कोपस्याङ्गम् । उत्तरालंकारः । उत्तरवचनश्रवणादुन्नयनं यत्र पूर्ववचनानाम् । विज्ञेय उत्तरोऽसौ प्रश्नादप्युत्तरं यत्र ॥(रुद्रट, ७, ९३) ॥५३॥

५४) हालस्य । [शिखिपिच्छतुलितकेशे वेपमानोरु निमीलितार्धाक्षि । ईषत्पुरुषायितविश्रमणशीले जानीहि पुरुषाणां दुःखानि ॥] ईषत्पुरुषायित-विश्रमणशीले मुणसु जानीहि पुरिसाण दुक्खाइं पुरुषाणां दुःखानि । तान्येव संबोधनद्वारेण प्रकटयति । सिहिपिच्छलुलियकेसे शिखिपिच्छ-वद् व्यालोलकेशे । वेवंतोरु निमीलियद्धच्छि वेपमानोरु निमीलितार्धाक्षि । कर्मधारयः समासः । आत्मानुमानेन मयि श्रमदुःखानि जानीहीत्यर्थः । पुरुषायितं विपरीतरतम् ॥५४॥

५५) केरलस्य । [प्रेम्णो विरोधितसंहितस्य प्रत्यक्षदृष्टव्यलीकस्य । उदकस्य च तापितशीतलस्य विरसो रसो भवति ॥] पिम्मस्स उययस्स

१W. वेवंतोरु विणिमीलियद्धच्छि, २W. दरपुरिसाइरि विरमिरि; ३W. जाणसु; ४W. जं दुक्खं; ५W. व.

W54 ५६) वज्जवडणाइरित्तं पइणो सोऊण सिञ्छिणिग्घोसं।[1]
फुसियाइँ[2] करमरीए सरिबंदीणं पि अच्छीणि[3] ॥५६॥
W55 ५७) करमरि अयालगज्जियँ[4]जलयासणिपडणपडिरवो एसो।
पइणो धणुरवकंखिरि[5] किं रोमंचं मुहा वहसि ॥५७॥

य विरसो रसो होइ प्रेम्ण उदकस्य च विरसो रसो भवति। कथंभूतस्य प्रेम्णः। पच्चक्खदिट्ठविलियस्स प्रत्यक्षदृष्टव्यलीकस्य। अत एव विरोहिय-संहियस्स, पूर्वं विरोधितस्य पश्चात् संहितस्य इति पूर्वकालैकदेशे वा इत्यादिना (पाणिनि, २, १, ४९) कर्मधारयः। उदकस्य कीदृशस्य। तावियसीयलस्स तापितशीतलस्य। प्रेम्णो विरसतात्र (!)। उदकस्य तद-नुषङ्गेण वैरस्योक्तिः। तुल्ययोग्यताऽलंकारः। तस्य लक्षणम्। विवक्षित-गुणोत्कृष्टैर्यत् समीकृत्य कस्यचित्। कीर्तनं स्तुतिनिन्दार्थं साम्यात् सा तुल्ययोग्यता (काव्यादर्श, २, ३३०)। औपम्यसमुच्चय इत्यन्ये ॥५५॥

५६) षण्मुखस्य। [वज्रपतनातिरिक्तं पत्युः श्रुत्वा ज्यानिर्घोषम्। प्रोञ्छितानि बन्द्या सदृग्बन्दीनामपि अक्षीणि ॥] करमरीए सरिबंदीणं पि अच्छीणि फुसियाइँ बन्द्या मुख्यबन्दीनामपि अक्षीणि मार्जितानि। न केवलं नेत्रोत्पलानि मार्जितानि तासाम्, आत्मनोऽपि, इति अपिशब्द-स्यार्थः। वज्जवडणाइरित्तं वज्रपतनातिरिक्तम्। कठिनकुलिशनिर्घातघोरेण धनुर्ध्वनिना अनुमितागमनस्य स्वकान्तस्य भुजबलं कलयन्त्या एष आगतो अस्मद्भर्तेति भवतीनामपि बन्धमोक्षाय भविष्यतीति शश्वदाश्वासयन्त्या इतरबाष्पाम्बुप्लवसरिता नेत्रोत्पलानि मार्जितानीत्यर्थः। फुसियाइँ इति मृजेर्यण् फुसो वा (?) इति फुसादेशे रूपम्। करमरी बन्दी। सच्छी ज्या। सरि मुख्यः। अन्ये तु समानपर्यायं सरिशब्दम् आहुः। सर्ववाचक इत्येके ॥५६॥

५७) कर्णराजस्य। [बन्दि अकालगर्जितजलदाशनिपतनप्रति-

१ W. सिंजिणीघोसं; २ W; पुसियाइ; ३ W अच्छीइं ४ W गज्जिर; ५ W संकिणि;

W56 ५८) सहइ सहइ त्ति तहे तेण रामिया सुरयदुव्वियड्ढेण ।
पव्वायसिरीसाइ व जह से जायाइँ अंगाइं ॥५८॥

W57 ५९) अगणियसेसजुवाणा बालय वोलीणलोयमज्जाया ।
अह सा भमइ दिसामुहपसारियच्छी तुह कएण ॥५९॥

रव एषः । पत्युर्धनूरवकाङ्क्षिणि किं रोमाञ्चं मुधा वहसि ॥] करमरि अयालगज्जियजलयासणिपडणपडिरवो एसो हे बन्दि अकालगर्जितजीमूतमुक्ताशनिपातप्रतिरवोऽयम् । पइणो घणुरवकंखिरि किं रोमंचं मुहा वहसि । पत्युर्धनुर्ध्वनिरिति प्रयुक्तया उक्तं भवति (?) । आक्षेपभ्रान्तिमङ्ग्यां संसृष्टिरलंकारः ॥५७॥

५८) करमन्दशेलस्य (! मकरन्दसेनस्य, मकरन्दशैलस्य) । [सहते सहत इति तथा तेन रमिता सुरतदुर्विदग्धेन । प्रम्लानशिरीषाणीव यथा तस्या जातानि अङ्गानि ॥] इयं सुरतं सहते सहत इति कृत्वा तथा तेन सुरतदुर्विदग्धेन रमिता । पव्वायसिरीसाइ व जह से जायाइँ अंगाइं यथा तस्या अङ्गानि प्रम्लानानि शिरीषाणीव जातानि । कथंभूतेन । सुरयदुव्वियड्ढेण सुरतदुर्विदग्धेन । यो विदग्धो भवति स मुग्धां मृदूपायैरभियुङ्क्ते । खरतरां च मुनिमतोक्ताङ्गलेपादिना कृत्रिमयन्त्रयोजनैश्च मुदिमानमानयति । तरुर्विदग्ध इति यथा प्रेमप्रम्लानाम् (?) । उपमालंकारः ॥५८॥

५९) कुसुमायुधस्य । [अगणितशेषयुवजना बालकातिक्रान्तलोकमर्यादा । अथ सा भ्रमति दिशामुखप्रसारिताक्षी तव कृते ॥] गतार्था गाथा । हे बालक, अगणितशेषतरुणा अतिक्रान्तलोकमर्यादा दिशामुखप्रसारिताक्षी तव कृते भ्रमति । औत्सुक्यचपलताख्यौ व्यभिचारिभावौ ॥५९॥

१ W तेण तहा रमिआ

W58 ६०) अज्जं चेव पउत्थो उज्जग्गिरओ[1] जणस्स अज्जेय ।
अज्जेय [2]हलद्दीपिंजराइँ गोलाइ तूहाइं ॥६०॥

W59 ६१) असरिसचित्ते दियरे सुद्धमणा पिययमे विसमसीले ।
न कहइ कुडुंबविहडणभएण तणुयायए वहुया[3] ॥६१॥

६०) ग्रहलङ्घितस्य । [अद्यैव प्रोषित उज्जागरो जनस्य अद्यैव । अद्यैव हरिद्रापिञ्जराणि गोदावर्यास्तीर्थानि ॥] काचिद् वियोगिनी वल्लभस्य वीरविलासौ व्यपदेशेन वर्णयितुम् इदमाह । सोऽस्माकं हृदयदयितः अज्जं चेव पउत्थो अद्यैव प्रोषितः । अज्जेय जणस्स उज्जग्गिरओ जाओ अद्यैव जनस्य उज्जागरको जातः । एतदुक्तं भवति । तस्मिंस्तिष्ठति अपसारितचौरभये यूनि जनाः सुखेन शेरते स्म । अद्य च कृतगमने तत्र प्रचुरतरतस्करत्रासेन समस्तवास्तव्यानां यामिनीयामजागरणमिति । अज्जेय हलद्दीपिंजराइँ गोलाइ तूहाइं अद्यैव हरिद्रापिञ्जराणि गोदावरीतटानि जातानि । अत्र च योऽनुरागो जितहरिद्रापिञ्जिमा गोदावर्याः, तेन च वनितानाम् अङ्गरागपरित्यागेन सौभाग्यभङ्गीभणितिराविष्कृता इति पूर्वार्द्धे वीरः, उत्तरार्द्धे विलासोक्तिः । गोला गोदावरी । तूहं तटम् । हलद्दी इति हरिद्रा । अत् पथिहरिद्रापृथिवीषु (वररुचि, १.१३) इत्यनेन इकारस्य अत्वम् । रेफस्य लत्वे च रूपमिदम् । पर्यायोक्तिरलंकारः । तस्य लक्षणम् । अर्थमिष्टमनाख्याय साक्षात् तस्यैव सिद्धये । यत्प्रकारान्तराख्यानं पर्यायोक्तिस्तदिष्यते ॥ (काव्यादर्श, २.२९५).

६१) असद्वस्य [?] । [असदृशचित्ते देवरे शुद्धमनाः प्रियतमे विषमशीले । न कथयति कुटुम्बविघटनभयेन तनूयते वधूः ॥] वहुया वधूः । असरिसचित्ते दियरे पिययमे विसमसीले न कहइ असदृशचित्ते देवरे, प्रियतमे विषमशीले न कथयति न निवेदयति, अर्थाद् देवरस्य दुरीहितम् इति लभ्यते । केन हेतुना । कुडुंबविहडणभएण कुटुम्बविघ-

१ W. उज्जागरओ; २ W. हलिद्दा; ३ W. सोण्हा.

W60 ६२) चिंताणियदइयसमागमम्मि कयमन्तुयाइँ भरिऊण।
सुन्नं कलहायंती सहीहिँ रुन्ना न[1] उण हसिया ॥६२॥
W61 ६३) हिययन्नुएहि समयं असमत्ताइं पि जह समप्पंति[2]।
कज्जाइँ मणे न तहा इयरेहिँ समाणियाइं पि ॥६३॥

टनभयेन। किं तर्हि करोतीत्याह। तणुयायए तनूयते, मा खल्वेष सहसैव देवरं त्यजेदिति। तदीयात्मा मनोरथे व्यथाव्यकृतीनां (?) कुटुम्बविघटनभयेन भर्तुः न प्रकाशयति। केवलम् अन्तःसन्तापेनोपजायमानात् तानवात् कथयति इति ॥६१॥

६२) हूणाधिपस्य। [चिन्तानीतदयितसमागमे कृतमन्तून् स्मृत्वा। शून्यं कलहायन्ती सखीभी रुदिता (शोचिता) न पुनर्हसिता ॥] काचिन्नायिका चिंताणियदइयसमागमम्मि सुन्नं कलहायंती रुन्ना न उण हसिया चिन्तानीतदयितसमागमे ध्यानपारमिताबलानीतप्रियतमे शून्यं कलहायमाना। कयमन्तुयाइँ भरिऊण कृतापराधान् स्मृत्वा। इदं शून्यं कलहायितम्। भोगोन्मादवताम् अन्तर्हितेत्यस्या उपहासावसानं भवतीत्यभीष्टा (?)। सा किल सखीजनेन शोचिता न पुनरुपहसिता, इत्यर्थः। विप्रलब्धा कलहान्तरिता खण्डिता नाम नायिका। स्मृतिचिन्तोन्मादा व्यभिचारिणो भावाः। आणिय इति 'इत् ईतः पानीयादिषु' (वररुचि, १.१८) इति ईतः इत्त्वे सति रूपम् ॥६२॥

६३) विग्रहराजस्य। [हृदयज्ञैः समम् असमाप्तान्यपि यथा समाप्यन्ते। कार्याणि मन्ये न तथा इतरैः समाप्तान्यपि ॥] हिययन्नुएहिँ समयं असमत्ताइं पि जह समप्पंति हृदयज्ञैः समम् असमाप्तान्यपि कार्याणि यथा समाप्यन्ते, न तहा इयरेहिँ समाणियाइं पि न तथा इतरैः अहृदयज्ञैः समं समाप्तान्यपि समाप्यन्त इत्यर्थः। परहितकरैः समम् असमाप्तानि न पुनरज्ञैः समं समाप्तान्यपीति, इयं सज्जनवर्णनोक्तिः ॥६३॥

---

१ W. ण ओहसिया; २ W. सुहावेंति.

W62 ६४) दरफुडियसिप्पिसंपुडणिलुक्कहालाहलग्गपुच्छेणिहं ।
पिक्कंबट्ठिविणिग्गयकोमलमंबंकुरं उयह ॥६४॥

W63 ६५) उयह पडलंतरोइण्णणिययतंतुद्धपायपडिलग्गं ।
दुल्लक्खसुत्तगुत्थेक्कबउलकुसुमं व मक्कडयं ॥६५॥

W64 ६६) उवरिदरदिट्ठखन्नुयणिलीणपारावयाण विरुएण ।
नीससइ जायवियणं सूलाभिन्नं व देवउलं ॥६६॥

---

६४) विचित्रस्य । [ईषत्स्फुटितशुक्तिसंपुटनिलीनहालाहलाग्रपुच्छ-निभम् । पक्वाम्रास्थिविनिर्गतकोमलम् आम्राङ्कुरं पश्यत ॥] अंबंकुरं उयह आम्राङ्कुरं पश्यत । कथंभूतम् । पिक्कंबट्ठिविणिग्गयकोमलं पक्वाम्र-पृष्ठ (? अस्थि) विनिर्गतं च तं कोमलं च पक्वाम्रस्य यद् अस्थि ततो विनिर्गतं च तं कोमलं चेति कर्मधारयः । अतश्च कीदृशम् । दरफुडिय-सिप्पिसंपुडणिलुक्कहालाहलग्गपुच्छणिहं दरस्फुटितशुक्तिसंपुटं तत्र निलीना या गृहगोधिका तस्याः पुच्छाग्रेण तुल्यम् । वृन्तानुगतताम्राङ्कुरस्य गृहगोधिकाग्रपुच्छोपमाबीजं प्रतीयमानेनैव धर्मेण । उपमालंकारः । हाला-हलशब्दो गृहगोधिकायाः पर्यायोक्तिः यस्या ब्राह्मणीति लोके प्रसिद्धिः ॥६४॥

६५) ईश्वरराजस्य । (पश्यत पटलान्तरावतीर्णनिजकतन्तूर्ध्वपाद-प्रतिलग्नम् । दुर्लक्षसूत्रगुम्फितैकबकुलकुसुममिव मर्कटकम् (ऊर्णनाभम्)॥] पश्यत ऊर्णनाभम् । कीदृशम् । पडलंतरोइण्णणिययतंतुद्धपायपडिलग्गं पटलान्तराद् अवतीर्णो यो निजकस्तन्तुः तत्र ऊर्ध्वपादप्रतिलग्नम् । यथा भवति । दुर्लक्षं सूक्ष्मत्वात् सूत्रं तत्र गुत्थं (गुम्फितम्) एकं यद् बकुल-कुसुमं, तदिव । पटलं (? छदिः) । उपमालंकारः ॥६५॥

६६) पालिकस्य । [उपरि ईषद्दृष्टस्थाणुकनिलीनपारापतानां

---

१ W. छेप्पणिहं. २ W. णिलुक्क; ३ W. विरुएहिं; ४ W णित्थणइ; ५ W. सूलाहिण्णं.

W65 ६७) जइ तस्स न[1] होसि पिया ता[2] दियहं नीसहेहि अंगेहिं ।
नवसूयपीयपेऊसमत्तपाडि व्व किं सुयसि ॥६७॥

W66 ६८) हेमंतियासु अइदीहरासु राईसु जं सि न[3] विणिद्दा ।
चिर[4]गयपउत्थवइए न सुंदरं जं दिवा सुयसि ॥६८॥

विरुतेन । निःश्वसिति जातवेदनं शूलाभिन्नमिव देवकुलम् ॥] उपरि शिखाभागे दरदष्टो यः स्थाणुकः तत्र निलीनपारापतविरुतेन निःश्वसितीव । कीदृशम् । जायवियणं सूलाभिन्नं व जातवेदनं किलमोरितशूलन्यस्ता(?) निःश्वसितीवेति । पूर्वार्धे समासः चिन्त्यः । नित्थणइ जायवियणं निलीण-पारावयाण विरुएण । उवरि दरदिट्ठखन्नुयसूलाभिन्नं व देवउलं ॥ इति पाठः श्रेयान् । यत्र देवकुलं तत्र तथाक्तम् । तदित्थंभूतम् (?) । नि ३१ ग - परावयाण विरुएण । उत्प्रेक्षालंकारः ॥६६॥

६७) सयरसेनस्य (?सगरसेनस्य) । [यदि तस्य न भवसि प्रिया तद् दिवसं निःसहैरङ्गैः । नवसूतपीतपीयूषमत्तसैरिभीसुतेव किं स्वपिषि ॥] यदि न भवसि त्वं तस्य प्रिया तत् किं निःसहैः सुरतश्रमखिन्नैरङ्गैः दिवा नव्यजात–नवप्रसूत–पोतपीयूषमत्तसैरिभीसुतेव किं स्वपिषि । सुतेवे-त्यादि ते (?) । कालाध्वभावदेशानां योगे अकर्मकाणाम् अपि कर्मसंज्ञा । अत्र उत्तरोपमाभ्यां संसृष्टिरलंकारः । निद्रा नाम संचारी भावः । आल-स्याद् दौर्बल्यात् श्रमात् क्लमात् चिन्तनात् स्वभावात् च । रात्रौ जागर-णादपि निद्रा संभवति देहभूतस्य ॥ उन्मुखगौरवगात्रव्यावर्तननयनमीलन-जडत्वैः । जृम्भणगात्रविमर्दैरनुभावैरभिनयस्तस्याः ॥ (नाट्यशास्त्र ७, ११०–१११.).

६८) आढ्यराजस्य । [हैमनीष्वतिदीर्घासु रात्रिषु यदसि न विनिद्रा । चिरगतप्रोषितपतिके न सुन्दरं यद् दिवा स्वपिषि ॥] काचित्

१W. होसि ण; २W. अणुदियहं; ३W. जं सि अविणिद्दा; ४W. चिरअर.

W67 ६९) जइ चिक्खिल्लभउप्पुयपयमिणमलसं पए तुह विइण्णं।[1]
ता सुहय कंटइज्जंतमम्ह[2] अंगं किणो हससि ॥६९॥
W69 ७०) पाणिग्गहणि[3] च्चिय पव्वईए नायइ सहीहिँ सोहग्गं।
पसुवइणा वासुइकंकणम्मि दूरं समोसरिए ॥७०॥

प्रोषितपतिकां दिवसां (? दिवसे) नयनेङ्गितचिरगान (?) विदितविक्रियां विदग्धसखीमिदमाह। हे चिरगयपउत्थवइए चिरगतप्रोषितभर्तृके जं दिवा सुयसि तं न सुंदरं यद् दिवा स्वपिषि तत् न शोभनम्। हेमंतियासु राईसु अइदीहरासु जं सि न विणिद्दा हैमनीषु यामिनीषु अतिदीर्घिकासु यदसि न विनिद्रा। अत्र दिवाशयनानुमितं यामिनीजागरणम् असतीत्व-शङ्कां जनयतीत्यर्थः। चिरगय इति गतशब्दो भावसाधनो द्रष्टव्यः। चिरगयपउत्थवइए इति पाठे तु न दोषः (?)। राई रात्रिः ॥६८॥

६९) कृष्टखदिरस्य। [यदि कर्दमभयोत्प्लुतपदमिदमलसं पदे तव वितीर्णम्। तत् सुभग कण्टकायमानम् अस्माकमङ्गं किं नु हससि ॥] काचित् मय्यनुरक्तेति जातहासे यूनि तदवलोकनाय मदनचिह्ननिह्नवोक्ति-त्वेन तदालपनसुखलाभलालसा सती इदमाह। हे सुहय सुभग जइ चिक्खि-ल्लभउप्पुयपयमिणमलसं पए तुइ विइण्णं यदि कर्दमभयोत्प्लुतं भयोत्क्षिप्तं पदमिदमलसं पदे तव वितीर्णं, ता किणो अम्ह अंगं हससि तत् कस्माद-स्माकमङ्गं हससि। किणो किमिव हससि। कथंभूतम्। कंटइज्जंतं पुलकेनाकीर्यमाणम्। मान्यथा संभावयतु भवान्। कर्दमघृणया किलाहं पुलकिताऽऽकीर्यमाणाङ्गेति। अन्ये तु पार्श्वपरिवर्तिनो विदग्धसखीजनस्य, तस्मिन् यूनि निजानुरागलिङ्गसहितत्वं सा नायिका इदमाह इत्याहुः। उभयथाऽपि लेशोऽलंकारः। तस्य लक्षणम्। लेशो लेशेन निर्भिन्नवस्तु-रूपनिगूहनम् ॥ (काव्यादर्श, २,२६५) ॥६९॥

७०) कोदिल्लकस्य। [पाणिग्रहण एव पार्वत्या ज्ञायते सखीभिः

१W. अलसाइ तुह पए दिण्णं; २W. अंगमेण्हिं किणो वहसि; ३W. पाणिग्ग-हण च्चिअ.

W68 ७१) पत्तो छणो न सोहइ अइप्पहाए[1] य पुण्णियायंदो ।
अंतविरसो य[2] कामो असंपयाणे[3] य परिओसो ॥७१॥

W70 ७२) गिम्हे दवग्गिमसिमइलियाइँ दीसंति विंझसिहराइं ।
आससु पउत्थवइए न हुंति नवपाउसब्भाइं ॥७२॥

सौभाग्यम् । पशुपतिना वासुकिकङ्कणे दूरं समुत्सारिते ॥] वासुकिकङ्कणे दूरमपसारिते सति । केन पसुवइणा पशुपतिना । इयम् उत्फुल्लफणा-फूत्कारतो मा भैषीदिति पशुपतिना वासुक्यपसर्पणं कृतमित्यर्थः । फणी कङ्कणम् । भीरुतो मा निषीदतु । भुजङ्गराजोत्सारेण सौभाग्यस्य लिङ्गम् । अनुमानालंकारः ॥७०॥

७१) ध्रुवराजस्य । [प्राप्तः क्षणो न शोभते अतिप्रभाते च पूर्णिमा-चन्द्रः । अन्तविरसश्च कामः असंप्रदाने च परितोषः ॥] पत्तो छणो न सोहइ प्राप्तः क्षण उत्सवो न शोभते । अइप्पहाए य पुण्णिमायंदो तथा अतिप्रभाते च पूर्णिमाचन्द्रः । अन्तविरसश्च कामः। असंपयाणे य असं-प्रदाने च परितोषः । न शोभत इति सर्वत्र संबन्धः । प्राप्ते हि क्षण उत्कण्ठा कुण्ठीभवति । उत्कण्ठाकारणाभावात् । प्रातः पूर्णिमाचन्द्रो अरुणोदयहतच्छायो भवति । अन्तविरसश्च कामो अनुभूतसुरतसुखतया न जायते । असंप्रदाने च न केवलेन साम्ना यः परितोषः पुष्यतीत्यर्थः (?) । दीपकसमुच्चयतुल्ययोग्यतायोगिनी संसृष्टिरलंकारः ॥७१॥

७२) चित्तराजस्य । [ग्रीष्मे दवाग्निमषीमलिनितानि दृश्यन्ते विन्ध्य-शिखराणि । आश्वसिहि प्रोषितपतिके न भवन्ति नवप्रावृडभ्राणि ॥] आससु पउत्थवइए आश्वसिहि प्रोषितपतिके न हुंति नवपाउसब्भाइं न भवन्ति नवप्रावृडभ्राणि, अपि तु विंझसिहराइं विन्ध्यशिखराणि । कीदृशानि । गिम्हे ग्रीष्मे दवग्गिमसिमइलियाइं दवाग्निमषीमलिनितानि । ग्रीष्मसमय एवायम् । दवाग्निधूमश्यामलितविन्ध्यशिखराणि न तु वर्षावतार इत्यर्थः ।

१W. अईप्पहाअ व्व; २W. व्व; ३W. असंपआणो.

W71 ७३) जित्तियमित्तं तीरइ निव्वोढुं देहि[1] तित्तियं पणयं ।
न जणो पिययमकयमाणभंगदुक्खक्खमो[2] सव्वो ॥७३॥

W72 ७४) बहुवल्लहस्स जा होइ वल्लहा कह वि पंच दियहाइं ।
सा[3] छट्ठं किं मग्गइ कत्तो मिट्ठं च बहुयं च ॥७४॥

W73 ७५) जं जं सो निज्झायइ अंगोवासं[4] महं अणिमिसच्छो[5] ।
पच्छाएमि य तं तं इच्छामि य तेण दीसंतं ॥७५॥

दावो वनदवाग्निरिति दवाग्निशब्दस्य यथादिगणपाठात् (वररुचि १, १०) ह्रस्वत्वे रूपम् । अपह्नुतिरलंकारः । अपह्नुतिरपह्नुत्य किंचिदन्यार्थदर्शनम् (काव्यादर्श, २, ३०४] ॥७२॥

७३) चन्द्रपुट्टिकायाः (चन्द्रपुत्रिकायाः ?) । [यावन्मात्रं शक्यते निर्वोढुं देहि तावन्तं प्रणयम् । न जनः प्रियकृतमानभङ्गदुःखक्षमः सर्वः ॥] तित्तियं पणयं देहि तावत् प्रेम प्रयच्छ जित्तियमित्तं निव्वोढुं तीरइ यावन्मात्रं निर्वोढुं शक्नोति इति । तीरइ इति कर्तर्यपि । अथवा यावन्निर्वाहयितुं शक्यत इत्येवंभूतकारितार्थे निर्वोढुम् इति शब्दो द्रष्टव्यः । ननु सकलजनस्य पतिप्रणयप्राचुर्ये कोऽयं दोष इत्याह न जणो पिययमकयमाणभंगदुक्खक्खमो सव्वो न जनः प्रियतमकृतमानभङ्गदुःखक्षमः सर्वः । नाहं प्रियतमकृतमानभङ्गदुःखमीक्षितुं क्षमेत्यर्थः ॥७३॥

७४) शुद्धशीलस्य । [बहुवल्लभस्य या भवति वल्लभा कथमपि पञ्च दिवसानि । सा षष्ठं किं मार्गयते, कुतो मिष्टं च बहु च ॥] बहुवल्लभस्य जा कह वि पंच दियहाइं वल्लहा होइ बहुवल्लभस्य पुंसो या कथमपि पञ्च दिवसान् वल्लभा भवति सा छट्ठं किं मग्गइ सा षष्ठं किमिति दिनं याचते । कुतः । बहुयं च मिट्ठं च कत्तो बहु च मृष्टं चेति कुतः । इदमेव दुर्लभं यद् बहुवल्लभस्य त्रिचतुराणि दिनानि प्रियत्वं प्राप्यते । ततोऽप्यधिकतरं मृगाक्षि मा मा खिद्यस्व (?) इति सखीशिक्षोक्तम् । अर्थान्तरन्यासोऽलंकारः ॥७४॥

---

१ w. देसु; २ w. विणिअत्तपसाअदुक्खसहणक्खमो. ३ w. सा किं मग्गइ छट्ठं, ४ w. अंगोआसं, ५ w. अणिमिसच्छं.

W74 ७६) दढमन्नुदूमियाएँ वि गहिओ दइयम्मि पिच्छह इमीए ।
ओसरइ वालुयामुट्ठिउ व्व माणो सुरसुरंतो ॥७६॥

W75 ७७) उय पोमैंरायमरगयसंवलिया नहयलाउ ओयरइ ।
नहसिरिकंठब्भट्ठ व्व कंठिया कीररिंछोली ॥७७॥

७५) अक्षणस्य । [यं यं स निर्ध्यायति अङ्गावकाशं ममानिमिषाक्षः । प्रच्छादयामि तं तम् इच्छामि च तेन दृश्यमानम् ॥] काचित् स्वसख्याः कथयति । जं जं सो महं अंगोवासं अणिमिसच्छो निज्झायइ यं यं स ममाङ्गपार्श्वम् अनिमिषाक्षः पश्यति तं तं अहं पच्छाएमि इच्छामि य तेण दीसंतं तं तम् अहं प्रच्छादयामि च इच्छामि च तेन दृश्यमानम् । लज्जानुरागप्रकाशनम् । मुग्धा नायिका । किमपि सखीनां कर्णे अलक्षिताक्षरं वक्ति, रुच्यम् अप्रावृतमङ्गं विदधाति ससंभ्रमं चैव । वागो (!) व्यभिचारिणो भावाः । निज्झायइ पश्यति ॥७५॥

७६) पीठहर्म्यस्य । [दृढमन्युदूनाया अपि गृहीतो दयिते पश्यतानया । अपसरति वालुकामुष्टिरिव मानः सुरसुरायमाणः ॥] पिच्छह इमीए माणो ओसरइ पश्यतास्या मानोऽपसरति । कीदृशः । दइयम्मि गहिओ दयिते गृहीतः । कथंभूतायाः । दढमन्नुदूमियाएँ वि दृढमन्युदूनाया अपि । किं कुर्वन् क इव । सुरसुरंतो वालुयामुट्ठिउ व्व शनैः शनैः विगलन् वालुकाया मुष्टिरिव । मन्युः क्रोधः । मुष्टिशब्दः पुंलिङ्गोऽपि । उपमालंकारः ॥७६॥

७७) पालित्तकस्य । [पश्य पद्मरागमरकतसंवलिता नभस्तलादवतरति । नभःश्रीकण्ठभ्रष्टेव कण्ठिका कीरपङ्क्तिः ॥] पश्य शुकश्रेणिर्नभस्तलादवतरति । कीदृशी का इव । नहसिरिकंठब्भट्ठ व्व कंठिया नभःश्रीकण्ठभ्रष्टेव कण्ठिका कण्ठाभरणम् । कथंभूता कण्ठिका । पोमरायमरगयसंवलिया पद्मरागमरकतमिलिता । आताम्रतुण्डतया नीलच्छदच्छाय-

१ W पोमराअ

W76 ७८) न वि तह विएसवासो दुग्गच्चं मह जणेइ संतावं ।
[1]आसंघियत्थविमुहो जह पणइयणो नियत्तंतो ॥७८॥

W77 ७९) खंधग्गिणा वणेसुं तणेहिँ गाममम्मि रक्खिओ पहिओ ।
नयरवसिओ नडिज्जइ साणुसएणं[2] व सीएण ॥७९॥

W78 ८०) भरिमो से गहियाहरधुयसोसपहोल[3]णालयाउलियं ।
वयणं परिमलतरलिय[4]भमरोलि[5]पइल्लकमलं व ॥८०॥

तया शुकशकुन्तश्रेणिः पद्मरागमरकतमिश्रितया अन्तरिक्षलक्ष्मीकण्ठकण्ठिकया उपमीयते । उपमालंकारः ॥७७॥

७८) वासुदेवस्य । [नापि तथा विदेशवासो दौर्गत्यं मम जनयति संतापम् । संभावितार्थविमुखो यथा प्रणयिजनो निवर्तमानः ॥] न वि तह विएसवासो दुग्गच्चं मह संतावं जणेइ नैव तथा विदेशवासो दौर्गत्यं च ममान्तःसंतापं जनयति जह आसंघियत्थविमुहो पणइयणो नियत्तंतो यथा आशस्तार्थविमुखः प्रणयिजनो निवर्तमानो मम संतापं जनयतीति । आसंघियं संभावितम् । हेतुदीपकाभ्यां संसृष्टिरलंकारः ॥७८॥

७९) भीमविक्रमस्य । [स्कन्धाग्निना वनेषु तृणैर्ग्रामे रक्षितः पथिकः । नगरोषितो विडम्ब्यते (अभिभूयते) सानुशयेनेव शीतेन ॥] नयरवसिओ पहिओ सीएण नडिज्जइ नगरोषितः पथिकः शीतेन विडम्ब्यते अभिभूयत इत्यर्थः । कथंभूतेन । साणुसएणं व सकोपेनेव । कीदृशः पथिकः । खंधग्गिणा वणेसुं तणेहिँ गाममम्मि रक्खिओ स्कन्धाग्निना वनेषु तृणैर्ग्रामे रक्षितः । इत्यत एवानुशयशीलेन । अयं किल वने वसन् प्रचुरकाष्ठकल्पिततल्पपार्श्वपावको ग्रामे च प्रबलपलालमध्यम् अध्यासीनो न मां मात्रयाऽपि गणयति स्म । सोऽयं नगरे निराश्रय इति सानुशयेन शीतेन बाध्यत इति । खंधग्गो स्थूलाग्निः (स्थूलकाष्ठाग्निः) । उत्प्रेक्षाऽलंकारः ॥७९॥

१W. आसंसिअत्थविमुहो, २W. साणुसएण व्व. ३W. पहोलिरा, ४W. भमरालि; ५W. पइण्ण;

W79 ८१) हल्लप्फलन्हाणपसाहिरीणं[1] छणवासरे सवत्तीणं ।
अज्जाएं मज्जणाणायरेण कहियं व सोहग्गं ॥८१॥

W80 ८२) न्हाणहलि[2]द्दीभरियंतराइँ जालाइँ जालवलयस्स ।
सोहंती[3] किलिंबयकंटएण कं काहिसि कयत्थं ॥८२॥

---

८०) विरयादित्यस्य (विनयादित्यस्य ?) । [स्मरामः तस्या गृहीताधरधुतशीर्षप्रघूर्णनालकाकुलितम् । वदनं परिमलतरलितभ्रमरालिप्रचलकमलमिव ॥] कश्चित् चिरप्रवासी इदमाह । से तस्या दयितायाः वयणं भरिमो वदनं स्मरामः । कीदृशम् । गहियाहरधुयसीसपहोलणालयाउलियं गृहीताधरधुतशीर्षप्रघूर्णनालकाकुलितम् । किमिव । परिमलतरलियभमरोलिपहल्लकमलं व परिमलतरलितभ्रमरमालाकम्पप्रचलकमलमिव । स्मृतिः व्यभिचारी भावः । अनुरागसूचको वागनुभावः । पहल्लं दोलितम् । उपमालंकारः ॥८०॥

८१) मुक्ताफलस्य । [औत्सुक्यस्नानप्रसाधनशीलानां क्षणवासरे सपत्नीनाम् । आर्यया मज्जनानादरेण कथितमिव सौभाग्यम् ॥] प्रौढयुवत्या मज्जनानादरेण कथितमिव सौभाग्यम्, अर्थाद् आत्मन इति लभ्यते । काभ्यः । सवत्तीणं सपत्नीभ्यः । हल्लप्फलन्हाणपसाहिरीण औत्सुक्येन यत् स्नानं प्रसाधनं च, तदाचरणशीलाभ्यः । सौभाग्यम् आहार्यगुणापेक्षं नेत्यभिप्रायः । कदा । छणवासरे उत्सवदिवसे । केन कृत्वा । मज्जणाणायरेण मज्जनानादरेण । अहं निजरूपशोभासौभाग्यगुणा अकृतमज्जनमण्डनाऽपि प्रकृत्यैव प्रियस्य प्रियेति । न हि स्वभावसुभगम् आहार्यगुणमपेक्षत इत्यभिप्रायः । हल्लप्फलं आकुलता । गर्वो नाम व्यभिचारी भावः । (आकुलता-) व्यञ्जकः बिव्वोको नाम चेष्टालंकारः । ईप्सितभावप्राप्तावप्यत्यभिमानगर्वसंभूतः । स्त्रीणामनादरकृतो बिव्वोको नाम विज्ञेयः ॥ उत्प्रेक्षालंकारः ॥८१॥

८२) काढिल्लकस्य । [स्नानहरिद्रापूरितान्तराणि जालानि जालवलयस्य । शोधयन्ती क्षुद्रवंशकण्टकेन कं करिष्यसि कृतार्थम् ॥]

---

१ W. पसाहिआण; २ W. हलिद्दा; ३ W. किलिंचिअकंटएण.

W81 ८३) अदंसणेण पिम्मं अवेइ अइदंसणेण वि अवेइ ।
पिसुणजणजंपिएण वि अवेइ एमेयं वि अवेइ ॥८३॥
W82 ८४) अदंसणेण महिलायणस्स अइदंसणेण नीयस्स ।
मुक्खस्स पिसुणजणजंपिएण एमेयं वि खलस्स ॥८४॥
W83 ८५) पुंट्टवडिएहिँ दुक्खं अच्छिज्जइ उन्नएहि होऊण ।
इय चिंतंताण मणे थणाण किसैणं मुहं जायं ॥८५॥

जालवलयस्य जालरूपकटकस्य जालानि सुषिराणि तत्स्थानदारुकेण शोषयन्ती कं कृतार्थं करिष्यसि । कथंभूतानि जालानि । न्हाणहलिद्दीभरियंतराइँ स्नानहरिद्रादापित (? पूरित)मध्यभागानि । धन्यः खल्वसौ यदर्थे त्वयायं विशेषः क्रियत इति । इयं हेला विलासः । तस्या लक्षणम् । सा जिघ्रति धम्मिल्लं माल्यं वा नखशिखाभिरुल्लिखति । कटकाद् व्यपनयति विलेपनं च कर्मेति हेलायाः ॥८२॥

८३) मधुकरस्य । [अदर्शनेन प्रेमापैति अतिदर्शनेनाप्यपैति । पिशुनजनजल्पितेनाप्यपैति एवमेवाप्यपैति ॥] निगदव्याख्यातेयं गाथा । अदर्शनेन अतिदर्शनेन पिशुनजनजल्पितेन एवमेवापि प्रेमापैति इति गाथार्थः । आवृत्तिरलंकारः । अर्थावृत्तिः पदावृत्तिरुभयावृत्तिरेव च । दीपकस्थान एवैतदलंकारत्रयं यथा ॥ (काव्यादर्श २, ११६) ॥८३॥

८४) तस्यैव (मधुकरस्य) । [अदर्शनेन महिलाजनस्य अतिदर्शनेन नीचस्य । मूर्खस्य पिशुनजनजल्पितेन एवमेवापि खलस्य ॥] पिम्मं अवेइ इति पूर्वगाथाया अनुवर्तनीयम् । उभे अप्यमू गाथे अन्योन्यापेक्षया गतार्थे इति ॥८४॥

८५) स्वामिनः । [उदरपतितैर्दुःखमास्यत उन्नतैर्भूत्वा । इति चिन्तयतोर्मन्ये स्तनयोः कृष्णं मुखं जातम् ॥] इति मनसि चिन्तयतां स्तनानां कृष्णं मुखं जातम् । किं तद् इत्याह । उन्नएहि होऊण उन्नतै-

---

१ W. एमेअ; २ W. पोट्ट; ३ W. कसणं;

W84 ८६) सो तुह कएण सुंदरि तह झीणो सुमहिलो हलियउत्तो ।
जह से मच्छेरिणीइ वि दुच्चं जायाइ पडिवन्नं ॥८६॥

W85 ८७) दक्खिण्णेण वि इंतो सुहय सुहावेसि अम्ह अंगाइं ।
निक्कइयवाणुरत्तो सि जाण का निव्वुई ताणं ॥८७॥

भूत्वा पश्चात् पुट्टवडिएहिँ दुक्खं अच्छिज्जइ जठरउदरपतितैः दुःख-मास्यत इति । उन्नतं पदं प्राप्यते तदनु उदरभरणमात्रसक्तैः स्थीयते, इति आत्मनो अवस्थाम् अवश्यंभाविनीं भावयत इव स्तनमण्डलस्य मुखमालिन्यं जातम् इत्यर्थः । अत्र प्रयुक्त्या कयाचिद् अन्तर्वत्नीत्वं सूचितम् इति ज्ञेयम् । उत्प्रेक्षालंकारः ॥८५॥

८६) कृतपुराशोलस्य (? कृतपुण्यशीलस्य)। [स तव कृते सुन्दरि तथा क्षीणः सुमहिलो हालिकपुत्रः । यथा तस्य मत्सरिण्याऽपि दौत्यं जायया प्रतिपन्नम् ॥ काचित् कस्यांचित् नायकानुरागं प्रकटयितुमिदमाह । सो तुह कएण स त्वदर्थे हलिअउत्तो हालिकसुतः तह झीणो तथा क्षीणः जहा से दुच्चं जायाइ पडिवन्नं यथा तस्य जयया दौत्यं प्रतिपन्नम् । कथंभूतया जायया । मच्छरिणीइ वि मात्सर्यवत्यापि । कथंभूतः स हालिकसुतः । सुमहिलो शोभनभार्यः । यत एव शोभना, अत एव पत्युः प्राणपरित्राणाय मत्सरं मुक्त्वा तया तद्दयितया दौत्यं प्रतिपन्नम् । अन्ये तु सुमहिलो शोभनभार्योऽपि यदसौ तव संगमाय कार्श्यमनुभवति तेन त्वमेव तद्भार्याया अधिकशोभासौभाग्यभावभाजिनीति दर्शितम् इत्याहुः । दौत्यमिति सख्याः तद्योगः । मच्छरिणी असहनशीला ॥८६॥

८७) निघट्टस्य । [दाक्षिण्येनाप्यायन् सुभग सुखयस्यस्माकमङ्गानि। निष्कैतवानुरक्तोऽसि यासां का निर्वृतिस्तासाम् ॥] काचिद् अन्याङ्ग-

१ W. मच्छरिणीअ वि. २ W. दोच्चं. ३ W. हिअआइं ४ W. णिक्कइअवेण जाणं गओ सि.

W86 ८८) इक्कं पहरुव्वायं हत्थं मुहमारुएण वीयंतो ।
सो वि हसंतीइ मए गहिओ बीएण कंठम्मि ॥८८॥

W89 ८९) मुहमारुएण तं कण्ह गोरयं राहियाइ अवणिंतो ।
एयाण बल्लवीणं अन्नाण य गोरयं हरसि ॥८९॥

नागोत्रग्रहणेन अन्येव (?) आकारेङ्गितलिङ्गेन कृतकानुरागमनुमाय नायकमिदमाह । हे सुहय सुभग दाक्खण्णेण वि इंतो सुहावेसि अम्ह अंगाइं दाक्षिण्येनापि आगच्छन् सुखयसि अस्माकम् अङ्गानि । निष्कैतवमनुरक्तोऽसि यासां का निर्वृतिस्तासाम् । कः सुखनिवेशो, नाहमवधारयितुं समर्थेत्यर्थः ॥८७॥

८८) आदिवराहस्य । [एकं प्रहारपीडितं हस्तं मुखमारुतेन वीजयन् । सोऽपि हसन्त्या मया गृहीतो द्वितीयेन कण्ठे ॥] काचित् स्वरहस्यं सख्याः कथयति । सो वि मए इक्कं पहरुव्वायं हत्थं मुहमारुएण वीयंतो सोऽपि मया एकं प्रहारपीडितं पाणिं मुखमारुतेन वीजयन् बीएण गहिओ कंठम्मि द्वितीयेन गृहीतः कण्ठे । कथंभूतया । हसंतीइ हसन्त्या । अथासौ सहसा अपराधक्रोधान्धया मया कान्तः करतलेन ताडितः । ततोऽसौ स्वीयां तथा परुषपाणिप्रहारवेदनामनादृत्य प्रत्युत तमेव हस्तं मुखनिःश्वासमारुतेन सुखयितुं प्रवृत्तः । ततः प्रत्यावृत्तप्रीत्या विहस्य मया तदितरकरेण कण्ठे गृहीत इत्यर्थः । उव्वायं पीडितम् । धृष्टो नायकः । कृतदोषोऽप्यविशङ्को न विलक्षस्तर्जितोऽपि निर्लज्जः । स तु निर्दिष्टो धृष्टो मिथ्यावाग् दृष्टदोषोऽपि ॥ अधीरा नायिका । ताडयति पतिमधीरा कोपात् संतर्ज्य संतर्ज्य ॥८८॥

८९) पृथिव्याः । [मुखमारुतेन त्वं कृष्ण गोरजो राधिकाया अपनयन् । एतासां बल्लवीनाम् अन्यासामपि गौरवं हरसि ॥] हे कण्ह कृष्ण तं त्वं मुहमारुएण राहियाइ गोरयं अवणिंतो मुखमारुतेन राधाया गोरजो अपनयन् एयाण बल्लवीणं अन्नाण वि एतासां बल्लवीनाम्

W87 ९०) अवलंबियमाणपरंमुहीइ इंतस्स माणिणि पियस्स।
[1]पिट्ठिपुलउग्गमो से[2] कहेइ समुहट्ठियं हिययं ॥९०॥

W88 ९१) जाणइ जाणावेउं अणुणयविद्दवियमाणपरिसेसं।
पइरिक्कि[3] च्चिय विणयावलंबणं स च्चिय कुणंती ॥९१॥

अन्यासामपि गोरयं हरसि गौरवं हरसि इति चित्रम्। वस्तुतस्तु (न) विरोधोऽयम्। यत एकत्र गोरयं गोरजः अन्यत्र गौरवम्। राधालग्नं रजो वदनपवनेन प्रोत्सारयन् इतरगोपीमुखानि मलि(नि)मानम् आनयसीत्यर्थः। विशेषोऽलंकारः। यत्रान्यत् कुर्वाणो युगपत् कर्मान्तरं च कुर्वीत। कर्तुमशक्यं कर्ता विज्ञेयोऽसौ विशेषोऽन्यः॥ (रुद्रट, ९, ९) ॥ ८९ ॥

९०) पुट्टिसस्स। [अवलम्बितमानपराङ्मुख्या आयतो मानिनि प्रियस्य। पृष्ठपुलकोद्गमस्तस्य कथयति संमुखस्थितं हृदयम् ॥] से तस्याः पिट्ठिपुलउग्गमो पृष्ठपुलकोद्गमः समुहट्ठियं हिययं कहेइ संमुखस्थितं हृदयं कथयति। कस्य। इंतस्स हे माणिणि पियस्स आगच्छतो मानिनि प्रणयिनः। कथंभूतायास्तस्याः। अवलंबियमाणपरंमुहीइ अवलम्बितमानपराङ्मुख्याः। तददर्शनादिव (? तददर्शनेऽपि) रोमाञ्चेन प्रेमाभिमुख्यं प्रिये प्रकटितम् इत्यर्थः। विरोधोऽलंकारः। मानिनीयम् ॥ ९० ॥

९१) रेवत्याः। [जानाति ज्ञापयितुम् अनुनयविद्रावितमानपरिशेषम्। प्रतिरिक्त एव विनयावलम्बनं सैव कुर्वती ॥] काचित् कस्याश्चिद् उत्तमनायिकायाः मानशेषसूचनवैदग्धीं वर्णयितुम् इदमाह। स च्चिय जाणावेउं जाणइ सैव ज्ञापयितुं जानाति। किम्। अणुणयविद्दवियमाणपरिसेसं अनुनयविद्रवितमानपरिशेषम्। किं कुर्वती। पइरिक्कि च्चिय विणयावलंबणं कुणंती एकान्तेऽपि विनयावलम्बनं कुर्वती। विनयपथेन

१W. पुट्ठि; २W. तुह; ३W. पइरिक्कम्मि बि

W90 ९२) किं ताव कया अहवा करेसि काहिसि य सुहय इत्ताहं[1] ।
अवराहाण अलज्जिर साहसु कयरा खमिज्जंति[2] ॥९२॥
W91 ९३) नूमंति[3] जे पहुत्तं कुवियं दास व्व जे पसायंति ।
ति च्चिय महिलाण पिया सेसा सामि च्चिय वराया ॥९३॥
W92 ९४) तइया कयग्घ महुयर न रमसि अन्नासु पुप्फजाईसु ।
बद्धफलडर्यां मालइ त्ति इन्हिं परिच्चयसि ॥९४॥

यथानुवर्तते; तथा अनुमीयते अद्यापि मानशेषमेषा वहतीत्यर्थः । स्वीया ....धीरा नायिका । सा समधिकमाद्रियते धीरा कान्ते कृतापराधेपि । आकारसंवृतिपरा सुरतेऽपि प्रस्तुत उदास्ते ॥९१॥

९२) ग्रामकुट्टिकायाः । [किं तावत् कृता अथवा करोषि करिष्यसि च सुभगेदानीम् । अपराधानां निस्त्रप कथय कतरे क्षम्यन्ते ॥] कयाचित् कृतापराध आवर्जनाय नायको अन्याङ्गनागोत्रेण अनुनयन् इदमुच्यते । हे अलज्जिर साहसु अवराहाण कयरा खमिज्जंति निर्लज्ज कथय अपराधानां मध्ये कतरे अपराधाः क्षम्यन्ते । किं ताव सुहय कया अहवा करेसि काहिसि किं तावत् कृताः सुभग अथवा करोषि यान् करिष्यसि वा यान् । न तवापराधानामन्तोऽस्तीति भावः । खण्डिता नायिका । दोषाधिकरणं (? दोषाविष्करणं) कोपाङ्गम् । अमर्षेर्ष्याविषादास्तथा व्यभिचारिभावाः ॥९२॥

९३) [छादयन्ति ये प्रभुत्वं कुपितां दासा इव ये प्रसादयन्ति । त एव महिलानां प्रियाः शेषाः स्वामिन एव वराकाः ॥] ति च्चिय महिलाण पिया त एव महिलानां प्रियाः । क इत्याह । जे पहुत्तं नूमंति ये (प्रभुत्वं) प्रच्छादयन्ति । कुवियं दास व्व जे पसायंति कुपितां दासा इव ये प्रसादयन्ति । अन्ये तर्हि क इत्याह । सेसा सामि च्चिय वराया शेषाः स्वामिन एव वराकाः । नितम्बिनीनां न तासां मनांसि आवर्जयन्तीत्यर्थः ॥९३॥

1w. एत्ताहे; 2w. खमिज्जंतु; 3w. ण कुणंति;
4w. बद्धफलभारगरुइं मालइमेण्हिं.

W93 ९५) अवियण्हपिच्छणिज्जेण तक्खणं मामि तेण दिट्ठेण।
सिविणयपीएण व पाणिएण तण्ह च्चिय न फिट्टा ॥९५॥

W94 ९६) सुयणो जं देसमलंकरेइ तं चिय करेइ पवसंतो।
गामासन्नुम्मूलियमहावडट्ठाणसारिच्छं ॥९६॥

---

९४) [तदा कृतघ्न मधुकर न रमसेऽन्यासु पुष्पजातिषु। बद्धफला मालतीति इदानीं परित्यजसि ॥] हे कयग्घ महुयर कृतघ्न मधुकर तइया न रमसि अन्नासु पुप्फजाईसु तदा न रमसेऽन्यासु पुष्पजातिषु। इन्हि इदानीं बद्धफलडया मालइ त्ति परिच्चयसि बद्धफला गुर्वीयमिति मालतीं परित्यजसि। कोऽयं नयः। चिरतरं खलु रतिसुखमनुभूय अन्तर्वत्नीत्यनुपभोग्यां यतो मां परिहरति (? यस्तां परिहरति) स एवं भङ्गिभणित्याऽभिधीयत इति। अन्यापदेशोऽलंकारः ॥९४॥

९५) मातङ्गस्य। [अवितृष्णप्रेक्षणीयेन तत्क्षणं सखि तेन दृष्टेन। स्वप्नपीतेनेव पानीयेन तृष्णा एव न नष्टा ॥] काचिदभीष्टावलोकनसुखामृतस्य नतृप्ता इदमाह। अवितृष्णप्रेक्षणीयेन तत्क्षणं तेन दृष्टेन तृष्णैव न व्यपगता। केनेव। सिविणयपीएण व पाणिएण स्वप्नपीतेन पानीयेनेव। यथा खलु स्वप्नसमयपीतं पानीयं तृषं न मथ्नाति तथा तद्दर्शनम्। रूपसौभाग्यभङ्गितं भणित्वोक्तिर्भवति(?)। उपमापर्यायोक्तिभ्यां संसृष्टिरलंकारः ॥९५॥

९६) बटुकस्य। [सुजनो यं देशमलंकरोति तमेव करोति प्रवसन्। ग्रामासन्नोन्मूलितमहावटस्थानसदृक्षम् ॥] जं चिय देसं सुयणो अलंकरेइ यमेव देशं सुजनोऽलंकरोति मण्डयति तं चिय पवसंतो गामासन्नुम्मूलियमहावडट्ठाणसारिच्छं करेइ तमेव प्रवसन् देशान्तरं व्रजन् ग्रामासन्नोन्मूलितमहावटस्थानसदृशं करोति। यं प्रदेशम् अध्यास्ते तं सत्पुरुषः प्रसा-

W95 ९७) सो नाम संभरिज्जइ पम्हुसेइ खणं पि जो हु हिययाहि ।
संभरियव्वं च कयं गयं च पिम्मं निरालंबं ॥९७॥

W96 ९८) नासं व सा कवोले अज्ज वि तुह दंतमंडलं बाला ।
उब्भिन्नपुलयवइवेढपरियरं[२] रक्खइ वराई ॥९८॥

धयति । यं च मुञ्चति स शून्यो भवति । सुजनप्रशंसा । इयमपि उपमापर्यायोक्तिसंसृष्टिरलंकारः ॥९६॥

९७) फरकुन्तस्य । [स नाम संस्मर्यते प्रवसति क्षणमपि यः खलु हृदयात् । संस्मर्तव्यं च कृतं गतं च प्रेम निरालम्बम् ॥] काचित् प्रवासप्रत्यावृत्तेन कान्तेन, मामनुस्मरन्ती भवती स्थिता उत नेति पृष्टा सतीदमाह । सो नाम संभरिज्जइ स नाम संस्मर्यते पम्हुसइ खणं पि जो हु हिययाहि प्रवसति क्षणमपि यः खलु हृदयात् । संभरियव्वं च कयं गयं च पिम्मं निरालंबं संस्मर्तव्यं च कृतं गतं च प्रेम निरालम्बम् । संभरियव्वं इति भावसाधनम् । त्वं तु मम हृदये सर्वदा वससीति स्मरणम् अनुपपन्नम् । प्रेयःसमुच्चयाभ्यां संसृष्टिरलंकारः ॥९७॥

९८) वाक्पतिराजस्य । [न्यासमिव सा कपोले अद्यापि तव दन्तमण्डलं बाला । उद्भिन्नपुलकवृतिवेष्टनपरिकरं रक्षति वराकी ॥] काचित् स्वसख्याः नायकस्य पुरतः प्रेमातिशयं भङ्ग्या अभिधातुमाह । सा बाला वराई अज्ज वि तुह दंतमंडलं कवोले रक्खइ सा बाला वराकी अद्यापि त्वया दत्तं दन्तव्रणं कपोले रक्षति । कमिव । न्यासमिव निक्षेपमिव । कथंभूतम् । उब्भिन्नपुलयवइवेढपरियरं उद्भिन्नपुलकवृतिवेष्टनपरिकरम् । यत् किल रक्षणीयं तत् कण्टकादिभिः परिवार्यत इति । अत एव च रोमाञ्चनिचितगण्डमण्डलतया तस्मिन् यूनि रागातिरेकः प्रकाशितः । इत्थंभूतायाम् अपि तस्यां त्वं शिथिलादर इति वराकीपदेन प्रकटितम् । दन्तमण्डलमिह अर्थाद् दन्तक्षतमेव । पुलकः सात्त्विको भावः ।

१ W. पब्भसिओ जो खणं पि. २ W. परिगयं;

W168 ९९) अच्छउ ताव मणहरं पियाइ मुहदंसणं अइमहग्घं ।
तग्गामछित्तसीमा वि झत्ति दिट्ठा सुहावेइ ॥९९॥

W97 १००) दिट्ठा चूया अग्घाइया सुरा दाहिणाणिलो सहिओ ।
कज्जाइं चिय गरुयाइँ मामि को वल्लहो कस्स ॥१००॥

तदुक्तम् । स्तम्भः स्वेदोऽथ रोमाञ्चः स्वरभेदोऽथ वेपथुः । वैवर्ण्यमश्रु प्रलय इत्यष्टौ सात्त्विका गुणाः ॥ उपमापर्यायोक्तिभ्यां संसृष्टिरलंकारः । प्रियोपालम्भः सखीकर्म ॥९८॥

९९) स्थिरसाहस्य (? स्थिरसाहसस्य) । [आस्तां तावन्मनोहरं प्रियाया मुखदर्शनम् अतिमहार्घम् । तद्ग्रामक्षेत्रसीमाऽपि झगिति दृष्टा सुखयति ॥] अच्छउ ताव पियाइ मुहदंसणं आस्तां तावत् प्रियाया मुखेन्दुदर्शनम् । कीदृशम् । मणहरं मनोहरम् । अत एव अइमहग्घं अतिमहार्घम् । तग्गामछित्तसीमा वि झत्ति दिट्ठा सुहावेइ तद्ग्रामक्षेत्रसीमाऽपि झगिति दृष्टा सुखयति ॥९९॥

१००) महिषासुरस्य । [दृष्टाश्चूता आघ्राता सुरा दक्षिणानिलः सोढः । कार्याण्येव गुरूणि सखि को वल्लभः कस्य ॥] दिट्ठा चूया दृष्टाश्चूता अवलोकितम् आम्रवनम् । अग्घाइया सुरा तथा आघ्राता सुरा । दाहिणाणिलो सहिओ मलयानिलः सोढः । एतदुक्तं भवति । मुकुलिताम्रदर्शनेन सुरभिसुरागन्धेन मनोज्ञमलयानिलेन च उद्दीपनविभावेनासौ अत्रैवानुपयातः । स्मरस्मरतिः (? जातस्मररतिः ?) तद्वियोगेनाहं विपन्नेति । अतोऽनुमीयते कज्जाइं चिय गरुयाइँ मामि को वल्लहो कस्स कार्याण्येव गुरूणि सखि कः कस्य वल्लभः, न कश्चित् कस्यापीत्यर्थः । दक्षिणानिलः सोढ इति वसन्तागमनं सूचयति । अत एव दिट्ठा चूया इति नवमञ्जरीसनाथा इति ज्ञेयम् । मङ्गल्यमिति (?) उत्सवेऽपि विरहिणीनां तत्पानाभावात् ॥१००॥

इति श्रीभुवनपालविरचिते छेकोक्तिविचारलीलायां श्रीसातवाहनकृते गाथाकोशे प्रथमं शतं समाप्तमिति ॥

१W. दाव; २W. दक्खिणाणिलो

बीयं सयं

W98 १०१) रमिऊण पयं पि गओ जाहे अवगूहए पडिणियत्तो[१]।
अहयं पउत्थवइय व्व तक्खणं सो पवासि व्व ॥१॥

W99 १०२) अवियण्हपिच्छणिज्जं समदुक्खसुहं[३] विइण्णसब्भावं।
अन्नुन्न[४]हिययलग्गं पुण्णेहि जणो जणं लहइ ॥२॥

---

१०१) [रत्वा पदमपि गतो यदाऽवगूहति प्रतिनिवृत्तः। अहं प्रोषितपतिकेव तत्क्षणं स प्रवासीव ॥] ओं नमो जिनाय। काचिदात्मनः प्रियतमे प्रेम स्वसौभाग्यं च भङ्ग्याऽभिधातुमिदमाह। रमिऊण पयं पि गओ रत्वा पदमपि गतः जाहे अवगूहए पडिणियत्तो यदाऽवगूहति प्रतिनिवृत्तः। अहयं पउत्थवइय व्व अहं प्रोषितपतिकेव तक्खणं सो पवासि व्व तत्क्षणं स प्रियतमः प्रवासीव ज्ञातः (? जातः) इत्यध्याहार्यम्। चिरविरहदुःखमनुभूय प्रवासावसानसंगतयोरिव आवयोरधिकं प्रेमारम्भनिर्भरं रिरंसा संजातेत्यर्थः। स्वाधीनभर्तृका नायिका। प्रस्तुतविचित्रसुरतक्रीडासुखलाभलालसो यस्याः। मुञ्चति पतिर्न पार्श्वं सा स्यात् स्वाधीनपतिकेति ॥ अनुकूलो नायकः ॥१०१॥

१०२) नन्नराजस्य। [अवितृष्णप्रेक्षणीयं समदुःखसुखं वितीर्णसद्भावम्। अन्योन्यहृदयलग्नं पुण्यैर्जनो जनं लभते ॥] काचिदात्मेच्छानुरूपं पतिमनाप्नुवती सखेदमिदमाह। पुण्यैर्जनो जनं लभते। कीदृशम्। अवियण्हपिच्छणिज्जं अवितृष्णप्रेक्षणीयं सुन्दरम्। कदाचित् सुन्दरोऽपि समदुःखसुखो न स्यादित्यत आह। समदुक्खसुहं समदुःखसुखम्। कदाचिद् दाक्षिण्येन समदुःखसुखता भवतीत्याह। विइण्णसब्भावं वितीर्णसद्भावम्। एवमपि कदाचित् परस्परप्रेमपात्रं न भवतीत्याह। अन्नुन्न-

---

१W. उवऊहिउं; २W. पडिणिउत्तो; ३W. समसुहदुक्खं ४W. अण्णोण्ण

W100 १०३) दुक्खं दिंतो वि सुहं जणेइ जो जस्स वल्लहो होइ ।
दइयणहदूमियाण वि वड्ढइ थणयाण रोमंचो ॥३॥

W191 १०४) चिरिर्डि पि अयाणंता लोया लोएहि गारवग्घविया ।
सुण्णारतुल व्व निरक्खरा वि खंधेण वुज्झंति ॥४॥

हिययलग्गं अन्योन्यहृदयलग्नम् । एवंभूतं पतिं धन्या प्राप्नोति, अहं पुनरधन्या यन्नेदृशं पतिं प्राप्तेत्यर्थः ॥१०२॥

१०३) धर्मणस्य । [दुःखं ददद‌पि सुखं जनयति यो यस्य वल्लभो भवति । दयितनखदूनयोरपि वर्धते स्तनयो रोमाञ्चः ॥] जो जस्स वल्लहो होइ यो यस्य वल्लभो भवति स तस्य दुक्खं दिंतो वि सुहं जणेइ दुःखं ददद‌पि सुखं जनयति । अमुमेव चार्थम् अर्थान्तरन्यासेन समर्थयति । दइयणहदूमियाण वि वड्ढइ थणयाण रोमंचो दयितनखदूनयोरपि वर्धते स्तनयो रोमाञ्चः । रोमाञ्चस्थायी हर्षोद्भवो भावः स दयितनखदूनयोरपि स्तनयोर्दृश्यते इति प्रकृतार्थसमर्थनम् । बहुसुखसाधनं न स्वल्पदुःखमपि दुःखं करोति यथा स्वर्गाप्तिहेतुकयागे छागादिवधमात्रं, यथा वा प्रचुरफलाभिलाषुकाणामपि अल्पबीजवपनव्ययो न दुःखाय जायते तथेदमपीत्यर्थः । दूमियं पीडितम् ॥१०३॥

१०४) नरनाथस्य । [ओष्ठस्फुरणमप्यजानन्तो लोका लोकैर्गौरवार्घिताः । स्वर्णकारतुलेव निरक्षरा अपि स्कन्धेनोह्यन्ते ॥] लोया लोएहि खंधेण वुज्झंति लोका लोकैः स्कन्धेनोह्यन्ते गौरवेण दृश्यन्त इत्यर्थः । गारवग्घविया गुरुतया महार्घतां नीताः । पुनः कीदृशाः । चिरिर्डि पि अयाणंता ओष्ठस्फुरणेऽप्यनभिज्ञाः । दूरे वाग्मिता तावदित्यर्थः । सुण्णारतुल व्व निरक्खरा वि स्वर्णकारतुलेव निरक्षरा अपि । स्वर्णकारतुला यथा निरक्षराऽपि स्कन्धेनोह्यते तथा तेऽपीत्यर्थः । चिरिर्डि ओष्ठस्फुरणम् । अक्षरं (? अक्षराणि) चात्र वर्णाः अन्यत्र परिमाणालेख्याक्षराणि । उपमालंकारः ॥१०४॥

W192 १०५) आयंबंतकवोलं खलियक्खरजंपिरिं फुरंतुट्ठिं ।
मा छिवसु त्ति सरोसं समोसरंतिं पियं भरिमो ॥५॥
W333 १०६) मुहविज्झवियपईवं ऊससियणिरुद्धसंकिरुल्लावं ।[1]
सवहसयरक्खिउट्ठं चोरियरमियं सुहावेइ ॥६॥
W573 १०७) मयणग्गिणु व्व धूमं मोहणपिच्छं व लोयदिट्ठीए ।
जुव्वणधयं व मुद्धा वहइ सुयंधं चिहुरभारं[2] ॥७॥

१०५) हालस्य । [आताम्रान्तकपोलां स्खलिताक्षरजल्पिनीं स्फुरदोष्ठीम् । मा स्पृशेति सरोषं समपसरन्तीं प्रियां स्मरामः ॥] प्रियं भरिमो प्रियां स्मरामः । कथंभूताम् । मा छिवसु त्ति सरोसं समोसरंतिं मा स्पृशेति सरोषं समपसरन्तीम् । पुनश्च कीदृशीम् । आयंबंतकवोलं आताम्रान्तकपोलाम् । खलियक्खरजंपिरिं स्खलिताक्षरजल्पनशीलाम् । फुरन्तुट्ठिं स्फुरदोष्ठीम् । आताम्रान्तकपोलादयः शारीराः कोपानुभावाः । प्रणयकलहकुपिताऽपि सा कमनीयमूर्तिरित्यर्थः । अन्ये तु मदिरामदमाचक्षते । वचनं यत्राव्यक्तं व्यक्तीकृतसकलमन्मथावस्थम् । न्यक्कृतनूपुरमणितं वान्मन्दमुद्वारम (?) इत्यादि तस्य लक्षणम् । स्मृतिर्व्यभिचारी भावः । जातिरलंकारः ॥१०५॥

१०६) मदाहडस्य । [मुखनिर्वापितप्रदीपं निरुद्धोच्छ्वसितशङ्कितोल्लापम् । शपथशतरक्षितौष्ठं चौर्यरतं सुखयति ॥] चोरियरमियं सुहावेइ प्रच्छन्नसुरतं सुखयति । कीदृशम् । मुहविज्झवियपईवं मुखवातनिर्वापितप्रदीपं, ऊससियणिरुद्धसंकिरुल्लावं निरुद्धोच्छ्वसितशङ्कितालापम् । प्राकृते विशेषणस्य पूर्वनिपातानियमः । पुनरपि च कथंभूतम् । सवहसयरक्खिउट्ठं शपथशतरक्षितोष्ठम् । जातिरलंकारः ॥१०६॥

१०७) विरहानलस्य । [मदनाग्नेरिव धूमं मोहनपिच्छमिव लोकदृष्टेः । यौवनध्वजमिव मुग्धा वहति सुगन्धि चिकुरभारम् ॥] मुद्धा मुग्धा

[1] W. णिरुद्धसासं ससंकिउल्लावं; [2] W. चिउरभारं.

W747 १०८) दे यो दुमसु तुमं चिय मा परिहर पुत्ति पढमदुमियं ति ।
किं कुड्डं नियमुहयंदकंतिदुमियं न लक्खेसि ॥८॥

W101 १०९) धरिओ धरिओ वियलइ उवएसो से[1] सहीहि[2] दिज्जंतो ।
मयरद्धयबाणपहारजज्जरे तीइ हिययम्मि ॥९॥

चिहुरभारं चिकुरभारं वहइ वहति । कीदृशम् । सुयंधं सुरभिगन्धम् । किमिव । मयणग्गिणु व्व धूमं मदनाग्निधूममिव । मोहणपिच्छं व लोयदिट्ठोए मोहनपिच्छमिव लोकदृष्टेः । जुव्वणधयं व यौवनध्वजमिव । मालोत्प्रेक्षाऽलंकारः । केशप्रशंसापरेयं गाथा । चिहुरभारं इति स्फटिकनिकषचिकुरेषु हः (वररुचि, २, ४) इति कस्य हत्वे रूपम् ॥१०७॥

१०८) कच्छाहनरस्य । [अहो धवलय त्वमेव मा परिहर पुत्रि प्रथमधवलितमिति । किं कुड्यं निजमुखचन्द्रकान्तिधवलितं न लक्षयसि॥] काचित् स्वगण्डमण्डलच्छायाच्छुरितं मुग्धा सुधारसेन धवलितम् इति भ्रान्त्या स्वभवनभित्तिभागमवलोकयन्ती कयाचिदिदमुच्यते । दे या अहोऽर्थे । दुमसु तुमं चियं धवलय त्वमेव । मा परिहर पुत्ति पढमदुमियं ति मा परिहार्षीः पुत्रि प्रथमधवलितमिति । किं कुड्डं न लक्खेसि किं कुड्यं न लक्षयसि । कीदृशम् । नियमुहयंदकंतिदुमियं निजमुखचन्द्रकान्तिधवलितम् । मुग्धामुखेन्दुद्युतिवर्णनपरेयं गाथा । चिय इति पदं भिन्नक्रमं कुड्डं इत्यतः परं द्रष्टव्यम् । दे या इति अहो इत्यर्थे निपातः । इति हेतौ । भ्रान्तिमत्पर्यायोक्तिभ्यां संकीर्णोऽलंकारः ॥१०८॥

१०९) श्रीस्वामिनः । [धृतो धृतो विगलति उपदेशस्तस्याः सखीभिर्दीयमानः । मकरध्वजबाणप्रहारजर्जरे तस्या हृदये ॥] से सहीहि दिज्जंतो उवएसो धरिओ धरिओ वियलइ तस्याः सखीभिरुपदेशो दीयमानो धृतो धृतो विगलति स्रंसते । क्व । हियए हृदये । कीदृशे । मयरद्धयबाणपहारजज्जरे मकरध्वजबाणप्रहारजर्जरे, इति विशेषणद्वारेण कारणोक्तिः। यत एव जर्जरं तत एव तस्मात् सखीशिक्षोपदेशो अजस्रं विस्रंसते इति।

१W. दइए (?). २W. पिअसहीहि.

W102 ११०) तहसंठियणिड्डक्कंतपिल्लपरिरक्खणिक्कदिन्नमणा ।
अगणियविणिवायभया पूरेण समं वहइ काई ॥१०॥
W103 १११) बहुपुप्फभरोणामिय भूमीगयसाह सुणसु विन्नत्तिं ।
गोलायडवियडकुडंगमहुय सणियं गलिज्जासु ॥११॥

स्मरेण परायणा वर्तते इत्यर्थः । संभावनानुमानोत्प्रेक्षालंकारः । तदुक्तं वक्रोक्तिजीवितकारेण "संभावनानुमानेन" इत्यादि (वक्रोक्तिजीवित, ३, २५) ॥१०९॥

११०) मानस्य । [तथासंस्थितनीडोत्क्रान्तशिशुपरिरक्षणैकदत्तमनाः । अगणितविनिपातभया पूरेण समं वहति काकी ॥] पूरेण समं वहइ काई पूरेण पयःप्रवाहेण समं वहति काकी वायसवधूः । कीदृशी । अगणियविणिवायभया अगणितविनिपातभया । पुनश्च कीदृशी । तहसंठियणिड्डुक्कंतपिल्लपरिरक्खणिक्कदिन्नमणा तथास्थितनीडोत्क्रान्तपोतपरिरक्षणैकदत्तमनाः, इति विशेषणद्वारेण कारणोक्तिः। स्वपक्षपक्षार्थित (? प्रच्छादित) पोतपतनशङ्काकुला कुलायवर्तिप्रथमसंस्थानम् अशिथिलयन्ती स्वनाशं नाशङ्कते । केवलं नदीपूरेण सह वहति वायसी । नीडशब्दस्य एत्वे द्वित्वे नेड्डं इति रूपम् । निड्डं कुलायम् । पिल्लः शिशुः । जातिरलंकारः । प्राकृते पूर्वनिपातानियमाद् एकशब्दस्य परनिपातः ॥११०॥

१११) ग्रामणीकस्य । [बहुपुष्पभरावनमित भूमिगतशाख शृणु विज्ञप्तिम् । गोदातटविकटनिकुञ्जमधूक शनैः गल ॥] काचित् स्वैरिणी मधूकमिदमाह । हे गोलायडवियडकुडंगमहुय गोदावरीतटविकटगहनमधूक, बहुपुप्फभरोणामिय बहुपुष्पभरावनमित, भूमीगयसाह भूमिगतशाख, सुणसु विन्नत्तिं शृणु विज्ञप्तिम् । किं तदित्याह । सणियं गलिज्जासु शनैर्गल इति । त्वयि अनवरतं प्रचुरकुसुमोत्करं किरति अचिरेण एव मम संकेतगमनमनोरथभङ्गो मा भूदित्यर्थः । कुडंगो गहनम् । कच्छस्तटम् (?) । आमन्त्रणपदोपादानद्वारेण सप्रशंसं प्रार्थ्यते इति ॥१११॥

---

१ W. तडसंठिअणीडेक्कंतपीलुआरक्खणेक्कदिण्णमणा; २ W. भरोणामिअ-भूमीगअसाह; ३ W. कुडंग महुअ.

W104 ११२) निप्पच्छिमाइँ असई दुक्खालोयाइँ महुयपुप्फाइं ।
चीए बन्धुस्स व अट्ठियाइँ रुइरी समुच्चेइ ॥११२॥

W105 ११३) हे[3] हियय मडहसरियाजलरयहीरंतदीहदारु व्व ।
ठाणे ठाणि च्चिय लग्गमाण केणावि डज्झिहिसि ॥११३॥

---

११२) महाइयस्स । [निष्पश्चिमानि असती दुःखालोकानि मधूकपुष्पाणि । चितायां बन्धोरिवास्थीनि रोदनशीला समुच्चिनोति ॥] असती मधूकपुष्पाणि समुच्चिनोति । कथंभूतानि । निप्पच्छिमाइँ निष्पश्चिमानि अन्त्यानि । अत एव दुक्खालोयाइँ दुःखदायित्वाद् दुःखः आलोको दर्शनं येषां तानि दुःखालोकानि । कीदृशी । रुइरी रोदनशीला । कस्यां कस्य कानीव । चीए बन्धुस्स अट्ठियाइँ व चितायां बन्धोरिव अस्थीनि दुःखदर्शनीयानि भवन्ति । अद्यैव खलु मम भग्नमनोरथायाः प्रियजनसंकेतसंगमावसरः इति सबाष्पं पुष्पावचयेन असतीभाव आविष्कृतः इति । निप्पच्छिमाइँ यतो अन्यानि पश्चिमानि न सन्तीति । असती स्वैरिणी । चीए इति सामान्यभाषाश्रयेण शब्दप्रयोगः । लोकः किल चीयशब्देन चितामाह । तद्भवतत्समदेशीसामान्यभाषाश्रयेण चतुर्विधं प्राकृतं पूर्वाचार्याः स्मरन्तीति । भावोपमाभ्यां संकीर्णोऽलंकारः ॥११२॥

११३) श्रीधर्मिलस्य । [हे हृदय तनुतरसरिज्जलरयह्रियमाणदीर्घदारु इव । स्थाने स्थान एव लगत् केनापि धक्ष्यसे ॥] काचित् क्वचित् असदृशप्रेम्णि पुरुषे अनुरज्य पुरुषान्तरं कामयमाना स्वहृदये सखेदमिदमाह । हे ठाणे ठाणि च्चिय लग्गमाण स्थाने स्थान एव स्थितिं कुर्वत् । केणावि डज्झिहिसि केनापि दह्यसे (? धक्ष्यसे) । किमिव । मडहसरियाजलरयहीरंतदीहदारु व्व तनुतरसरिज्जलरयह्रियमाणदीर्घदारु इव । यथा किल तनुतरतरङ्गिणीरयहृतं स्थाने स्थाने संश्लिष्टं दीर्घकाष्ठमाकृष्य केनापि दह्यते तथा त्वमपि पुरुषं पुरुषं प्रति स्नेहानुबन्धबुद्धिमात्मनः (? कुर्वत्) केनापि दुर्विदग्धेन लक्षसंपातिरेकं (?) नेष्यस इत्यर्थः । मडहं तुच्छम् । ठाणं स्थानम् । उपमालंकारः ॥११३॥

१W. रुअरी; २W. समुच्चिणइ, ३W. ओ हिअअ.

W107 ११४) गोलायडट्ठियं पिच्छिऊण गहवइसुयं हलियसुन्हा ।
आढत्ता उत्तरिउं दुक्खुत्ताराएँ पयवीए ॥१४॥

w106 ११५) जो तीइ अहरराओ रत्तिं उव्वासिओ पिययमेण ।
सु च्चिय गोसे दीसइ सवत्तिवयणेसु संकंतो ॥१५॥

११४) दामोदरस्य । [गोदातटस्थितं प्रेक्ष्य गृहपतिसुतं हालिकस्नुषा । आरब्धा उत्तरीतुं दुःखोत्तारया पदव्या ॥] दुक्खुत्ताराएँ पयवीए उत्तरिउं आढत्ता दुःखोत्तारया पदव्या उत्तरीतुम् आरब्धवती । किं कृत्वा । पिच्छिऊण दृष्ट्वा । कम् । गहवइसुयं गृहपतिसुतम् । कीदृशम् । गोलायडट्ठियं गोदावरीतटस्थितम् । यत् किलासौ सत्यपि सुखावहे गोदानदीतीरोत्तरणमार्गे मृगेक्षणा विषमेण तटिनीतटेन उत्तरीतुमैच्छत, तदस्या मामेवमवेक्ष्य अयं ग्रामणीसुतः करावलम्बं करिष्यति, ततोऽहम् एतत्करकमलन्यस्तहस्तस्पर्शामृतम् अनुभविष्यामीति भावः । सुन्हा वधूः । पदवी मार्गः । इङ्गितलक्ष्यः सूक्ष्मालंकारः (काव्यदर्श, २, २६०) ॥११४॥

११५) महादेवस्य । [यस्तस्या अधररागो रात्रावुद्वासितः प्रियतमेन । स एव प्रभाते दृश्यते सपत्नीवदनेषु संक्रान्तः ॥] जो तीइ अहरराओ रत्तिं पिययमेण उव्वासिओ यस्तस्या अधररागो रात्रौ उद्वासितः अपनीतः प्रियतमेन, सु च्चिय सवत्तिवयणेसु संकंतो गोसे दीसइ स एव सपत्नीवदनेषु संक्रान्तो विभातवेलायां दृश्यते इति । तस्या हि निशायां प्रियतमपीतपोतमिति वीतरागमधरं प्रातर्निरीक्षमाणा विपक्षवनिता ईर्ष्यारोषेण ताम्रवदनेन्दुबिम्बा बभूवुरित्यर्थः । उत्प्रेक्षालंकारः । तदिवेति तदेवेति तामुत्प्रेक्षां प्रचक्षते (वक्रोक्तिजीवित, ३, २६) । अयमेवोत्प्रेक्षाध्वनिः ध्वनिकारमतेन । श्रीभोजदेवमते तु व्यत्ययवत्यमुख्या परिवृत्तिरियम् । व्यत्ययो वस्तुनोर्यस्तु यो वा विनिमयो मिथः । तद्द्वयेनोभयवती निर्दिष्टा काव्यसूरिभिः (सरस्वतीकण्ठाभरण ३, २९–३०) ॥ त्रिधापि चासौ मुख्यामुख्यभेदाद् द्विधा पुनः ॥११५॥

१W. सोण्हा; २W. दीसइ गोसे

W108 ११६) चलणोवासणिसण्णस्स तस्स भरिमो अणावलंतस्स ।
पायंगुट्ठावेढियकेसदढायड्ढणसुहेल्लिं ॥१६॥
W109 ११७) फालेइ अच्छभल्लं व उयह कुग्गामदेउलद्दारे ।
हेमंतयालपहिओ विज्झायंतं पलालग्गिं ॥१७॥
W699 ११८) इन्हिं वारेइ जणो तइया मूयल्लिओ कहिं व गओ ।
जाहे विसं व जायं सव्वंगपहोलिरं पिम्मं ॥१८॥

---

११६) [चरणावकाशनिषण्णस्य तस्य स्मरामोऽनालपतः । पादाङ्गुष्ठावेष्टितकेशदृढाकर्षणसुखम् ॥] तस्य नायकस्य पादाङ्गुष्ठावेष्टितकेशदृढाकर्षणसुखं स्मरामः । कथंभूतस्य । चलणोवासणिसण्णस्स चरणावकाशनिषण्णस्य चरणपार्श्वोपविष्टस्य । पुनरपि कथंभूतस्य । अणालवंतस्स अनालपतः ॥११६॥

११७) चमरस्य [पाटयति ऋक्षभल्लम् इव पश्यत कुग्रामदेवकुलद्वारे । हेमन्तकालपथिको विध्यमानं (निर्वाप्यमाणं) पलालाग्निम् ॥] उयह पश्यत हेमंतयालपहिओ पलालग्गिं फालेइ हेमन्तकाले पथिकः पलालाग्निं पाटयति । विज्झायंतं निर्वाप्यमाणम् । क्व । कुग्गामदेउलद्दारे कुग्रामदेवकुलद्वारे । कमिव । अच्छभल्लं व ऋक्षमिव । य उपरि सर्वाङ्गनिर्वाणस्य लोमश्यामलिम्नः पाटितस्य पलालाग्नेः सदृश इति । अच्छभल्लो ऋक्षः । उपमालंकारः ॥११७॥

११८) कालियसिंहस्य । [इदानीं वारयति जनस्तदा मूक इव कुत्र इव गतः । यदा विषमिव जातं सर्वाङ्गप्रघूर्णनशीलं प्रेम ॥] काचित् प्रियतमे समुपोढप्रौढानुरागा सरवोजनेन केनचिद् हेतुना निवार्यमाणा इत्याह । इन्हिं वारेइ जणो इदानीं वारयति जनः । जाहे विसं व विसमं सव्वंगपलोहिरं पिम्मं जायं यदा विषमिव सर्वाङ्गप्रघूर्णनशीलं प्रेम जातं, तइया मूयल्लिओ कहिं व गओ तदा तु मूकः क्वचिद् गत इव जोन

W110 ११९) कमलायरा न मलिया हंसा उड्डाविया न य पिउच्छा ।
केण वि गामतलाए अब्भं उत्ताणयं छूढं ॥१९॥

W700 १२०) कह तं पि तइ[3] न नायं जह सा आसंदियाण बहुयाण ।
काऊण उत्तरविडिं[4] तुह दंसणलेहडा पडिया ॥२०॥

जातः । नवानुरागसुकरप्रतिक्रिये प्रेम्णि जनेन नाहं निवारिता माऽस्मिन् यूनि रज्येथा इति । इदानीं च विषमिव प्रेम सर्वाङ्गं सर्पति स्म । अतोऽस्य आरूढप्रौढिम्नः प्रतिक्रिया कर्तुं न पार्यत इत्यर्थः । मूयल्लिओ मूकः । जाहे यदा ॥११८॥

११९) मेघनादस्य । [कमलाकरा न मृदिता हंसा उड्डायिता न च पितृष्वसः । केनापि ग्रामतटाके अभ्रम् (अन्तरिक्षम्) उत्तानकं क्षिप्तम् ॥] काचित् संकेतोपान्तप्रदेशे प्रियमनागतं वीक्ष्य सव्रीडमर्धपथ एव व्यावृत्ता तदनागमनचिह्नं विवृण्वतीदमाह । कमलायरा न मलिया हंसा उड्डाविया न य पिउच्छा इत्यर्धोक्त एव पितृष्वसारं प्रेक्ष्य स्वेङ्गितलिङ्गं निगूहन्ती पुनरपीदमाह । हे पिउच्छा हे पितृष्वसः केण वि गामतलाए केनापि ग्रामतटाके अब्भं उत्ताणयं अभ्रम् उत्तानकं छूढं क्षिप्तम् । कमलायरा न मलिया कमलाकरा न मृदिताः, हंसा उड्डाविया हंसा उड्डापिताः (उड्डायिताः) न च । इह ग्रामतटाकस्यापि मध्ये अन्तरिक्षं निक्षिप्तं विकीर्णम् । कमलखण्डनम् उड्डयनं च हंसानां न जातमिति चित्रम् इत्येतेन स्वाशयप्रच्छादनम् । ते वृक्षा कीदृक्षा येषां मुक्ताफलं फलं भवति । चन्द्रजदीपनिभाते प्रतीक्षते हन्त तव कान्तः ॥ यदि मदनः संनिहितः सदैव संभवति चूतमञ्जर्याः । प्रियसखि तदसावस्यां विलोक्यते किं न भग्नायाम् ॥ सत्यं किमन्यदेशेऽपि दृश्यते व्योम्नि चन्द्रमुखि चन्द्रः । स्यादेवमादि वचनं मौग्ध्यं बाल्ये व्यतीतेऽपि ॥११९॥

१२०) रसिकस्य । [कथं तदपि त्वया न ज्ञातं यत् सा पीठिकानां बहूनाम् । कृत्वोपर्युपरिस्थापनं तव दर्शनलम्पटा पतिता ॥] काचित् कस्याश्चित्

१W. गामतडाए; २W. उत्ताणिअं; ३W. तुइ; ४W. उच्चवचिअं.

W111 १२१) केण वणे[1] भग्गमणोरहेण उल्लाविंयं पवासु त्ति।
सविसाइ व अलसायंति जेण वहुयाएँ अंगाइं ॥२१॥
W112 १२२) अज्ज वि बालो दामोयरो त्ति इय जंपिए जसोयाए।
कण्हमुहपेसियच्छं निहुयं हसियं वयवहूहिं ॥२२॥

प्रियतमेऽनुरागं प्रकटयन्तीदमाह। कथं तदपि त्वया न ज्ञातं यत् पीठानां बहूनां कृत्वा उत्त्रिपिटिं (!) तव दर्शनलम्पटा पतिता। स्वैरिणीचेष्टां सखी गोपयति। नैषा जारेण नखक्षतादिभिरुपद्रुता किंतु तव दर्शनार्थं बह्वासनोपरिस्थिता जघनभारेण पतिता। न तु ईदृशी (जारेण हेतुना!) संजाता। गतार्था गाथा। अन्ये तु 'तं मि' इति पठन्ति। तत्र तं मि (=तं पि) इति द्वितीयैकवचनेऽपि भवति (?)। सप्तम्यास्तु दुर्घटः (दुर्घटम्)। आसन्दी पीठिका॥ उत्तरिविडि उपर्युपरिस्थापनम्। लेहडो लम्पटः ॥१२०॥

१२१) मृगाङ्कस्य। [केन सखि भग्नमनोरथेन उल्लपितं प्रवास इति। सविषाणीवालसायन्ते येन वध्वा अङ्गानि ॥] केण वणे पवासु त्ति उल्लाविंयं केन सखि ते प्रियप्रवास इति उल्लपितम्। कथंभूतेन। भग्ग-मणोरहेण भग्नमनोरथेन। कथं जानासीत्याह। सविसाइ व अलसायंति जेण अंगाइं सविषाणीव अलसायान्ते येन अङ्गानि। कस्याः वहुयाए वध्वाः। यदि न कोऽपि एतस्याः प्रियप्रवास इति उदलपिष्यत्, नाङ्गानि अल-सानि अभविष्यन्। वणे इति सखीसंबोधनम्। उल्लाविंयं इति प्रकटा-दिपाठाद् दीर्घत्वम्। अलसादिपाठात् अम्र्यन्तः (? अण्यन्तः ?)। अनुमा-नालंकारः ॥१२१॥

१२२) तारभेदकस्य। [अद्यापि बालो दामोदर इति जल्पिते यशोदया। कृष्णमुखप्रेषिताक्षं निभृतं हसितं व्रजवधूभिः ॥] निहुयं हसियं वयवहूहिं निभृतं हसितं व्रजवधूभिः। कस्मिन् सति। अज्ज वि बालो दामोयरो त्ति इय जंपिए अद्यापि बालो दामोदर इति जल्पिते सति।

१W. मणे; २W. संलाविअं.

W193 १२३) गोलाविसमोयारच्छलेण अप्पा उरम्मि से खित्तो[1]।
अणुयंपाणिद्दोसं तेण वि सा गाढमवऊढा[2] ॥२३॥

W113 १२४) ते विरला सप्पुरिसा जाण सिणेहो अभिन्नमुहराओ[3]।
अणुदियहवड्ढमाणो रिणं व पुत्तेसु संकमइ ॥२४॥

कया। जसोयाए यशोदया। कथं हसितम्। कण्हमुहपेसियच्छं कृष्णमुखप्रेषिताक्षं यथा भवतीति। जननीजनयोग्यं जल्पितं यशोदया। यथा च त्वं बालस्तथा वयं विभ्र इति हरेः सहास्यम् आस्यकमलावलोकनं गोपीनामिति ॥१२२॥

१२३) नारायणस्य। [गोदाविषमावतारच्छलेन आत्मा उरसि तस्य क्षिप्तः। अनुकम्पानिर्दोषं तेनापि सा गाढमवगूढा ॥] से तस्य वल्लभस्य उरम्मि अप्पा खित्तो उरसि आत्मा क्षिप्तः। कथम्। गोलाविसमोयारच्छलेण गोदावरीविषमावतरणच्छलेन। स्खलिता हला अहम् इति तया तदङ्गसङ्गसुखलाभलालसया सकलजनसमक्षम् उरसि तस्य आत्मा क्षिप्तः। किमेतावदेव। न इत्याह। तेण वि सा गाढमवऊढा तेनापि सा गाढमुपगूढा। कथम्। अणुयंपाणिद्दोसं अनुकम्पानिर्दोषम्। इयं खलु तुङ्गात् सिन्धुरोधसोऽधस्तात् पतन्ती मा वराकी प्राणैर्वियुज्यतामिति अनुकम्पापदेशेन सर्वाङ्गमालिङ्गिता इति। अवतारो घट्टः। सूक्ष्मोऽलंकारः ॥१२३॥

१२४) स्थिरचित्तस्य। [ते विरलाः सत्पुरुषा येषां स्नेहो अभिन्नमुखरागः। अनुदिवसवर्धमान ऋणमिव पुत्रेषु संक्रामति ॥] ते विरला सप्पुरिसा ते विरलाः सत्पुरुषा जाण सिणेहो पुत्तेसु संकमइ येषां स्नेहः पुत्रेषु संक्रामति। कथंभूतः स्नेहः। अभिन्नमुहराओ अभिन्नमुखरागः, अनुपदर्शितवदनविकृतिरिति यावत्। पुनरपि कीदृशः। अणुदियहवड्ढमाणो अनुदिवसवर्धमानः। किमिव। रिणं व ऋणमिव। ऋणं खलु

१. W मुक्को; २. W गाढमुवऊढा; ३. W अहिण्णमुहराओ.

W114 १२५) नच्चणसलाहणासंणिहेण[1] पासट्ठिया[2] निउणगोवी ।
सिरिगोवियाइ[3] चुंबइ कवोलपडिमा।ायं कण्हं ॥२५॥
W115 १२६) सव्वत्तं[4] दिसामुहपसरिएहिँ अन्नुंन्न(?अन्नन्न)[5] कडयलग्गेहिं ।
छल्लिं व मुयइ विंझो मेहेहिँ विसंघडंतेहिं ॥२६॥

अभिन्नमुखरागं प्रतिदिनसंचीयमानं पुत्रेषु संक्रामति इति । उपमालंकारः । सत्पुरुषप्रशंसापरेयं गाथा ॥१२४॥

१२५) मृगेन्द्रस्य । [नृत्यश्लाघनापदेशेन पार्श्वस्थिता निपुणगोपी । मुख्यगोपिकायाश्चुम्बति कपोलप्रतिमागतं कृष्णम् ॥] निउणगोवी कवोलपडिमागयं कण्हं चुंबइ निपुणगोपी कपोलप्रतिमागतं कृष्णं चुम्बति । कस्याः । सिरिगोवियाइ मुख्यगोपिकायाः । कथंभूता सा । पासट्ठिया पार्श्वस्थिता तत्पार्श्ववर्तिनी । कथं चुम्बति । नच्चणसलाहणासंणिहेण नृत्यश्लाघापदेशेन । सुललितललितैः पादपातैर्मनोहरैर्हरिणाक्षि त्वयाऽद्य साधु नृत्तमित्यभिधाय । गोपीकपोलपालीप्रतिफलितं कृष्णवदनेन्दुबिम्बं चुम्बति । अत एव निपुणेत्युक्तम् । सिरिशब्दो मुख्यपर्यायः । लेशोऽलंकारः ॥१२५॥ १२६) गुरथस्य (?) । [सर्वत्र दिङ्मुखप्रसृतैः अन्योन्य (? अन्यान्य)-कटकलग्नैः । त्वचमिव मुञ्चति विन्ध्यो मेघैर्विसंघटमानैः ॥] विंझो छल्लिं व मुयइ विन्ध्यस्त्वचमिव मुञ्चति । कैः कीदृक्षैः । मेहेहिँ विसंघडंतेहिं मेघैर्विसंघटमानैः । कथंभूतैः । अन्योन्य (? अन्यान्य) कटकलग्नैः । पुनरपि कीदृशैः । सव्वत्त दिसामुहपसरिएहिँ सर्वत्र दिङ्मुखप्रसृतैः । घटितविघटितैर्घनैर्विन्ध्यादयः पर्वतः त्वचमिव मुञ्चतीत्यर्थः । ये किल गगनमपि स्वेच्छया प्रच्छादयितुमीशते ते तदीयकटकघटितविघटिताः तनुतरत्वग्रूपतां तन्वन्तीति महत्त्वं युक्त्या विन्ध्याद्रेर्वर्णितं भवति । कटकः पर्वतैकदेशः । छल्ली त्वक् । उत्प्रेक्षालंकारः ॥१२६॥

१W. सलाहणणिहेण, २W. पासपरिसंठिया, ३W. सरिगोविआण, ४W. सव्वत्थ, ५W. अण्णोण्ण.

W116 १२७) आलोयंति पुलिंदा पव्वयसिहरट्ठिया धणुणिसण्णा।
हत्थिउलेहि ँ व विंझं पूरिज्जंतं नवब्भेहिं ॥२७॥
W117 १२८) वणेयवमसिमइलंगो रेहइ विंझो घणेहि ँ धवलेहिं।
छीरोयमंथणुच्छलियदुद्धसित्तु व्व महुमहणो ॥२८॥
W118 १२९) बंदीएँ निहयबंधववियणाएँ वि पक्कलु त्ति चोरजुया।
अणुराएण पुलइओ गुणेसु को मच्छरं वहइ ॥२९॥

१२७) कमलाकरस्य। [आलोकयन्ति पुलिन्दाः पर्वतशिखरस्थिता धनुर्निषण्णाः। हस्तिकुलैरिव विन्ध्यं पूर्यमाणं नवाभ्रैः ॥] पुलिंदा विंझं आलोयन्ति पुलिन्दा विन्ध्यमालोकयन्ति। कथंभूतम्। पूरिज्जंतं पूर्यमाणम्। कैः। नवब्भेहिं नवाभ्रैः। कैरिव। हत्थिउलेहि ँ व हस्तिकुलैरिव। कथंभूतास्ते। पव्वयसिहरट्ठिया धणुणिसण्णा पर्वतशिखरस्थिता धनुर्निषण्णाः। स्वभाव एव धनुष्मतां, यदि ते किंचित् कौतुकेनालोकयन्ति धनुषि निषीदन्ति। सजलजलधराणां श्यामलिम्ना महिम्ना च करिच्छालैः (? करिकुलैः) सह साम्यम्। उपमालंकारः ॥१२७॥

११८) ललितस्य। [वनदवमषीमलिनाङ्गो राजति विन्ध्यो घनैर्धवलैः। क्षीरोदमथनोच्छलितदुग्धसिक्त इव मधुमथनः।] विंझो रेहइ विन्ध्यः शोभते। कथंभूतः। वणयवमसिमइलंगो वनदवमषीमलिनाङ्गः। कैः शोभते। घणेहि ँ घनैः। कथंभूतैः। धवलेहिं धवलैः। क इव। छीरोयमंथणुच्छलियदुद्धसित्तु व्व महुमहणो क्षीरोदधिमथनोच्छलितदुग्धसिक्त इव मधुमथनः। दावशब्दस्य ह्रस्वत्वं यथादिगणपाठात् (वररुचि, १,१०)। उपमाऽलंकारः ॥१२८॥

१२९) कोहिलस्य (काहिलस्य)। [बन्द्या निहतबान्धववेदनयाऽपि समर्थ इति चौरयुवा। अनुरागेण प्रलोकितो गुणेषु को मत्सरं वहति ॥]

१W. वणदव; २W. खीरोअ; ३W. विमणाइ.

W119 १३०) अज्ज कइमो वि दियहो वाहवहू रूवजुव्वणुम्मइया[1]।
सोहग्गं धणुरुंपच्छलेण रच्छासु विकिरइ[2] ॥३०॥
W122 १३१) नववहुपिम्मतणुइओ पणयं पढमघरिणीएँ रक्खंतो।
अलिहियदुप्परियल्लं पि नेइ रण्णं धणुं वाहो ॥३१॥

बंदीएँ बन्धा चोरजुवा चोरयुवा प्रलोकितः। केन। अनुराएण अनुरागेण। कथंभूतया तया। निहयबंधववियणाएँ वि निहतबान्धववेदनयाऽपि। निहतबान्धवानां वेदना यस्या इति बहुव्रीहिः। उपलक्षणे वा तृतीया। केन हेतुना तर्हि अवलोकित इत्याह। पक्कलु त्ति समर्थ इति। अमुमर्थं समर्थयन्नाह। गुणेसु को मच्छरं वहइ गुणेषु को मत्सरं वहति। पक्कलो समर्थः। मत्सरः असहिष्णुता। अर्थान्तरन्यासोऽलङ्कारः ॥१२९॥

१३०) कृष्णराजस्य। [अद्य कतमोऽपि दिवसो व्याधवधू रूपयौवनोन्मत्ता। सौभाग्यं धनुरुल्लेखनत्वक्छलेन रथ्यासु विकिरति ॥] अज्ज कइमो वि दियहो अद्य कतमोऽपि दिवसः। वाहवहू सोहग्गं रच्छासु विक्किरइ व्याधवधूः सौभाग्यं रथ्यासु विकिरति। केन। धणुरुंपच्छलेण धनुर्नवोल्लेखनत्वग्व्यपदेशेन। कीदृशी सा। रूवजुव्वणुम्मइया रूपयौवनगर्विता। तस्यां खल्वसौ शबरयुवा अत्यन्तमासक्तः शक्तिक्षयाद् अनुदिनं स्वधनुस्तनूकरोति। तद्वंशत्वचश्च सा तरुणी तारुण्योन्मादनमदेन सौभाग्यं मूर्तिमदिव रथ्यापथेषु विकिरतीत्यर्थः। रुंपं त्वक्। उत्प्रेक्षाऽलङ्कारः ॥१३०॥

१३१) स्कन्ददासस्य। [नववधूप्रेमतनूकृतः प्रणयं प्रथमगृहिण्या रक्षन्। अलिखितदुष्परिकर्षम् अपि नयत्यरण्यं धनुर्व्याधः ॥] वाहो रण्णं धणुं नेइ व्याधो धनुररण्यं नयति। कीदृशम्। अलिहियदुप्परियल्लं पि अलिखितम् अत एव च दुप्परियल्लं आक्रष्टुम् अशक्यम् इति। किमर्थं तर्हि नयतीत्याह। पणयं पढमघरिणीएँ रक्खंतो प्रणयं प्रथमगृहिण्या रक्षन्। कथंभूतः। नववहुपिम्मतणुइओ नववधूप्रेम्णा तनूकृतः। अमुना

[1] W. रूवजोव्वणुम्मत्ता; [2] W. विक्खिरइ.

W123 १३२) हासाविओ जणो सामलीएँ पढमं पसूयमाणीएँ ।
वल्लहवाएण अलं मम त्ति बहुसो भणंतीए ॥३२॥

W124 १३३) कइयवरहियं पिम्मं नत्थि च्चिय मामि माणुसे लोए ।
²अह हुंतं विरहो कस्स होइ विरहे य को जियइ ॥३३॥

कोमलचापाकुञ्चनचिह्नेन अन्यस्यामयम् आसक्तः इति मा मम प्रथमजायाजनो जानातु इति तत्प्रणयभङ्गभीरुर्मृषैव दुःखाकर्षणकर्म कार्मुकं मृगयामहीं नयतीत्यर्थः । दुप्परियल्लं (आक्रष्टुम्) अशक्यम् । दक्षिणो नायकः । खण्डयति न पूर्वस्यां सद्भावं गौरवं भयं प्रेम (रुद्रट, १२, १०) । अन्यासक्तो मनागपि विज्ञेयो दक्षिणः स इति ॥१३१॥

१३२) कर्णपूरस्य । [हासितो जनः श्यामल्या प्रथमं प्रसूयमानया । वल्लभवाते (दे) न अलं ममेति बहुशो भणन्त्या ॥] सामलीएँ पढमं पसूयमाणीए जणो हासाविओ श्यामया प्रथमं प्रसूयमानया जनो हासितः । किं कुर्वत्या । वल्लहवाएण अलं मम त्ति बहुसो भणंतीए वल्लभवातेन अमुना अलं ममेति असकृद् जल्पन्त्या । अत्र एतस्या मौग्ध्याद् असमञ्जसभाषिणीत्वं सखीजनस्य हासहेतुः । वल्लहवाएण इति लोकोक्तिः । वल्लभवातेनेत्यर्थः ॥१३२॥

१३३) अनुरागस्य । [कैतवरहितं प्रेम नास्त्येव सखि मानुषे लोके । अथाभविष्यत् (अथ भवेत्) विरहः कस्य भवति विरहे च को जीवति ॥] मामि सखि माणुसे लोए कइयवरहियं पिम्मं नत्थि च्चिय मनुष्यलोके कैतवरहितं प्रेम नास्त्येव । अह हुंतं विरहो कस्स होइ विरहे य को जियइ अथ भवेदकृत्रिमं प्रेम विरहः कस्य भवतीति । निर्व्याजं व्याजृम्भमाणे प्रेम्णि न कश्चित् स्वभार्यां विरहय्य देशान्तरमनुसरेत् । अथ कथंचिद् विरहो भवति तदा तस्मिन् सति को जीवति न कश्चिदित्यर्थः । अमुना विरहे जीवितलिङ्गेन अकृत्रिमं प्रेम नास्तीति भावः । मामि इति सखीपर्यायः । मनुष्यलोको जीवलोकः । अनुमानालंकारः ॥१३३॥

१ W. पसुअमाणाए; २ W. अह होइ कस्स विरहो विरहे होंतम्मि को जिअइ.

W125 १३४) अच्छेरं व निहिं [1]पिव [2]सुक्खं सग्गं व अमयपाणं व ।
आसि म्ह सो [3]मुहुत्तो विणियंसणदं[4]सणे तिस्सा ॥३४॥

W126 १३५) सा तुज्झ वल्लहा तं पि मज्झ,वेसो सि तो[5]इ तुज्झ अहं ।
बालय फुडं भणामो पिम्मं किर बहुवियारं ति ॥३५॥

१३४) रामस्य । [आश्चर्यमिव निधिरिव सौख्यं स्वर्ग इव अमृतपानमिव । आसीदस्माकं स मुहूर्तो विनिवसनदर्शने तस्याः ॥] विणियंसणदंसणे तिस्सा सो मुहुत्तो अम्ह आसि विनिवसनं यद् दर्शनं तस्मिन् सति तस्याः, स मुहूर्तो अस्माकम् आसीत् । किमिव । अच्छेरं व आश्चर्यमिव आश्चर्यजनकत्वात् । किम् एतावदेव । नेत्याह । निहिं पिव सुक्खं सग्गं व अमयपाणं व निधिरिव सौख्यमिव स्वर्ग इव अमृतपानमिव आसीदिति सर्वत्र प्रयोज्यम् । नियंसणं परिधानवासः । मालोपमालंकारः । मालोपमेति सेयं यत्रैकं वस्त्वनेकसामान्यम् । उपमीयेतानेकैरुपमानैरेकसामान्यैः (रुद्रट, ८, २५) ॥ अच्छेरं आश्चर्यशब्दस्य शय्यादित्वाद् (वररुचि, १,५) तूर्यधैर्यादित्वाद् (वररुचि, ३, १८) र्यस्य रत्वे रूपम् ॥१३४॥

१३५) प्रवरसेनस्य । [सा तव वल्लभा त्वमपि मम, द्वेष्योऽसि तस्यास्तवाहम् । बालक स्फुटं भणामः प्रेम किल बहुविकारमिति ॥] काचिदात्मनोऽनुरागेण विपक्षद्वेषोद्घोषेण च नायकं प्रयुक्त्या प्रतिभिनत्ति । बालक सत्यं भणामः प्रेम किल बहुविकारमिति । तामेव च बहुविकारतां प्रकटयति । सा तुज्झ वल्लहा तं पि मज्झ सा तव वल्लभा त्वमपि मम वल्लभ इति । वेसो सि तीइ तुज्झ अहं द्वेष्योऽसि तस्यास्त्वं तवाहं द्वेष्येति । बालय इति अभिधेयान्तर (? वैधेय) सम्बोधनम् । रिरंसमानां न रमयसि, अकामयमानां च कामयसे । अतो मूर्ख एव त्वमित्यर्थः । मध्या नायिका । मध्या प्रतिभिनत्तीत्यादि । दीपकालंकारः ॥१३५॥

१W. णिहिं मिव; २W. सग्गे रज्जं व; ३W. तं मुहुत्तं; ४W. दंसणं; ५W. सि; ६W. तीअ.

W129 १३६) तह माणो माणधणाइ तीइ एमेय दूरमणुबद्धो ।
जह से असुणीऍ पिओ इक्कग्गामि च्चिय पउत्थो ॥३६॥
W128 १३७) महुमासमारुयाहयमहुयरझंकारणिब्भरे रण्णे ।
गाइ[1] विरहक्खराबद्धपहियमणमोहणं गोवी ॥३७॥
W127 १३८) अहयं लज्जालुइणी तस्स य उम्मच्छराइ पिम्माइं ।
सहियायणो य[3] निउणो अलाहि किं पायराएण ॥३८॥

१३६) [तथा मानो मानधनया तया एवमेव दूरमनुबद्धः । यथा तस्या अनाश्रवायाः प्रिय एकग्राम एव प्रोषितः ॥] तथा मानो मनधनया तया एवमेव निष्कारणं दूरमनुबद्धः परां कोटिमारोपितः, यथा तस्याः प्रिय एकस्मिन्नेव ग्रामे प्रोषितः, तस्या न समीपमुपसर्पतीत्यर्थः । कथंभूतायाः । असुणीऍ अश्रवणशीलायाः । अश्रवणो या उपदेशं न शृणोति । अधमा नायिका । तस्या लक्षणम् । दोषं विनाऽपि रुष्यति तुष्यति चानुनयमन्तरेणापि । निर्हेतुकप्रवृत्तिश्चलचित्ता साधमा ज्ञेया ॥१३६॥

१३७) स्वामिनः । [मधुमासमारुताहतमधुकरझङ्कारनिर्भरेऽरण्ये । गायति विरहाक्षराबद्धपथिकमनोमोहनं गोपी ॥] रण्णे गोवी गाइ अरण्ये गोपी गायति । कीदृशेऽरण्ये । महुमासमारुयाहयमहुयरझंकारणिब्भरे मधुमासमारुताहतमधुकरझङ्कारनिर्भरे पूरिते । कथं गायति । विरहक्खराबद्धपहियमणमोहणं विरहाक्षराबद्धपथिकमनोमोहनमिति गानक्रियाविशेषणम् । मलयानिलान्दोलनमनोहरझङ्कारिणा विशेषतो विरहाक्षरबद्धेन गोपीगानेन उद्दीपनविभावेन पथिकाः स्वसीमन्तिनीर्निरन्तरं स्मरन्तो मुह्यन्तीत्यर्थः ॥१३७॥

१३८) ग्रामकुट्टिकायाः । [अहं लज्जावती तस्य च निरर्गलानि प्रेमाणि । सखीजनश्च निपुणः, आस्तां किं पादरागेण ॥] काचिच्चरणौ यावकरसरागेण रञ्जयितुमुन्मुखीम् अनुलेप्तुकामाम् सखीमिदमाह । अलाहि किं पायराएण आस्तां किं पादरागेण । यतः अहयं लज्जालुइणी

१W. अणुणीअ; २W. गाअइ विरहक्खरबद्ध...; ३W. वि णिउणो.

W130 १३९) सालोई च्चिय सूरे घरिणी घरसामियस्स घित्तूण ।
निच्छंतस्स वि पाए धुयइ हसंती हसंतस्स ॥३९॥
W195 १४०) केलीइ वि रूसेउं न तीरए तम्मि मुक्कविणयम्मि ।
माएँ जाइयएहिँ इमेहि ँ अवसेहि ँ अंगेहिँ ॥४०॥

अहं लज्जावती । तस्स य उम्मच्छराइ पिम्माइं तस्य च निरर्गलानि प्रेमाणि । सहियायणो य निउणो सखीजनश्च निपुणः । इति कृत्वा आस्तां पादरागेण । पादरागलिङ्गानुमितां विपरीतक्रीडां मम विदग्धसखीजनो मा जानात्वित्यर्थः । अहयं इति अस्मदो हं अहं अहयं सौ (वररुचि, ६,४०) इति अहयं आदेशे रूपम् । अलाहि इति निषेधे निपातः । आक्षेपहेतुभ्यां संसृष्टिरलंकारः ॥१३८॥

१३९) [सालोके चैव सूर्ये गृहिणी गृहस्वामिनो गृहीत्वा । अनिच्छतोऽपि पादौ धावयति हसन्ती हसतः ॥] घरसामियस्स घरिणी पाए घित्तूण धुयइ गृहस्वामिनो गृहिणी पादौ गृहीत्वा प्रक्षालयति । कदा । सालोइ च्चिय सूरे अस्तमस्तकमनासादयत्यादित्ये । कथंभूतस्य । निच्छंतस्स वि अनिच्छतोऽपि । अनु च (? अथ च) कीदृशस्य । हसंतस्स । अनया प्रकृत्या (? प्रयुक्त्या) अवरुद्धोऽहमनयेति हसतः । साऽपि कीदृशी । हसन्ती स्मयमाना । अथ मा खल्वयम् अन्याङ्गनासंभोगसुखलालसतया निर्यासीदिति व्यपदेशेन प्रियं निरुणद्धीति । असमय एव पादप्रक्षालनम् उभयाभिप्रायपरिज्ञानं च उभयोर्हासहेतुः । स्वीया प्रगल्भा नायिका । लब्ध्वा पतिं प्रगल्भाऽनुभावहेलाविलासवासगृहम् । आक्रान्तपतिर्नानाविधनिधुवनलब्धवैदग्ध्या (४.रुद्रट, १२,२४) ॥ आक्षेपोऽलंकारः ॥१३९॥

१४०) सुरभिवृक्षस्य । [क्रीडयाऽपि रोष्टुं न शक्यते तस्मिन् मुक्तविनये । मातर्जातैरेभिरवशैरङ्गैः ॥] काचिदनुनयसुखलाभलालसा अवशान्यङ्गानि सीदन्ति इदमाह । माए केलीए वि रूसेउं न तीरए मातः

---

१ W. सालोअ च्चिअ; २ W. चुक्क; ३ W. जाइअएहि व माए इमेहि.

W196 १४१) फुंडिल्लियाएँ खिल्लउ मा नं वारेह होउ पडिहत्था ।
मा रमणभारगरुई पुरिसायंती किलम्मिहिइ ॥४१॥
W197 १४२) पउरजुवाणो गामो महुमासो जुव्वणं पई थेरो ।
जुण्णसुरा साहीणा असई मा होउ किं मरउ ॥४२॥

क्रीडयाऽपि रोषं कर्तुं न शक्यते । तम्मि तस्मिन् प्रिये । कीदृशे । मुक्कविणयम्मि मुक्तविनये । कैः करणभूतैः । इमेहिँ अवसेहिँ अंगेहिं जाइयएहिं एभिरेव स्वैरङ्गैरवशैर्जातैः । यदि नर्मणा मनागपि अहं रुष्येयं तदेतान्यङ्गानि प्रियरतरसिकानि निरन्तरम् अमुमेव अनुवर्तन्ते, इति भावः ॥१४०॥

१४१] गागिलस्य । [फुड्डिल्लिकया क्रीडतु मैनां वारयत भवतु प्रतिहस्ता । मा रमणभारगुर्वी पुरुषायमाणा क्लमिष्यति ॥] हे सख्यः, मा नं वारेह मा एनां वारयत । फुड्डिल्लियाएँ क्रीडाविशेषेण खिल्लउ क्रीडतु । यतः होउ पडिहत्था भवतु पट्वी । किं पटुतया अस्य : इत्याह । मा पुरिसायंती किलामिहिइ मा एषा पुरुषायितं कुर्वती क्लान्तिं यास्यति । कथंभूता । रमणभारगरुई जघनभारगुर्वी । घनजघनतया विपरीतसुरतश्रमं मा आसादयतु इत्यर्थः । फुड्डिल्लिया क्रीडाभेदो यस्यां न्यञ्चनोदञ्चनानि जघनस्य जायन्त इति । पडिहत्था पट्वी । नं इति एनामित्यस्य अवासवि (?) लोपविशेषा बहुलम् इति एकारस्य लोपे सति रूपम् । अनुमानालंकारः ।१४१॥

१४२] वत्सराजस्य । [प्रचुरयुवा ग्रामो मधुमासो यौवनं पतिः स्थविरः । जीर्णसुरा स्वाधीना असती मा भवतु किं म्रियताम् ।।] असई मा होउ किं मरउ असती मा भवतु किं म्रियताम् । कदाचिदसतीत्वस्य आलम्बनविभावाभाव एव इत्याह । पउरजुवाणो गामो प्रचुरयुवा ग्रामः । कदाचित् कन्दर्पदीपकः समया न स्यादित्याह । महुमासो मधुमासः । कदाचिदनवतीर्णतारुण्या भवतीत्याह । जुव्वणं यौवनम् । कदाचित् पति-

१W. उप्फुल्लियाइ, २W. परिखामा, ३W. जहण, ४W. किलिम्मिहिइ ५W. ठेरो

५

W198 १४३) बहुसो वि कहिज्जंतं तुह वयणं मज्झ हत्थसंदिट्ठं ।
न सुयं ति जंपमाणी पुणरुत्तसुयं करेइ अज्झा ॥४३॥
W199 १४४) पायडियणेहसब्भावविब्भमं तीए जह अहं दिट्ठो ।
संवरणवावडाए अन्नो वि जणो तह च्चेय ॥४४॥

रेव तरुणोऽस्याः स्यादित्याह । पई थेरो पतिः स्थविरः । कदाचिदुन्माद-यतां भावानामन्यतमो न स्यादित्याह । जुण्णसुरा साहीणा जीर्णा पुराणी या सुरा सा स्वाधीना । एवम् असतीत्वहेतौ कारणकलापे सत्यपि न चेद् असती, इति किं वराकी विपद्यतामित्यर्थः । काकुवक्रोक्तिरियम् । श्रीभोजदेवस्तु पठितिमिमामाह । तदुक्तम्–काकुस्वरपदच्छेदभेदाभिनयकान्तिभिः । पाठो योऽर्थविशेषाय पठितिं तां प्रचक्षते ॥ (सरस्वतीकण्ठाभरण ॥, २,५६) आचार्यदण्डिमते निषेधाक्षेपोऽयमिति ॥१४२॥

१४३) भावस्य । [बहुशोऽपि कथ्यमानं तव वचनं मम हस्तसंदिष्टम् । न श्रुतमिति जल्पन्ती पुनरुक्तश्रुतं करोत्यार्या ॥] काचिद् दूती कस्यचिद्यूनस्तत्प्रियानुरागं प्रकटयितुम् इदमाह । अज्झा तुह वयणं पुणरुत्तसुयं करइ उपभोगयोग्या युवतिस्तव वचनं पुनरुक्तश्रुतं करोति । कथंभूतं तव वचनम् । मज्झ हत्थसंदिट्ठं मम पार्श्वसंदिष्टं मन्मुखेन संदिष्टमिति यावत् । किं कुर्वती । न सुयं ति जंपमाणी न श्रुतमिति जल्पन्ती । कदाचित् तयाऽपि न श्रुतं भवतीत्याह । बहुसो वि कहिज्जंतं बहुशोऽपि कथ्यमानम् । सा त्वत्संदेशनिशमनसुखरसरसिका श्रुतमपि पुनः शृणोतीत्यर्थः । अज्झा प्रौढयुवतिः । हत्थसंदिट्ठं इति लोकोक्तिः ॥१४३॥

१४४) कशपुत्रस्य । [प्रकटितस्नेहसद्भावविभ्रमं तया यथाऽहं दृष्टः । संवरणव्यापृतया अन्योऽपि जनस्तथैव ॥] कश्चिद्युवा निजवयस्यपुरतः स्ववल्लभाया आत्मातिमनोद्भवभावम् (?) आविष्कुर्वन् इदमाह । तीए जह अहं दिट्ठो तया यथाऽहं दृष्टः अन्नो वि जणो तह च्चेय अन्योऽपि जनस्तथैव दृष्टः । कथं यथा भवति । पायडियणेहसब्भावविब्भमं

१W. जंपमाणा, २W. पुणरुत्तसयं, ३W. कुणइ, ४W. णिब्भरं, ५W. तुमं.

W200 १४५) हंते पुलोएसु इमं ति वियसियच्छी पइस्स अप्पेइ ।
[1]घरिणी सुयपढमुब्भिन्नदंतजुयलंकियं बोरं ॥४५॥

W201 १४६) अच्छउ ता जणवाओ हिययं चिय अत्तणो तुह पमाणं ।
तह तं सि मंदणेहो जह न उवालंभजुग्गो सि ॥४६॥

प्रकटितस्नेहसद्भावविभ्रमम् । कथंभूतया । संवरणवावडाए संवरणव्यापृतया । सा खलु मां स्नेहार्द्रया दृशा कृशाङ्गी सविभ्रमं वीक्ष्य सहसैव दैवादापतितम् अन्यमपि जनं स्वलोचनपथातिथिं तथैव (चकार), मम समक्षमीक्षांचक्रे । मा खल्वियम् अस्मिन् यूनि रक्तेति जनो जानातु, स्वभाव एवास्या यदियं सर्वानप्येवमवलोकयतीति । विकृतावलोकनेन स्वदुर्नयेच्छाप्रच्छादनमिति । विभ्रमो विलासः । संवरणमाकारनिगूहनम् । वावडो व्यापृतः । अवहित्थं व्यभिचारी भावः । लेशोऽलंकारः ॥१४४॥

१४५) हरिवृद्धस्य । [हन्त प्रलोकयेदम् इति विकसिताक्षी पत्युरर्पयति । गृहिणी सुतप्रथमोद्भिन्नदन्तयुगलाङ्कितं बदरम् ॥] घरिणी सुयपढमुब्भिन्नदंतजुयलंकियं बोरं पइस्स अप्पेइ गृहिणी सुतप्रथमोद्भिन्नदन्तद्वयाङ्कितं बदरं पत्युरर्पयति । किमुक्त्वा । हंत पुलोएसु इमं हन्त प्रलोकयेदम् इत्यभिधाय । कीदृशी । वियसियच्छी विकसिताक्षी । आ सुतदन्तदर्शनाद अनुपभोगयोग्या युवतिर्भवति । इदानीम् अभिगम्या अहम् इति भावः । हंत इति आमन्त्रणे । बोरं इति उपपत्त्योरुदास्याम् (?)। इङ्गितलक्ष्यः सूक्ष्मालंकारः । तस्य लक्षणम् । इङ्गिताकारेत्यादि (काव्यादर्श २,२६०) ॥१४५॥

१४६) मणिनागस्य । [आस्तां तावज्जनवादो हृदयमेवात्मनस्तव प्रमाणम् । तथा त्वमसि मन्दस्नेहो यथा नोपालम्भयोग्योऽसि ॥] तह तं सि मंदणेहो जह न उवालंभजुग्गो सि तथा तेन प्रकारेण त्वमपि

---

[1]W. गेण्हह पुलोअह इमं पहसिअवअणा, [2]W. जाआ.

W202 १४७) अप्पच्छंदपहाविर दुल्लहलंभं जणं विमग्गंत ।
आयासवहेहि[1] भमंत हियय कइया वि भज्जिहिसि॥४७॥

W203 १४८) अहव गुण च्चिय लहुया अहवा अगुणन्नुओ[2] हु सो लोओ ।
अहव म्हे[3] निग्गुणा बहुगुणो[4] हु अन्नो ज़णो तस्स ॥४८॥

मन्दस्नेहो यथा नोपालम्भयोग्योऽसि । आनन्त्याद् अपराधानाम् उपालम्भभाजनं न भवसि इत्यर्थः । किमत्र प्रमाणमित्याह । अच्छउ ता जणवाओ आस्तां तावदयं जनवादः, हिययं चिय अत्तणो तुह पमाणं हृदयमेव आत्मनस्तव प्रमाणं यदि उपालम्भयोग्यो भवसीति ॥१४६॥

१४७) राघवदेवस्य । [आत्मच्छन्दप्रधावनशील दुर्लभलम्भं जनं विमार्गयत् । आकाशपथैर्भ्रमत् हृदय कदाऽपि भङ्क्ष्यसे ॥] काचिद् दुर्लभजनसंगमाशा सुखग्रहं ग्रहीतुं हृदयं प्रत्याह । हे हियय हृदय अप्पच्छंदपहाविर स्वच्छन्देन प्रधावनशील । अन्ये तु आत्मच्छन्दप्रधावित इति व्याचक्षते । यथा आत्मानं तथा अन्यमपि जनं जानासीत्यर्थः । दुल्लहलंभं जणं विमग्गंत दुर्लभलाभं जनम् अभिलषत् । अत एव आयासवहेहिं भमंत आकाशपथैर्भ्राम्यत्, केणावि भज्जिहिसि केनापि भज्यसे (? भङ्क्ष्यसे) । यथा कश्चित् स्वैरविहारः दुर्लभलाभाशापिशाचिकागृहीतः आकाशपथेन भ्राम्यन् भज्यते तथा त्वमपीति । आकाशपथेनेति लोकोक्तिः, लोकातीतमार्गसंचरणे । एकत्र आकाशपथैः, अन्यत्र आयासपथैरिति योज्यम् । हृदयोपदेशः । आक्षेपोऽलंकार ॥१४७॥

१४८) प्रवरसेनस्य । [अथवा गुणा एव लघवः अथवा अगुणज्ञः खलु स लोकः । अथवा स्मो निर्गुणाः बहुगुणः खलु अन्या जनस्तस्य ॥] काचित् समुचितसमयेऽप्यनागच्छति कान्ते अनेककल्पनया स्वगतमिदमाह । अहव गुण च्चिय लहुया अथवा गुणा एव(मम)लघवः, यत् सत्सु अपि

१W. इज्झिहिसि; २W. गुणअण्णुओ ण; ३W. म्हि; ४W. वा बहुगुणवंतो जणो तस्स.

W204 १४९) फुट्टंतेण वि हियएण मामि कह निव्वरिज्जइ जणम्मि।
अद्दाए पडिबिंबं व जम्मि दुक्खं न संकमइ ॥४९॥
W177 १५०) सहि दूमंति कलंबाइँ जह ममं तह न सेसकुसुमाइं।
नूणं इमेसु दियहेसु वहइ गुलियाहणुं कामो ॥५०॥

तेषु मम प्रियो नायात इति। अहवा अगुणन्नुओ हु सो लोओ अथवा अगुणज्ञोऽसौ मद्भर्ता यः सतोऽपि मद्गुणान्न बहु मन्यते। अहव म्ह निग्गुणा अथवा निर्गुणाः स्मः, येषाम् अगुणेषु गुणाभिमानोऽस्माकम्। सोऽपि मत्प्रियो गुणज्ञः, वयमेव केवलं निर्गुणाः। बहुगुणो हु अन्नो जणो तस्स बहुगुणः खलु अन्यो जनस्तस्य। सा सपत्नी गुणाधिकेति भावः। उत्कण्ठिता नायिका। तस्या लक्षणम्। उत्कण्ठिता तु सा स्यात्समुचितसमयेऽप्यनागते कान्ते। तिष्ठत्यनागतेऽस्मिन् (? तिष्ठत्यथागतेऽस्मिन्) बहलविकल्पाकुला या स्त्री ॥१४८॥

१४९) कुडलहस्तिनः। [स्फुटताऽपि हृदयेन सखि कथं (दुःखं) निवेद्यते जने। आदर्शे प्रतिबिम्बमिव यस्मिन् दुःखं न संक्रामति ॥] मामि सखि, फुट्टंतेण वि हियएण कह तम्मि जणम्मि निव्वरिज्जइ स्फुटितेनापि (? स्फुटताऽपि) हृदयेन कथं तस्मिन् जने स्वदुःखं प्रकाश्यते। जम्मि दुक्खं न संकमइ यस्मिन् जने तत् निवेद्यमानं दुःखं न संक्रामति। कस्मिन् किमिव। अद्दाए पडिबिंबं व आदर्शे प्रतिबिम्बमिव। यदि दुःखभरनिर्भरं स्फुटितं भूयिष्ठमपि (स्फुटितभूयिष्ठमपि) हृदयं भवति तथाप्युक्तस्वरूपे जने न निवेद्यते, निष्फलत्वादिति भावः। स्वदुःखाविष्करणम्। अद्दाओ आदर्शः। उपमालंकारः ॥१४९॥

१५०) बन्धुदत्तस्य। [सखि दुन्वन्ति कदम्बानि यथा मां तथा न शेषकुसुमानि। नूनम् एषु दिवसेषु वहति गुलिकाधनुः कामः ॥] सहि जह ममं कलंबाइँ दूमंति सखि यथा मां कदम्बपुष्पाणि दुन्वन्ति उपतापयन्ति

१W. णिव्वरिज्जए तम्मि; २W. दुम्मेंति.

W205 १५१) नेच्छइ[1] पासासंकी काओ दिन्नं पि पहियघरिणीए।
[2]ओणंतकरयलोअलियवलयमज्झट्ठियं पिंडं ॥५१॥

W574 १५२) रूवं सिट्ठं चिय तस्स[3] सेसपुरिसोणियत्तियच्छेण।
बाहुल्लेण इमीए अजंपमाणेण वि मुहेण ॥५२॥

न तह सेसकुसुमाइं न तथा शेषकुसुमानि। अतो न जानीमहे नूणं इमेसु दियहेसु वहइ गुलियाहणुं कामो नूनमेषु दिवसेषु वहति गुलिकाधनुः काम इति। एतानि कदम्बगोलकानि कामकार्मुकनिर्मुक्तगुटिका इव मनो दुन्वन्ति इति भावः। अनुमानालंकारः ॥१५०॥

१५१) नागधर्मस्य। [नेच्छति पाशाशङ्की काको दत्तमपि पथिकगृहिण्या। अवनमत्करतलावगलितवलयमध्यस्थितं पिण्डम् ॥] काओ पिंडं दिन्नं पि नेच्छइ काको दत्तमपि पिण्डं नेच्छति। कया। पहियघरिणीए पथिकगृहिण्या। कथंभूतं पिण्डम्। ओणंतकरयलोअलियवलयमज्झट्ठियं अवनमत्करतलावगलितवलयमध्यस्थितम्। किमिति न गृह्णातीत्याह। पासासंकी पाशाशङ्की तदेव वलयं पाशमाशङ्कमानः। स्वबन्धनभिया दत्तमपि बलिपिण्डं वायसो न वाञ्छतीति। पान्थकान्ताया देहदौर्बल्यं प्रयुक्त्या दर्शितं भवति। ओणंतं अवनमत्। पर्यायोक्तिभ्रान्तिमद्भ्यां संकीर्णोऽलंकारः ॥१५१॥

१५२) हालस्य। [रूपं कथितमेव तस्य शेषपुरुषापनिवृत्ताक्षेण। बाष्पार्द्रेणैतस्या अजल्पतापि वदनेन ॥] इमोए मुहेण तस्य रूवं सिट्ठं चिय अस्या मुखेन तस्य यूनो रूपं शिष्टमेव कथितमेव। कीदृशेन। अजंपमाणेण वि अजल्पताऽपि। भूयश्च कीदृशेन। सेसपुरिसोणियत्तियच्छेण शेषपुरुषापनिवृत्ताक्षेण अन्यनरेभ्योऽपगतनेत्रेण। पुनश्च कीदृशेन। बाहुल्लेण बाष्पजलार्द्रेण। तं वीक्ष्य यद् इतरपुरुषावेक्षणनिरपेक्षं मुखं सजलां दृशं

१W. पासासंकी काओ . ण छिवइ; २W. ओणत्त; ३W. से असेसपुरिसे णिअत्तिअच्छेण.

W206 १५३) ओहिदियहागमासंकिरोहिँ सहियाहिँ तीएँ लिहिरीए ।
दो तिन्नि तहे च्चिय चोरियाएँ रेहा फुसिज्जंति ॥१३॥
W207 १५४) तुह मुहसारिच्छं न लहइ त्ति संपुण्णमंडलो विहिणा ।
अन्नमयं व घडेउं पुणो वि खंडिज्जइ मियंको ॥५४॥

वहति, तेन अनुमायते अनुपमरूपसंपत्संपन्नोऽसौ युवेत्यर्थः । सिट्ठं कथितम् । उल्लं आर्द्रम् । विरोधच्छायानुमानाभ्यां संकीर्णोऽलंकारः ॥१५२॥

१५३) भोगिनः । [अवधिदिवसागमाशङ्किनीभिः सखीभिस्तस्या लिखनशालायाः । द्वे तिस्रस्तथैव चौर्येण रेखा प्रोञ्छ्यन्ते ॥] ताएँ दो तिन्नि तह च्चिय रेहा फुसिज्जंति तस्या द्वे तिस्रस्तथैव रेखाः उन्मृज्यन्ते । किंभूतायाः तस्याः । लिहिरीए लिखनशीलायाः । काभिः । सहियाहिँ सखीभिः । कीदृशीभिः । ओहिदियहागमासंकिरोहिँ अवधिदिवसागमाशङ्किनीभिः । कथम् । चोरियाएँ चौर्येण । एषा किल प्रियतमागमनदिनलेखालिखनशीला पूर्णावधिम् अवधीरयितुम् अपारयन्ती प्राणान् मंक्षु मोक्ष्यति इति तत्प्राणपरित्राणाय अनाकलिता द्वे तिस्रो विदग्धसख्यो लेखाः परिमृजन्तीत्यर्थः । मुग्धाश्वासनोपायः सखीकर्म ॥१५३॥

१५४) [तव मुखसादृश्यं न लभत इति संपूर्णमण्डलो विधिना । अन्यमयमिव घटयितुं पुनरपि खण्ड्यते मृगाङ्कः ॥] विहिणा मियंको पुणो वि खंडिज्जइ विधिना विश्वसृजा मृगाङ्कः पुनरपि खण्ड्यते । किमित्याह । तुह मुहसारिच्छं न लहइ त्ति तव मुखसादृश्यं न लभत इति । अन्नमयं व घडेउं पुनरुक्तमिव घटितुम् । यथा यथा नायं पूर्णेन्दुस्त्वद्वदनसादृश्यं स्पृशति तथा तथा एनं तुल्याभिलाषेण विधिर्भङ्क्त्वा घटयतीति (?वेधि) । अन्नमयं पुनरुक्तम् । उत्प्रेक्षाऽलंकारः । अनुकूलो नायकः । अतिरक्ततया नार्याः करोति नान्याङ्गनाप्रसङ्गं यः । स्यान्नायकोऽनुकूलः स रामवज्जनकतनयायाम् ॥१५४॥

१W. कुडुडलिहिआओ; २W. तहिं विअ.

W208 १५५) अज्जं गउ त्ति अज्जं गउ त्ति अज्जं गउ त्ति भणिरीए[1] ।
पढम च्चिय दियहद्धे कुड्डो रेहाहिँ चित्तलिओ ॥५५॥

W209 १५६) न वि तह पढमसमागमसुरयसुहे पाविए वि परिओसो ।
जह बीयदियहसविलक्खलक्खिए वयणकमलम्मि ॥५६॥

W210 १५७) जे समुहागयवोलीणवलियपियपेसियच्छिविच्छोहा[2] ।
अम्हं ते मयणसरा जणस्स जे[3] हुंति ते हुंतु ॥५७॥

---

१५५) नागहस्तिनः । [अद्य गतो अद्य गतो अद्य गत इति भणनशीलया । प्रथम एव दिवसार्धे कुड्यं रेखाभिश्चित्रितम् ॥] कयाचित् कुड्यं रेखाभिः चित्रितम् । कथंभूतया । अज्जं गउ त्ति अद्य गत इति पुनरुक्तं च वचनशीलया । किं कालान्तरेण इत्याह । पढम च्चिय दियहद्धे प्रथम एव दिवसार्धे । एतदुक्तं भवति । प्रियया अवधिदिनगणनलेखाभिः लाञ्छितं स्वभवनभित्तितलम् । मुग्धा विरहिणो नायिका । "स्वावधिदिवसगणनया गमयति कालं प्रियतमस्य" ॥१५५॥

१५६) प्रवरसेनस्य । [नैव तथा प्रथमसमागमसुरतसुखे प्राप्तेऽपि परितोषः । यथा द्वितीयदिवससविलक्षलक्षिते वदनकमले ॥] नैव तथा प्रथमसमागमसुरतसुखे प्राप्तेऽपि परितोषो यथा द्वितीयदिवससविलक्षलक्षिते वदनकमल इति । अर्थात् प्रियाया इति लभ्यते । व्रीडा हि वनितानां प्रथमसमागमे, प्रणयिनां मनांसि आवर्जयतीति । लज्जा व्यभिचारी भावः ॥१५६॥

१५७) भानुशक्तेः । [ये संमुखागतातिक्रान्तवलितप्रियप्रेषिताक्षिविक्षेपाः । अस्माकं ते मदनशरा जनस्य ये भवन्ति ते भवन्तु ॥] काचित् प्रियकृतकटाक्षविक्षेपैः क्षिप्रमेव वशीकृतहृदया इदमाह । अम्हं ते मयणसरा अस्माकं ते मदनशराः । जणस्स जे हुंति ते हुंतु जनस्य ये भवन्ति ते भवन्तु । एते अन्ये वा भवन्तु इत्यर्थः । के ते इत्याह । जे समुहागयवोलीणवलियपियपेसियच्छिविच्छोहा ये संमुखागतातिक्रान्तव-

---

१ W. गणिरीए. २ W. वोलंत; ३ W. जें होंति ते होंतु.

W211 १५८) अणुहवउ कणयदोरो हुयवहवरुणाण लद्धमाहप्पो ।
इयरो जणो न पावइ तुह जहणारुहणसुक्खाइं ॥५८

W212 १५९) जं जस्स विहवसारं सो[3] तं देइ त्ति किं व[4] अच्छरियं ।
अणहुंतयं पि दिन्नं दोहग्गं तइ सवत्तीणं ॥५९॥

लितप्रियप्रेषिताक्षिविक्षेपाः इति । प्रथमानुरागे साक्षाद् दर्शने गाथेयम् । गुणस्तुतिरवस्थाभेदः । त एवास्माकं स्मरशराः, तत्कार्यकरणादित्यर्थः । वोलीणो अतिक्रान्तः । विच्छोहा विक्षेपाः । रूपकमलंकारः ॥१५७॥

१५८) माधवराजस्य । [अनुभवतु कनककाञ्चीगुणो हुतवहवरुणयोर्लब्धमाहात्म्यः । इतरो जनो न प्राप्नोति तव जघनारोहणसौख्यानि ॥] कणयदोरो तुह जहणारुहणसुक्खाइं अणुहवउ कनककाञ्चीकलापस्तव जघनारोहणसुखानि अनुभवतु । कीदृशः । हुयवहवरुणाण लद्धमाहप्पो हुतवहवरुणयोर्लब्धमाहात्म्यः । कनककाञ्चीगुणः किल घटनकाले पावके समुत्ताप्य वारिणि निर्वाप्यते । अतो अस्य विषमनमवह्निवरुणव्रतचरिष्णोस्त्वदीयजघनारोहणं युज्यते । यतः इयरो जणो न पावइ इतरस्तु अकृतव्रतो जनो न प्राप्नोति तानि सुखानीत्यर्थः ॥१५८॥

१५९) अनङ्गस्य । [यो यस्य विभवसारः स तं ददातीति किमिवाश्चर्यम् । अभवदपि दत्तं दौर्भाग्यं त्वया सपत्नीभ्यः ॥] काचित् कस्याश्चित् सौभाग्यं वर्णयितुम् इदमाह । जं जस्स विहवसारं सो तं देइ त्ति यद्यस्य विभवसारं स तद् ददातीति किं व अच्छरियं किमिवाश्चर्यम् । इदं तु चित्रम्, अणहुंतयं पि दिन्नं दोहग्गं तइ सवत्तीणं असदपि दत्तं दौर्भाग्यं त्वया सपत्नीनाम् । किं व इत्यत्र एकारस्य अपभ्रंशोपविशेषो बहुलम् (?) इति लोपः ॥१५९॥

१ W. इयरो जणो ण पावइ तुह जहणारुहणसंगमसुहेल्लिं । अणुहवइ कणअडोरो हुअवहवरुणाण लद्धमाहप्पो ॥ २ W. जो जस्स विहवसारो, ३ W तं सो; ४ W. व अच्छेरं; ५; अणहोंतं पि खु दिण्णं.

W213 १६०) चंदसरिसं मुहं से सरिसो अमयस्स[1] मुहरसो तिस्सा ।
सकैयग्गहरहसायल्लचुंबणं[2] केण सरिसं से ॥६०॥
W215 १६१) बालय तुमाहि अहियं निययं चिय वल्लहं महं जीयं ।
तं तइ विणा न होइ त्ति तेण कुवियं पसाएमि ॥६१॥
W216 १६२) पत्तिय न पत्तियंती जइ तुज्झ इमे न मज्झ रुइरीए ।
पैट्ठीएँ[3] बाहबिंदू पुलउँब्भेएण[4] भिज्जंता ॥६२॥

१६०) अद्दमरिस्स । [चन्द्रसदृशं मुखं तस्याः सदृशो अमृतस्य मुखरसस्तस्याः । सकचग्रहरभसहठचुम्बनं केन सदृशं तस्याः ॥) कश्चित् स्वजायां प्रशंसन्निदमाह । से तस्याः चन्दसरिसं मुहं चन्द्रसदृशं वदनं, सरिसो अमयस्स मुहरसो तिस्सा सदृशो अमृतस्य मुखरसस्तस्याः, सकयग्गहरहसायल्लचुंबणं सकचग्रहरभसहठचुम्बनं केण सरिसं से केन सदृशं तस्याः, न केनापीत्यर्थः । आयल्लं बलात्कारः ॥१६०॥

१६१) त्रिविक्रमस्य । [बालक त्वत्तो अधिकं निजकमेव वल्लभं मम जीवितम् । तत् त्वया विना न भवतीति तेन कुपितं प्रसादयामि ॥] काचिदनुनयन्ती भर्तुः (? प्रियकरस्य) भङ्ग्या अनुरागं प्रकटयितुम् इदमाह । हे बालय बालक, तुमाहि अहियं त्वत्तोऽधिकं निययं चिय वल्लहं महं जीयं निजमेव मम वल्लभं जीवितम् । तर्हि किमर्थं वृथाऽनुनयसि (इत्याह) तं तइ विणा न होइ त्ति तेण कुवियं पसाएमि तत् त्वया विना न भवतीति तेन कुपितं प्रसादयामि । त्वया विना नाहं मुहूर्तमपि जीवितुमुत्सहे इत्यर्थः । तइ विणा इति तृतीया विनायोगे (cf. पाणिनि, २, ३, ३२) । अन्ये तु अगृहीतानुनयतया रोषजुषि रुषित्वा गते विदग्धदूत्या च प्रत्यानीते कान्ते कलहान्तरिता अनुनयन्ती इदमाहेत्याहुः ॥१६१॥

१६२) हालस्य । ["प्रतीहि", "न प्रतीयां यदि तवेमे न मम रुदत्याः । पृष्ठे बाष्पबिन्दवः पुलकोद्भेदेन भिद्येरन्" ॥] काचिन्मानिनी

१ W. अमिअस्स; २ W. सकअग्गहरहसुव्वेल्लचुंबणं; ३ W. पुट्ठीअ, ४ W पुलउब्भेए ण.

W217 १६३) तं मित्तं कायव्वं जं मित्तं वसणदेसयालम्मि ।
आलिहियभित्तिबाउल्लयं व न परंमुहं ठाइ ॥६३॥

W218 १६४) वहुयाएँ नइणिउंजे पढमुंल्लयसीलखंडणविलैक्खो ।
उड्डेइ विहंगैउलो हा हा पक्खेहि व भैणंतो ॥६४॥

प्रसादनाय पादपतितस्य प्रणयिन उपरि पतितान् स्वबाष्पवारिबिन्दून् तत्पृष्ठपुलकाङ्कुरकोटिप्रोतान् प्रेक्ष्य रोमोद्गमलिङ्गलक्षितप्रेम्णि तस्मिन् प्रसन्ना सतीदमाह । पत्तिय प्रतीहि मयि स्नेहानुबन्धबुद्धिं विधेहीति । नाहं त्वां प्रतीयां यदि मम रुदत्यास्तव पृष्ठे बाष्पबिन्दवः पुलकोद्भेदेन भिद्येरन् । इदानीं प्रतीतिर्जातेति । प्रणतिरेव प्रसादनोपायः । स्युः-सामदानभेदप्रणत्युपेक्षाप्रसङ्गविभ्रंशाः । मानोपशमोपाया दण्डः शृङ्गारहा नैव ॥ तानेतान् यथावसरं वक्ष्यामः । अनुमानालंकारः ॥१६२॥

१६३) सर्वसेनस्य । [तन्मित्रं कर्तव्यं यन्मित्रं व्यसनदेशकाले । आलिखित-भित्तिपञ्चालिकेव न पराङ्मुखं तिष्ठति ॥] तं मित्तं कायव्वं तन्मित्रं कर्तव्यं जं न परंमुहं ठाइ यन्न पराङ्मुखं तिष्ठति । कदा । वसणदेसयालम्मि व्यसनदेशकाले व्यसनदेशे व्यसनकाले च । किमिव । आलिहियभि-त्तिबाउल्लयं व आलिखितभित्तिपुत्रक इव । यथैव चित्रपुत्रकः पराङ्मुखो न भवति तथैव यत् पृष्ठं न प्रयच्छति तदेव मित्रं कार्यमित्यर्थः । बाउ-ल्लयं पुत्रकः । उपमालंकारः ॥१६३॥

१६४) पालित्तकस्य [वध्वा नदीनिकुञ्जे प्रथमशीलखण्डनविलक्षम् । उड्डयते विहङ्गकुलं हा हा पक्षैरिव भणत् ॥] उड्डेइ विहंगउलो उड्ड-यते विहङ्गकुलम् । क्व । नइणिउंजे नदीनिकुञ्जे । कथंभूतम् । पढमु-ल्लयसीलखंडणविलक्खं वध्वाः प्रथमशीलखण्डनविलक्षम् । किं कुर्वत् । हा हा पक्खेहि व भणंतो हा हा पक्षैरिव भणत् । पक्षिकुलम् उड्डीयमानं पक्षविक्षेपोत्पन्नपवनस्वनेन "हा हा किमेतद् अभव्यया अनुष्ठितम्" इतीव

---

१ W. जं किर वसणम्मि देसआलम्मि; २ W. पढमुग्गअ; ३ W. विलक्खं; ४ W. विहंगउलं; ५ W. भणंतं;

W219 १६५) सच्चं भणामि बालय नत्थि असेज्झं वसंतमासस्स ।
गंधेण कुरबयाणं मणम्मि असइत्तणं पत्ता ॥६५॥

W220 १६६) इक्किक्कमवइवेढयविवरंतरतरलदिन्नणयणाए ।
तइ वोलंते बालय पंजरसउणाइयं तीए ॥६६॥

व्याहरतीत्यर्थः । व्यत्यया बहुलम् इति (विहङ्गकुलस्य नपुंसकस्यापि) पुंसा निर्देशः । अथवा विहंगगणो इति पाठः ॥१६४॥

१६५) आढ्यराजस्य । [सत्यं भणामि बालक नास्ति असाध्यं वसन्तमासस्य । गन्धेन कुरबकाणां मनसि असतीत्वं प्राप्ता ॥] काचित् स्वयमभिसारणेन निजलब्धिमलिङ्गं निगूहन्ती इदमाह । हे बालय बालक सच्चं भणामि सत्यं वदामि, नत्थि वसंतमासस्स असज्झं नास्ति वसन्तमासस्य असाध्यम् । यतः गंधेण कुरबयाणं गन्धेन कुरबकाणां मणम्मि असइत्तणं पत्ता मनसि असतीत्वं प्राप्ता अहमिति । यदहम् अनाहूताऽपि प्राप्ता तदेतत् कुरबककुसुमपरिमलविलसितमित्यर्थः । श्लेशहेतुभ्यां संकीर्णोऽलंकारः ॥१६५॥

१६६) देवराजस्य । [एकैकवृतिवेष्टकविवरान्तरतरलदत्तनयनया । त्वयि अतिक्रामति बालक पञ्जरशकुनायितं तया ॥] कस्याश्चित् काचित् प्रियतमेऽनुरागम् अधिकुर्वती आह । हे बालय बालक तइ वोलंते त्वयि अतिक्रामति सति पंजरसउणाइयं ताए पञ्जरशकुनायितं तया । कथंभूतया । इक्किक्कमवइवेढयविवरंतरतरलदिन्नणयणाए एकैकवृतिवेष्टकविवरान्तरतरलदत्तनयनया । यथा पञ्जरशकुनिः एकैकशलाकान्तरदत्तदृष्टिः तथा असौ त्वदवलोकनकौतुकेन भवनाभ्यन्तर एव भ्राम्यति स्मेत्यर्थः । उपमालंकारः ॥१६६॥

१ W. असक्कं; २ W. मणं पि असइत्तणं ण गआ. ३ W. एक्केक्कमवइवेढणविवरंतरदिण्णतरलणयणाए;

W221 १६७) ता किं करेउ जइ तं सि तीएँ वइवेढपिल्लियथणीए ।
पायेग्गंगुट्ठुक्खित्तणीसहंगीएँ वि न दिट्ठो ॥६७॥

W222 १६८) पियसंभरणपलुट्टंतबाहधाराणिवायभीयाए ।
दिज्जइ वंकग्गीवाएँ दीवओ पहियजायाए ॥६८॥

---

१६७) अरिकेसरिणः । [तत् किं करोतु यदि त्वमसि वृतिवेष्टप्रेरित (पीडित) स्तनया । पादाग्राङ्गुष्ठोत्क्षिप्तनिःसहाङ्ग्याऽपि न दृष्टः ॥] जइ तं सि तीएँ न दिट्ठो यदि त्वं तया न दृष्टोऽसि ता किं करेउ तत् किं कुरुताम् । कथंभूतया । वइवेढपिल्लियथणाए वृतिवेष्टप्रेरितपयोधरया । पुनरपि कथंभूतया । पायग्गंगुट्ठुक्खित्तणीसहंगीएँ वि पादाग्राङ्गुष्ठोत्क्षिप्तनिःसहाङ्ग्याऽपि । पूर्ववद् विशेषणेन उच्चैस्त्वं वृतिवेष्टकस्य वर्णितम् उत्तारणे च प्रयत्नातिशयः तस्याः सूचितः । निःसहपदेन च स्तनजघनभरगौरवं तस्याः कथितम् । एवमपि यदि तया त्वं न दृष्टः, तद् इदानीं किं करोतु । यत् स्वाधीनं तत् सर्वं तया त्वदवलोकनाय सुष्ठु अनुष्ठितमिति । वइवेढो वृतिवेष्टकः । औत्सुक्यं व्यभिचारी भावः । जातिरलंकारः ॥१६७॥

१६८) ब्रह्मचारिणः । [प्रियसंस्मरणप्रवर्तमानबाष्पधारानिपातभीतया । दीयते वक्रग्रीवया दीपकः पथिकजायया ॥] दीवओ दिज्जइ पहियजायाए पथिकजायया दीपको दीयते । कथंभूतया । वंकग्गीवाएँ वक्रग्रीवया । पुनः कथंभूतया । पियसंभरणपलुट्टंतबाहधाराणिवायभीयाए प्रियसंस्मरणप्रवर्तमानबाष्पधारानिपातभीतया । अत एव मा खल्वयम् अनवरतपतदनल्पबाष्पाम्बुपातो दीपशिखां शमयतु इति कुटिलीकृततरकण्ठकन्दलया दीपको दीयते इत्यर्थः । विरहिणी नायिका । अश्रूणि सात्त्विको भावः । संभरणं संस्मरणम् । पलुट्टइ प्रवर्तते । हेतुजातिभ्यां संसृष्टिरलंकारः ॥१६८॥

---

१ W. पाअंगुट्ठग्गुक्खित्तणीसहंगीअ.

W223 १६९) तइ वोलंते बालय तिस्सा वलियाइँ तह नु अंगाइं ।
जह पट्ठिमज्झणिवडंतबाहधाराउ दीसंति ॥६९॥

W224 १७०) ता मज्झिमु च्चिय वरं दुज्जणसुयणेहि दोहि वि अलं मे।
जह दिट्ठा तवइ खलो तहेव सुयणो अईसंतो ॥७०॥

W225 १७१) अद्धच्छिपिच्छियं मा करेसु साहाइयं पलोएसु ।
सो वि सुदिट्ठो होही तुमं पि मुद्धा कलिज्जिहिसि ॥७१॥

१६९) अनवरतस्य । [त्वय्यतिक्रामति बालक तस्या वलितानि तथा नु अङ्गानि । यथा पृष्ठमध्यनिपतद्बाष्पधारा दृश्यन्ते ॥] काचित् कस्यचित् स्वसख्याः प्रेम प्रकाशयितुम् इदमाह । हे बालय बालक, तइ वोलंते त्वय्यतिक्रामति तिस्सा वलियाइँ तह नु अंगाइं तस्या वलितानि तथा न्वङ्गानि, जह पट्ठिमज्झणिवडंतबाहधाराउ दीसंति यथा पृष्ठमध्ये निपतद्बाष्पधाराः अश्रुप्रवाहाः दृश्यन्ते इति । प्रथमानुरागगाथा ॥१६९॥

१७०) [तस्मान्मध्यम एव वरं दुर्जनसुजनाभ्यां द्वाभ्यामप्यलं मे । यथा दुष्टस्तापयति खलस्तथैव सुजनोऽदृश्यमानः ॥] ता मज्झिमु च्चिय वरं तस्मान्मध्यम एव वरं दुज्जणसुयणेहि दोहि वि अलं मे दुर्जनसुजनाभ्यां द्वाभ्यामपि अलं मे पर्याप्तम् । यतः जह दिट्ठा तवइ खलो यथा दृष्टस्तापयति खलः तहेव सुयणो अईसंतो तथैव सुजनोऽप्यदृश्यमानस्तापयतीत्यर्थः । यतोऽसंयोगविषयो गौरवेण सुजनो दुःखाय जायते एतेन दुर्जनजने निन्दा सुजने च प्रशंसा पर्यवस्यति । व्याजस्तुतिरलंकारः । तस्या लक्षणम् । यदि निन्दन्निव स्तौति व्याजस्तुतिरसौ मता (काव्यादर्श, २, ३४३) ॥१७०॥

१७१) तस्यैव (?) । [अर्धाक्षिप्रेक्षितं मा कुरु स्वाभाविकं प्रलोकय । सोऽपि सुदृष्टो भविष्यति त्वमपि मुग्धा कलिष्यसे ॥] काचित्

१ W. तिस्सा अंगाइ तह णु वलिआई; २ W. पुट्ठि; ३ W. ण कज्जं; ४ W. करेहि; ५ W. पलोएहि; ६ W. होहिइ.

W226 १७२) दियहं घुडुंकियाए[1] तीए काऊण गेहवावारं ।
गरुए वि मन्नु[2]दुक्खे भरिमो [3]पायंतसुत्ताए ॥७२॥

W227 १७३) पाणउडोए[4] जलिऊण हुयवहो जलइ जन्नवाडेसुं[5] ।
न हु ते परिहरियव्वा विसमदसासंठिया पुरिसा ॥७३॥

कंचन मनीषितं प्रियं नेत्रत्रिभागेण पश्यन्तो कयाचिद् विदग्धसख्या इदमुच्यते । अद्धच्छिपिच्छियं मा करेमु अर्धाक्षिप्रेक्षितं मा कार्षीः । साहाइयं पलोएसु स्वाभाविकदृष्ट्या प्रलोकय । सो वि सुदिट्ठो होही तव हृदयदयितो अविकृतदृशा पश्यन्त्या सुदृष्टो भविष्यति, तुमं पि मुद्धा कलिज्जिहिसि त्वमपि मुग्धा ज्ञास्यसे । अन्यथा विकृतेति ज्ञास्यसे । संजातलज्जायाः कटाक्षप्रेक्षितानि खलु अनुरागलिङ्गानि, अतः तानि मा कार्षीः इति सखीशिक्षोक्तिः ॥१७१॥

१७२) मकरन्दस्य । [दिवसं रोषमूकायास्तस्याः कृत्वा गेहव्यापारम् । गुरुकेऽपि मन्युदुःखे स्मरामः पादान्तसुप्तायाः ॥] घुडुंकिया मानमौनावलम्बिनी । खण्डिता नायिका । तस्याः कोपाङ्गम् । गतार्था गाथा ॥१७२॥

१७३) विक्रमस्य । [चाण्डालकुट्यां ज्वलित्वा हुतवहो ज्वलति यज्ञवाटेषु । न खलु ते परिहर्तव्या विषमदशासंस्थिताः पुरुषाः ॥] अगम्यागमनदोषदूषितं पुरुषं परिहरन्तो पण्याङ्गना काऽपि कुट्टिन्या इदमभिधीयते । न हु ते परिहरियव्वा न खलु ते परिहर्तव्याः । के । पुरिसा पुरुषाः । कीदृशाः । विसमदसासंठिया विषमदशासंस्थिताः। अर्थोऽन्यः । न खलु कामुकानां पण्याङ्गना गुणागुणान् गणयन्तीति । अमुमेवार्थम् अर्थान्तरन्यासेन द्रढयति । पाणउडीए जलिऊण हुयवहो जलइ जन्नवाडेसु चाण्डालकुट्यां ज्वलित्वा हुतवहो ज्वलति यज्ञवाटेषु । यथा दाह्यमदाह्यं च दहनस्य वस्तु नास्ति, एवम् उपभोग्यमनुपभोग्यं च धनलुब्धानां गणि-

---

१W. खुडक्किआए; २W. मण्णुदुक्खे; ३W. पाअंतसुत्तस्स; ४W. पाणउडीअ वि; ५W. जण्णवाडम्मि;

W228 १७४) जं तुज्झ सई जाया असईओ जं च सुहय अम्हे वि।[1]
ता किं फुट्टउ बिल्लं[2] तुज्झ समाणो जुवा नत्थि ॥७४॥

W229 १७५) सव्वस्सम्मि वि डड्ढे[3] तह वि हु हिययस्स निव्वुइ च्चेय।
जं तेण गामडाहे हत्थाहत्थिं कुडो गहिओ ॥७५॥

कानां नास्तीत्यर्थः। पाणो चाण्डालः। अर्थान्तरन्यासोऽलंकारः। दृष्टान्तोऽयमित्यन्ये ॥१७३॥

१७४) हालस्य। [यत्तव सती जाया असत्यो यच्च सुभग वयमपि। तत् किं स्फुटतु रहस्यं तव समानो युवा नास्ति॥] जं तुज्झ जाया सई यत्तव जाया सती असईओ जं च सुहय अम्हे वि असत्यश्च यद्वयमपि हे सुभग ता किं फुट्टउ बिल्लं तत् किं भिद्यतां रहस्यं तुज्झ समाणो जुवा नत्थि तव समानो युवा नास्ति इति। एतदुक्तं भवति। मम जाया स्वतः सतीति मा मनसि मंस्थाः। न हि स्त्री स्वतः सती भवति, स्त्रीत्वादेव। तदुक्तम्–रहो नास्ति क्षणो नास्ति नास्ति चोपनिमन्त्रकः। तेन नारद नारीणां सतीत्वमुपजायते॥ कथं न तस्याः सतीत्वमिति चेत्, तव समानो युवा नास्ति। यद्यभविष्यत् तस्याः सतीत्वं नाभविष्यत्। किमेतदेव। नेत्याह। असईओ जं च सुहय अम्हे वि असत्यो यच्च सुभग वयमपि, तत्रापि त्वदीयशीलसौन्दर्यमेव निमित्तम्। अयमेव रहस्यभेदः, तुज्झ समाणो जुवा नत्थि इति। सदृशार्थैरतुलोपमाभ्यां तृतीया वा (cf. पाणिनि २,३,७२] इति षष्ठी। हेतुपर्यायोक्तिभ्यां संकरोऽलंकारः ॥१७४॥

१७५) अन्ध्रलक्ष्म्याः। [सर्वस्वेऽपि दग्धे तथापि खलु हृदयस्य निर्वृतिरेव। यत्तेन ग्रामदाहे हस्ताहस्तिकया घटो गृहीतः॥] कश्चिद् व्यसने समुपस्थिते पारम्पर्येण प्रियकरस्पर्शसुखं समासाद्य स्वगतमिदमाह। सव्वस्सम्मि वि डड्ढे सर्वस्वेऽपि दग्धे तह वि हु हिययस्स निव्वुइ च्चेय

---

१ W. असईओ सुहअ जं च; २ W. बीअं. ३ W. डड्ढे;

W230 १७६) जाइज्ज वणुद्देसे खुज्जो वि हु खन्नुओ झडियवत्तो ।
मा माणुसम्मि लोए चाई रसिओ दरिद्दो य ॥७६॥

W231 १७७) तुज्झ[2] य सोहग्गगुणं अमहिलसरिसं च साहसं मज्झ ।
जाणइ गोलाऊरो वासारत्तद्धरत्तो य ॥७७॥

W232 १७८) ते वोलिया वयंसा[3] ताण कुडंगाण खन्नुया सेसा ।
अम्हे वि गयवयाओ मूलु[4]च्छेयं गयं पिम्मं ॥७८॥

तथापि खलु हृदयस्य निर्वृतिरेव । किं कारणम् । जं तेण गामडाहे हत्था-हत्थि कुडो गहिओ यत्तेन हृदयेप्सितेन पुरुषेण ग्रामदाहे हस्ताहस्तेन कुटो घटको गृहीतः । तेन मां सर्वस्वदाहोऽपि न दुःखाकरोतीत्यर्थः । कुडो घटकः । निर्वृतिः सुखम् ॥१७५॥

१७६) वल्लभस्य । [जायेत वनोद्देशे कुब्जोऽपि खलु स्थाणुको विशीर्णपत्रः । मा मानुषे लोके त्यागी रसिको दरिद्रश्च ॥] कश्चिन्महात्मा दैवदोषेण दुर्गतिं प्राप्तः परोपकारमपारयन् कर्तुं स्वगतं शोचति । जाइज्ज वणुद्देसे जायेत वनोद्देशे खुज्जो वि हु खन्नुओ झडियवत्तो कुब्जोऽपि स्थाणुकः स्रस्तपत्रः । मा माणुसम्मि लोए चाई रसिओ दरिद्दो य मा मानुषे लोके त्यागी रसिको दरिद्रश्च कश्चिज्जनो जनिष्ट । खुज्जो कुब्जः । खन्नुओ स्थाणुकः ॥१७६॥

१७७) असमसाह(स)स्य । [तव च सौभाग्यगुणम् अमहिला-सदृशं च साहसं मम । जानाति गोदावरीपूरो वर्षारात्रार्धरात्रश्च ॥] तुज्झ य सोहग्गगुणं तव च सौभाग्यगुणं अमहिलसरिसं च साहसं मज्झ अम-हिलासदृशं च साहसं मम । जाणइ गोलाऊरो जानाति गोदावरीपूरः । किमेष एव । नेत्याह । वासारत्तद्धरत्तो य वर्षारात्रार्धरात्रश्च जानातीति । समुच्चयालंकारः ॥१७७॥

१७८) [तेऽतिक्रान्ता वयस्यास्तेषां संकेततरूणां स्थाणुकाः शेषाः । वयमपि गतवयसो मूलच्छेदं गतं प्रेम ॥] काचिद् गतवयाः, एव-

---

१W. णीसहो सिढिलवत्तो; २W. तस्स. ३W. वअस्सा, ४W. मूलुच्छेअं.

W233 १७९) थणवयेणणियंबोवरि डसणंका गयवयाण विलयाण ।
उव्वसियाणंगणिवासमूलबंध व्व दीसंति ॥७९॥

W234 १८०) जस्स जहिं चिय पढमं तिस्सा अंगम्मि निवडिया दिट्ठी ।
तस्स तहिं चेय ठिया सव्वंगं केण वि न दिट्ठं ॥८०॥

माह । ते वोलिया वयंसा ते तथाभूता इङ्गिताकारवेदिनोऽतिक्रान्ता वयस्याः, ताण कुडंगाण खन्नुया सेसा तेषां दर्शनमनोहारिणां कुडङ्गकानां संकेततरूणां स्थाणुकाः शेषाः । अम्हे वि गयवयाओ वयमपि गतवयसः मूलच्छेयं गयं पिम्मं मूलच्छेदं गतं प्राप्तं प्रेम आलम्बनोद्दीपनविभावाभावात् । एतत्सर्वं कालेन समूलकाषं कषितमित्यर्थः । वोलिया अतिक्रान्ताः । वयंसा सुहृदः । कुडंगो लघुवृक्षः । खन्नुओ स्थाणुकः । सेवादित्वात् (वररुचि, ३,५२) द्वित्वम । समुच्चयोऽलंकारः ॥१७८॥

१७९) निरुपमस्य । [स्तनवदननितम्बोपरि दशनाङ्काः गतवयसां वनितानाम् । उद्वासितानङ्गनिवासमूलबन्धा इव दृश्यन्ते ॥] थणवयणणियंबोवरि डसणंका दीसंति स्तनवदननितम्बानामुपरि दशनाङ्का दृश्यन्ते दन्तक्षतानि विलोक्यन्ते । कासाम् । विलयाण वनितानाम् । गयवयाण गतवयसाम् । कीदृशाः । उव्वसियाणंगणिवासमूलबंध व्व उद्वासितानङ्गनिवासनीवीबन्धा इव दृश्यन्ते इति सम्बन्धः । उत्प्रेक्षाऽलंकारः ॥१७९॥

१८०) सर्वसेनस्य । [यस्य यत्रैव प्रथमं तस्या अङ्गे निपतिता दृष्टिः । तस्य तत्रैव स्थिता सर्वाङ्गं केनापि न दृष्टम् ॥] कश्चित् कस्याश्चिल्लावण्यातिरेकं प्रकटयितुम् इदमाह । जस्स जहिं चिय पढमं यस्य यत्रैव प्रथमं तिस्सा अंगम्मि निवडिया दिट्ठी तस्या अङ्गे निपतिता दृष्टिः, तस्स तहिं चेय ठिया तस्य तत्रैव स्थिता । एतदुक्तं भवति । यस्य पुंसः तद्वदनकमले दृष्टिः प्रथमं निपतिता तस्य पूर्णेन्दुबिम्बसंवादिनि तस्मिन्नेव

३W. जहण; ४W. णहरंका

W235 १८१) विरहे विसं व विसमा अमयमया होइ संगमे अहियं ।
किं विहिणा समयं चिय दोहिं पि पिया विणिम्मविया॥८१

लावण्यामृतरसास्वादनलालसा स्थिता । यस्य तु नेत्रोत्पलयोः पतिता तस्य तु तदीयं तरलिमगुणं, तीक्ष्णपक्ष्मलतां, निकामकमनीयत्वं कनीनिकयोः, धवलभागभ्राजिष्णुतां, केतकदलद्राधिमाणं, रक्तोत्पलपलाशपाटलापाङ्गतां च पश्यतः तत्रैव स्थिता । यस्य पुनः स्तनकलशयोर्दृष्टिः पतिता तस्य तदीयं पारिमाण्डल्यं, घनपीनोन्नतत्वगुणं करिकलभकुम्भशोभां च संभावयतः तत्रैव स्थिता । यस्य तु तदीयबाह्वोर्दृष्टिः पतिता तस्व तदीयां शिरोषकुसुमसुकुमारतां चिरं चिन्तयतः तत्रैव स्थिता । यस्व च मध्यदेशे दृष्टिः पतिता तस्यापि प्रतनुलोमलतालावण्यं, नाभिगम्भीरतां, त्रिवलीवलयसौभाग्यं च भावयतः तत्रैव स्थिता । यस्य च ऊरुदण्डद्वये दृष्टिः पतिता तस्यापि करिकराकारतां रूपाद्भुतं च पश्यतः तत्रैव स्थिता । यस्य च पादयोः पतित दृष्टिः तस्यापि तदीयां स्थलकमलकोमलकान्ति नखचन्द्रचन्द्रिकां च चिरं चेतसि चिन्तयतः तत्रैव स्थिता । एवं च यस्य यत्रैव दृष्टिः पतिता तस्य तत्रैव दर्शनसुखस्य अतृप्ता अन्यतो न वलितेति । अत एव सव्वंगं केण वि न दिट्ठं सर्वाङ्गं केनापि न दृष्टम् इति । अङ्गम् अङ्गं तस्या रम्यमिति भावः । पर्यायोक्तिरलंकारः ॥१८०॥

१८१) आदयराजस्य । [विरहे विषमिव विषमा अमृतमया भवति संगमेऽधिकम् । किं विधिना सममेव द्वाभ्यामपि प्रिया विनिर्मिता ॥] विरहे विसं व विसमा पिया विरहे विषमिव विषमा प्रिया, अमयमया होइ संगमे अहियं अमृतमयी भवति संगमेऽधिकम् । किं विहिणा समयं चिय किं विधिना सममेव दोहिं पि द्वाभ्यामपि विषामृताभ्यां पिया विणिम्मविया प्रिया विनिर्मिता, तत्कार्यकारित्वात् ताभ्यां संसृष्टेति संभावना । वियोगावियोगौ तस्या मारणजीवनकाविति तात्पर्यार्थः । विणिम्मविया सृष्टा । सामान्यम् (? साम्यम्) अलंकारः ॥१८१॥

१ W. समअं चिअ किं विहिणा

W236 १८२) अद्दंसणेण पुत्तय सुट्ठु वि नेहाणुबद्धहिययाणं ।
हत्थउडपाणियाइँ व कालेण गलंति पिम्माइं ॥८२॥
W237 १८३) पइपुरउ च्चिय निज्जइ बिंछुयडक्क त्ति विज्जजारहरं ।
सिढिला सहियणकरधरियभुयलयंदोलिरी अज्झा॥८३॥
W238 १८४) विक्केइँ माहमासम्मि पामरो पारयं बइल्लेण ।
निध्दूमम्मुम्मुरे सामलीएँ थणए नियच्छंतो ॥८४॥

१८२) हालस्य । [अदर्शनेन पुत्रिके सुष्टु अपि स्नेहानुबद्धहृदयानाम् । हस्तपुटपानीयानीव कालेन गलन्ति प्रेमाणि ॥] काचित् स्वसखीं शिक्षयितुमिदमाह । पुत्तय कालेण गलंति पिम्माइं पुत्रि कालेन गलन्ति प्रेमाणि । केषाम् । सुट्ठु वि अत्यर्थमपि नेहाणुबद्धहिययाणं स्नेहानुबद्धहृदयानाम् । केन गलन्ति । अद्दंसणेण अदर्शनेन । कानीव । हत्थउडपाणियाइँ व हस्तपुटपानीयानीव इति अस्वाधीनतां दर्शयति । अतोऽनुवर्तस्व प्रियं, प्रियकृतप्रणयप्रौढिमदूरदार्ढ्येन दीर्घं मानं मा कार्षीरित्यर्थः । उपमापर्यायोक्तिभ्यां संकीर्णोऽलंकारः ॥१८२॥

१८३) वेहुरस्य । [पतिपुरत एव नीयते वृश्चिकदष्टेति वैद्यजारगृहम् । शिथिला सखीजनकरधृतभुजलतान्दोलनशीला आर्या ॥] अज्झा विंछुयडक्क त्ति विज्जजारहरं निज्जइ प्रौढयुवतिः वैद्योऽयमिति व्यपदेशेन जारगृहं नीयते वृश्चिकदष्टेति । कथम् । पइपुरउ च्चिय पत्युः पुरत एव । कीदृशी । सिढिला शिथिला । सहियणकरधरियभुयलयंदोलिरी सखीजनकरधृतान्दोलनशीलभुजलता । मा खलु अस्याः पतिरयं मदनवेदनां विदांकरोत्विति कृतकवृश्चिकविषव्यथाश्लथाङ्गीति विदग्धेन सखीजनेन करधृतविलोलदोलायमानदोर्लता वैद्योऽयमिति व्याजेन जारगृहं सा तरुणी नीयत इत्यर्थः । अज्झा प्रौढयुवतिः । विंछुओ वृश्चिकः । लेशालंकारः ॥१८३॥

१८४) मल्लसेनस्य । [विक्रीणाति माघमासे पामरः प्रावारकं वृषभेण । निर्धूममुर्मुरौ श्यामल्याः स्तनौ पश्यन् ॥] पामरो पारयं विक्केइ

१ W. णेहाणुबंधघडिआइं. २ W. विछुंअदट्ठेति जारवेज्जघरं; ३ W. णिउणसहीकरधरिआ भुअजुअलंदोलिरी बाला; ४ W. विविकणइ; ५ W. पारिडिं.

W240 १८५) अंधलयबोरपत्थिं व माउया मह पइं विलुंपंति ।
ईसायंति मह च्चिय छिप्पाहिंतो फणो जाओ ॥८५॥
W239 १८६) सच्चं भणामि मरणट्ठिय म्हि पुण्णे तडम्मि तावीए ।
अज्ज वि तत्थ[2] तह च्चिय वलंति नयणा कुडंगम्मि॥८६॥

पामरः प्रावारकं विक्रीणाति । केन । बइल्लेण वृषभेण । कदा । माहमासम्मि माघमासे । किं कुर्वन् । सामलीएँ थणए नियच्छंतो श्यामायाः पयोधरौ पश्यन् । कथंभूतौ । निध्दूममुम्मुरे निर्धूमकरीषाग्निकल्पौ । अनेनैव सोष्मणा कान्ताकुचकलशद्वयेन शिशिरनिशागमं गमयिष्यामीति किमेतेन अन्तर्गडुना प्रावारकेणेति भावः। पामरो ग्रामीणः। पारयं प्रावारकशब्दात् यावदादित्वात् (वररुचि ४, ५) लोपे सन्धौ च रूपम् । मुम्मुरो कारीषाग्निः । संकरोऽलंकारः । शृङ्गाराभासोऽयम् ॥१८४॥

१८५) [अन्धबदरपात्रीमिव मातर्मम पतिं विलुम्पन्ति । ईर्ष्यन्ति मह्यमेव च शेफात् फणा जाता ॥] हे माउया मातः । अंधलयबोरपत्थिं व मह पइं विलुंपंति ईसायंति मह च्चिय अन्धबदरपात्रीमिव मम पतिं विलुम्पन्ति, ईर्ष्यन्ति मह्यमेव । स एष छिप्पाहितो फणो जाओ सोऽयं पुच्छात् फणो जातः । विपरीतमेतत । या एव मम कान्तं कामयन्ते ता एव प्रत्युत मह्यमीर्ष्यन्ति, इति तदिदं पुच्छात् फणोत्पत्त्या उपमीयते । प्रतिवस्तूपमालंकारः । तस्य लक्षणम्—वस्तु किंचिदुपन्यस्य न्यसनात् तत्सधर्मणः । साम्यप्रतीतिरस्तीति प्रतिवस्तूपमा मता (काव्यादर्श, २, ४६) ॥१८५॥

१८६) [सत्यं भणामि मरणस्थिताऽस्मि पुण्ये तटे ताप्याः । अद्यापि तत्र तथैव वलतो नयने लतागृहे ॥] काचिदसती वयःपरिणत्या मरणावस्थायां स्वभावम् आविष्कुर्वती इदमाह । पुण्णे तडम्मि तावीए पुण्ये तटे ताप्यभिधानाया नद्याः मरणट्ठिय म्हि सच्चं भणामि मरणस्थिताऽहं सत्यं भणामि । किं तदित्याह । अज्ज वि तत्थ तह च्चिय वलंति नयणा

१W. मरणे ठिअ म्हि, २W. तत्थ कुडंगे णियडइ दिट्ठी तह च्चेअ

W241 १८७) अप्पत्तपत्तयं पाविऊण नवरंगयं हलियसुन्हा[1] ।
उयह तणुई न मायइ रुंदासु वि गामरच्छासु ॥८७॥

W242 १८८) थक्के[2] पियाएँ पियजंपियाइँ पिय हिययणिव्वुइयराइं
विरलो हु जाणइ जणो उप्पन्ने जंपियव्वाइं ॥८८॥

W243 १८९) छज्जइ पहुस्स ललियं पियाएँ माणो खमा समत्थस्स ।
जाणंतस्स य भणियं मउणं[3] च अयाणमाणस्स ॥८९॥

अद्यापि तत्र तथैव नयने वलतः । कं ' कुडंगम्मि लतागृहे । अस्यामप्य-वस्थायां सानुरागं नयने संकेतलतागृहं वलतः इति सत्यमेतत् । मरणाव-स्थायां को नाम असत्यं जल्पतीत्यर्थः । नयणा इति व्यत्ययो बहुलम् इति पुंसि निर्देशः । कुडंगं लतागृहम् ॥१८६॥

१८७) अनुरागस्य । [अप्राप्तप्राप्तं प्राप्य नववस्त्रं हालिकस्नुषा । पश्यत तन्वी न माति विपुलास्वपि ग्रामरथ्यासु ॥] रुंदं विपुलम् । गतार्था गाथा ॥१८७॥

१८८) मन्मथस्य । [विलम्बे प्रियायाः प्रियजल्पितानि प्रिय हृदयनिर्वृतिकराणि । विरलः खलु जानाति जनः उत्पन्ने जल्पितव्यानि ॥] काचित् प्रतिभाप्रभावेण तत्कालकृतमप्यलीकं प्रच्छादयति प्रिये प्रसन्ना इद-माह । हे प्रिय थक्के विलम्बे सति पियजंपियाइँ प्रियजल्पितानि.... सर्व एव जनो जानाति । कीदृशानि । हियणिव्वुइयराइं हृदयसुखसंपादकानि । कस्याः । पियाएँ प्रियायाः । विरलो हु जाणइ जणो विरलः खलु जानाति जनः उत्पन्ने जंपियव्वाइं उत्पन्ने जल्पितव्यानि इति । त्वमेव केवलं तत्का लोत्पन्नं जानासि येनेदं सद्यःकृतमपि व्यलीकम् अलीकतां नीतमिति भावः ॥१८८॥

१८९) वल्लभट्टस्य । [शोभते प्रभोर्ललितं प्रियाया मानः क्षमा समर्थस्य । जानतश्च भणितं मौनं चाजानतः ॥] छज्जइ पहुस्स ललियं

---

१ W हलिअसोण्हा, २ W. वक्खेवआइ पिअजंपिआइ परहिअअणिव्वुइअराइं. ३ W मोणं

W244 १९०) वेविरसिन्नकरंगुलिपरिग्गहक्खलियलेहणीमग्गे ।
सत्थि च्चिय न समप्पइ पियसहि लेहम्मि किं लिहिमो ॥९०॥

W246 १९१) मामि हिययं व पीयं तेण जुवाणेण मज्जमाणीए ।
न्हाणहलिद्दीकडुयं अणुसुत्तजलं पियंतेण ॥९१॥

शोभते प्रभोर्विलसितं, पियाएँ माणो प्रियाया मानः, खमा समत्थस्स क्षमा समर्थस्य । जाणंतस्स य भणियं जानतश्च सतो भणितम्, मउणं च अयाणमाणस्स मौनं चाजानतः शोभते । इतोऽन्यथारूपं हासाय जायते, इत्यर्थः । छज्जइ इति सर्वत्र योज्यम् । दीपकमलंकारः ॥१८९॥

१९०) सुन्दरस्य । [वेपमानस्विन्नकराङ्गुलिपरिग्रहस्खलितलेखनीमार्गे । स्वस्त्येव न समाप्यते, प्रियसखि लेखे किं लिखामः ॥] काचित् कयाचित् प्रियतमाय सखि लेखो लिख्यताम् इत्युक्ता इदमाह । पियसहि प्रियसखि, किं लिहिमो किं लिखामः । यतः सत्थि च्चिय न समप्पइ स्वस्त्येव न समाप्यते । क्व । लेहम्मि लेखे । कथंभूते । वेविरसिन्नकरंगुलिपरिग्गहक्खलियलेहणीमग्गे कम्प्रप्रस्विन्नकराङ्गुलिपरिग्रहस्खलितलेखनीमार्गे । इह हि बहु लेखनीयं या लिखति, लिख्यते च यस्य, तयोर्द्वयोरपि नामधामनी तदनु चोत्कण्ठाकण्ठग्रहणस्वकायकल्याणवार्ताकीर्तनादि कार्यं पर्यन्तमिति । तत्र तावदादौ यत् श्रियः सूचकं स्वस्तीति (पदं) तदपि न समाप्यते, किमुतान्यदिति । वेविरसिन्न इत्यादि विशेषणद्वारेण कारणोक्तिः । कम्पस्वेदौ सात्त्विकभावौ । उत्तरमलंकारः । तस्य लक्षणम्–उत्तरवचनादित्यादि (रुद्रट, ७,९३) ॥१९०॥

१९१) इल्लकस्य । [सखि हृदयमिव पीतं तेन यूना मज्जन्त्याः । स्नानहरिद्राकटुकम् अनुस्रोतोजलं पिबता ॥] मामि सखि, मज्जमाणीए हियय व पीयं मज्जन्त्या हृदयमिव पीतम् । अर्थात् ममेति । केन । तेण

१ W. मज्जमाणाए, २ W. हलिद्दा, ३ W अणुसोत्त जलं.

W245 १९२) दिव्वम्मि पराहुत्ते पत्तिय घडियं वि विहडइ नराणं ।
कज्जं वालुयवडलं व कह वि बंधं[1] च्चिय न एइ ॥९२॥
W247 १९३) जीयं[3] असासयं चिय न नियत्तइ जुव्वणं अइक्कंतं ।
दियहा दियहेण[4] समा न हुंति, किं निट्ठुरो लोओ ॥९३॥
W248 १९४) उप्पाइयदव्वाण वि खलाण को भायणं, खलु च्चेय ।
पिक्काइँ वि निंबहलाइँ नवर काएहि खज्जंति ॥९४॥

जुवाणेण तेन यूना । किं कुर्वता । अणुसुत्तजलं पियंतेण अनुगतं यत् स्रोतः तत्र जलं पिबता । किंभूतम् । न्हाणहलिद्दीकडुयं स्नानार्थं या हरिद्रा तया कटुकम् । मदङ्गरागानुरागतया कटुकमपि पयः पिबता तेन अहम् आवर्जिता, इति भावः ॥१९१॥

१९२) [दैवे पराग्भूते प्रतीहि घटितमपि विघटते नराणाम् । कार्यं वालुकापटलमिव बन्ध एव नैति ॥] दिव्वम्मि पराहुत्ते कज्जं सुघडियं पि विहडइ दैवे पराङ्मुखे कार्यं सुघटितमपि विघटते । केषाम् । नराणं पुरुषाणाम् । किमिव । वालुयवडलं व वालुकापटलमिव । कह वि बन्ध च्चिय न एइ कथमपि बन्ध एव नागच्छति । पुनः पुनर्योज्यमानमपि न घटाम् उपैतीत्यर्थः । दैवप्रशंसा । उपमालंकारः ॥१९२॥

१९३) रोलदेवस्य । [जीवितमशाश्वतमेव न निवर्तते यौवनमतिक्रान्तम् । दिवसा दिवसेन समा न भवन्ति, किं निष्ठुरो लोकः ॥] काचिन्नायकं प्रतिबोधयितुं सप्रतिभेदमिदमाह । जीयं जीवितम्, असासयं चिय अशाश्वतमेव । न नियत्तइ न निवर्तते जुव्वणं अइक्कंतं यौवनमतिक्रान्तम् । दियहा दियहेण समा न हुंति दिवसा दिवसेन समा न भवन्ति, दुःखबहुलत्वात्संसारस्य । किं निट्ठुरो लोओ किमर्थं निष्ठुरो लोकः । लोकशब्देनेह प्रियो विवक्ष्यत इति ॥१९३॥

१९४) हाडुलस्य (?राहुलस्य) । [उत्पादितद्रव्याणामपि खलानां को भाजनं, खल एव । पक्वान्यपि निम्बफलानि काकैः केवलं खाद्यन्ते ॥]

१W. वालुअवरणं; २W. बंधं चिअ ण देइ; ३W जिविअं; ४W दिअहेहि.

W 250 १९५) सुयणो न कुप्पइ च्चिय अह कुप्पइ मंगुलं न चिंतेइ ।
अह चिंतेइ न जंपइ अह जंपइ लज्जिओ होइ ॥९५॥

W251 १९६) सो अत्थो जो हत्थे तं मित्तं जं निरंतरं वसणे ।
तं रूवं जत्थ गुणा तं विन्नाणं जहिं धम्मो ॥९६॥

उप्पाइयदव्वाण वि खलाण को भायणं उत्पादितद्रव्याणामपि खलानां को भाजनम् । उच्यते । खलु च्चेय, खल एव तदीयद्रव्यभाग्भवतीत्यर्थः । अमुमेवार्थम् अर्थान्तरन्यासेन द्रढयति । पिक्काइँ वि निंबहलाइँ नवर काएहि खज्जंति पक्वान्यपि निम्बफलानि नूनं काकैरेवोपभुज्यन्ते, इत्यत्र अर्थान्तरन्यासोऽलंकारः । अङ्गं पुनरुत्तरम् । प्रश्नादप्युत्तरं यत्र (रुद्रट,७ ९६) ॥ १९४ ॥

१९५) सुचरितस्य । [सुजनो न कुप्यत्येव, अथ कुप्यति पापं न चिन्तयति । अथ चिन्तयति न जल्पति, अथ जल्पति लज्जितो भवति ॥] सुयणो न कुप्पइ च्चिय सुजनो न कुप्यत्येव । अह कुप्पइ मंगुलं न चिंतेइ अथ कथंचित् कुप्यति पापं न चिन्तयति । अह चिंतेइ न जंपइ अथ चिन्तयति न जल्पति, अह जंपइ लज्जिओ होइ अथ जल्पति लज्जितो भवति । मंगुलं पापम् ॥१९५॥

१९६) सज्जनस्य । [सोऽर्थो यो हस्ते तन्मित्रं यन्निरन्तरं व्यसने । तद्रूपं यत्र गुणाः, तद् विज्ञानं यस्मिन् धर्मः ॥] सो अत्थो जो हत्थे सोऽर्थो यो हस्ते । परहस्तगतं व्यसने न प्राप्यत इत्यर्थः । तं मित्तं जं निरंतरं वसणे तन् मित्रं यन्निरन्तरं व्यसने । अन्यदा (? अन्यथा) किं मित्रेणेत्यर्थः । तं रूवं जत्थ गुणा तद्रूपं यत्र गुणाः । गुणरहितं रूपं न फलायेत्यर्थः । तं विन्नाणं जहिं धम्मो तद् विज्ञानं यत्र धर्मः । धर्मरहितं विज्ञानम् इहामुत्र च शर्मणे न भवतीत्यर्थः । परिसंख्यालंकारः । तस्य लक्षणम् । पृष्टमपृष्टं वा सद् गुणादि यत् कथ्यते क्वचित् तुल्यम् । अन्यत्र तु तदभावः प्रतीयते सेति परिसंख्या (रुद्रट, ७.७९) ॥१९६॥

१W. विप्पिअं; २W रूअं

W252 १९७) चंदमुहि चंदधवला दीहा दीहच्छि तुह विओयम्मि ।
चउजामा सयजाम व्व जामिणी कह वि वोलीणा ॥९७॥

W253 १९८) अकुलीणो दोमुहओ ता महुरो भोयणं मुहे जाव ।
मुरउ व्व खलो जिण्णम्मि भोयणे विरसमारसइ ॥९८॥

---

१९७) हालस्य।[चन्द्रमुखि चन्द्रधवला दीर्घा दीर्घाक्षि तव वियोगे। चतुर्यामा शतयामेव यामिनी कथमप्यतिक्रान्ता ॥] कश्चिन्नायको नायिकां प्रति स्वानुरागं प्रकटयितुमिदमाह। हे चंदमुहि चन्द्रमुखि, चंदधवला चन्द्रधवला दीहा दीहच्छि दीर्घा दीर्घाक्षि तुह विओयम्मि तव वियोगे, चउ-जामा जामिणी कह वि वोलीणा चतुर्यामा यामिनी कथमपि कष्टेन अति-क्रान्ता । केव । सयजाम व्व शतयामेव । चतुर्यामाऽपि त्वद्वियोगेन मम शतयामेव यामिनी भूतेत्यर्थः । लाटानुप्रासो वर्णालंकारः ॥१९७॥

१९८) रिन्द्रस्य (? इन्द्रस्य । [अकुलीनो द्विमुखस्तावन्मधुरो भोजनं मुखे यावत् । मुरज इव खलो जीर्णे भोजने विरसमारसति ॥] खलो दुर्जनः ता महुरो भोयणं मुहे जाव तावन्मधुरो भोजनं मुखे यावत् । भोज्यमान एव मधुरं वक्ति । जिण्णम्मि भोयणे विरसमारसइ जीर्णे भोजने विरसमार-सतीति परुषाक्षरं वक्ति । क इव ।मुरउ व्व मुरज इव। कीदृशः खलो मुरजश्च। अउलीणो अकुलीनोऽनभिज्ञातः । मुरजस्तु कौ पृथिव्यां लीनो न भवति । स हि स्कन्धमारोप्य वाद्यत इति । पुनश्च कीदृशः । दोमुहओ द्विमुखः । खलः प्रियाप्रियवादित्वात्, मुरजस्तु द्विमुख उभयतोऽनुबद्धत्वात् । अयं भोजनं मार्जनापिण्डो मुखे यावत् तावदेव मधुरोऽतिसुखदः । । जीर्णे स्रस्ते च तस्मिन् विरसमारसति कर्णकटु रटतीत्यर्थः । मृदङ्गे भोजनं मार्जनादि-पिण्डः । तिस्रो मार्जना भवन्ति मायूरी अर्धमायूरी कामगवेधा (? कार्मारवी) इति । उपमालंकारः ॥१९८॥

W254 १९९) तह सुन्हाएँ पुलइओ दरवलियावंगतारयं पहिओ ।
जह वारिओ वि घरसामिएण ओणिद्धएँ वसिओ ॥९९॥

W575 २००) रुंदारविंदमंदिरमयरंदाणंदिरालिरिंछोली ।
रणरणइ कसणमणिमेहल व्व महुमासलच्छीए ॥ १०० ॥

१९९) [तथा स्नुषया प्रलोकित ईषद्वलितापाङ्गतारकं पथिकः । यथा वारितोऽपि गृहस्वामिना अपनीध्रके उषितः ॥] तह सुन्हाएँ पहिओ पुलोइओ तथा कथंचिदवर्णनीयेन विधिना स्नुषया पथिकः प्रलोकितः जह वारिओ वि घरसामिएण यथा वारितोऽपि गृहस्वामिना "माऽस्मिन्वेश्मनि वात्सीः" इति, ओणिद्धए वसिओ अपनीध्रके उषितः अनाच्छादितप्रदेश एवोषितः । कया अवलोकितः । दिट्ठीए दृशा । दरवलियावंगतारयं दरवलितापाङ्गतारकम् इति क्रियाविशेषणम् । अत्र ललितचेष्टालंकारः । क्षणमीषत्साचिविलोकितं च सभ्रूलतास्यहसितं च । सिचयैकाञ्चलनिरुद्धवदनेन्दुचन्द्रिकाप्रसरम् ॥ मनसिजगुरूपदिष्टं चेष्टितमित्यादि यत् समुद्भवति । स्त्रीणां स्वभावचेष्टालङ्कितं तत् कीर्तितं कविभिः ॥ दरं ईषत् । सुन्हा वधूः । नीध्रं पटलम् । हेतुरलंकारः । "कारकज्ञापकौ हेतू" इत्यादि (काव्यादर्श, २,२३५) ॥ १९९ ॥

२००) पालित्तकस्य । [विशालारविन्दमन्दिरमकरन्दानन्दशीला अलिमाला । रुणरुणायते कृष्णमणिमेखलेव मधुमासलक्ष्म्याः ॥] रुंदारविंदमंदिरमयरंदाणंदिरालिरिंछोली रणरणइ रुंदं विस्तीर्णं यद् अरविन्दमन्दिरं तत्र यो मकरन्दस्तेन आनन्दशीला या अलिरिंछोली मधुकरमाला सा रुणरुणायते । कसणमणिमेहल व्व कृष्णमणिमेखलेव । कस्याः । महुमासलच्छीए मधुमासलक्ष्म्याः । अत्र मधुरस्वरत्वं श्यामलिमा च भ्रमरमालायाः इन्द्रनीलमणिमेखलाकल्पोपमाबीजम् । रुंद विस्तीर्णम् । उपमालंकारः ॥ २०० ॥ द्वितीयं शतं समाप्तम् ।

१W. ओलिंदए. २W. मयरंदाणंदियालिरिंछोली; ३W. झणझणइ

तीयं सयं

W576 २०१) कस्स करो बहुपुण्णप्फलिक्कतरुणो तुहं विसम्मिहिइ ।
थणपरिणाहे वम्महणिहाणकलसे व्व पारोहो ॥ १ ॥

W249 २०२) अज्ज मए गंतव्वं घणंधयारे वि तस्स सुहयस्स ।
अज्झा निमीलियच्छी पयपरिवाडिं घरे कुणइ ॥ २ ॥

---

२०१) इन्दुराजस्य । [कस्य करो बहुपुण्यफलैकतरोस्तव विश्रमिष्यति । स्तनपरिणाहे मन्मथनिधानकलशे इव प्ररोहः ।।] ओं नमो जिनाय । काचित् कान्तं युक्त्या प्रशंसन्ती इदमाह । कस्स करो बहुपुण्णप्फलिक्कतरुणो थणपरिणाहे तुहं विसम्मिहिइ बहुपुण्यफलैकतरोः कस्य करः स्तनपरिणाहे तव निपतिष्यति (? विश्रमिष्यति) । कस्मिन् क इव वम्महणिहाणकलसे व्व पारोहो मन्मथनिधानकलशे प्ररोहः पल्लवः इव । निधानकलशस्योपरि तरोः प्ररोहो रोहतीति लोकप्रसिद्धिः । धन्यः खल्वसौ यस्य करः तव परिणाहिनि स्तनमण्डले पतिष्यतीति भावः । बहुपुण्णप्फलेति सेवादिगणपाठात् (वररुचि, ३,५८) द्वित्वम् ।। २०१ ॥

२०२) हालस्य [अद्य मया गन्तव्यं घनान्धकारेऽपि तस्य सुभगस्य । युवतिर्निमीलिताक्षी पदपरिपाटीं गृहे करोति ॥] तरुणी पदपरिपाटीं गृहे करोति । कथंभूता । निमीलियच्छी निमीलितनयना । अज्ज मए तस्स सुहयस्स घणंधयारे वि गंतव्वं अद्य मया तस्मै सुभगाय घनान्धकारेऽपि गन्तव्यम् । तत्कथं तिरस्कृतनयनालोकेषु (तमस्सु) गम्यते इति प्रागेव प्रियभवनमनुसंधाय निमीलिताक्षी गृह एव गतागतं करोतीति भावः । तस्य सुभगस्येति तादर्थ्यचतुर्थ्यर्थे षष्ठी । गृह इति काकाक्षिगोलकन्यायेन वा उभयत्र संबन्धनीयम् । अभिसारिका नायिका । तस्या लक्षणम्—या दूतिकाऽऽगमनकालमपारयन्ती सोढुं स्मरज्वरभरार्तिपिपासितेव । निर्याति वल्लभजनाधरपानलोभात् सा कथ्यते कविवरैरभिसारिकेति ।। तस्याः

W255 २०३) लहुयंति लहुं पुरिसं पव्वयमित्तं पि दो य कज्जाइं
निव्वरियमणिव्वूढे निव्वूढे जं अणिव्वरियं ॥ ३ ॥

W256 २०४) कं तुंगथणुक्खित्तेण पुत्ति दारट्ठिया पुलोएसि ।
उन्नामियकलसणिवेसियग्घकमलेण व मुहेण ॥ ४ ॥

प्रियाभिसरणे बहुलानि[3] (?) । सा ग्रीष्मसमयमध्याह्ना अग्न्या-द्युपद्रवभवश्च कलकलभस्वस्वभाव श्वसिति (?) । लक्षितदुर्दिनहैमवतीति (?) चैव । नीहारपातपातात् पुरस्थानवेति (?) निजकालाः । पराङ्गना चेयम् । स्वीया सर्वकामिनी चेति । या तयोरावतना सा प्रार्थितेव प्रस्तावतीव तं स्वैरं गच्छेत् । अप्रार्थिताऽपि वाऽन्यासह (? अन्यया सह) । सा प्रगल्भा या गतो गच्छेत् (?) नलकूबरमिता (?) प्रथमवरूमरागमश्नीयात् (?) । अन्याङ्गनाऽभिसरति रुदित दिशि दिशि भयतरलदृष्टिपातेन । स्मररूजायै दलितासितोत्पलस्रजमिव सृजन्ती । स्वीया व्यभिसरति । पतिं प्रयच्छति प्रथमनायिका भीत्या इत्यादि । एतत् स्वयं प्राप्तावसरं दर्शयिष्यामः । अज्ञा उपभोगयोग्या युवतिः ॥ २०२ ॥

२०३) शूद्रकस्य । [लघयतो लघु पुरुषं पर्वतमात्रमपि द्वे च कार्ये । निवेदनमनिर्व्यूढे निर्व्यूढे यदनिवेदनम् ॥] दो य कज्जाइं पुरिसं लहुं लहुयंति द्वे च कार्ये पुरुषं लघु शीघ्रं लघयतः । किंविशिष्टं पुरुषम् । पव्वयमित्तं पि पर्वतमात्रमपि । के ते द्वे कार्ये इत्याह । निव्वरियं दुःखनिवेदनं यत् अणिव्वूढे अभरसहे पुंसि, निव्वूढे जं अणिव्वरियं निर्व्यूढे यद् दुःखानिवेदनम् ॥ २०३ ॥

२०४) गोविन्दस्वामिनः । [कं तुङ्गस्तनोत्क्षिप्तेन पुत्रि द्वारस्थिता प्रलोकयसि । उन्नामितकलशनिवेशितार्धकमलेनेव मुखेन ॥] पुत्ति पुत्रि कं तुंगथणुक्खित्तेण मुहेण द्वारट्ठिया पुलोएसि कं पुरुषं तुङ्गस्तनोत्क्षिप्तेन मुखेन द्वारस्थिता अवलोकयसि । कथंभूतेन मुखेन । उन्नामियकलसणिवे-

१ W. दो वि कज्जाइं; २ W. पलोएसि. ३ The following portion of the commentary is corrupt and abounds in quotations.

W257 २०५) वइविवरणिग्गयदलो एरंडो साहइ व्व तरुणाणं ।
एत्थ घरे हलियवहू इद्दहमित्तत्थणी वसइ ॥ ५ ॥
W258 २०६) करिकलहकुंभसंनिहघणपीणणिरंतरेहिँ तुंगेहिं ।
ऊससिउं पि न तीरइ किं पुण गंतुं हयथणेहिं ॥ ६ ॥

सियग्घकमलेण व उन्नामितकलशनिवेशितार्धकमलेनेव । धन्यः खल्वसौ यस्य त्वं मार्गं मृगाक्षि मृगयसे, इत्यर्थः । उपमाजातिभ्यां संसृष्टिरलंकारः ॥ २०४ ॥

२०५) पालित्तकस्य । [वृतिविवरनिर्गतदलः एरण्डः कथयतीति तरुणानाम् । अत्र गृहे हालिकवधूरेतावन्मात्रस्तनो वसति ॥] एरण्डो गन्धर्वहस्तकतरुः साहइ व्व तरुणाणं कथयतीव तरुणानाम् । कीदृशः । वइविवरणिग्गयदलो वृतिविवरनिर्गतदलः । किं तदित्याह । एत्थ घरे हलियवहू इद्दहमित्तत्थणो वसइ अत्र गृहे हालिकवधूः एतावन्मात्रस्तनी वसति । प्रविततांङ्गुलिकराकारेण पत्रेण यौवनप्रमाणमिव प्रकाशयतीति । स तवेत्यनुमानेन (!) उत्प्रेक्षा । तदुक्तं वक्रोक्तिजीवितकृता संभावनानुमानेन इत्यादिना ग्रन्थेन (वक्रोक्तिजीवित, ३, २५) । वई वृतिः । साहइ कथयतीति ॥ २०५ ॥

२०६) तस्यैव (पालित्तकस्य) । [करिकलभकुम्भसंनिभघनपीननिरन्तराभ्यां तुङ्गाभ्याम् । उच्छ्वसितुमपि न शक्यते किं पुनर्गन्तुं हतस्तनाभ्याम् ॥] काचित् कयाचित् सर्वाङ्गावतीर्णतारुण्यभरनिर्भरा प्रियाभिसरणेऽभिहिता इदमाह । हयथणेहिं ऊससिउं पि न तीरइ किं पुण गंतुं हतपयोधराभ्याम् उच्छ्वसितुमपि न शक्यते किं पुनर्गन्तुम् । कथंभूताभ्याम् । गयकलहकुंभसंनिहघणपीणणिरंतरेहिँ गजकलभकुम्भसंनिभघनपीननिरन्तराभ्याम् । पुनश्च कीदृशाभ्याम् । तुंगेहिं तुङ्गाभ्याम् । ईदृशेनामुना कुम्भद्वयेन उच्छ्वासोऽपि न मे इति । गच्छेति का कथा मन्यसे, इत्यर्थः ॥ २०६ ॥

१W. गअकलह.

W259 २०७) मासपसूयं छम्मासगब्भिणिं इक्कदियहजरियं च ।
रंगुत्तिण्णं च पियं पुत्तय कामंतओ होहि ॥ ७ ॥
W260 २०८) पडिवक्खमन्नुपुंजे लायण्णकुडे[1] अणंगगयकुंभे ।
पुरिससयहिययधरिए कीस थणंती थणे वहसि ॥ ८ ॥

२०७) कविराजस्य । [मासप्रसूतां षण्मासगर्भिणीम् एकदिवसज्वरितां च रङ्गोत्तीर्णां च प्रियां पुत्रक कामयमानो भव ॥] मासप्रसूतां प्रियां पुत्रक कामयमानो भव । मासप्रसूताया अलसश्लथाङ्ग्या गात्रे प्रियानुरागातिरेकः स प्रियस्य रिरंसां जनयति । एवं षण्मासगर्भिण्याः एकदिवसज्वरितायाः रङ्गोत्तीर्णायाश्च विश्रमशिथिलाङ्ग्याः वेदितव्यम् । अपरिपूर्णमासा प्रदरप्रसवव्यथाश्लमीना (?) अभिगमनायोग्या युवतिर्भवतीति । किमेतावदेव । नेत्याह । छम्मासगब्भिणिं इक्कदियहजरियं च रंगुत्तिण्णं च कामंतओ कामयमानो भवेति सर्वत्र योज्यम् । आ षण्मासाद् हि गर्भस्रंसनशङ्कया न भार्याऽभिगम्यते । परतस्तु कललघनपेशीपराङ्गुलिपरिपूर्णबहलपिण्डतया गर्भस्य, अभिगम्यत एव । एकदिवसज्वरितायां न तावन्मात्रेणैव शक्तिव्युपरमः । अतः साऽपि सेव्यते, इति । रङ्गोत्तीर्णा वस्तुश्रमशिथिलसर्वावयवाऽपि रतिरिरंसां जनयतीति । अतः साऽपि सविशेषतः सेव्या । तिसृणामिति च सामीकक्षतसामर्थ्यात् (?) नार्या रिरंसा प्रियस्यानुरागातिशयहेतुरिति । अन्यस्तु यो मासप्रसवां षण्मासगर्भिणीम् एकदिवसज्वरितामपि कामयमानावासास्वविरोधाद (?) रङ्गोत्तीर्णां प्रियां कामयमानो भवेत्याह । अपरे तु–मासप्रसूतां कामयमानः स गर्भिणीम् एकदिवसज्वरितां रङ्गोत्तीर्णां च अङ्गना मृगाङ्गा भवतीति (?) अतः सैव सेव्येति व्याचक्षते । शब्दपूर्ववाक्याविशेषवर्तिने (?) । रङ्गो नृत्यभूमिः ॥ २०७ ॥

२०८) हालस्य । [प्रतिपक्षमन्युपुञ्जौ लावण्यघटौ अनङ्गगजकुम्भौ । पुरुषशतहृदयधृतौ कस्मात् स्तनन्ती स्तनौ वहसि ॥] किमिति स्तनन्तो स्तनौ वहसि । कीदृशौ । पडिवक्खमन्नुपुंजे प्रति-

[1] W. लावण्णउडे.

W261 २०९) घरिणिघणत्थणपिल्लणसुहेल्लिपडियस्स हुंतपहियस्स ।
अवसउणंगारयवारविट्ठिदियहा सुहावंति ॥ ९ ॥

W262 २१०) सा तुज्झ कए बालय [1]निच्चं धरदारतोरणणिसण्णा ।
ओ सूसइ वंदणमालिय व्व दियहं चिय वराई ॥१०॥

पक्षस्य सपत्नीजनस्य मन्युराशी । अणंगगयकुंभे अनङ्गगजकुम्भौ । ईदृशौ पयोधरौ किमिति स्तनन्ती: वहसि । विशेषणद्वारेण कारण-माह । पुरिससयहिययधरिए पुरुषशतहृदयादो भासरतया(?)सुवहावपि किं स्तनन्ती स्तनौ वहसीत्यर्थः । तव स्तनौ समस्तयूनां मनस्सु सं-विभक्तभारतया वस्तुसुवहं भवति (? वस्तुसुवहौ भवतः) । स्फरसि वर्तस (?) इति तात्पर्यार्थः । मन्नू मन्युः । कुडो घटकः । रूपकसमासोपमा (?) संकरानुगृहीतः पर्यायोक्तिरलंकारः ॥ २०८ ॥

२०९) ऊर्ध्ववंशस्य । [गृहिणीघनस्तनप्रेरणसुखपतितस्य भ-वत्पथिकस्य । अपशकुनाङ्गारकवारविष्टिदिवसाः सुखयन्ति ॥] हुंतपहि-यस्स भवत्पथिकस्य सुहावंति सुखयन्ति । के ते । अवसउणंगारयवार-विट्ठिदियहा अपशकुनाङ्गारकवारविष्टिदिवसाः । कीदृशस्य तस्य । घरिणि-घणत्थणपिल्लणसुहेल्लिपडियस्स गृहिण्या यौ घनौ स्तनौ, ताभ्यां यत् प्रेरण-सुखं, तत्र पतितस्य । सर्वस्यैव प्रवसतः सतोऽपशकुनादीनि दुर्निमित्तानि दुःखाय जायन्ते । तस्य पुनः प्रत्युत प्रमदाघनस्तनकलशस्पर्शकेलिदुर्ललितस्य सुखाय जायन्त इति । अनुकूलो नायकः । सुहेल्ली सुखम् । अङ्गारक-वारो मङ्गलदिनम् । विष्टिः भद्रा ॥ ५०९ ॥

२१०) दुर्विदग्धस्य । [सा तव कृते बालक नित्यं गृहद्वारतोरण-निषण्णा । ओ शुष्यति वन्दनमालिकेव दिवसमेव वराकी ।।] हे बालय सा वराई तुज्झ कए ओ सूसइ हे बालक सा त्वदर्थे वराकी नित्यं शुष्यति म्लानिमायाति । दियहं चिय दिवसमेव । कीदृशी । घरदारतोरणणिसण्णा

---

१ W. अणिसं

W263 २११) हसियं सहत्थयालं सुक्कवडं आइएहि[1] पहिएहिं ।
पत्तप्फलसारिच्छे[2] उड्डीणे पूसवंद्रम्मि[3] ११॥
W264 २१२) अज्ज म्हि हासिया मामि तेण पाएसु तह पडंतेण ।
तीए वि जलंतिं दीववट्टिमब्भुत्तंणंतीए[4] ॥ १२ ॥

गृहद्वारतोरणनिषण्णा । का इव । वंदणमाळिय व्व वन्दनमालिकेव । यथा वन्दनमालिका मन्दिरद्वारे तोरणनिषण्गा अतिक्रामति दिवे (? दिवसम्) । वन्दनमालिकां निवेश्य तया सह त्वन्मार्गं मृगयमाणा मृगाक्षी ध्यायती-त्यर्थः । अपश्य (?) सहोक्तिरलंकारः । उभयोरपि उपमानोपमेयभावयोः प्रारम्भणिकत्वात् (?) समुच्चयोपमेयम् इत्यन्ये । ओ इति सूचनायां निपातः ॥ २१० ॥

२११) पालित्तकस्य । [हसितं स्वहस्ततालं शुष्कवटम् आगतैः पथिकैः । पत्रफलसदृक्षे उड्डीने शुकवृन्दे ॥] पहिएहिं हसियं पथिकैर्हसि-तम् । सहत्थयालं स्वहस्ततालं करतले करं ताडयित्वेत्यर्थः । कथंभूतैः । सुक्कवडं आइएहिं शुष्कवटमागतैः । कस्मिन् सति हसितम् । उड्डीणे पूस-वंद्रम्मि उड्डीने शुककुले । कीदृशे । पत्तप्फलसारिच्छे पत्रफलसदृक्षे । शुकानां चञ्चुपुटपाटलिम्ना नीलच्छदच्छवितया च वटविटपिनः पत्रफलसादृश्यम् । आइओ आगतः । पूसो शुकः । वंद्रं वृन्दम् । हास्यो रसः । शुकशकु-न्तोड्डयनम् आलम्बनविभावः । स्वकरतलताडनं सहितम् अनुभावः । संरब्धस्वरनेत्रं यद् विकृष्टोत्कण्ठस्वरहास्यम् । स्वकरताडितकरतलं पुनरपि हसितमित्याहुः । हेतुरलंकारः ॥ २११ ॥

२१२) अन्ध्रलक्ष्म्याः । [अद्यास्मि हासिता सखि तेन पादयो-स्तथा पतता । तयाऽपि ज्वलन्तीं दीपवर्त्तिमभ्युन्नमयन्त्या ॥] अद्य स्वना-यिकां तामनुनेतुं तथा सपत्नीनाम्ना पादयोः पतता तेन यूना ऽहं हा-सिताऽस्मि । सर्वत्रैव खलु सपत्न्यनुकूलाचरणचिह्ननिह्नवपरेण प्रेयसो

१W. उवगएहि; २W. पत्तअफलाण सरिसे; ३W.पूसविंदम्मि; ४W. अब्भु-त्तअंतीए.

W265 २१३) अणुवत्तणं कुणंतो वेसे वि जणे अभिन्नमुहराओ ।
अप्पव्वसो वि सुयणो परव्वसो आहियाईए ॥१३॥

W266 २१४) अणुदियहवड्ढियायरविन्नाणगुणेहिँ जणियमाहप्पो ।
पुत्तय अहियायजणो विरज्जमाणो वि दुल्लक्खो ॥१४॥

प्रसाद्यते । प्रवृत्त इति (?) । न केवलं (तेन) । तीए वि जलंतिं दीववट्टिट-मब्भुत्तणंतोए तयाऽपि ज्वलन्तीमपि दीपवर्त्तिमुत्क्षिपन्त्या अहं हासिते-त्यर्थः । अयमर्थः । मा कदाचित् विभवं (?) मत्प्रियो मां मन्दमन्देन दी-पकोद्योतेन (न) प्रत्यभिजानातीति । तदेषाऽहं तद्वर्त्तिमुद्दीप्य दर्शयामि आत्मानमिति । अथवा अमुना दीपवर्त्तिनो (?) वन्दनरूपेणेङ्गितलिङ्ग-तेन........ । अहुत्तणं (?अब्भुत्तणं) उत्क्षेपणम् । सूक्ष्मो नामालंकारः । तस्य लक्षणम्– इङ्गिताकारलक्ष्योऽर्थ इत्यादि (काव्यादर्श २,२६०) । हास्यो रसः । एष मुखरागपार्श्वग्रहणौष्ठकपोलनासिकास्फुरणैः । करतल-ताडनदृष्टिव्याघातांसकुञ्चनैः कार्यः ॥ हास्योऽपि हासमूलः स्फुटमुत्तमम-ध्यमाधमप्रकृतिः । विकृताङ्गवेषभाषाव्यापारेभ्यः समुद्भवति ॥ २१२ ॥

२१३) शूद्रकस्य । [अनुवर्तनं कुर्वन् द्वेष्येऽपि जनेऽभिन्नमुख-रागः । आत्मवशोऽपि सुजनः परवश आभिजात्येन ॥] काचिदन्यास-क्तमपि नायकगुणेन तथैव वर्तमानं प्रियं भिनत्ति । अप्पव्वसो वि सुयणो आत्मवशोऽपि सुजनः परव्वसो परवशो भवति । कया । आहियाईए अ-भिजातकुलीनतया । किं कुर्वन् । अणुवत्तणं कुणंतो अनुवर्तनं कुर्वन् । वेसे वि जणे द्वेष्येऽपि जनेऽपि । कीदृशः सन् । अभिन्नमुहराओ अभिन्नमु-खरागः । त्वं खलु मयि वीतरागो यत् पुनरनुवृत्तिं विधत्से । अभिजाति-शब्दस्य समृद्ध्यादिगणपाठाद् दीर्घत्वम् (वररुचि, १,२) । अप्पव्वसो अ-परवशः (परव्वसो परवशः) इति सेवादित्वाद् द्वित्वे रूपे आत्मवशप-रवशशब्दयोः । मध्या नायिका स्वीया ॥ २१३ ॥

1W. अहिण्ण; 2W. अप्पवसो वि हु सुअणो.

W267 २१५) विन्नाणगुणमहग्घे पुरिसे वेसत्तणं पि रमणिज्जं ।
जणणिंदिए उण जणे पियत्तणेणावि लज्जामो ॥ १५ ॥
W268 २१६) कह नाम[1] तीएँ तं तइ सहावगरुओ वि थणहरो पडिओ ।
अहवा महिलाण चिरं को वा हिययम्मि संठाइ ॥ १६ ॥

२१४) हालस्य । [अनुदिवसवर्धितादरविज्ञानगुणैर्जनितमाहात्म्यः । पुत्रिके अभिजातजनो विरज्यमानोऽपि दुर्लक्षः ॥] पुत्तय पुत्रिके अहियायजणो विरज्जमाणो वि दुल्लक्खो अभिजातजनो विरज्यमानोऽपि दुर्लक्षः । कीदृशः । जणियमाहप्पो जनितमाहात्म्यः । कैः । अणुदियहवड्ढियायरविन्नाणगुणेहिँ अनुदिवसवर्धितादरविज्ञानगुणैः । यथा यथा अभिजातजनो विरज्यते तथा तथा अधिकाधिकम् आदरविशेषं दर्शयति । अतो मय्ययमनुरक्त इति मा मनसि मंस्था इति । मुग्धाप्रबोधनम् । दक्षिणो नायकः । यः सद्भावं भयं प्रथम (?) गौरवं पूर्वयोषिति । न मुञ्चत्यन्यवृत्तेऽपि ज्ञेयोऽयं दक्षिणो यथा ॥ २१४ ॥

२१५) पराक्रमस्य । [विज्ञानगुणमहार्घे पुरुषे द्वेष्यत्वमपि रमणीयम् । जननिन्दिते पुनर्जने प्रियत्वेनापि लज्जामहे ॥] पुरिसे वेसत्तणं पि रमणिज्जं पुरुषे द्वेष्यत्वमपि रमणीयम् । कथंभूते पुरुषे । विन्नाणगुणमहग्घे विज्ञानगुणमहार्घे । जणणिंदिए उण जणे जननिन्दिते पुनर्जने पियत्तणेणावि लज्जामो प्रियत्वेनापि लज्जामहे । गुणवान् वरं विरक्तोऽपि न पुना रक्तोऽपीतरः, इत्यर्थः । विवेकिपुरुषप्रशंसापरेयमुक्तिः ॥ २१५ ॥

२१६) समरशक्तेः । [कथं नाम तस्यास्तत् तथा स्वभावगुरुकोऽपि स्तनभरः पतितः । अथवा महिलानां चिरं को वा हृदये संतिष्ठते ॥] कह नाम तीएँ कथं नाम तस्याः तं तह सहावगरुओ वि विशेषेण तथा स्वभावगुरुकोऽपि थणहरो पडिओ स्तनभरः पतितः । अहवा महिलाण चिरं को वा हिययम्मि संठाइ कः किल महिलानां

[1] W. तीअ तह सा

W269 २१७) सुयणु वयणं छिवंतं मा सूरं साहुलीएँ वारेहि ।
एयस्स पंकयस्स य जाणउ कयरं सुहप्फंसं ।। १७ ।।

W270 २१८) माणोसढं व पिज्जइ पियाइ माणंसिणीएँ दइयस्स ।
करसंपुडवलिउत्ताणवयणँ मइराएँ गंडूसो ।। १८ ।।

W430 २१९) अन्नो को इ सहावो वम्महसिहिणो हला हयासस्स ।
विज्झाइ नीरसाणं हियए सरसाण पज्जलइ ।। १९ ।।

हृदये चिरं संतिष्ठते । तथेति तेन प्रकारेण । तनुतरतरङ्गभङ्गुरं पुरन्ध्रीणां प्रेम भवतीत्यर्थः । आक्षेपोऽलंकारः । तस्य लक्षणम् । वस्तु प्रसिद्धमिति यद् विरुद्धमिति वाऽस्य वचनमाक्षिप्य । अन्यत् तथात्वसिद्धचै यत्र ब्रूयात् स आक्षेपः ।। (रुद्रट, ८, ५९) । २१६ ।।

२१७) हालस्य । [सुतनु वदनं स्पृशन्तं मा सूर्यं मयूरपिच्छच्छत्रिकया वारय । एतस्य पङ्कजस्य च जानातु कतरत् सुखस्पर्शम् ।।] हे सुयणु सुतनु वयणं छिवंतं वदनं स्पृशन्तं मा सूरं साहुलीएँ वारेहि सूर्यं मा मयूरच्छदच्छत्रिकया करधृतया वारय । एयस्स पंकयस्स य जाणउ कयरं सुहप्फंसं एतस्य वदनस्य पङ्कजस्य च जानातु कतरत् सुखस्पर्शम् । सुखदायित्वात् सुखः स्पर्शो यस्य तत् तथोक्तम् । साहुली मायूरच्छत्रिका । शाखा, वस्त्रं वा (इति) अन्ये । पर्यायोक्तिरलंकारः ।। २१७ ।।

२१८) मेघनीलस्य । [मानौषधमिव पीयते प्रियया मनस्विन्या दयितस्य । करसंपुटवलितोत्तानवदनं मदिराया गण्डूषः ।।] प्रियया गण्डूषः पीयते । कस्य । दइयस्य वल्लभस्य । कथंभूतया तया । माणंसिणीएँ मनस्विन्या । कस्या गण्डूषः । करसंपुडवलिउत्ताणवयणमइराएँ करसंपुटवलितोत्तानवदनमदिरायाः । करसंपुटवलितोत्तानवदनम् इति क्रियाविशेषणस्य मदिरापदेन समासश्चिन्त्यः । उपमाऽलंकारः ।। २१८ ।।

१W. साउलीअ; २W. माणोसहं; ३W. करसंपुडवलिउद्धाणणाइ.

W271 २२०) कह सा निव्वण्णिज्जइ जीएँ जहालोइयम्मि अंगम्मि ।
दिट्ठी दुब्बलगाइ व्व पंकवडिया न उत्तरइ ॥ २० ॥

W272 २२१) कीरंति च्चिय नासइ उयए रेह व्व खलजणे मित्ती ।
सा उण सुयणम्मि कया अणहा पाहाणरेह व्व ॥ २१ ॥

२१९) राघवस्य । [अन्यः कोऽपि स्वभावो मन्मथशिखिनो हला हताशस्य । वीध्यते नीरसानां हृदये सरसानां प्रज्वलति ॥] अन्यः कोऽपि स्वभावो मन्मथशिखिनः, हला चेट्याह्वानं, हताशस्य । तदेव दर्शयति (नीरसानां हृदये निर्वाति) सरसानां हृदये प्रज्वलति दीप्यते । अन्यो वह्निः खलु आर्द्रेण दारुणा न दीप्यते शुष्केणेन्धनेन पुनर्दीप्यत एव । एकत्र नीरससरसशब्दौ शुष्कार्द्रपर्यायौ, अन्यत्र निरनुरागसानुरागपर्यायौ । आभ्यां विरोधच्छाया काऽपि सहृदयचमत्कारिणी समुल्लसतीति । सजातिव्यतिरेको नामालंकारः (काव्यादर्श, २. १९८) ॥ २१९ ॥

२२०) रामदेवस्य । [कथं सा निर्वर्ण्यते यस्या यथाऽऽलोकिते अङ्गे । दृष्टिर्दुर्बलगौरिव पङ्कपतिता नोत्तरति ॥] कह सा निव्वण्णिज्जइ[1] कथं सा निर्वर्ण्यते जीएँ जहालोइयम्मि अंगम्मि यस्या यथाऽऽलोकिते अङ्गे दिट्ठी न उत्तरइ दृष्टिर्नोत्तरति । कीदृशी का इव । पंकवडिया दुब्बलगाइ व्व पङ्कपतिता दुर्बलगौरिव । अङ्गमङ्गं तस्या मनोहरमित्यर्थः । उपमालंकारः ॥ २२० ॥

२२१) पर्वतकुमारस्य । [क्रियमाणैव नश्यति उदके रेखेव खलजने मैत्री । सा पुनः सुजने कृता अनघा पाषाणरेखेव ॥] क्रियमाणैव विनश्यति उदके रेखेव खलजने मैत्री । सा पुनः सुजने कृता अनघा अक्षया भवति । केव । पाहाणरेह व्व पाषाणरेखेव । उपमाऽलंकारः ॥ २२१ ॥

[1] W. णिव्वण्णिज्जउ.

W 273 २२२) अव्वो दुक्करयारय पुणो वि तत्तिं करेसि गमणस्स
अज्ज वि न हुंति सरला वेणीएँ तरंगिणो चिहुरा ॥ २२ ॥

W 274 २२३) न वि तह छेयरयाइँ वि हरंति पुणरुत्तरायरसियाइं ।
जह जत्थ व तत्थ व जह व तह व सब्भावरमियाइं ॥ २३॥

W276 २२४) दढमूढबद्धगंठि व्व मोइया कह वि तेण मे बाहू । [1]
अम्हेहि वि तस्स उरे खुत्त व्व समुक्खया थणया ॥ २४॥

---

२२२) [हंहो दुष्करकारक पुनरपि चिन्तां करोषि गमनस्य। अद्यापि न भवन्ति सरला वेण्यास्तरङ्गिणश्चिकुराः ॥] काचित् प्रियं प्रवसन्तं सखेदमिदमाह । अव्वो दुक्करयारय अव्वो (!हंहो) दुष्करकारक, पुणो वि तत्तिं करेसि गमणस्स पुनरपि चिन्तां करोषि गमनस्य । यतः अज्ज वि न हुंति सरला अद्यापि न भवन्ति सरलाः वेणीएँ तरंगिणो चिहुरा वेण्यास्तरङ्गिणश्चिकुराः । एतदुक्तं भवति । त्वयि प्रवासरसिके ये वेणीबन्धाकुञ्चनकुञ्चिताः केशाः ते नाद्यापि सरलतामायान्ति । तत् किमर्थमियम् अचिरागतस्यापि तव पुनःप्रवासवासनाव्यसनितेति । अव्वो इति निपातो दुःखसूचने (वररुचि ९,१०) । चिहुरा इति स्फटिकनिकषचिकुरेषु कस्य हत्वे रूपम्(वररुचि २,४) । आक्षेपोऽलंकारः ॥ २२२ ॥

२२३) हालस्य । [नैव तथा छेकरतान्यपि हरन्ति पुनरुक्तरागरसिकानि । यथा यत्र वा तत्र वा यथा वा तथा वा सद्भावरतानि ॥] नैव तथा छेकरतान्यपि पारतन्त्र्यम् उत्पादयन्ति । कीदृशानि । पुणरुत्तरायरसियाइं पुनरुक्तरागरसिकानि । जह जत्थ व तत्थ व यथा यत्रैव (!यत्र वा तत्र वा) यथा च तथा च (!यथा वा तथा वा) सब्भावरमियाइं सद्भावरमितानि । आलिङ्गनचुम्बनदशनच्छेद्यविधाननिपुणनिधुवनविधेः सहजस्नेहभरनिर्भरनिष्णाताधिकसुरतानि विशिष्यन्त इत्यर्थः ॥ २२३ ॥

२२४) कस्यापि (?) [दृढमूढबद्धग्रन्थिरिव मोचितौ कथमपि

---

1 W. दढमूलबंधगंठि व्व.

W275 २२५) वुज्झेसि पियाइ समयं तह[2] वि हु रे भणसि कीस किसय त्ति ।
उपरिभरेण अयाणुय मुयइ बइल्लो वि अंगाइं ॥२५ ॥

W 277 २२६) अणुणयपसाइयाए तुज्झ[3]वराहे चिरं गणंतीए ।
अपहुत्तोइयहत्थंगुलीएँ रुन्नं वराईए ॥२६॥

तेन मे बाहू । अस्माभिरपि तस्योरसि मग्नाविव समुत्खातौ स्तनौ ॥] दृढमुग्धदत्तग्रन्थिरिव तेन कथमपि स्थापितौ बाहू, तेनाहं गाढं भुजाभ्यामवष्टब्धा इत्यर्थः । अस्माभिरपि तस्योरसि खुत्त ब्व समुक्खया थणया मग्नाविव उत्खातौ स्तनौ, इति विपरीतरतानुरागप्रकाशनम् । पूर्वार्धे उपमा, उत्तरार्धे तूत्प्रेक्षा । स्वाधीनपतिका नायिका, अनुकूलो नायकः ॥ २२४ ॥

२२५) समरस्य । [उह्यसे प्रियया समं तथापि खलु रे भणसि कस्मात् कृशेति । उपरिभरेण अज्ञ मुञ्चति बलीवर्दोऽपि अङ्गानि ॥] काचित् किमिति त्वं कृशेति प्रियेण पृष्टा तं प्रतिभिनत्ति । उह्यसे प्रियया सार्धं तथापि खलु रे भणसि कस्मात् कृशेति । उयरिभरेण अयाणुय उपरिभरेण अज्ञ मुयइ बइल्लो वि अंगाइं मुञ्चति वृषभोऽपि अङ्गानि, किं पुनर्न वयं मुञ्चामः इति । सा तव हृदये वसतीति उभयभारधारणे कस्मान्न देहदौर्बल्यं जायत इति । वुज्झसि इति दुहिलिहिवहां दुज्झलिज्झवुज्झाः धातोः इति वहेः वुज्झादेशे रूपम् । उत्तरार्थान्तरन्यासाभ्यां संसृष्टिरलंकारः । रे इति निपातो निन्दायाम् । रे अरे इति संभाषणरतिकलहाक्षेपेषु (वररुचि, ९. १५) ॥२२५ ॥

२२६) ईशानस्य । [अनुनयप्रसादितया तवापराधांश्चिरं गणयन्त्या । अप्रभूतोभयहस्ताङ्गुल्या रुदितं वराक्या ॥] काचित् सखी कस्याश्चिन्नायकं प्रतीदम् आह । अनुनयप्रसादितया रुदितं वराक्या । प्रसादितापि किं रोदितीति विशेषणद्वारेण कारणमाह । कथंभूतया । तुज्झवराहे चिरं गणंतीए तवापराधांश्चिरं गणयन्त्या । अतोऽपि किम् इत्याह ।

---

1 w.उज्झसि, 2 w. तह वि अरे, 3 w. तुह अवराहे

W 278 २२७) सेयच्छलेण पिच्छइ तणुए अंगम्मि से अमायंतं ।
लायण्णं ओसरइ व्व तिवलिसोवाणपंतीहिं ॥२७ ॥

W 279 २२८) दिव्वायत्तम्मि फले किं कीरइ[1] एत्तियं पुणं[2] भणामि ।
किंकिल्लि[3]पल्लवा पल्लवाण न हु हुंति सारिच्छा ॥२८॥

अपहुत्तोहयहत्थंगुलीएँ अप्रभूतोभयहस्ताङ्गुल्या । अहं किल कराङ्गुलीगणनाधिकान् एतान् अपराधान् कथं गणयिष्यामीति रुदितमित्यर्थः । एतेन नायकस्य (प्र) भूतापराधता तस्याश्च मौग्ध्यमुक्तं भवति । तुज्झवराहे इति आवांसंविलोपवहुरित्यकारलोपः (?) ॥ २२६ ॥

२२७) निरवग्रहस्य । [स्वेदच्छलेन प्रेक्षध्वं तनुकेऽङ्गे तस्या अमात् । लावण्यमपसरतीव त्रिवलीसोपानपङ्क्तिभिः ॥] काचिन्नायकस्य प्रथमदर्शने स्वेदप्लुतां कांचिद् वीक्ष्येदमाह । पिच्छह से लायण्णं ओसरइ व्व पश्यतास्या लावण्यम् अपसरतीव । कथम् । सेयच्छलेण स्वेदापदेशेन । काभिः । तिवलिसोवाणपंतीहिं त्रिवलिसोपानपङ्क्तिभिः । किमित्यवतरतीत्याह । तणुए अंगम्मि अमायंतं तनुके अङ्गे अमात् । यत् किल तुच्छाधारतया न माति, तत् तस्मादवस्रंसत इति प्रचुरलावण्यवर्णनपरेयमुक्तिः । स्वेदः सात्विको भावः ॥२२७॥

२२८ हालस्य ।[दैवायत्ते फले किं क्रियते, एतावत् पुनर्भणामि । अशोकपल्लवाः न खलु पल्लवानां भवन्ति सदृशाः॥] काचित् स्वगुणानुगुणं फलमनासादयन्ती इदमाह । दिव्वायत्तम्मि फले किं कीरइ दैवायत्ते फले किं क्रियते एत्तियं पुण भणामि एतावन्मात्रं पुनर्ब्रवीमि । किं तदित्याह । किंकिल्लिपल्लवा पल्लवाण न हु हुंति सारिच्छा अशोकपल्लवा अन्यपल्लवानां न खलु भवन्ति सदृशाः । अन्यथा गुणा अन्यथा फलमिति भावः । सेवादिपाठाद् द्वित्वम् । सारिच्छा इति समृद्ध्यादिपाठाद् दीर्घत्वम् । किंकिल्ली अशोकः । अन्योक्तिरलंकारः ॥ २२८ ॥

1w. कीरउ 2w.पुणो भणिमो; 3w. कंकेल्लिपल्लवाणं ण पल्लवा होंति सारिच्छा.

W280 २२९) धुयइ व्व मयकलंकं कवोलपडियस्स चंदस्स ।
अणवरयमुक्कजलभरियणयणकलसेहि सा बाला ॥ २९ ॥
W281 २३०) गंधेण अप्पणो मालियाएँ नोमालियाएँ फुट्टिहिइ ।
अन्नो को वि हयासाएँ मासलो परिमलुग्गारो ॥३०॥
W282 २३१) फलसंपत्तीएँ समोणयाइँ तुंगाइ फलविपत्तीए ।
हिययाइँ सुपुरिसाणं महातरूणं व सिहराइं ॥ ३१ ॥

२२९) जीवदेवस्य ।[मार्जयतीव मृगकलङ्कं कपोलपतितस्य चन्द्रस्य । अनवरतमुक्तजलभृतनयनकलशाभ्यां सा बाला ।] धुयइ व्व सा बाला चंदस्स मयकलंकं सा बाला चन्द्रस्य मृगकलङ्कं मार्जयतीव । कथंभूतस्य चन्द्रस्य । कवोलपडियस्स कपोलपतितस्य । कैः । अणवरयमुक्तजलभृतनयनकलशैः बाष्पतीव (?) रुदतीव । अनवरतमुक्ताश्रुवारिधाराभिः स्वगण्डमण्डलप्रतिबिम्बितमृगाङ्कमृगमलमिवमार्ष्टि, इत्युत्प्रेक्ष्यते । उत्प्रेक्षालंकारः ॥ २२९ ॥

२३०) [गन्धेनात्मनो मालिताया नवमालिकायाः स्फुटिष्यति । अन्यः कोऽपि हताशायाः मांसलः परिमलोद्गारः ॥] काचिद् उद्दीपनविभावभूतां नवमालिकां निन्दन्तीदमाह । नोमालियाएँ हयासाएँ अन्नो को वि परिमलुग्गारो हताशाया नवमालिकाया अन्यः कोऽपि परिमलोद्गारो अवर्णनीयरूपः परिमलोद्गारः फुट्टिहिइ स्फुटिष्यति । कथंभूतः । मासलो मांसलः । कीदृश्याः गंधेण अप्पणो मालियाएँ गन्धेनात्मनः आलिङ्गितायाः व्याप्तायाः । स कश्चिदस्याः सुगन्धिगन्धोद्गारो येन मादृशीनां प्रोषितपतिकानां देहसंदेहो भविष्यतीत्यर्थः ॥ २३० ॥

२३१) विशुद्धशीलस्य । [फलसंपत्त्या समवनतानि तुङ्गानि फलविपत्त्या । हृदयानि सुपुरुषाणां महातरूणामिव शिखराणि ॥] फलसंपत्त्या समवनतानि तुङ्गानि फलविपत्त्या हृदयानि सत्पुरुषाणां तरूणामिव शिखराणीत्यादि सुबोधम् । उपमालंकारः ॥ २३१ ॥

१W. माणिणी उयह, २W. अणवरअवाहजल, ३W. चंदस्स, ४W मालिआण, ५W णोमालिआण फुट्टिहिइ, ६W मंसलो

W283 २३२) आसासेइ परियणं परियत्तंतीएँ पहियजायाए।
नित्थामावत्तणवलियहत्थमुहलो वलयसद्दो ॥ ३२ ॥

W284 २३३) तुंगं च्चिय होइ मणो मणंस्सिणो अंतिमासु वि दसासु।
अत्थंतस्स वि रविणो किरणा उद्दं चिय फुरंति ॥ ३३ ॥

---

२३२) [आश्वासयति परिजनं परिवर्तमानायाः पथिकजायायाः। निःस्थामावर्तनवलितहस्तमुखरो वलयशब्दः ॥] पहियजायाए वलयसद्दो परियणं आसासेइ पथिकजायाया वलयशब्दः कङ्कणध्वनिः परिजनमाश्वासयति। कीदृशः। नित्थामावत्तणवलियहत्थमुहलो निःस्थामावर्तनवलितहस्तमुखरः निस्सहहस्तावर्तनवशविशङ्खलवलयरवश्रवणेन अनुमितं परिजनेन, यथेयं देहदौर्बल्यं प्राप्ता, तथा सोढः खल्वनया सुदुःसहोऽपि प्रियविरहवेदनाऽऽवेगः। तन्नूनं न विपत्स्यत इति आश्वासनहेतुः वलयशब्दः। प्राकृते पूर्वानिपातानिपातानियमात् मुखशब्दस्य परनिपातः(?)। हेतुरलंकारः। रुद्रभट्टमतेन (तु सूक्ष्मोऽलंकारः)। यत्रायुक्तिमदर्थो गमयति शब्दो निजार्थसंबद्धम्। अर्थान्तरमुपपत्तिमदिति तत् संजायते सूक्ष्मम् ॥ (काव्यालंकार, ७, ९८)। आचार्यदण्डिनस्तु मते समाधिर्नाम गुणोऽयम्। तस्य लक्षणम्। साधारणधर्माणां यदन्यत्राधिरोपणम् इति (cf काव्यादर्श १, ९३) ॥ २३२ ॥

२३३) अलंकारस्य। [तुङ्गमेव भवति मनो मनस्विनोऽन्तिमास्वपि दशासु। अस्तं गच्छतोऽपि रवेः किरणा ऊर्ध्वमेव स्फुरन्ति ॥] तुंग च्चिय होइ मणो मणंस्सिणो तुङ्गमेव भवति मनो मनस्विनः अंतिमासु वि दसासु अन्तिमास्वपि दशासु। इदमेव समर्थयन्नाह। अत्थंतस्स वि रविणो किरणा उद्धं चिय फुरंति अस्तं गच्छतोऽपि रवेः उर्ध्वमुखा एव मयूखाः स्फुरन्ति। अर्थान्तरन्यासोऽलंकारः ॥ २३३ ॥

---

१ W. णित्थामुव्वत्तण; २ W. तुंगो च्चिअ; ३ W. मणंसिणो; ४ W अत्थमणम्मि; ५ W. रइणो; ६ W. उद्धं

W285 २३४) पुट्टं¹ भरेइ सउणी वँ माउया अत्तणो² अणुव्विग्गा।
विहलुद्धरणभरसहा³ भवंति⁴ जइ के वि सप्पुरिसा ॥३४॥

W286 २३५) न विणा सब्भावेणं घिप्पइ परमत्थयाणुओ लोओ।
को जुण्णमंजरं कंजिएण वेयारिउं तरइ ॥ ३५ ॥

W287 २३६) रण्णाउ तणं रण्णाउ पाणियं सव्वं⁵यं सयंगाहं।
तह वि मयाणं⁶ मईणं आमरणंताइँ पिम्माइं ॥ ३६ ॥

२३४) [उदरं भरति शकुनिर्हे मातः आत्मनो अनुद्विग्ना। विह्वलोद्धरणभरसहा भवन्ति यदि केऽपि सत्पुरुषाः ॥] हे माउया मातः सउणी वि अत्तणो पुट्टं भरेइ शकुनिरपि आत्मनः उदरं बिभर्ति। अणुव्विग्गा विहलुद्धरणभरसहा भवंति जइ के वि सप्पुरिसा अनुद्विग्नाः विह्वलोद्धरणभरसहाः भवंति यदि केऽपि सत्पुरुषाः। बहव औदरिकाः सन्ति न पुनः परोपकारका इत्यर्थः। पुट्टं उदरम् ॥ २३४ ॥

२३५) अभिनवगजेन्द्रस्य। [न विना सद्भावेन गृह्यते परमार्थज्ञो लोकः। को जीर्णमार्जारं काञ्जिकेन प्रतारयितुं शक्नोति ॥] न विणा सब्भावेणं न विना सद्भावेन घिप्पइ लोओ गृह्यते लोकः। किं सर्व एव। नेत्याह। परमत्थयाणुओ परमार्थज्ञः तत्त्वज्ञः। अमुमेवार्थम् अर्थान्तरन्यासेन द्रढयति। को जुण्णमंजरं को जीर्णमार्जारं कंजिएण काञ्जिकेन वेयारिउं तरइ प्रतारयितुं शक्नोति, न कोऽपीत्यर्थः। विदग्धेन मया प्रपञ्चरचनां विहाय प्रवर्तितव्यम् इति भावः ॥ २३५ ॥

२३६) [अरण्यात् तृणम् अरण्यात् पानीयं सर्वकं स्वयंग्राह्यम्। तथापि मृगाणां मृगीणाम् आमरणान्तानि प्रेमाणि ॥] रण्णाउ तणं रण्णाउ पाणियं अरण्यात् तृणम् अरण्यात् पानीयं सव्वयं सयंगाहं सर्वकं स्वयंग्राह्यम्। तह वि मयाण मईणं तथाऽपि मृगाणां मृगीणां च आमरणंताइँ पिम्माइं आमरणान्तानि प्रेमाणि। सर्वत्र (? सर्वः) किल कार्यानु-

१W. पोट्टं भरंति सउणा; २W. अप्पणो; ३W. विहलुद्धरणसहावा; ४W हुवंति ५W. सव्वदो; ६W. मआण मईण अ

W438 २३७) जो वि न पुच्छेइ तस्स वि कहेइ, "भग्गाइँ तेण वलयाइं"।
अह उज्जुया वराई अह व पिओ से हयासाए ॥३७॥

W298 २३८) हियइच्छियस्स दिज्जउ तणुयायंतिं न पिच्छह पिउच्छा।
"हियइच्छियं म्ह कत्तो" भणिउं मोहं गया कुमरी ॥३८॥

रोधेन प्रेम बिभर्ति। तथा हि नायको नायिकायाः कनककटकेन नैपुणगुणेन प्रतिभासते। केयूरादिलोभेन रोचते। न च तदस्ति मृगाणाम्। अनेनैवोक्तेन प्रकारेण मृगीणां मृगाणां च परस्परोपकारकत्वमस्ति, इति अतस्तयोः अत्यन्तानुरागयोः रद्विरोधेऽपि (?) शृङ्गाराभासोऽपि साक्षात् शृङ्गाररसकोटिं स्पृशतीति ॥ २३६ ॥

२३७) रत्नाकरस्य। [योऽपि न पृच्छति तस्यापि कथयति "भग्नानि तेन वलयानि"। अथ ऋज्वी वराकी असौ वा प्रियस्तस्या वराक्याः ॥] जो वि न पुच्छइ तस्स वि कहेइ योऽपि न पृच्छति तस्यापि कथयति। किं तत् कथयतीत्याह। भग्गाइँ तेण वलयाइं भग्नानि तेन वलयानि। अह उज्जुया वराई अथ ऋज्वी वराकी मयेदं रतिकलहरहस्यं प्रियस्य प्रच्छादयितव्यम् इत्यपि न जानातीति। अह व पिओ से हयासाए अथवा प्रियो वल्लभः असौ तस्या हताशायाः। तदेकतानमानसतया "तेन भग्नानि वलयानि" इति अपृष्टाऽपि व्याचष्टे इति। उज्जुया ऋज्वी ॥२३७॥

२३८) हालस्य। [हृदयेप्सितस्य दीयतां, तनूभवन्तीं न प्रेक्षध्वे पितृष्वसः। "हृदयेप्सितमस्माकं कुतः" भणित्वा मोहं गता कुमारी॥] हे पिउच्छा पितृष्वसः, हियइच्छियस्स दिज्जउ एषा हृदयेप्सिताय दीयतां, तणुयायंतिं न पिच्छइ तनूभवन्तीं न प्रेक्षध्वं (? प्रेक्षध्वे) यूयम्। ययेयं प्रत्यहम् उपजायमानतानवा तन्वङ्गी तथा तस्या हृदये कोऽपि युवा वर्तते। तस्मै इयं दीयतामित्यर्थः। हियइच्छियं म्ह कत्तो हृदयेप्सितमस्माकं कुतः इय भणिउं मोहं गया कुमरी इति भणित्वा मोहं गता कुमारी। मोहः सात्विको भावः। भणिउं इति क्त्वार्थे तुमुन् ॥२३८॥

१W. आणइ.

W299 २३९) खिन्नेस्स ठावइ उरे पइणो गिम्हावरन्हरमिरस्स ।
उल्लं गलंतपुप्फं न्हाणसुयंधं चिहुरभारं ॥३९॥

W300 २४०) अह सरसदंतमंडलकवोलपडिमागओ मयच्छीए ।
अंतोसिंदूरियसंखवत्तकरणिं वहइ चंदो ॥४०॥

W302 २४१) पुसिया कंठाहरणिंदणीलकिरणाहया ससिमऊहा ।
माणिणिवयणेसु सकज्जलंसुसंकाइ दइएहिं ॥४१॥

---

२३९) सर्वस्वामिनः । [खिन्नस्य स्थापयत्युरसि पत्युर्ग्रीष्मापराह्णरमणशीलस्य । आर्द्रं गलत्पुष्पं स्नानसुगन्धि चिकुरभारम् ॥] पइणो उरे चिहुरभारं ठावइ पत्युरुरसि कुन्तलकलापं स्थापयति । कथंभूतस्य पत्युः । गिम्हावरन्हरमिरस्स ग्रीष्मापराह्णरमणशीलस्य, अत एव खिन्नस्य । कीदृशं चिकुरभारम् । उल्लं आर्द्रम् । पुनश्च कीदृशम् । गलंतपुप्फं गलत्पुष्पम् । अन्यच्च कीदृशम् । न्हाणसुयंधं स्नानेन स्नानीयेन सुगन्धम् । स्नानशब्देन स्नानीयं चूर्णमुच्यते, उपचारात् । प्रेमातिरेकेण दृष्टादृष्टार्थविरुद्धमपि ग्रीष्मापराह्णरतम् आचरतः श्रमापनयनाय प्रत्युपकारकं कामिनी कान्तस्योरसि कुन्तलकलापं शीतं सुरभिं च निवेशयतीत्यर्थः ॥२३९॥

२४०) कीर्तिवर्मणः । [असौ सरसदन्तमण्डलकपोलप्रतिमागतो मृगाक्ष्याः । अन्तःसिन्दूरितशङ्खपात्रसादृश्यं वहति चन्द्रः॥] अह चंदो अंतोसिंदूरियसंखवत्तकरणिं वहइ एष चन्द्रो अन्तःसिन्दूरितशङ्खपात्रसादृश्यं वहति । कीदृशः । सरसदंतमंडलकवोलपडिमागओ सरसदन्तमण्डलकपोलप्रतिमागतः । कस्याः मयच्छीए मृगाक्ष्याः । अह इत्यदसो रूपम् । दन्तमण्डलं दन्तमण्डलक्षतम् अर्थात् । करणी सादृश्यम् । उपमालंकारः ॥२४०॥

२४१) आढकस्य । [प्रोञ्छिताः कण्ठाभरणेन्द्रनीलकिरणाहताः शशिमयूखाः । मानिनीवदनेषु सकज्जलाश्रुशङ्कया दयितैः ॥] दइएहिं पुसिया

---

१ W. खिण्णस्स उरे पइणो ठवेइ गिम्हावरण्हरमिअस्स २ W. माणिणिवअणम्मि

W303 २४२) इद्दहमित्ते वि जए सुंदरमहिलासहस्सभरिए वि ।
अणुहरइ नवरि तिस्सा वामद्धं दाहिणद्धस्स ॥४२॥

W304 २४३) जइ जह वाएइ पिओ तइ तइ नच्चामि चंचले पिम्मे ।
वल्ली वलेइ अंगं सहावथद्धे वि रुक्खम्मि ॥४३॥

प्रियैः उन्मार्जिताः । के । ससिमऊहा शशिमयूखाः । कीदृशाः । कंठाहरणिंदणीलकिरणाहया कण्ठाभरणे यद् इन्द्रनीलं तत्प्रभाहताः । क्व माणिणिवयणेसु मानिनीवदनेषु । कया । सकज्जलंसुसंकाइ सकज्जलं यद् अश्रु तच्छङ्कया । शशिमयूखा मानिनीकपोलफलकपतिताः कण्ठाभरणीकृतेन्द्रनीलप्रभाभिन्नाः सन्तः सकज्जलाश्रुपतनभ्रान्त्या भर्तृभिः मृष्टा इत्यर्थः । भ्रान्तिमानलंकारः ॥२४१॥

२४२) कलशचिह्नस्य । [एतावन्मात्रेऽपि जगति सुन्दरमहिलासहस्रभृतेऽपि । अनुहरति केवलं तस्या वामार्धं दक्षिणार्धस्य ॥] अणुहरइ नवरि तिस्सा अनुहरति केवलं तस्याः वामद्धं दाहिणद्धस्स वामार्धं दक्षिणार्धस्य । कदाचिद् जगदेवाल्पं स्यादित्याह । इद्दहमित्ते वि जए एतावन्मात्रेऽपि अप्रमाणे जगति, इति । कदाचिद् रमणीयरामारहितं तत् स्यादित्याह । सुंदरमहिलासहस्सभरिए वि सुन्दरमहिलासहस्रभृतेऽपि । एतदुक्तं भवति । न तस्या भिन्नजातीयेन निशाकरविकचारविन्दादिना, सजातीयेन अन्यवनितावक्त्रेन्दुप्रभृतिना उपमानेन उपमार्हा । केवलं तस्या वामार्धं तस्या एव दक्षिणार्धेन यदि परम् उपमीयते इति । नियमालंकारः (काव्यादर्श २, १९) ॥२४२॥

२४३) माधवस्य । [यथा यथा वादयति प्रियस्तथा तथा नृत्यामि चञ्चले प्रेम्णि । वल्ली वलयत्यङ्गं स्वभावस्तब्धेऽपि वृक्षे ॥] काचित् क्षणभङ्गुरानुरागे प्रियतमे सति सखेदमिदमाह । जह जह वाएइ पिओ यथा यथा वादयति प्रियः तह तइ नच्चामि तथा तथा नृत्यामि । क्व सति ।

---

१ W एद्दहमेत्तम्मि जए २ W णवर

W305 २४४) दुक्खेहि लब्भइ पिओ लद्धो दुक्खेण होइ साहीणो ।
लद्धो वि अलध्दु च्चिय जह हिययं तह जइ न होइ ॥४४॥
W306 २४५) अव्वो अणुणयसुहकंखिरीएँ अकयं कयं कुणंतीए ।
सरलसहावो वि पिओ अविणयमग्गं बला नीओ ॥४५॥

चंचले पिम्मे चञ्चले प्रेम्णि । अमुमेवार्थम् अर्थान्तरन्यासेन द्रढयति । वल्ली वलेइ अंगं वल्ली वलयत्यङ्गं सहावथद्धे वि रुक्खम्मि स्वभावस्तब्धेऽपि वृक्षे । अहमनुरक्ता स पुनर्मयि वीतरागः इत्यर्थः । जह जह वाएइ तह तह नच्चामि इति लोकोक्तिः । यथा यथा स मां वर्तयति तथा तथा वर्तेऽहम् इत्यर्थः ॥२४३॥

२४४) शशिप्रभायाः । [दुःखैर्लभ्यते प्रियो लब्धो दुःखेन भवति स्वाधीनः । लब्धोऽप्यलब्ध एव यथा हृदयं तथा यदि न भवति ॥] काचिन्मनोरथान् करोति । दुक्खेहि लब्भइ पिओ दुःखैर्लभ्यते प्रियो वल्लभजनः । किम् एतावदेव इत्याह । लद्धो दुक्खेण होइ साहीणो लब्धोऽपि प्रियो दुःखेन भवति स्वाधीनः । लद्धो वि अलद्धो च्चिय जइ जह हिययं तह न होइ लब्धोऽप्यलब्ध एव यदि यथा हृदयं तथा न भवति । यथा मम हृदयमनुरक्तं विदग्धं तथा योऽनुरक्तो न भवतीत्यर्थः । एकतरानुरागे हि उपकरणकलापकल्पः एव च प्रियो भवति । तथा हि उपकारामादानाद् (?) एकशय्यासनादि पुरुषोऽभिलषति । तस्मादन्योन्यानुरागः श्रेयान् । अथवा लब्धोऽप्यलब्ध एव यदि यथा हृदये तथा न भवति । यदि च हृदयम् आलिङ्गनचुम्बनादिकं चिकीर्षति तथैव प्रियोऽपीति विदग्धो दयितः श्रेयान् इति भावः ॥२४४॥

२४५) ग्रामकुट्टिकायाः । [हंहो अनुनयसुखकाङ्क्षिण्या अकृतं कृतं कुर्वत्या । सरलस्वभावोऽपि प्रियो अविनयमार्गं बलान्नीतः] । प्रियोऽविनयमार्गं बलान्नीतः । कया । अणुणयसुहकंखिरीएँ अनुनयसुखकाङ्क्षणशीलया । किं कुर्वत्या । अकयं अकृतमप्यपराधं कयं कृतं कुणंतीए कुर्वत्या । कीदृशश्च प्रियः । सरलसहावो वि सरलस्वभावोऽपि । अनुनयसुखलाभला-

W307 २४६) "हत्थेसु य पाएसु य अंगुलिगणणाइ तवं गया दियहा ।
इन्हि पुण केण गणिज्जउ" त्ति भणिउं रुयइ मुद्धा ॥४६॥
W308 २४७) कीरमुहसच्छहेहिं रेहइ वसुहा पलासकुसुमेहिं ।
बुद्धस्स चलणवंदणपडिएहिँ व भिक्खुसंघेहिं ॥४७॥
W309 २४८) जं जं पिहुलं अंगं तं तं जायं किसोयरि किसं ते ।
जं जं तणुयं तं तं पि निट्ठियं किं वै माणेण ॥४८॥

लसया तया स्वकान्तो मृषैव अविनयपथातिथिः कृतः इति सखीशोचनम् । अव्वो इति दुःखसूचनायां निपातः ॥२४५॥

२४६) सुग्रीवस्य । ["हस्तयोश्च पादयोश्च अङ्गुलिगणनया तव गता दिवसाः । इदानीं पुनः केन गण्यताम्" इति भणित्वा रोदिति मुग्धा ॥] हत्थेसु य पाएसु य अंगुलिगणणाइ तव गया दियहा हस्तपादयोरपि अङ्गुलिगणनया अतिक्रान्ता दिवसाः । इन्हि पुण इदानीं पुनः केण गणिज्जउ केन गण्यताम् इति भणिउं भणित्वा रुयइ मुद्धा रोदिति मुग्धा ॥२४६॥

२४७) [कीरमुखसच्छायैः शोभते वसुधा पलाशकुसुमैः । बुद्धस्य चरणवन्दनपतितैरिव भिक्षुसंघैः ॥] कीरमुहसच्छहेहिं कीरमुखसदृक्षैः पलासकुसुमेहिं रेहइ वसुहा पलाशकुसुमैः शोभते वसुधा । कथंभूतैः । बुद्धस्स चलणवंदणपडिएहिँ व भिक्खुसंघेहिं बुद्धस्य चरणवन्दनपतितैरिव भिक्षुसंघैः । उपमालंकारः ॥ २४७ ॥

२४८) भूषणस्य । [यद्यत् पृथुलमङ्गं तत् तज्जातं कृशोदरि कृशं ते । यद्यत् तनुकं तत् तन्निष्ठितं किमिव मानेन] काचित् सखी मानकृशामिदमाह । यद्यत् पृथुलमङ्गं तत् तत् तनु जातं किसोयरि कृशोदरि । किं तावदेव । नेत्याह । जं जं तणुयं तं तं पि निट्ठिय यद्यत् तनुकं तत्तदपि निष्ठितं नष्टं परकाष्ठां प्राप्तम् । अतः किं व माणेण किमिव मानेन । तव चेयम् एतादृशी दशा वर्तते । अतो मुञ्च मानं प्रियमनुवर्तस्वेत्यर्थः । आक्षेपोऽलंकारः । सखीशिक्षोक्तिः । खण्डिता कलहान्तरिता च नायिका ॥२४८॥

१W. अइगआ; २W. व (=एत्थ).

W 310 २४९) न गुणेहि हीरइ जणो हीरइ जो जेण भाविओ तेण ।
निच्छंति[1] पुलिंदा मुत्तियाइँ गुंजाउ गिण्हंति ॥४९॥

W311 २५०) लंकालयाण पुत्तय वसंतमासम्मि[2] लद्धपसराणं ।
आवीयलोहियाणं बीहेइ जणो पलासाणं ॥५०॥

२४९) [न गुणैर्ह्रियते जनो ह्रियते यो येन भावितस्तेन । नेच्छन्ति पुलिन्दा मौक्तिकानि, गुञ्जा गृह्णन्ति ॥] काचित् कुपाशाङ्गिनोमपि गृहिणीम् अगणयित्वा पराङ्गनायामासक्तं नायकं प्रति प्रयुक्त्या उपालम्भगर्भमिदमाह । न गुणेहि हीरइ जणो न गुणैर्ह्रियते जनः हीरइ जो जेण भाविओ तेण, यो येन भावितो रञ्जितो वासितान्तःकरणः स तेन ह्रियत इति । अमुमर्थं दर्शयन्नाह । निच्छंति पुलिंदा मोत्तियाइँ गुंजाउ गिण्हंति नेच्छन्ति पुलिन्दा मौक्तिकानि गुञ्जाश्च गृह्णन्ति । तत्त्वप्रकाशनपरेयमुक्तिः । पुलिंदा शबराः । गुञ्जाः कृष्णलाः । अर्थान्तरन्यासपर्यायोक्तिरलंकारः ॥२४९॥

२५०) सुदर्शनस्य । [लङ्कालयेभ्यः पुत्रक वसन्तमासे (वसान्त्रमासे) लब्धप्रसरेभ्यः । आपीतलोहितेभ्यो बिभेति जनः पलाशेभ्यः ॥] हे पुत्तय पुत्रक, बीहेइ जणो पलासाणं बिभेति जनः पलाशेभ्यः । न केवलं पलाशा वृक्षाः राक्षसाश्च । तत्र वृक्षेभ्यस्तावत् कथभूतेभ्यः । लंकालयाण लङ्कयुक्तगृहेभ्यः । वसंतमासम्मि लद्धपसराणं वसन्तमासे लब्धप्रसरेभ्यः । तदा किल पलाशानां (पुष्पसमृद्धिर्भवति) । राक्षसेभ्यः कथंभूतेभ्यः । वसान्त्रमासेषु लब्धप्रसरेभ्यः । ते हि वसान्त्रमासेषु लुब्धाः । पुनरपि कीदृशेभ्यः । आवीयलोहियाणं आपीतलोहितेभ्यः । कीदृशेभ्यो वृक्षेभ्यो राक्षसेभ्यश्च । आपीतो लोहितो वर्णो येषां ते (वृक्षाः) तथोक्ताः । आसमन्तात् पीतं लोहितं यैस्ते (राक्षसाः) तथोक्ताः । अतस्तेभ्यः पलाशेभ्यो जनो बिभेतीति वाक्यार्थः । शब्दशक्त्यनुरणनरूपव्यापारव्यङ्ग्यो ध्वनिरयं लक्ष्यक्रमोद्योतभेदः । अविशेषश्लेषोऽयम् इति रुद्रटः (काव्यालंकार, १०,३-४) ॥२५०॥

1w मोत्तूण; 2w. वसंतमासेक्कलद्धपसराण.

W312 २५१) घित्तूण चुण्णमुट्ठिं हासूसलियाएँ वेवमाणीए ।
फंसलिहिमि त्ति पिययमं हत्थे गंधोययं जायं ॥५१॥

W 313 २५२) पुट्ठिं पुससु किसोयरि परोहँडंकुल्लपत्तचित्तलियं ।
छेयाहिँ दियरजायाहिँ उज्जुए मा कलिज्जिहिसि ॥५२॥

---

२५१) अनुरागस्य । [गृहीत्वा चूर्णमुष्टिं हास्यपुलकिताया वेपमानायाः । अवगुण्ठयामीति प्रियतमं हस्ते गन्धोदकं जातम् ॥] कस्याश्चिद् हस्ते गन्धोदकं जातम् । कथंभूतायाः । फसळि (हि) मि त्ति पिययमं हासूसलियाएँ वेवमाणीए उद्गुण्डयामि प्रियतममिति हास्यतः पुलकितायाः। किं कृत्वा । घित्तूण चुणगमुट्ठि गृहीत्वा चूर्णमुष्टिम् । स्वहस्तेनास्तचूर्णमुष्टेरभीष्टजनगात्रोद्गुण्डितप्रवृत्तायाः स्वेदोदकबन्धाद् गन्धोदकतां गता [चूर्णमुष्टिः] इत्यर्थः । स्वेदपुलकोत्कम्पाः सात्त्विका भावाः । अनुरागातिशयवर्णनपरेयमुक्तिः । फसलियं भूषितम् । ऊसलिओ पुलकितः । हेतुसूक्ष्माभ्यां संकरोलंकारः ॥ २५१ ॥

२५२) हालस्य । [पृष्ठं प्रोञ्छय कृशोदरि गृहपश्चाद्भागाङ्कोठपत्रचिह्नितम् । छेकाभिर्देवरजायाभिः ऋजुके मा ज्ञास्यसे ॥] किसोयरि पुट्ठिं पुससु हे कृशोदरि पृष्ठं परिमार्जय । परोहडंकुल्लपत्तचित्तलियं पृष्ठगृहाङ्कोल्लपत्राचित्रितं पश्चाद्वाटकाङ्कोठपत्रचित्रितम् । को हेतुरित्याह । उज्जुए दियरजायाहिँ मा कलिज्जिहिसि ऋजुके देवरजायाभिर्मा ज्ञास्यसे । कीदृशीभिः । छेयाहिँ विदग्धाभिः । पृष्ठावसक्तपत्राचित्राचिह्नतः अङ्कोठदलकल्पनया तया प्रियतमो रमित इति मा देवरजाया जानन्तु इत्यर्थः । पृष्ठशब्दः स्त्रियां प्राकृते । परोहडं पश्चाद्वाटकम् । अंकुल्लं अङ्कोठम् ॥२५२॥

1w.हरिसूससिआइ, 2w.वेअमाणाए, 3w.भिसिणेमि त्ति 4w.पडोहरंकोल्ल.

W314 २५३) अच्छीणि ता थइस्सं दोहि मिं हत्थेहि तम्मि दिट्ठम्मि ।
अंगं कलंबकुसुमं व मेउलियं कह नु ढक्किस्सं ॥५३॥
W315 २५४) झंझावाउत्तिणिए घरम्मि रोत्तूण नीसहणिसण्णं ।
जोएँइ गयवईयं विज्जुज्जोओ जलहराणं ॥५४॥
W316 २५५) भुंजसु जं साहीणं कत्तो लोणं खुँ गामरद्धम्मि ।
सुँहय सलोणेण वि किं वं तेण नेहो जहिं नत्थि ॥५५॥

---

२५३) पण्डितस्य । [अक्षिणी तावत् स्थगयिष्यामि द्वाभ्यामपि हस्ताभ्यां तस्मिन् दृष्टे । अङ्गं कदम्बकुसुममिव मुकुलितं कथं नु स्थगयिष्ये ॥] अक्षिणी तावत् स्थगयिष्यामि । काभ्याम् । दोहि मि हत्थेहि द्वाभ्यामपि हस्ताभ्याम् । क्व सति । तम्मि दिट्ठम्मि तस्मिन्दृष्टे । एतदुक्तं भवति । तस्मिन्नायाते तदवलोकनसुखलाभलालसनेत्रे निवारयितुमक्षमाऽपि भवतु कराभ्यां ते निवारयिष्यामि । इदं तु अंगं कलंबकुसुमं व मउलियं कह नु ढक्किस्सं अङ्गं पुनरुदञ्चद्रोमाञ्चं कदम्बकुसुममिव मुकुलितं, स्थगयिष्यामि कथं तदित्यर्थः । उत्तमवचनश्रवणादित्यादि स्त्रिया (?) उत्तमा नारी । रागप्रणयप्रणयिनि गुणहार्या वोत्तमा नारी ॥२५३॥

२५४) नरसिंहस्य । [झञ्झावातोत्तृणिते गृहे रुदित्वा निःसहनिषण्णाम् । द्योतयति गतपतिकां विद्युदद्योतो जलधराणाम् ॥] विज्जुज्जोओ जोएइ विद्युदद्योतः गवेषयति । काम् । गयवईयं प्रोषितभर्तृकाम् । केषां विद्युदद्योतः । जलहराणं मेघानाम् । नीसहणिसण्णं निस्सहं यथा भवेद् एवं निषण्णाम् उपविष्टाम् । किं कृत्वा । रोत्तूण रुदित्वा । क्व । झंझावाउत्तिण्णे घरम्मि झञ्झावातैरुत्तीर्णे गृहे । का किल अद्यापि आस्ते शून्येषु प्रोषितयुवतिः (इति) तदन्वेषणतात्पर्यं पर्जन्यानामित्यर्थः । झञ्झावातः सवृष्टिः स्यात् । उत्तिणियं उद्गततृणम् । उत्प्रेक्षा नामालंकारः ॥२५४॥

२५५) नागहस्तिनः । [भुङ्क्ष्व यत् स्वाधीनं कुतो लवणं खलु ग्रामराद्धे । सुभग सलवणेनापि किमिव तेन स्नेहो यत्र नास्ति ॥] काचिद्

1w. पि, 2w पुलइअं, 3w दीवेइ व गअवइअं, 4w. कुगामरिद्धम्मि, 5w. अहव 6w. तेण सिणेहो जहिं ण त्थि.

W317 २५६) सुहउच्छियाएँ हलिओ मुहपंकयसुरहिपवणणिव्ववियं ।
तह पियइ पयइकडुयं वि ओसहं जह न निट्ठाइ ॥५६॥

ग्रामकामिनीलावण्यलोभेन पण्याङ्गनाहितचित्तम् इष्टं स्वामिनमिदमाह । भुंजसु जं साहीणं हे सुहय सुभग भुङ्क्ष्व यत् स्वाधीनं, कत्तो लोणं खु गामरद्धम्मि कुतः खलु लवणं ग्रामराद्धे । सुहय सलोणेण वि किं व तेण हे सुभग सलवणेनापि किमिव तेन, नेहो जहिं नत्थि स्नेहो यत्र नास्ति । एतदुक्तं भवति । स्वाधीनं जनं रमयस्व । कुतः किल ग्रामे ग्रामे कामिनीनां लावण्यं लभ्यते । अयमभिप्रायः । लावण्यं हि परप्रत्ययवेद्यं यदि प्रतिपद्यसे तदा अस्ति, नो चेन् नास्तीति ब्रूमः । पण्याङ्गनालोकस्तु निःस्नेहो भवतीति भावः । लावण्येनापि किं क्रियते यत्र स्नेहः प्रेम नास्ति । अहं खलु त्वयि अनुरक्तेति । इदम् इदमायत्तं परायत्तं च (इति) वालोक्य स्नेहो भवतीत्यर्थः । इवशब्दो वाक्यालंकारः यथा किमिव हि मधुराणां मण्डनं नाकृतीनाम् (शाकुन्तल, १, १९) । समासोक्तिरलंकारः । तस्य लक्षणम् । सकलसमानविशेषणमेकं यत्राभिधीयमानं सत् । उपमानमेव गमयेद् उपमेयं सा समासोक्तिः ॥ (रुद्रट, काव्यालंकार, ८, ६६) ॥२५५॥

२५६) त्रिलोचनस्य । [सुखपृच्छिकाया हालिको मुखपङ्कजसुरभिपवननिर्वापितम् । तथा पिबति प्रकृतिकटुकमपि औषधं यथा नावशिष्यते ॥] हलिओ ओसहं जह न निट्ठाइ तह पियइ हालिक औषधं यथा नावशिष्येत् तथा निःशेषं पिबतीत्यर्थः । कदाचित् स्वादु स्यादित्याह । प्रकृतिकटुकमपि । किमर्थं तर्हि निःशेषयतीति विशेषणद्वारेण कारणमुच्यते । कीदृशं तत् । मुहपंकयसुरहिपवणणिव्ववियं मुखपङ्कजसुरभिणा पवनेन निर्वापितं शैत्यं नीतम् । कस्याः । सुहउच्छियाएँ सुखप्रश्नकारिण्याः । एतदीयवदनपवननिर्वापितम् इति अनुरागयोगात् सर्वं पिबतीत्यर्थः । ॥२५६॥

W318 २५७) अह सा तहिं तहिं चिय वाणीरवणम्मि चुक्कसंकेया ।
तुह दंसणं विमग्गइ पब्भट्ठणिहाणठाणं व ॥ ५७ ॥
W319 २५८) दढरोसकलुसियस्स वि सुयणस्स मुहाउ विप्पियं कत्तो ।
राहुमुहम्मि वि ससिणो किरणा अमयं चिय मुयंति ॥५८॥
W320 २५९) अवमाणिओ वि नवि तह दूमिज्जइ सज्जणो विहवहीणो ।
पडिकाउं असमत्थो माणिज्जंतो जह परेहिं ॥ ५९ ॥

---

२५७) यज्ञस्वामिनः । [अथ सा तस्मिन् तस्मिन् एव वानीरवने भ्रष्टसंकेता । तव दर्शनं विमार्गयति प्रभ्रष्टनिधानस्थानमिव ॥] काचित् सखी कस्याश्चिदनुरागं प्रकटयितुमिदमाह । अह सा तुह दंसणं विमग्गइ अथ सा तव दर्शनं विमार्गयति । क्व । तहिं तहिं चिय वाणीरवणम्मि तस्मिन् तस्मिन् एव वानीरवने । कीदृशी । चुक्कसंकेया चलितसंकेता । किमिव दर्शनम् । पब्भट्ठणिहाणठाणं व प्रभ्रष्टनिधानस्थानमिव । यथा हि प्रभ्रष्टं विस्मृतं निधानस्थानं तत्र तत्रैव मृग्यते, एवं तव दर्शनं मृगाक्षी मृगयत इत्यर्थः । चुक्कं चलितम् । वाणीरशब्दो वेतसपर्यायः । उपमालंकारः । विप्रलब्धा नायिका । तस्या लक्षणम्— अहरहरनुरागे दूतिकां प्रेष्य पूर्वं सरभसमभिधाय क्वापि संकेतकं वा । न मिलति खलु यस्या वल्लभो दैवयोगात् कथयति भरतस्तां नायिकां विप्रलब्धाम् ॥ २५७ ॥

२५८) श्रीमाधवस्य । [दढरोषकलुषितस्यापि सुजनस्य मुखाद् विप्रियं कुतः । राहुमुखेऽपि शशिनः किरणा अमृतमेव मुञ्चन्ति ॥] सुयणस्स मुहाउ विप्पियं कत्तो सुजनस्य मुखाद् विप्रियं कुतः । न कुतश्चिद् भवतीत्यर्थः । कदाचित् कुपितस्य भवतीत्याह । दढरोसकलुसियस्स वि दढरोषकलुषितस्यापि । अमुमेवार्थं समर्थयन्नाह । राहुमुहम्मि वि ससिणो राहुमुखेऽपि शशिनः किरणा अमयं चिय मुयंति किरणा अमृतमेव मुञ्चन्ति । सुजनप्रशंसापरेयमुक्तिः । अर्थान्तरन्यासोऽलंकारः ॥ २५८ ॥

२५९) अवन्तिवर्मणः । [अपमानितोऽपि नैव तथा दूयते सज्जनो विभवहीनः । प्रतिकर्तुम् असमर्थो मान्यमानो यथा परैः ॥] अपमानितोऽपि

१W. मुहाहि; २W. अप्पियं; 3W. परेण.

W321 २६०) कलहंतरे वि न विणिग्गयाइँ हियए जरं उवगयाइं ।
सुयणसुयाइँ रहस्साइँ डहइ आउक्खए अग्गी ॥ ६० ॥

W322 २६१) लुंबीओ अंगणमाहवीण दारग्गलाउ जायाओ ।
आसासो पंथपलोयणे वि नट्ठो गयवईणं ॥ ६१ ॥

तथा नैव दूयते सज्जनो विभवहीनः जह माणिज्जंतो परेहिं यथा मान्यमानः परैः दूयते । कथंभूतः । पडिकाउं असमत्थो प्रतिकर्तुमक्षमः । न तथा विभवभ्रंशेन सुजनस्य सकलजनापमानो दुनोति यथा प्रत्युपकारं कर्तुमसमर्थस्य मान्यमानस्यापि इत्यर्थः । नवि इति अवधारणे ॥२५९॥

२६०) प्रवरराजस्य । [कलहान्तरेऽपि न विनिर्गतानि हृदये जरामुपगतानि । सुजनश्रुतानि रहस्यानि दहत्यायुःक्षये अग्निः ॥] सुयणसुयाइँ रहस्साइँ सुजनश्रुतानि रहस्यानि गुप्तमन्त्रयितव्यानि आउक्खए अग्गी डहइ प्राणान्ते वह्निः भस्मसात् करोति । कलहंतरे वि न विणिग्गयाइँ कलहमध्येऽपि न विनिर्गतानि । भूयश्च कीदृशानि । जरं उवगयाइं जरामुपगतानि । क्व । हियए हृदये । रुष्टादपि सत्पुरुषात् प्राणान्तेऽपि रहस्यभेदो न भवतीत्यर्थः । डहइ आउक्खए अग्गी इति लोकोक्तिः ॥२६०॥

२६१) [लता अङ्गणमाधवीनां द्वारार्गला जाताः । आश्वासः पथिपलोकनेऽपि नष्टो रातपतिकानाम् ।] आश्वासो नष्टो गतपतिकानाम् । क्व विषये । पंथलोयऽपि मार्गान्वेषणेऽपि । अर्थात् प्रियस्येति । लुंपोओ दारग्गलाउ जायाओ लताः द्वारार्गलाः जाता । कस्याः । अंगणमाहवीए अङ्गणमाधविकायाः । प्रियमार्गान्वीक्षणेन किल वियोगिन्यो मनो विनोदयन्ति । लुंबी लता । माधवी अतिमुक्तकम् ॥२६१॥

१W. अविणिग्गआइं; २W. हिअअम्मि जरमुघगआइं.

W323 २६२) पियदंसणसुहरसमउलियाइँ नेयणाइँ तोइ न हु हुंति ।
ता केण कण्णलेइयं लक्खिज्जइ कुवलयं तिस्सा ॥६२॥

W 324 २६३) चिक्खिल्लखुत्तहलमुहकड्ढणसुढिए[3] पइम्मि पासुत्ते ।
अप्पत्तमोहणसुहा घणसमयं पामरी सवइ ॥६३॥

W 325 २६४) दूमंति दिंति सुक्खं कुणंति अणुरामयं रमाविंति ।
अरइरइबंधवाणं नमो नमो कामबाणाणं ॥६४॥

---

२६२) हंसस्य । [प्रियदर्शनसुखरसमुकुलिते नयने तस्या न खलु भवतः । तत् केन कर्णगृहीतं लक्ष्यते कुवलयं तस्याः ॥] प्रियदर्शनसुखरसेन मुकुलिते नयने न (चेत्) भवतः, ता केण कण्णलइयं तत् केन कर्णगृहीतं लक्खिज्जइ कुवलयं तिस्सा लक्ष्यते कुवलयं तस्याः । न केनापीत्यर्थः । एतेन कर्णकुवलयाकारे च तस्या नयने, इति भङ्ग्याऽभिहितं भवति । लइयं गृहीतम् । साम्यमलंकारः । अर्थक्रियया यस्मिन् उपमानस्यैति साम्यमुपमेयम् । तत्सामान्यगुणादिककारणया तद् भवेत् साम्यम् (रुद्रट, ८, १०५) ॥ २६२ ॥

२६३) तस्यैव (i. e. हंसस्य) । [कर्दममग्नहलमुखकर्षणश्रान्ते पत्यौ प्रसुप्ते । अप्राप्तमोहनसुखा घनसमयं पामरी शपति ॥] घनसमयं पामरी शपति आक्रोशति । कीदृशी । अप्पत्तमोहणसुहा अप्राप्तसुरतसुखा । क्व सति । पइम्मि पासुत्ते पत्यौ प्रसुप्ते । कीदृशे पत्यौ । चिक्खिल्लखुत्तहलमुहकड्ढणसुढिए कर्दमनिमग्नहलमुखाकर्षणश्रान्ते, श्रमेण स्वपति, सुरतस्य अभिलाषो न भवतीति । चिक्खिल्लं कर्दमम् । खुत्तं मग्नम् । सुढिओ श्रान्तः ॥ २६३

२६४) चुल्लोडकस्य । [दुन्वन्ति ददति सौख्यं कुर्वन्ति अरतिं रमयन्ति । अरतिरतिबान्धवेभ्यो नमो नमः कामबाणेभ्यः ॥] कामबाणेभ्यो नमो नमः । कीदृशेभ्यः । अरइरइबंधवाणं अरतिरतिबान्धवेभ्यः ।

१W. जइ से ण होंति णअणाइं; २W. कण्णरइअं. ३W. सिढिले; ४W. अणुराअं.

W 748 २६५) विंधंति[1] तणुं उवणिंति वेयणं नेय ताण खयमग्गो ।
अव्वो अइट्ठउव्वो अणंगबाणाण माहप्पो ॥६५॥

W 326 २६६) कुसुममया वि अइखरा अलद्धफंसा वि दूसहपयावा ।
भिंदंता वि रइयरा कामस्स सरा बहुवियप्पा ॥६६॥

कथमित्याह । दूमेंति देंति सुक्खं एते हि दुन्वन्ति ददति सौख्यम् । किमेतावदेव । नेत्याह । कुणंति अणरामयं रमाविति कुर्वन्ति अरतिं रमयन्ति । यत एवेदृशा अत एव अरतिरतिबान्धवत्वमेषाम् । इतरेतर-विरुद्धकार्यकारणत्वाच्च नमो नमः कामबाणेभ्य इत्युक्तम् । विरोधोऽलं-कारः ॥ २६४ ॥

२६५) तस्यैव (i. e. चुल्लोडकस्य) । [विध्यन्ति तनुम् उपनयन्ति वेदनां नैव तेषां क्षतमार्गः । अहो अदृष्टपूर्वम् अनङ्गबाणानां माहात्म्यम् ॥] अव्वो अइट्ठपुव्वो माहप्पो अहो अदृष्टपूर्वं माहात्म्यम् । केषाम् । अणंग-बाणाणं अनङ्गबाणानाम् । किं तदित्याह । विंधंति तणुं उवणिंति वेयणं विध्यन्ति तनुम् उपनयन्ति वेदनाम् । नेय ताण खयमग्गो नव तेषां क्षत-मार्ग इति । ये किल मनः (? शरीरं) व्यथयन्ति तेषां व्रणमार्गो दृश्यते । न चैवं स्मरमार्गगानाम् इति अननुभूतपूर्वः प्रभावस्तेषाम् इति सजातिव्य-तिरेकोऽलंकारः । अव्वो इति विस्मयार्थे निपातः ॥२६५॥

२६६) वराहधर्मिणः । [कुसुममया अप्यतिखरा अलब्धस्पर्शा अपि दुःसहप्रतापाः । भिन्दन्तोऽपि रतिकराः कामस्य शरा बहुविकल्पाः ॥] कामस्स सरा बहुवियप्पा कामस्य शरा बहुविकल्पाः । कथमित्याह । कुसुममया वि अइखरा कुसुममया अपि अतिखराः मर्मभेदिनः । ये किल कुसुममयास्ते मृदवो भवन्ति । पुनः कीदृशाः । अलद्धफंसा वि दूसहपयावा अलब्धस्पर्शा अपि दुस्सहप्रतापाः । किमेतावदेव । नेत्याह । भिंदंता वि रइयरा भिन्दन्तोऽपि रतिकराः । ये किल भिन्दन्ति न ते रतिं कुर्वन्ति ।

[1] W. विज्झंति.

W 327 २६७) ईसं जणंति वेड्ढंति वम्महं विप्पियं सहाविंति ।
विरहे न दिंति मरिउं अहो गुणा तस्स बहुमग्गा ॥६७॥

W 328 २६८) नीयाइँ अज्ज निक्किव पिणद्धणवरंगयाएँ वरईए ।
घरपरिवाडीएँ पहेणयाइँ तुह दंसणासाए ॥६८॥

अत एव बहुविकल्पत्वं कामबाणानामिति विरोधोऽलंकारः । तस्य लक्षणम् (?) ॥२६६॥

२६७) हालस्य । [ईर्ष्यां जनयन्ति वर्धयन्ति मन्मथं विप्रियं साहयन्ति । विरहे न ददति मर्तुम् अहो गुणास्तस्य बहुमार्गाः ।] अहो आश्चर्यम् । गुणास्तस्य हृदयवल्लभस्य बहुमार्गा नानाप्रकारा इत्यर्थः । तदेव बहुमार्गत्वमाह । ईसं जणंति ईर्ष्यां जनयन्ति । स खलु मे अन्ययोषिज्जनम् अयं रमयेन्नु, इति तस्य सौन्दर्योक्तिः । वड्ढंति वम्महं वर्धयन्ति मन्मथम् । तदनुस्मरणात् स्मरो वर्धते, इति । विप्पियं सहाविंति विप्रियं सहयन्ति इति सहजसौभाग्यं भङ्गेनोक्तं भवति । किमेतावदेव । नेत्याह । विरहे न दिंति मरिउं विरहे न प्रयच्छन्ति मर्तुं, पुनःसंगमसुखाशया । काचित् प्रोषितेऽपि प्रिये न म्रियत इति भावः । अहो इति आश्चर्ये । क्रियासमुच्चयोऽलंकारः ॥२६७॥

२६८) महासेनस्य । [नीतानि अद्य निष्कृप पिनद्धनवरक्तवसनया वराक्या । गृहपरिपाट्या प्रहेणकानि तव दर्शनाशया ॥] हे निक्किव निष्करुण अज्ज वरईए घरपरिवाडीएँ पहेणयाइँ नीयाइँ अद्य तया वराक्या गृहपरिपाट्या प्रहेणकानि नीतानि । कथंभूतया । पिणद्धणवरंगयाएँ निवसितनवरक्तकया । कया । तुह दंसणासाए त्वद्दर्शनाशया । त्वदवलोकनसुखलाभलालसया वराक्या प्रहेणकनिभेन प्रतिभवनं यातमिति तदनुरागप्रकाशनपरेयमुक्तिः । पहेणयं यदुत्सवदिने प्रतिगृहं प्रमदाभिर्दीयते । यस्य लाहणक इति लोकप्रसिद्धिः ॥२६८॥

1w. दावेंति

W 329 २६९) दूमिज्जइ हेमंतम्मि दुग्गओ फुंफुआसुयंधेण ।
धूमकविलेण परिविरलतंतुणा जुण्णवडएण ॥६९॥

W 330 २७०) खरसिप्पीरुल्लिहियाइँ कुणइ पहिओ हिमागमपहाए ।
आयमणजलुल्लयहत्थफंसमसिणाइँ अंगाइं ॥७०॥

W 331 २७१) नक्खुक्खुडियं सहयारमंजरिं पामरस्स सीसम्मि ।
बंदिं पिव हीरंतिं भमरजुवाणा अणुसरंति ॥७१॥

२६९) धनंजयस्य । [दूयते हेमन्ते दुर्गतः करीषाग्निसुगन्धेन । धूमकपिलेन परिविरलतन्तुना जीर्णपटकेन ॥] दुग्गओ हेमंतम्मि दूमिज्जइ दरिद्रो हेमन्ते दूयते । केन । जुण्णवडएण जीर्णपटकेन । पुनरपि कीदृशेन । परिविरलतंतुणा परिविरलतन्तुना । इत्थंभूतेन शीतमपनेतुमशक्तेन पटेन दुर्गतो दूयत इत्यर्थः । अन्ये तु सूइज्जइ हेमंतम्मि इति पठन्ति । तत्र च दरिद्रो हेमन्ते करीषानलसंक्रान्तसौरभेण कलितकालिम्ना स्फटितशतेन जरद्वस्त्रेण सूच्यत इति संबन्धः । फुंफुआ करीषाग्निः । पूर्वपक्षे हेतुः, उत्तरत्र अनुमानमलंकारः ॥२६९॥

२७०) कृष्णचरित्रस्य । [खरपलालोल्लिखितानि करोति पथिको हिमागमप्रभाते । आचमनजलार्द्रकहस्तस्पर्शमसृणानि अङ्गानि ॥] अङ्गानि पथिकः करोति । कीदृशानि । आयमणजलुल्लयहत्थफंसमसिणाइँ आचमनजलार्द्रकहस्तस्पर्शमसृणानि । कदा । हिमागमपहाए हिमागमप्रभाते । स्वभावोऽयं परिपाट्यां पलालतल्पतृणाग्रैर्लाञ्छितानि अङ्गानि पथिकः परिमार्जयतीति । सिप्पीरं पलालम् । जातिरलंकारः ॥२७०॥

२७१) प्रसन्नस्य । [नखोत्खण्डितां सहकरमञ्जरीं पामरस्य शीर्षे । बन्दीमिव ह्रियमाणां भ्रमरयुवानो अनुसरन्ति ॥] सहकारमञ्जरीं भ्रमरयुवानोऽनुसरन्ति । कीदृशीम् । नक्खुक्खुडियं नखोत्खण्डिताम् । क्व । पामरस्स सीसम्मि पामरस्य शिरसि । कामिव अनुसरन्ति ।

1w. सूइज्जइ; 2w. जलुल्लिअ; 3w. भमरजुआणा.

W 288 २७२) तावमवणेइ न तहा चंदणपंको वि कामिमिहुणाणं ।
जह दूसहे वि गिम्हे अन्नुन्नालिंगणसुहिल्ली ॥७२॥

W 289 २७३) तुप्पोलया किणो मं¹ज्जसि त्ति इं²यं जंपियाएँ वहुयाए ।³
विउणावेढियजहणत्थलाएँ लज्जोणयं हसियं ॥७३॥

बंदिं पिव होरंतिं बन्दीमिव ह्रियमाणाम् । यथा बन्दीं ह्रियमाणां जना अनुसरन्ति, एवं सहकारमञ्जरीं भ्रमरयुवान इत्यर्थः । नखशब्दस्य सेवादिपाठाद् (वररुचि, ३, ५८) द्वित्वम् । खुडियं खण्डितम् । उपमालंकारः ॥२७१॥

२७२) महाराजस्य । [तापमपनयति न तथा चन्दनपङ्कोऽपि कामिमिथुनानाम् । यथा दुस्सहेऽपि ग्रीष्मे अन्योन्यालिङ्गनसुख-केलिः ॥] न तथा चन्दनपङ्कोऽपि तापमपनयति जह अन्नुन्नालिंगण-सुहिल्लो यथा अन्योन्यालिङ्गनसुखम् । केषाम् । कामिमिहुणाणं कामिमिथुनानाम् । कदा । गिम्हे ग्रीष्मे । कीदृशे । दुस्सहे वि दुस्सहेऽपि । अगणितग्रीष्माणां कामिमिथुनानाम् अन्योन्यं सर्वाङ्गमालिङ्गनं निर्वृतिहेतुरित्यर्थः ॥२७२॥

२७३) हरिमृगस्य । [स्निग्धालका किं मज्जसि इतीति जल्पितया वध्वा । द्विगुणावेष्टितजघनस्थलया लज्जावनतं हसितम् ॥] वध्वा लज्जा-वनतं हसितम् । कथंभूतया । तुप्पालया किणो मज्जसि त्ति इय जंपियाएँ स्निग्धालका किमिति मज्जसीति जल्पितया । पुनश्च कीदृश्या । विउणावेढियजहणत्थलाएँ द्विगुणावेष्टितजघनस्थलया । अहो अहमनेन लक्षिता । यथा चानेन तथा मा मां रजस्वलां कश्चिज्जनो जानातु इति द्विगुणावेष्टितनितम्बता वध्वाः । तुप्पं स्निग्धम् । किणो प्रश्ने । अन्य इतिशब्दः प्रश्ने, अन्यश्च प्रकारे ॥२७३॥

1W. तुप्पाणणा; 2W.अच्छसि; 3W. परिपुच्छिआइ.

W 290 २७४) हियइ च्चेय विराओ न साहिओ जाणईएँ घरसारं।
बंधवदुव्वयणं पिव दोहलओ दुग्गयवहूए ॥७४॥

W291 २७५) धावइ विहडियधम्मिल्लसिचयसंजमणवावडकरग्गा।
चंडिलभयविवलायंतडिंभमग्गन्निरी जणणी ॥७५॥

W292 २७६) उव्वहइ वहू जह जह नवजुव्वणमणहराइँ अंगाइं।
तह तह से तणुयाइं मज्झं दइओ य पडिवक्खो ॥७६॥

---

२७४) लक्षणस्य। (लक्ष्मणस्य ?)। [हृदय एव विलीनो न कथितो जानत्या गृहसारम्, बान्धवदुर्वचनमिव दोहदो दरिद्रवध्वा ॥] दुग्गयवहूए दोहलओ न साहिओ दुर्गतवध्वा दोहदो न कथितः। किमिव। बन्धवदुव्वयणं पिव बान्धवदुर्वचनमिव। कथंभूतया। जाणईएँ घरसारं जानत्या गृहसारम्। अत एव हियइ च्चेय विराओ स दोहदस्तस्या अभिलष्यमाणो हृदय एव विलीनः। यथैव बान्धवदुर्वचनं न प्रकाश्यते तथा दोहदमपि न प्रकाशितवती दुष्प्राप्यत्वादिति भावः। विराओ विलीनः। साहिओ कथितः। दुर्गतो दरिद्रः। उपमालंकारः ॥२७४॥

२७५ कृष्णचित्तस्य। [धावति विघटितधम्मिल्लसिचयसंयमनव्यापृतकराग्रा। नापितभयविपलायमानडिम्भमार्गान्वेषणशीला जननी ॥] जणणी धावइ जननी धावति। कीदृशी। चंडिलभयविवलायंतडिंभमग्गन्निरी नापितभयविपलायमानडिम्भमार्गान्वेषणशीला। पुनरपि कीदृशी। विहडियधम्मिल्लसिचयसंजमणवावडकरग्गा विघटितधम्मिल्लसिचयसंयमनव्यापृतकराग्रा। वावडं ज्ञ न स्यावर्ति त कर्नेग (?) धम्मिल्लो केशपाशः। चंडिलो नापितः। जातिरलंकारः ॥२७५॥

२७६) कृष्णराजस्य। [उद्वहति वधूर्यथा यथा नवयौवनमनोहराण्यङ्गानि। तथा तथा तस्यास्तनुकानि मध्यं दयितश्च प्रतिपक्षः ॥] जह जह वहू नवजुव्वणमणहराइँ अंगाइं उव्वहइ यथा यथा वधूर्नवयौवनमनोहराणि अङ्गानि उद्वहति, तह तह से तणुयाइं मज्झं दइओ य पडि-

---

१W. विलीणो; २W. जाणिऊण; ३W. विअलिअ; ४W. डिंभपरिमग्गिरी; ५W घरिणी; ६W जह जह उव्वहइ वहू; ७W तणुआअइ.

W293 २७७) जह जह जरापरिणओ होइ पई दुग्गओ विरूओ य ।
कुलबालियाण तह तह अहिययरं वल्लहो होइ ॥७७॥

W294 २७८) एसो मामि जुवाणो वारंवारेण जं अडयणाओ ।
गिम्हे गामिक्ककवडोअयं व [2]किच्छेहिँ पाविंति ॥७८॥

W295 २७९) गाम[3]वडम्मि पिउच्छा आवंडुमुहीण पंडुरच्छायं ।
हियएण समं असईण पडइ वायाहयं पत्तं ॥७९॥

वक्त्रो तथा तथा तस्यास्तनूनि भवन्ति मध्यं दयितः प्रतिपक्षश्च । मध्यं तयोर्विशेषणम् (?) । दयितस्तदासक्त्या । प्रतिपक्षः सपत्नीजनः । हेतुसमुच्चयाभ्यां संसृष्टिरलंकारः ॥२७६॥

२७७) राजधर्मणः । [यथा यथा जरापरिणतो भवति पतिर्दुर्गतो विरूपश्च । कुलबालिकानां तथा तथा अधिकतरं वल्लभो भवति ॥] जह जह जरापरिणओ यथा यथा जरापरिणतः होइ पई भवति पतिः दुग्गओ विरूओ य दुर्गतो विरूपश्च, कुलबालियाण तह तह कुलबालिकानां तथा तथा अहिययरं वल्लहो होइ अधिकतरं वल्लभो भवति । कुलबालिकाप्रशंसापरेयमुक्तिः॥२७७॥

२७८) पाहिलस्य । [एष मातुलानि (अथवा सखि) युवा वारंवारेण यमसत्यः । ग्रीष्मे ग्रामैकावटोदकमिव कृच्छ्रेण प्राप्नुवन्ति ॥] एसो मामि जुवाणो एष मातुलानि युवा जं अडयणाओ किच्छेहिँ पावंति यम् असत्यः कृच्छ्रेण प्राप्नुवन्ति । गिम्हे गामिक्कवडोअयं व ग्रीष्मे ग्रामैककूपोदकमिव । कथम् । वारंवारेण पुनःपुनः । अडयणाओ असत्यः । मामि इति मातुलानी सखी च । अवटः कूपः ॥२७८॥

२७९) मधुसूदनस्य । [ग्रामवटे पितृष्वसः आपाण्डुमुखीनां पाण्डुरच्छायम् । हृदयेन समम् असतीनां पतति वाताहतं पत्रम् ॥] हे पिउच्छा पितृष्वसः, गामवडम्मि पत्तं पडइ ग्रामवटे पत्रं पतति ध्वंसते (? स्रंसते) । कथंभूतम् । वायाहयं वाताहतम् । पुनश्च कीदृशम् ।

१W. पिओ; २W किच्छेण; ३W गामवडस्स.

W296 २८०) पिच्छइ अलद्धलक्खं दीहं नीससइ सुन्नयं हसइ ।
जह जंपइ अफुडत्थं तह से हिययट्ठियं किं पि ॥८०॥

W297 २८१)घरेवइ[1] गउ म्ह सरणं रक्खसु एयं ति अडयणा भणिरी[2] ।
सहसागयस्स तुरियं पइणु च्चिय जारमप्पेइ ॥८१॥

पंडुरच्छायं पाण्डुरच्छायम् । किं तदेव केवलं पतति । नेत्याह । आपंडुमुहीण असईण हियएण समं आपाण्डुरमुखीनाम् असतीनां हृदयेन समम् । अत्र पत्रपतनक्रमेण विरलतां गते वटविटपिनि कथमस्माभिरभीष्टसंगमसुखम् आस्वादयितव्यम् इति असतीनां हृदयपतनं वैवर्ण्यं चेति । सहोक्तिरलंकारः । भवति यथारूपोऽर्थः कुर्वन्नेवापरं तथारूपम् । उक्तिस्तस्य समाना तेन समं या सहोक्तिः सा ॥ (रुद्रट,७, १३)॥२७९॥

२८०) खलस्य। [प्रेक्षतेऽलब्धलक्ष्यं दीर्घं निःश्वसिति शून्यं हसति । यथा जल्पत्यस्फुटार्थं तथाऽस्या हृदयस्थितं किमपि ॥] यथा सा पिच्छइ अलद्धलक्खं प्रेक्षते अलब्धलक्ष्यम् , दीहं नीससइ दीर्घं निःश्वसिति, सुन्नयं हसइ शून्यं हसति, जइ जंपइ अफुडत्थं यथा च अस्फुटार्थं जल्पतीति, तथा अहम् एवं मन्ये से तस्याः हिययट्ठियं किं पि हृदयस्थितं किमपि । लिङ्गेन ज्ञायते तस्याः कश्चित् सुन्दरयुवा चित्ते वर्तते, इत्यर्थः । अनुमानं नामालंकारः । तस्य लक्षणम् । वस्तु परोक्षं यस्मिन् साध्यमुपन्यस्य साधनं तस्य । पुनरन्यदुपन्यस्येद् विपरीतं चैतदनुमानम् ॥ (रुद्रट, ७, ५६) प्रथमानुरागे बिप्रलम्भोऽयम् । प्रियतमाप्राप्तौ उन्मादो नाम दशा ॥२८०॥

२८१) विषदस्य । [गृहपते गतोऽस्माकं शरणं रक्षैनमित्यसती भणन्ती । सहसागतस्य त्वरितं पत्युरेव जारमर्पयति ॥] काचिदुपपतौ गाढोपगूढे सति समायान्तं स्वपतिं प्रेक्ष्य स्वदुर्नयं निगूहितुम् इदमाह । स्वदुश्चरितं प्रच्छादयितुं काचित् पत्युरेव जारमर्पयति । कथम् । तुरियं तत्क्षणेनेत्यर्थः ।

१ W· गहवइ; २ W· भणिडं.

W301 २८२) अह अम्ह आगओ कुलहराउ पुरउ त्ति छिंछई जारं ।
सहसागयस्स पइणो तुरियं कंठम्मि लाएइ ॥८५॥

W332 २८३) सूरच्छलेण पुत्तय कस्स तुमं अंजलिं पणामेसि ।
हासकडक्खुम्मीसा न हुंति देवाण जोक्कारा ॥८३॥

कीदृशस्य पत्युः । सहसागयस्स सहसागतस्य । कीदृशी सा । घरवइ गउ म्ह सरणं गृहपते गतोस्माकं शरण रक्खसु एयं ति अइयणा भणिरी रक्षैनमिति भणनशीला असती । शरणागतोऽयं त्वां, रक्षैनमिति व्यपदेशेन पत्युरेव उपपतिमर्पयतीत्यर्थः । अइयणा असती । अप्पेइ अर्पयति । लेशोऽलंकारः । तस्य लक्षणम् । लेशो लेशेन निर्भिन्नवस्तुरूपनिगूहनम् । (काव्यादर्श, २, २६५) ॥२८१॥

२८२) समविषमकस्य । [‘एषोऽस्माकमागतः कुलगृहात् पुरतः’ इत्यसती जारम् । सहसागतस्य पत्युस्त्वरितं कण्ठे लगयति ॥] छिंछई असती जारं पइणो तुरियं कंठम्मि लाएइ जारं पत्युः त्वरितं कण्ठे लगयति । कथंभूतस्य पत्युः । सहसागयस्स अकस्मादागतस्य । कथम् । अह अम्ह आगओ कुलइराउ पुरउ त्ति एषोऽस्माकम् आगतः कुलगृहात् पुरत इति । स्वदुर्नयप्रच्छादनपरेयं व्याजोक्तिः । छिंछई असती ॥२८२॥

२८३) शिखण्डिनः । [सूर्यच्छलेन पुत्रिके कस्य त्वम् अञ्जलिम् उपनयसि । हासकटाक्षोन्मिश्रा न भवन्ति देवानां नमस्काराः ॥] सूरच्छलेण पुत्तय सूरच्छलेन पुत्रिके कस्स तुमं अंजलिं पणामेसि कस्य त्वम् अञ्जलिमुपनयसि । सूर्यप्रणामापदेशेन कस्य त्वम् अञ्जलिं करसम्पुटं घटयसीत्यर्थः । यतः हासकडक्खुम्मीसा हासकटाक्षोन्मिश्राः न हुंति देवाण जोक्कारा न भवन्ति देवतानां नमस्काराः । अतः कोऽसौ युवा यस्यार्थे त्वम् अञ्जलिं बध्नासीति गाथार्थः ॥२८३॥

---

१ W- अज्ज कुलहराओ त्ति छेंछई

W334 २८४) गीयच्छलेण भरई कस्स तुमं रुयसि निब्भरुक्कंठं ।
मन्नुपडिरुद्धकंठद्धणिंतखलियक्खरुल्लावं ॥८४॥

W335 २८५) बहलतमाहयराई अज्ज पउत्थो पई घरं सुन्नं ।
तह जग्गेसु सयज्झय जहा न अम्हे मुसिज्जामो ॥८५॥

२८४) वज्रदेवस्य । [गीतच्छलेन स्मरन्ती कस्य त्वं रोदिषि निर्भरोत्कण्ठम् । मन्युप्रतिरुद्धकण्ठार्धनिर्यत्स्खलिताक्षरोल्लापम् ॥] कस्स भरई तुमं निब्भरुक्कठं रुयसि कस्य स्मरन्ती त्वं निर्भरोत्कण्ठं रोदिषि । केन । गीयच्छलेण गीतच्छलेन । कथम् । मन्नुपडिरुद्धकंठद्धणिंतखलियक्खरुल्लावं । मन्युप्रतिरुद्धकण्ठार्धनिर्यत्स्खलिताक्षरोल्लापम् इति क्रियाविशेषणम् । इति पूर्वानुरागे विप्रलम्भशृङ्गारे अनुस्मरणं नाम दशा । मन्युर्दैन्यम् । जातिरलंकारः ॥२८४॥

२८५) आउकस्य । [बहलतमआहतरात्रिः, अद्य प्रोष्पितः पतिः, गृहं शून्यम् । तथा जागृहि प्रतिवेशिन् यथा न वयं मुष्यामहे ॥] काचिदसती जारस्य आगमनाभयं सूचयन्ती इदमाह । तह जग्गेसु तथा जागृहि सयज्झय प्रतिवेशिन्, न जहा अम्हे मुसिज्जामो न यथा वयं मुष्यामहे । किं कारणम् । यतः बहलतमाहयराई बहलतिमिराहता रात्रिः । अज्ज पउत्थो पई घरं सुन्नं अद्य प्रोषितः पतिः गृहं शून्यम् । घनतमतमस्काण्डकज्जलितायां निशि न कोऽपि लक्षयति, नापि सद्यः प्रोषितस्य पत्युः प्रत्यागमनं संभाव्यते । शून्यतायां (? शून्यतया) प्रातिवेश्मिकत्वन्मयम् (?) अस्मद्वेश्म । निःशङ्कं त्वया आगन्तव्यम् इति प्रयुक्त्योपपतेः ज्ञापितं भवति । सयज्झओ प्रतिवेशी । पउत्थो प्रोषितः । भावो नाम अलंकारः । तस्य लक्षणम् — अभिधेयमभिदधानं तदेव तदसदृशसकलगुणदोषम् । अर्थान्तरमवगमयति यद् वाक्यं सोऽपरो भावः ॥ (रुद्रट. ७,४०) ॥२८५॥

१ W. गेअच्छलेण; २ W. भरेउं; ३ W. सअज्झिअ; ४ W. ण जहा अम्हे

W336 २८६) संजीवणोसहं पिव सुयस्स रक्खइ अणन्नवावारा ।
साद्यू नवब्भदंसणकंठागयजीवियं सुन्हं ॥८६॥
W337 २८७) नूणं हिययणिहित्ताएँ वससि जायाएँ अम्ह हिययम्मि ।
अन्नह मणोरहा साहे सुहय कह तीएँ विन्नाया ॥८७॥[1]
W338 २८८) तइ सुहय अईसंते तिस्सा अच्छीहि कण्णलग्गेहिं ।
दिन्नं[2] घोलिरबाहेहिँ पाणियं दंसणसुहाणं ॥८८॥

२८६) कैवर्तस्य । [संजीवनौषधमिव सुतस्य रक्षति अनन्यव्यापारा । श्वश्रूर्नवाभ्रदर्शनकण्ठागतजीवितां स्नुषाम् ॥] सासू सुन्हं रक्खइ श्वश्रूः स्नुषां रक्षति । कीदृशी । अणन्नवावारा अनन्यव्यापारा तद्रक्षणैकपरा । कथंभूतां स्नुषाम् । नवब्भदंसणकंठागयजीवियं नवाभ्रदर्शनेन कण्ठागतं जीवितं यस्याः, सा तथोक्ता, ताम् । किमिव । संजीवणोसहं पिव संजीवनौषधमिव । कस्य । सुयस्स सुतस्य । तया विना नासौ मत्पुत्रो जीवतीति भावः । सुन्हा पुत्रवधूः । उपमाऽलंकारः ॥२८६॥

२८७) भूतदत्तस्य । [नूनं हृदयनिहितया वससि जायया अस्माकं हृदये । अन्यथा मनोरथाः कथय सुभग कथं तया विज्ञाताः ॥] काचित् खण्डिताधरदलं प्रातरायातं प्रियं प्रतिभेत्तुमिदमाह । नूणं हिययणिहित्ताएँ जायाएँ अम्ह हिययम्मि वससि नूनं हृदयनिहितया जायया त्वम् अस्मद्हृदये वससि । कथमेतद् व्यज्ञासीरित्याह । अन्नह मणोरहा साह सुहय तीएँ कह विन्नाया अन्यथा मनोरथाः कथय सुभग मम मनोरथाः कृता भवद्दशनादिकाः कथं तया विज्ञाताः । यदि च सा त्वदनुषङ्गेण मम चेतसि न वसति कथं तया मम मनोरथाः त्वदधरदलदशनादिकाः ज्ञाताः । त्वयि अनुतिष्ठतीति (?) प्रतिभेदः । मध्या खण्डिता नायिका । मध्या प्रतिभिनत्त्येनं सोल्लुण्ठैः साधु भाषितैः । अनुमानालंकारः ॥२८७॥

२८८) महादेवस्य । [त्वयि सुभगादृश्यमाने तस्या अक्षिभ्यां कर्णलग्नाभ्याम् । दत्तं घूर्णनशीलबाष्पाभ्यां पानीयं दर्शनसुखानाम् ॥] तिस्सा

१W. मे साहसु कह तीअ विण्णाआ; २W. दिण्णं.

W340 २८९) वोलीणालक्खियरूवजुव्वणा पुत्ति कं न दूमेसि।
दिट्ठा पणट्ठपोराणजणवया जम्मभूमि व्व ॥८९॥
W341 २९०) परिओसवियसिएहिं भणियं अच्छीहिँ तेण जणमज्झे।
पेंडिवन्नं चिय भरिउव्वरंतसेएहिँ अंगेहिं ॥९०॥

अच्छीहिँ दंसणसुहाणं पाणियं दिन्नं तस्या अक्षिभ्यां दर्शनसुखानां पानीयं दत्तम्। कथंभूताभ्याम्। घोलिरबाहेहिँ घूर्णनशीलबाष्पाभ्याम्। पुनरपि कीदृशाभ्याम्। कण्णलग्गेहिं कर्णलग्नाभ्याम्। क्व सति। तइ सुहय अईसंते त्वयि सुभग अदृश्यमाने। अन्ययुवावलोकनविमुखी त्वामेव स्वदृशा अदृक्षद् इति भावः। उत्प्रेक्षालंकारः ॥२८८॥

२८९) विश्वसेनस्य। [अतिक्रान्तालक्षितरूपयौवना पुत्रि कं न दुनोषि। दृष्टा प्रनष्टपुराणजनपदा जन्मभूमिरिव ॥] हे पुत्ति पुत्रि दिट्ठा कं न दूमेसि दृष्टा कं न दुनोषि। कीदृशो। वोलीणालक्खियरूवजुव्वणा वोलीणं अतिक्रान्तम् अथ च आलक्षितं रूपयौवनं यस्याः सा तथोक्ता। का इव। जम्मभूमि व्व जन्मभूमिरिव। कीदृशी। पणट्ठपोराणजणवया प्रनष्टपुराणजनपदा। यथा प्रनष्टपुराणजनपदा जन्मभूमिः मनो दुनोति तथा त्वम् इत्यर्थः। वयःपरिणतिसमये सविशेषरूपयौवनलिङ्गानुमितपूर्व-सौन्दर्या त्वं मनो दुनोषीति भावः। वोलीणं अतिक्रान्तम्। आ ईषदर्थे। पोराणं इति तुण्डादिपाठाद् ओत्वम् (वररुचि ७,२०) हेत्वलंकारः ॥२८९॥

२९०) प्रवरराजस्य। [परितोषविकसिताभ्यां भणितमक्षिभ्यां तेन जनमध्ये। प्रतिपन्नमेव भृतोर्वरितस्वेदैरङ्गैः ॥] तेण अच्छीहिँ भणियं तेनाक्षिभ्यां भणितम्। कथंभूताभ्याम्। परिओसवियसिएहिं परितोषविक-सिताभ्याम्। क्व। जणमज्झे जनमध्ये। सकलजनसमाजे लज्जया वक्तुं न पार्यते, अतो नेत्राभ्यामेव अभिहितं मां भजस्वेति भावः। किमेतावदेव। नेत्याह। अंगेहिं पडिवन्नं चिय अङ्गैः प्रतिपन्नमेव। कीदृशैरङ्गैः। भरि-

१W. पडिवण्णं तीअ वि उव्वमंतसेएहि.

W342 २९१) इक्किक्कमसंदेसाणुरायवड्ढंतकोउहल्लाइं ।
दुक्खं असमत्तमणोरहाइँ अच्छंति मिहुणाइं ॥९१॥

W343 २९२) जइ सो न वल्लहु च्चिय गुत्तग्गहणेन तस्स सहि कीस ।
होइ मुहं ते रवियरफंसविसट्टं व तामरसं ॥९२॥

W344 २९३) माणदुमफरुसपवणस्स मामि सव्वंगणिव्वुइयरस्स ।
अवऊहणस्स भद्दं रेयनाडयपुव्वरंगस्स ॥९३॥

उव्वरंतसेएहिँ भृतावशिष्यमाणस्वेदैः । मम इत्यध्याहार्यम् । स्वेदः सात्त्विको भावः । रुद्रटमते सूक्ष्मम् अलंकारः । यत्रायुक्तिमदर्थो गमयति शब्दो निजार्थसंबद्धम्। अर्थान्तरमुपपत्तिमदिति तत् संजायते सूक्ष्मम् ॥ (रुद्रट, ७, ९८) ॥२९०॥

२९१) जीवदेवस्य । [अन्योन्यसंदेशानुरागवर्धमानकौतूहलानि । दुःखमसमाप्तमनोरथानि आसते मिथुनानि ॥] दुक्खं मिहुणाइं अच्छंति कष्टं मिथुनानि तिष्ठन्ति । तामेव दुःखासिकामाह। कीदृशानि मिथुनानि । असमत्तमणोरहाइँ असमाप्तमनोरथानि । पुनश्च कीदृशानि । इक्किक्कम-संदेसाणुरायवड्ढंतकोउहल्लाइं परस्परसंदेशानुरागवर्धमानकौतूहलानि । पूर्वानुरागे गाथेयम् । इक्किक्कमं परस्परम् ॥२९१॥

२९२) प्राणराजस्य । [यदि स न वल्लभ एव, गोत्रग्रहणेन तस्य सखि कस्मात् । भवति मुखं ते रविकरस्पर्शविकसितमिव तामरसम् ॥] जइ सो न वल्लहु च्चिय यदि स न वल्लभ एव, गुत्तग्गहणेग तस्स सहि कीस गोत्रग्रहणेन तस्य सखि कस्मात्। होइ मुहं ते भवति मुखं ते, रवि-यरफंसविसट्टं व तामरसं रविकरस्पर्शविकसितमिव तामरसम् । गोत्रं नाम । तामरसं कमलम् । उत्तरनामालंकारः ॥२९२॥

२९३) पाहिलस्य । [मानद्रुमपरुषपवनस्य सखि सर्वाङ्गनिर्वृति-करस्य । अवगूहनस्य भद्रं रतनाटकपूर्वरङ्गस्य ॥] हे मामि सखि, अव-

---

१W. रइणाडअ.

W345 २९४) निययाणुमाणणीसंक हियय दे पसिय विरम इत्ताहे ।
अमुणियपरमत्थजणाणुलग्ग कीसम्ह लहुएसि ॥९४॥
W346 २९५) अवेसहिओ[1] तुज्झ पइणा सलाहमाणेण ईच्चिरं[2] हसिओ ।
चंदु[3] त्ति तुज्झ मुहदिन्नकुसुमसायंजलिविलक्खो ॥९५॥

ऊहणस्स भद्दं अवगूहनस्य भद्रं शोभनं भवतु । कीदृशस्य । माणदुमफरुसपवणस्स मान एव द्रुमः, तस्य परुषपवनस्य, तदुन्मूलकत्वात् । सव्वंगणिव्वुइयरस्स सर्वाङ्गनिर्वृतिकरस्य । भूयश्च कीदृशस्य । रयणाडयपुव्वरंगस्स, रतनाटकपूर्वरङ्गस्य तस्य प्रथमं प्रयुज्यमानत्वात् । ईदृशस्य अवगूहनस्य भद्रं भवतु इत्यर्थः । पूर्वरङ्गो यत् नाटकादीनामादौ प्रयुज्यते । यस्य प्रत्याहारोऽवतरणं तथा ह्यारम्भ एव च । संघातः कार्यान्तश्च परिघट्टनेत्यादीनि महाचारीपर्यन्तानि द्वाविंशतिः अङ्गानि । (cf. नाट्यशास्त्र, ५, ९) । रूपकभेदः परम्परितं नामालंकारः । यस्मिन्नुपमानाभ्यां समस्यमुपमेयमन्यार्थे (रुद्रट, ८, ४७) ॥२९३॥

२९४) चुल्लोडकस्य । [निजानुमाननिःशङ्क हृदय प्रार्थये विरम सांप्रतम् । अज्ञातपरमार्थजनानुलग्न किमित्यस्मान् लघयसि ॥] काचिदस्थिरप्रेम्णि प्रियतमे स्वगतमिदमाह । हे हियय हृदय निययाणुमाणणीसंक निजानुमाननिःशङ्क, अमुणियपरमत्थजणाणुलग्ग अज्ञातपरमार्थजनानुलग्न, पसिय विरम इत्ताहे प्रसीद विरम इतः (? सांप्रतम्) । कीसम्ह लहुएसि किमित्यस्मान् लघयसि । अमुना अनुमानेन निजार्जवगुणेन अन्यासक्तेऽपि कान्ते मा स्म अनुरागारम्भनिर्भरं भूरित्यर्थः । दे प्रार्थनायाम् । इत्ताहे सांप्रतम् । अन्ये इतः । खण्डिता नायिका स्वीया । द....देश (?) कोपाङ्गम् । आक्षेपोऽलंकारः ॥२९४॥

२९५) कैलासस्य । [आवसथिकः तव पत्या श्लाघमानेन चिरं हसितः । चन्द्र इति तव मुखदत्तकुसुमसायाञ्जलिविलक्षः ॥] तुज्झ पइणा

१W. ओसहिअजणो पइणा; २W. अइचिरं; ३W. चंदो त्ति तुज्झ वअणे विइण्णकुसुमंजलिविलक्खो.

W702 २९६) अन्नच्छलेण पेसियतुलग्गमेलीणदिट्ठिपसराइं।
दो[2] वि वणे कयभंडणाइँ सम[3]यं चि हसियाइं ॥९६॥

W347 २९७) झिज्जंतेहि अणुदिणं पच्चक्खम्मि वि तुमम्मि अंगेहिं।
बालय पुच्छिज्जंती न याणिमो कस्स किं भणिमो ॥९७॥

अवसहिओ जणो इच्चिरं हसिओ तव पत्या प्रतिजनः (? आवसथिकः जनः) चिरकालं हसितः। कीदृशेन पत्या। सलाहमाणेण श्लाघमानेन। कीदृशः प्रतिजनः। चंदु त्ति तुज्झ मुहदिन्नकुसुमसायंजलिविलक्खो चन्द्र इति त्वन्मुखसायंदत्तकुसुमाञ्जलिविलक्षः। स तव भर्ता स्वभावोद्द्योतितदिङ्मुखः शशी अयम् इति बुद्ध्या मुग्धमुनिजनं वितीर्णसन्ध्याञ्जलिं विलक्षं वीक्ष्य सायं हसितवान् इत्यर्थः। अवसहिओ प्रतिजनः (?) इच्चिरं चिरं कालम्। अपह्नुतिरलंकारः ॥२९५॥

२९६) मन्दरस्य। [अन्यच्छलेन प्रेषितयदृच्छामिलितदृष्टिप्रसरौ। द्वावपि सखि कृतकलहौ सममेव हसितौ ॥] काचित् कस्याश्चित् कथयति। दो वि वणे समयं चिय पहसियाइं द्वावपि दंपती सखि सममेव प्रहसितौ सहास्यौ संपन्नौ। कीदृशौ। कयभंडणाइँ कृतकलहौ। कृतकलहतया अन्योन्यानवलोकनस्थितौ। कथं तर्हि प्रहसितौ। विशेषणद्वारेण कारणमुच्यते। कीदृशौ दंपती। अन्नच्छलेण पेसियतुलग्गमेलीणदिट्ठिपसराइं अन्यच्छलेन प्रेषिततुलाग्रमिलितदृष्टिप्रसरौ, अत एव प्रहसितौ, नावयोः किल प्रतिज्ञा पूर्णेति। अन्ये पुनरन्यथा व्याचक्षते। यथा वणे सखि कृतकलहावपि दंपती अन्यच्छलेन अन्यमेवावलोकयतः। तथा पश्यतोस्तयोः एकदा कथमपि दैवाद् द्वयोरपि दृष्टिर्मिलितेति। ततस्तौ इतरेतरं ज्ञाताभिप्रायतया हसितवन्तौ इति। प्राकृते बहुलम् इति पुंस्यपि नपुंसकतानिर्देशः। वणेशब्दः सखीपर्यायः। जातिरलंकारः ॥२९६॥

२९७) अन्यशक्तेः। [क्षीयमाणैरनुदिनं प्रत्यक्षेऽपि त्वयि अङ्गैः। बालक पृच्छ्यमाना न जानामि कस्य किं भणामि ॥] काचित प्रियस्य

१W. अण्णोण्णकडक्खंतरपेसियमेलीण; २W. दो च्चिअ मण्णे; ३W. समअं पहसिआइं.

W348 २९८) अंगाणं तणुयारय सिक्खावय दीहरोइयव्वाणं ।
विणयाइक्कमकारय मा[1] हो णे विम्हरिज्जासु ॥९८॥

W349 २९९) अन्नह न तीरइ च्चिय परियइढंत[2]म्म गरुयपिम्मस्स ।
मरणविणोएण विणा विरमा[3]लेउं विरहदुक्खं ॥९९॥

लज्जया लघिम्ना च अपराधान् प्रकटयितुम् अपारयन्ती अवपृच्छति । अणुदिणं अनुदिनं झिज्जंतेहिँ अंगेहिँ क्षीयमाणैरङ्गैः पुच्छिज्जंती किमिति त्वं कृशासीति पृच्छ्यमाना न याणिमो कस्स किं भणिमो न जानीमः कस्य किं भणामः । कस्मिन् सति । पच्चक्खम्मि वि तुमम्मि प्रत्यक्षेऽपि त्वयि । विरहे हि प्रियप्रवासः कायकार्श्यकारणं कथ्यते । त्वयि तु प्रत्यक्षं लक्ष्यमाणे किं वक्ष्यामीति । तवापराधान् प्रकटयितुं न पारयामीति भावः ॥२९७॥

२९८) माणिक्यराजस्य । [अङ्गानां तनु (त्व)कारक शिक्षक दीर्घरोदितव्यानाम् । विनयातिक्रमकारक मा रे नः विस्मरेः ।'] काचित् कान्तस्य नैकापराधदुःखभरनिर्भरतया कृतस्वमरणव्यवसाया तमेव आत्ममरणं प्रार्थयमाना इदमाह । हे अंगाणं तणुयारय अङ्गानां तनु(त्व)कारक, सिक्खावय दीहरोइयव्वाणं शिक्षादायक दीर्घरोदितव्यानाम् , विणयाइक्कमकारय विनयातिक्रमकारक मा हो णे विम्हरिज्जासु मा पुनरस्मान् विस्मरेरिति । एषाऽहं दशमीं दशां प्राप्ता त्वया स्मरणीयेति भावः । मरणव्यवसिता खण्डिता । कोपाङ्गम् (?) । णे इति अस्मदो द्वितीयाबहुवचनरूपम् ॥२९८॥

२९९) शबरस्य । [अन्यथा न शक्यत एव परिवर्धमाने गुरुप्रेम्णि । मरणविनोदेन विना सोढुं विरहदुःखम् ॥] काचिद् विरहदुःखिता दयितं सनिर्वेदमिदमाह । मरणविणोएण विणा मरणविनोदेन विना अन्नह न तीरइ च्चिय विरहदुःक्खं विरमालेउं अन्यथा न शक्यत एव विरहदुःखं सोढुम् ।

१W. मा मा णं पम्हरिज्जासु २W. परिवड्ढंतगरुअं पिअअमस्स ३W. विरमावेउं; साधारणदेव, वोलावेउं

W350 ३००) वण्णंतीहि तुह गुणे बहुसो अम्हेहि छिछईपुरओ ।
बालय सयमेव कओ सि दुल्लहो कस्स कुप्पामो ॥१००॥
W351 ३०१)जाओ सो वि विलक्खो मए वि हसिऊण धणियमवऊढो ।
पढमोसरियस्स नियंसणस्स गंठिं विमग्गंतो ॥१॥
W723 ३०२)सेउल्लणियंबालग्गसण्हसिचयस्स मग्गमलहंतो ।
सहि मोहघोलिरो अज्ज तस्स हसिओ मए हत्थो ॥२॥

मरणमन्तरेण नास्त्यन्य उपाय इत्यर्थः । क्व सति । परिवड्ढंतस्स गरुयपिम्मस्स परिवर्धमाने गुरुप्रेम्णि । सप्तम्यर्थे षष्ठी द्रष्टव्या । विरमालेउं सोढुम् ॥२९९॥

३००) नागहस्तिनः । [वर्णयन्तीभिस्तव गुणान् बहुशोऽस्माभिरसतीपुरतः । बालक स्वयमेव कृतोऽसि दुर्लभः कस्य कुप्यामः ॥] ॥३००॥

इति हालविरचिते गाथाकोशे श्रीभुवनपालवृत्तौ छेकोक्तिविचारलीलायां तृतीयमेतत् शतं समाप्तम् । जिनः जिनः ।

३०१) [जातः सोऽपि विलक्षो मयापि हसित्वा गाढमवगूढः । प्रथमापसृतस्य निवसनस्य ग्रन्थि विमार्गयन् ॥] ओं नमो जिनाय । काचित् स्वरहस्यं सख्याः कथयति । सो वि विलक्खो जाओ सोऽपि प्रियो विलक्षो जातः । किं कुर्वन् । गंठिं विमग्गंतो ग्रन्थिं विमार्गयन् । कस्य । नियंसणस्स निवसनस्य । कथंभूतस्य । पढमोसरियस्स प्रथमापसृतस्य । किमेतावदेव । नेत्याह । मए वि सो धणियमवऊढो मयापि स गाढमवगूढः । किं कृत्वा । हसिऊण हसित्वा । निवसनग्रन्थिश्लथनजनितवैलक्ष्यक्षपणाय गाढमुपगूढ इत्यर्थः । धणियं गाढम् । नियंसणं परिधानवासः ॥३०१॥

३०२) चन्द्रकस्य । [स्वेदार्द्रनितम्बालग्नसूक्ष्मसिचयस्य मार्गमलभमानः । सखि मोघघूर्णनशीलो अद्य तस्य हसितो मया हस्तः ॥] हे

१.W वि सो, २W गाढमुवऊढो.

W352 ३०३)[1]कण्णुज्जुया वराई सा[2] अज्ज तए कयावराहेण ।
अलसाइयसु[3]ण्णवियंभियाइँ दियहेण सिक्खविया ॥३॥

W353 ३०४)अवराहेहि वि[4] नवि तह पत्तिय जह तं इमेहि दूमेसि[5] ।
अवहत्थियसब्भावेहि सुहय दक्खिणभणिएहिं ॥४॥

सहि अज्ज तस्स मए हसिओ हत्थो सखि अद्य तस्य मया हसितो हस्तः । कीदृशः । मोहघोलिरो मोघमेव घूर्णनशीलः । किं कुर्वन् । मग्गमलहंतो मार्गमलभमानः । कस्य । सेउल्लणियंबालग्गसण्हसिचयस्स स्वेदार्द्रो यो नितम्बः, तत्र आलग्नं यत् सूक्ष्मं सिचयं तस्य मार्गम् अनासादयन् स हसित इति । सण्हं सूक्ष्मम् । उल्लं आर्द्रम् ॥३०२ ॥

३०३) अनङ्गदेवस्य । [कर्णर्जुका वराकी सा अद्य त्वया कृतापराधेन । अलसायितशून्यविजृम्भितानि दिवसेन शिक्षिता ॥] सा अज्ज तए दियहेण सिक्खविया सा अद्य त्वया दिवसेनैव शिक्षिता । कथंभूतेन । कयावराहेण कृतापराधेनापि । कानि । अलसाइयसुन्नवियंभियाइँ अलसायितशून्यविजृम्भितानि । यतः कण्णुज्जुया वराई कर्णर्जुका वराकी । यथैव शृणोति तथैव प्रतिपद्यत इत्यर्थः । कृतमपि व्यलीकम् अकृतं ब्रुवता अनुरागे निवेशितेति भावः । अन्ये तु कंडुज्जुया इति पठन्ति । अत्र पक्षे काण्डवद् ऋजुका सरलस्वभावेति व्याख्येयम् ॥३०३॥

३०४)कदलीगृहस्य । [अपराधैरपि नैव तथा प्रतीहि यथा त्वम् एभिर्दुनोषि । अपहस्तितसद्भावैः सुभग दाक्षिण्यभणितैः ॥] हे सुहय सुभग पत्तिय प्रतीहि । अवराहेहि वि नवि तह दूमेसि अपराधैरपि नैव तथा मां दुनोषि संतापयसि जह इमेहिं दक्खिणभणिएहिं यथा एभिर्दाक्षिण्यभणितैः । कथंभूतैः । अवहत्थियसब्भावेहि अपहस्तितसद्भावैः । दुनोषीति सम्बन्धः । अपराधेभ्यो दाक्षिण्योक्तयो व्यथकत्वेन विशिष्यन्त इत्यर्थः । अत्र दक्षिणो नायकः । मध्या नायिकेति ॥३०४॥

१W. कंडुज्जुआ, २W. अज्ज तए सा, ३W. रुण्ण ४W. वि ण तहा; ५W. दुम्मेसि.

W354 ३०५)मा जूर पियालिंगणसुंन्नोवासभमिरीण बाहाणं[2] ।
[3]तुण्हिक्कपरुन्ना सुयणु अज्ज माणंसिणि मुहेणं ॥५॥

W355 ३०६)मा वच्च [4]पुप्फलाई देवा [5]उययंजलीएँ तूसंति ।
[6]गोयावरीएँ पुत्तय सीलुम्मूलाइँ कूलाइं ॥६॥

३०५) सिद्धराजस्य। [मा क्रुध्य प्रियालिङ्गनशून्यावकाशभ्रमणशीलयोः बाह्वोः। तूष्णींप्ररोदिता सुतनु अद्य मनस्विनि मुखेन ॥] कांचित् प्रतिबुध्य शून्यशय्यापार्श्वपरामर्शेन उदश्रुमुखीं सखो सखेदमिदमाह। मा जूर मा खिद्यस्व। कयोः। पियालिंगणसुन्नोवासभमिरीण बाहाणं प्रियालिङ्गनशून्यात् पार्श्वाद् भ्रमणशीलयोः बाह्वोः। किं कारणमित्याह। तुण्हिक्कपरुन्ना सुयणु अज्ज माणंसिणि मुहेणं तूष्णींप्ररुदिता सुतनु अद्य मनस्विनि मुखेन। अनेन सरोषपरुषाक्षरतापहस्तितकान्तसंगमसुखेन मुखेन तूष्णींप्ररुदिता कृतासि इति। तस्मै मुखराय मुखाय कुप्यतां, किं बाहुभ्यामपराद्धम् इति भावः। कलहान्तरिता नायिका। सख्याः सखीकर्म ॥३०५॥

३०६) नकुलस्य। [मा व्रज पुष्पलावी देवा उदकाञ्जलिना तुष्यन्ति। गोदावर्याः पुत्रि शीलोन्मूलकानि कूलानि ॥] कयाचित् कुलबालिकया पुष्पावचयनिमित्तं गोदावरीगमनाय पृष्टा श्वश्रूः सती इदमाह। मा वच्च पुप्फलाई मा व्रज पुष्पलावी। पुष्पाणि लविष्यामीति कृत्वा मा व्रज। देवा उययंजलीएँ तूसंति देवा उदकाञ्जलिभिः तुष्यन्ति। को दोषो गमन इत्याह। गोयावरीएँ पुत्तय सीलुम्मूलाइँ कूलाइं गोदावर्याः पुत्रि शीलोन्मूलकानि कूलानि। स्वभावरमणीयत्वात्, सुन्दरयुवजनाकीर्णत्वात्, असतीसमूहसंकुलत्वाच्च गोदावर्याः सतीनामपि चरित्रखण्डनशौण्डानि सैकतानि। आक्षेपोऽलंकारः ॥३०६॥

१W, सरहसभमिरीण; २W. बाहुलइआणं; ३W. तुण्हिक्क परुण्णेणं इमिणा, ४W. पुप्फलाविर; ५W. उअअंजलीहिं; ६W. गालाणईअ.

W356 ३०७)वयणे वयणम्मि चलंतसीससुन्नावहाणहुंकारे ।
सहि दिंती नीसासंतरेसु कीस म्ह दूमेसि ॥७॥
W357 ३०८)सब्भावं पुच्छंती बालय रोयाविया तुह पिया मे ।
नत्थि[3] त्ति अकयसवहं हासुम्मीसं भणंतीए ॥८॥
W358 ३०९)इत्थ मए रमियव्वं तीएँ समं चिंतिऊण हियएण ।
पामरकरसेउल्ला न[5] पडइ तुवरी वविज्जंती ॥९॥

३०७) नन्दनस्य । [वचने वचने चलच्छीर्षशून्यावधानहुंकारान् । सखि ददती निःश्वासान्तरेषु कस्माद् अस्मान् दुनोषि ॥] काचिद् दुर्लभजनेऽनुरक्तां सखीं नियमावस्थां शिक्षयन्ती सखेदमिदमाह । वयणे वयणम्मि वचने वचने चलंतसीससुन्नावहाणहुंकारे दिंती चलच्छीर्षं यथा भवति एवम् अवधानशून्यत्वात् हुंकारान् ददती । केषु । नीसासंतरेसु निःश्वासान्तरेषु । निःश्वासश्वसनसूचितमिथ्याप्रतिपत्तितया (!) किमस्मान् व्यथयसि । त्वद्दुःखदुःखिता अहमपि भवामीति भावः । पूर्वानुरागे गायेयम् ॥३०७॥

३०८) अशोकस्य । [सद्भावं पृच्छन्ती बालक रोदिता तव प्रिया मया । नास्तीत्यकृतशपथं हासोन्मिश्रं भणन्त्या ॥] दुर्लभलम्भजने अनुरक्तां कामपि (अधिकृत्य) काचित् सखी इदमाह । हे बालय रोयाविया तुह पिया मे बालक रोदिता तव प्रिया मया । किं कुर्वती । सब्भावं पुच्छंती मत्प्रियस्यापराधोऽस्ति न वेति पृच्छन्ती सद्भावम् । कथंभूतया मया । नत्थि त्ति अकयसवहं हासुम्मीसं भणंतीए नास्तीत्यकृतशपथं हासोन्मिश्रं भणन्त्या । अकृतशपथतया मिथ्येति प्रतिपद्य सा रुदितवतीत्यर्थः । मे इति तृतीयारूपम् । हेतुरलंकारः ॥३०८॥

३०९) [अत्र मया रन्तव्यं तया समं, चिन्तयित्वा हृदयेन । पामरकरस्वेदार्द्रा न पतति तुवरी उप्यमाना ॥] इत्थ मए रमियव्वं तीएँ

१W. ०सुण्णावहाणहुंकारं; २W. विआए; ३W. णत्थि च्चिय कयसवहं; ४W. हासुम्मिस्सं; ५W. णिवडइ.

W359 ३१०) गहवइसुउच्चिएसु वि पलहीवोढेसु उयह वहुयाए।
मोहं भमइ पुलइओ सेयगलंतंगुली हत्थो ॥१०॥
W361 ३११) नीससिउक्कंपपुलइएहिं जाणंति पिच्छिउं धन्ना।
अम्हारिसीण दिट्ठे पियम्मि अप्पा वि वीसरइ ॥११॥

समं हियएण चिंतिऊण अत्र निष्पन्नाढकीक्षेत्रे अलक्षितेन मया रमितव्यं तया समम् (इति) हृदयेन चिन्तयित्वा। न पडइ तुवरी वविज्जंती न पतति तुवरी उप्यमाना। विशेषणद्वारेण कारणमाह। कीदृशी। पामरकरसेउल्ला पामरकरस्वेदार्द्रा। अत एव न पततीति। स्वेदः सात्त्विको भावः॥३०९॥

३१०) गुणनन्दिनः। [गृहपतिसुतोच्चितेष्वपि कर्पासफलेषु पश्यत वध्वाः। मोघं भ्राम्यति पुलकितो गलत्स्वेदाङ्गुलिर्हस्तः॥] उयह वहुयाए हत्थो मोहं भमइ पश्यत वध्वाः हस्तः मोघं भ्राम्यति। केषु। पलहीवोढेसु कर्पासफलेषु। कथंभूतेषु। गइवइसुउच्चिएसु वि गृहपतिसुतोच्चितेष्वपि। कथंभूतो हस्तः। पुलइओ पुलकितः। पुनः कीदृशः। सेयगलंतंगुली गलत्स्वेदाङ्गुलीकः। गृहपतिसुतकरस्पृष्टकर्पासप्रसङ्गेन स्वेदपुलकोद्गम इति। पलही कर्पासः। वोढं फलम्। संभावनोत्प्रेक्षालंकारः॥३१०॥

३११) जयकुमारस्य। [निःश्वसितोत्कम्पपुलकितैर्जानन्ति प्रेक्षितुं धन्याः। अस्मादृशीनां दृष्टे प्रिये आत्माऽपि विस्मरति॥] धन्ना पिच्छिउं जाणंति धन्याः प्रेक्षितुं जानन्ति। नीससिउक्कंपपुलइएहिं निःश्वसितोत्कम्पपुलकितैः। अम्हारिसीण दिट्ठे पियम्मि अप्पा वि वीसरइ अस्मादृशीनां दृष्टे प्रिये आत्माऽपि विस्मरति, का कथा निःश्वसितादीनाम्। अहं दृष्टे प्रिये सति अत्यन्तानुरागयोगात् कोऽसौ, काऽहम् इत्यपि न जानामीत्यर्थः। स्वीया नायिका प्रगल्भा च ! लब्धायतिः प्रगल्भा रतिकर्मणि पण्डिता विदुर्दक्षा। आक्रान्तनायकमना निर्व्यूढविलासविस्तारा। सुरते निराकुलाऽसौ द्रवतामिव याति नायकशरीरे। न च तत्र विवेक्तुमलं कोऽयं काऽहं किमेतदिति॥ (रुद्रट, १२,२४-२५) ॥३११॥

१W. फलहीवेंटेसु; २W. विलग्गसेअंगुली, ३W. णीसासुक्कंपिअपुलइएहि, ४W. णच्चिउं, ५W. अम्हारिसीहि, ६W. वीसरिओ,

W362 ३१२) तणुएण वि तणुइज्जइ खामेण खमिज्जए बला इमिणा ।
मज्झत्थेण वि मज्झेण सुयणु कह तुज्झ पडिवक्खो ॥१२॥

W363 ३१३) वाहि व्व विज्जरहिओ धणरहिओ साहवासवासु व्व ।
रिउरिद्धिदंसणं पिव दूसहणीओ तुह वियोओ ॥१३॥

---

३१२) रोलदेवस्य । [तनुकेनापि तनूक्रियते क्षामेणापि क्षामीक्रियते बलादनेन । मध्यस्थेनापि मध्येन सुतनु कथं तव प्रतिपक्षः ॥] हे सुयणु कह तुज्झ पडिवक्खो इमिणा मज्झेण बला तणुइज्जइ हे सुतनु, कथं तव प्रतिपक्षः सपत्नीजनः अनेन मध्येन बलात् तनूक्रियते कार्श्यं नीयते । कीदृशेन मध्येन । तणुएण वि तनुकेनापि । यो हि अतनुः स कदाचिद् अन्यं तनूकरोति । न चैवं मध्यम् इति । खामेण खमिज्जए क्षामेण क्षाम्यते (=क्षामीक्रियते) । यो हि अक्षामो भवति स कदाचिद् अन्यं क्षामयति । न चैवं मध्यमिति । कदाचिद् अमध्यस्थं मध्यं भवति इत्याह । मज्झत्थेण वि मध्यस्थेनापि मध्येन स तथा क्रियते, क्षितिं नीयते । विक्षिप इति विधीयामहे (?) । प्रतिपक्षः सपत्नीजनः । तनुः कृशः । क्षामो निस्सहः । रुद्रटमतेन विषमः (रुद्रट, ९,४५) । आचार्यदण्डिनस्तु मते अयमेव चित्रहेतुरलंकारः (काव्यादर्श, २,२५३, २५८) ॥३१२॥

३१३) विफुल्लकस्य । [व्याधिरिव वैद्यरहितो धनरहितः सहवासवास इव । रिपुऋद्धिदर्शनमिव दुस्सहनीयस्तव वियोगः ॥] काचिद् विरहासहिष्णुः प्रियं प्रत्याह । वाहि व्व विज्जरहिओ व्याधिरिव वैद्यरहितः, धणरहिओ साहवासवासु व्व धनरहितः सहवासवास इव मित्रेणैव सहवास इव । रिउरिद्धिदंसणं पिव रिपुऋद्धिदर्शनमिव दूसहणीओ तुइ वियोओ दुस्सहनीयस्तव वियोगः इति सर्वत्र योज्यम् । सहवासाद्वेति समृद्ध्यादिषु चेति दीर्घः (cf. वररुचि, १,२) । रुद्रटमतेन मालोपमालंकारः (रुद्रट, ८, २५) ॥३१३॥

१W. खीणेण वि खिज्जए, २W. पुत्ति. ३W. सअणमज्झवासो व्व.

W364 ३१४) को[1] तरइ समुच्छरिउं वित्थिण्णं निम्मलं समुत्तुंगं ।
हिययं तुज्झ नराहिव गयणं व पओहरे मुत्तुं ॥१४॥

W365 ३१५) आयण्णेइ अडयणा कुडंगहिट्ठम्मि दिन्नसंकेया ।
चलणग्ग[2]पिल्लियाणं मम्मरयं जुण्णपत्ताणं ॥१५॥

W439 ३१६) सामाएँ गरुयजुव्वणविसेसभरिए कवोलमूलम्मि ।
पिज्जइ अहोमुहेणं[3] कण्णवयंसेण लायण्णं ॥१६॥

३१४) वासुदेवस्य । [कः शक्नोति समवस्तरितुं विस्तीर्णं निर्मलं समुत्तुङ्गम् । हृदयं तव नराधिप गगनमिव पयोधरान् मुक्त्वा ॥] स्वामिनं कविरुपगाथयितुमिदमाह । हे नराहिव नराधिप पओहरे मुत्तुं को तुज्झ हिययं समुच्छरिउं तरइ पयोधरान् स्तनान् मुक्त्वा कोऽन्यः तव हृदयं व्याप्तुं पारयति । कथंभूतं हृदयम् । वित्थिण्णं निम्मलं समुत्तुंगं विस्तीर्णं महाकटं, निर्मलं मलरहितं, समुत्तुङ्गम् उन्नतम् । किमिव । गयणं व गगनमिव । यथा किल गगनं विस्तीर्णं निर्मलं समुत्तुङ्गं पयोधरान् मुक्त्वा नान्योऽवच्छादयितुमलम्, एवं तव हृदयम् इति श्लेषोपमालंकारः । एकत्र पयोधराः स्तनाः, अन्यत्र स्तनयित्नवः । समुच्छरणं व्याप्तिः ॥३१४॥

३१५) विशालस्य । [आकर्णयत्यसती गहनाधस्ताद् दत्तसंकेता । चरणाग्रप्रेरितानां मर्मरशब्दं जीर्णपत्राणाम् ॥] अडयणा मम्मरयं जुण्णपत्ताणं आयण्णेइ असती मर्मरशब्दं जीर्णपत्राणाम् आकर्णयति । कथंभूतानाम् । चलणग्गपिल्लियाणं चरणाग्रप्रेरितानाम् । कीदृशी सा । कुडंगहिट्ठम्मि दिन्नसंकेया कुडंगो गहनं, तस्य अधस्ताद् दत्तसंकेता । तत्कालायातप्रियपादप्रेरितानां जीर्णपत्राणां स्वनम् आकर्णयतीत्यर्थः । अडयणा असती । कुडंगो गहनम् । ह्रस्ववृक्ष इत्यन्ये । प्रच्छन्नकामिते वासग्या (?) ॥३१५॥

३१६) विक्रमादित्यस्य । [श्यामाया गुरुयौवनविशेषभृते कपोलमूले । पीयतेऽधोमुखेन कर्णावतंसेन लावण्यम् ॥] सामाएँ लायण्णं पिज्जइ

[1] W. को एथ जअम्मि समत्थो थइउं वित्थिण्णणिम्मलुत्तुंगं. [2] W. अग्गपअपेल्लिआणं; [3] W. अहोमुहेण व.

W366 ३१७) अहिलिंति सुरहिणिम्महियपरिमलाबद्धमंडलब्भमरा।
अमुणियचंदपरिभवं अउव्वकमलं मुहं तिस्सा ॥१७॥

W367 ३१८) धीरमवलंबिरीए गुरुयणमज्झे पियम्मि वोलीणे।
पडिओ से अच्छिणिमीलणेण पम्हट्ठिओ बाहो ॥१८॥

श्यामाया लावण्यं पीयते इव। केण। कण्णवयंसेण कर्णावतंसेन। कीदृशेन। अहोमुहेणं अधोमुखेन। क्व। कवोलमूलम्मि कपोलमूले। कीदृशे। गरुयजुव्वणविसेयभरिए गुरुकयौवनविशेषभृते। अधोमुखत्वात् कर्णावतंसस्य तारुण्यपूर्णत्वात् कपोलमूलस्य लावण्यं पीयते इव इत्युत्प्रेक्ष्यते। लावण्यवर्णनपरेयमुक्तिः। संभावनानुमानेनोत्प्रेक्षालंकारः ॥३१६॥

३१७) मार्गशक्तेः। [अभिलीयन्ते सुरभिनिष्क्रान्तपरिमलाऽऽबद्धमण्डलभ्रमराः। अज्ञातचन्द्रपरिभवम् अपूर्वकमलं मुखं तस्याः ॥] कश्चित् प्रियावदनं वर्णयितुमिदमाह। अउव्वकमलं मुहं तिस्सा अपूर्वकमलं मुखं तस्याः। अहिलिंति अभिलीयन्ते। के। सुरहिणिम्महियपरिमलाबद्धमंडलब्भमरा। सुरभिर्निष्क्रान्तो यः परिमलः, तत्र आबद्धं मण्डलं यैस्ते तथोक्ताः। ते च ते भ्रमराश्च इति बहुव्रीहिगर्भः कर्मधारयः। कथंभूतं मुखम्। अमुणियचंदपरिभवं अज्ञातचन्द्रपरिभवम्, अत एव अपूर्वकमलम्। पद्मं खलु ज्ञातचन्द्रपरिभवं भवति इति। सजातिव्यतिरेकोऽलंकारः ॥३१७॥

३१८) [धैर्यमवलम्बिन्या गुरुजनमध्ये प्रिये अतिक्रान्ते। पतितस्तस्या अक्षिनिमीलनेन पक्ष्मस्थितो बाष्पः ॥] से बाहो अच्छिणिमीलणेण पडिओ तस्या बाष्पो नेत्रनिमीलनेन पतितः। कीदृशः। पम्हट्ठिओ पक्ष्मस्थितः। क्व सति। पियम्मि वोलीणे प्रिये गते सति। कीदृश्यास्तस्याः। धीरमवलंबिरीए धैर्यम् अवलम्बनशीलायाः। क्व। गुरुयणमज्झे गुरुजनमध्ये ॥३१८॥

१W. सुरहिणीससिअपरिमलाबद्धमंडलं भमरा. २W. धीरावलंबिरीअ वि; ३W. गुरुअणपुरओ; ४W. तुमम्मि;

W440 ३१९) सेउल्लियसव्वंगी नामग्गहणेण तस्स सुहयस्स ।
दूई अप्पाहिंती तस्सेय घरंगणं पत्ता ॥१९॥

W565 ३२०) नवि तह अणालवंती हियय दूमेइ माणिणी अहियं ।
जह दूरवियंभियगरुयरोसमज्झत्थभणिएहिं ॥२०॥

W441 ३२१) जम्मंतराइँ वीसं चलणे जीएण मयण अग्घिस्सं ।
जइ तं पि तेण बाणेण विज्झसे जेण हं विद्धा ॥२१॥

---

३१९) राहवस्स (राघवस्य)। [स्वेदार्द्रितसर्वाङ्गी नामग्रहणेन तस्य सुभगस्य। दूतीं संदिशन्ती तस्यैव गृहाङ्गणं प्राप्ता ॥] काचिन्नायिका तस्स सुहयस्स नामग्गहणेण तस्य सुभगस्य नामग्रहणेन दूई अप्पाहिंती दूतीं संदिशती तस्सेय घरंगणं पत्ता तस्यैव गृहाङ्गणं प्राप्ता। कीदृशी। सेउल्लियसव्वंगी स्वेदार्द्रितसर्वाङ्गी। अनुरागयोगात् नानाविधविकल्पकल्पनया तत्संदेशावसानं जातम् इति तस्यैव प्रियतमस्य एव वेश्म प्राप्तेति। अप्पाहियं संदिष्टम् ॥३१९॥

३२०) खरग्रहणस्य। [नैव तथा अनालपन्ती हृदयं दुनोति मानिनी अधिकम्। यथा दूरविजृम्भितगुरुरोषमध्यस्थभणितैः ॥] नवि तह माणिणी हिययं दूमेइ नैव तथा मानिनी हृदयं दुनोति। किं कुर्वती। अणालवंती अनालपन्ती। जह दूरवियंभियगरुयरोसमज्झत्थभणिएहिं यथा दूरविजृम्भितगुरुकरोषमध्यस्थभणितैरधिकं मनो दुनोति इति। अनालपन्ती अनुनयेन प्रसाद्यते। या पुनर्मिथ्याऽप्रसन्ना तस्या अनुनयावसरोऽपि नासाद्यते, इति अधिकमसौ सन्तापं प्रयच्छतीत्यर्थः। नवि तह इत्यवधारणे ॥३२०॥

३२१) सातवाहनस्य। [जन्मान्तराणि विंशतिं चरणौ जीवितेन मदन अर्धयिष्यामि। यदि तमपि तेन बाणेन विध्यसि येनाहं विद्धा ॥]

१W. गोत्तग्गहणेण. २W. जम्मंतरे वि चलणे जीएणं मअण तुज्झ अच्चिस्सं.

W368 ३२२) भरिमो से सयणपरंमुहीएँ वियलंतमाणपसराए ।
कइवयसुत्तुव्वत्तंतथणहरुप्पिल्लणसुहिल्लिं ॥२२॥

W749 ३२३) आमोडेऊण बला मह हत्थं पहिय एँ गओ सि ।
हिययाउ जइ य नीहसि सामत्थं तो तु जाणिस्सं ॥२३॥

हे मयण मदन, जइ जेण बाणेन हं विद्धा तेण तं पि विज्झसे यदि येन बाणेनाहं विद्धा तेन बाणेन तमपि मम वल्लभं विध्यसि, तदा चलणे जीएण अग्घिस्सं चरणौ जीवितेन अर्धयिष्यामि। किमस्मिन्नेव जन्मनि । नेत्याह । जम्मंतराइँ वीसं विंशतिं जन्मान्तराणि यावत् । येन हि बाणेन अहं विद्धा सती तदेकपरायणा संपन्ना, एवं सोऽपि तेन बाणेन प्रतिभिन्नविग्रहो ममैकतानमानसो भविष्यतीति प्राणोपहारदानेनापि प्रार्थना । जेण हं विद्धा इति आवां संविश्लेपविशेषबहुलम् (?) इति अलोपः ॥३२१॥

३२२) कर्कधर्मणः [स्मरामस्तस्याः शयनपराङ्मुख्या विगलन्मानप्रसरायाः । कैतवसुप्तोद्वर्तमानस्तनभरोत्प्रेरणसुखकेलिम् ॥] से तस्याः सयणपरंमुहीएँ शयने पराङ्मुखितायाः भरिमो कइयवसुत्तुव्वत्तंतथणहरुप्पिल्लणसुहिल्लिं कैतवशयितोद्वर्तमानायाः स्तनभरोत्प्रेरणसुखं स्मरामः । कीदृश्याः । वियलंतमाणपसराए विगलद्मानप्रसरायाः । तया मानमवधीर्य अनुरागयोगेन शयनापदेशात् स्तनयुगेनाहमाहतः । तत्सुखं स्मरामीत्यर्थः । अयं बिब्बोको नाम चेष्टालंकारः । तस्य लक्षणम्–"आर्द्रार्द्रसुरभिचन्दनविलिप्तकुचकलशनिर्दयोन्मर्दः" इत्यादि ॥३२२॥

३२३) [आमोट्य बलाद् मम हस्तं पथिक हे गतोऽसि । हृदयाद् यदि च निर्यास्यसि सामर्थ्यं ततस्तव ज्ञास्यामि ॥] हे पहिय पथिक मह हत्थं आमोडेऊण बला गओ सि मम हस्तमामोट्य बलाद् गतोऽसि । हिययाउ जइ य नीहसि हृदयाद् यदि च निर्यास्यसि सामत्थं तो तु जाणिस्सं सामर्थ्यं ततस्तव ज्ञास्यामि । (नीहसि इति) निष्क्रामसीति भावः । तु इति युष्मदः षष्ठयेकवचने रूपम् ॥३२३॥

१W. कइअवसुत्तुव्वत्तणथणअलसपेल्लणसुहेल्लिं.
२W. आमोडऊण बलाउ हत्थं मज्झं गओ सि भो पहिअ; ३W· तुज्झ.

W370 ३२४) किं न भणिओ सि बालय गामणिधूयाएँ गुरुयणसमक्खं ।
अणवरयं तंसवलंतवयणणयणद्धदिट्ठेहिं ॥२४॥

W371 ३२५) नयणब्भंतरघोलंतबाहभरमंथराएँ दिट्ठीए ।
पुणरुत्तपिच्छिरीए बालय किं जं न भणिओ सि ॥२५॥

W372 ३२६) वडँजक्खो जो ऊसीसयम्मि दिन्नो महं जुवाणेहिं ।
तं चिय इन्हि पणमामि हयजरे होहि संतुट्ठा ॥२६॥

३२४) शूरस्य । [किं न भणितोऽसि बालक ग्रामणीदुहित्रा गुरुजनसमक्षम् । अनवरतं तिर्यग्वलद्वदननयनार्धदृष्टैः ॥] काचिद् दूती, गृहमागतोऽपि तयाऽहं नाभाषित इत्युपालभमानं नायकमिदमाह । हे बालय बालक तं गामणिधूयाएँ त्वं ग्रामणीदुहित्रा किं न भणिओ सि किं न भणितोऽसि । सर्वमेव गृहागतगौरवगर्भं भणितोऽसीत्यर्थः । कैः । अणवरयं तंसवलंतवयणणयणद्धदिट्ठेहिं अनवरतं त्र्यश्रं (? तिर्यक्) वलद् वदनं, तेन यानि नयनार्धदृष्टानि तैः । कथम् (? कुत्र) । गुरुयणसमक्खं गुरूणामग्रे । संजातलज्जा अर्धाक्षिप्रेक्षितैरेव सर्वम् अभिहितवतीति । विहृतं नाम चेष्टालंकारः । तस्य लक्षणम्—कार्यात् स्वभावतो वा वाक्यानामवचनं तु यद् भवति । आकारेङ्गितगम्यं विहृतं तद् व्याहरन्ति बुधाः ॥ ग्रामणीर्ग्रामनायकः ॥३२४॥

३२५) वत्सराजस्य । [नयनाभ्यन्तरघूर्णमानबाष्पभरमन्थरया दृष्ट्या । पुनरुक्तप्रेक्षणशीलया बालक किं यद् न भणितोऽसि ॥] पूर्वव्याख्ययैव गतार्था गाथा ॥३२५॥

३२६) हालस्य । [वटयक्षो य उच्छीर्षके दत्तो मम युवभिः । तमेवेदानीं प्रणमामि हतजरे भव संतुष्टा ॥] तं चिय इन्हि पणमामि तमेव इदानीं प्रणमामि । तं कम् । वडजक्खो जो ऊसीसयम्मि दिन्नो महं जुवा-

१W. अणिमिसमीसीसिवलंत; २W. जो सीसम्मि विइण्णो मज्झ जुआणेहि गणवई आसि.

W 373 ३२७) अंतोहुत्तं डज्झइ जायासुन्ने घरे हलियउत्तो ।
उक्खिण्णणिहाणं पिव रमियट्ठाणाइँ पिच्छंतो ॥२७॥

W 374 ३२८) निद्दाभंगो आवंडुरत्तणं दीहरा य नीसासा ।
जायंति जस्स विरहे तेण समं केरिसो माणो ॥२८॥

णेहिं वटयक्षो यो मम उच्छीर्षके युवभिर्दत्तः । यौवने हि घनदके वटविटपितके संकेते तत्रस्थं यक्षमेव तस्या उच्छीर्षके दत्त्वा तां युवानो रमयन्ति स्म । वार्द्धके सा तं नमस्यतीति स्वस्था संचिन्त्य जरामुपालभते । हयजरे हतजरे हाहि संतुट्ठा भव संतुष्टा । किमन्यदतोऽपि त्वया कर्तव्यमिति भावः ॥३२६॥

३२७) तस्यैव (i.e. हालस्य) । [अन्तरभिमुखं दह्यते जायाशून्ये गृहे हालिकपुत्रः । उत्कीर्णनिधानमिव रमितस्थानानि प्रेक्षमाणः ॥] हलियउत्तो अंतोहुत्तं डज्झइ हालिकपुत्रो अन्तरभिमुखं दह्यते । क्व । जायासुन्ने घरे रमणीरहिते गृहे । किं कुर्वन् । रमियट्ठाणाइँ पिच्छंतो रमितस्थानानि पश्यन् । किमिव । उक्खिण्णणिहाणं पिव उत्कीर्णनिधानमिव । उत्कीर्णनिधानस्थानं पश्यन् यथा कश्चिदन्तर्दह्यते तथा हालिकसुत इत्यर्थः ॥३२७॥

३२८) नागहस्तिनः । [निद्राभङ्ग आपाण्डुरत्वं दीर्घाश्च निःश्वासाः । जायन्ते यस्य विरहे तेन समं कीदृशो मानः ॥] तेण समं केरिसो माणो तेन समं कीदृशो मानः । केन इत्याह । जस्स विरहे निद्दाभंगो यस्य विरहे निद्राभङ्गः । किम् एतावदेव । नेत्याह । आवंडुरत्तणं दीहरा या नीसासा जायंति आपाण्डुरत्वं दीर्घतराश्च निःश्वासा जायन्ते, तेन समं कीदृशो मानः । मानं मा कार्षीरिति भावः । पीठमर्दस्येदं शिक्षावाक्यम् । तदुक्तम्—स्युस्तस्य नर्मसचिवाः कुपितां कान्तां (?) प्रसादने पटवः । प्रथमोऽत्र पीठमर्दो विदूषकोऽन्यो विटश्चैव ॥ नायकसमगुण आद्यो विदूषकः क्रीडनी-

१W. उक्खाअणिहाणाइ व.

W 375 ३२९) तेण न मरामि मन्नूहिँ पूरि[1]या जेण अज्ज रे सुहय।
तग्गयमणा मरंती मा तुज्झ पुणो वि लग्गिस्सं ॥२९॥
W 376 ३३०) अवरज्झसु वीसं[2]त्थं सव्वं ते सुहय विसहिमो अम्हे।
गुणणिब्भरम्मि हियए पत्तिय दोसा न मायंति ॥३०॥

यकप्रायः। विट एकदेशविद्यो निगद्यते कामशास्त्रेषु(cf. रुद्रट, १२, १४ –१५) आक्षेपोऽलंकारः ॥३२८॥

३२९) दुगल्लकस्य। तेन न म्रिये मन्युभिः पूरिता येनाद्य रे सुभग। त्वद्गतमना म्रियमाणा मा तव पुनरपि लगिष्यामि ॥] काचित् प्रियापराधदुःखदहनदग्धा प्रियतममिदमाह। रे सुहय रे सुभग तेण न मरामि तेन न म्रिये। कीदृशी। मन्नूहिँ पूरिया मन्युभिः पूरिता। जेण तग्गयमणा मरंती येन त्वद्गतमना म्रियमाणा मा तुज्झ पुणो वि लग्गिस्सं मा तव पुनरपि लगिष्यामि इति। यो हि यद्वासनावासितो जन्तुर्जीवितं जहाति स तया जन्मान्तरे जायते। तथा चेतिहासः। हिरण्यकशिपुः प्राणान् परित्यजन् राक्षसेनाहं निहत इति रावण एवाभवत्। पुनश्च स एव मनुष्येणाहं निहत इति वासनया शिशुपालतां प्राप्तः। पुनः स एव हरिणाहं निहत इति हरिरेवाभवत्। रे इति निपातः संभाषणे। रे अरे संभाषणरतिकलहाक्षेपेषु (वररुचि, ९,७५) ॥३२९॥

३३०) अनुरागस्य। [अपराध्य विश्वस्तं सर्वं ते सुभग विषहामहे वयम्। गुणनिर्भरे हृदये प्रतीहि दोषा न मान्ति ॥] काचिन्नायिका सकृत्कृतापराधलज्जावैलक्ष्यं प्रियं प्रेक्ष्येदमाह। हे सुभग अवरज्झसु वीसत्थं अपराध्य विश्वस्तम्। सव्वं ते विसहिमो अम्हे सर्वं ते विषहामहे वयम्। अयं जनो मन्युं करिष्यति, इति मा हृदि कृथाः। यतः गुणणिब्भरम्मि हियए तव गुणैर्निर्भरे हृदये पत्तिय दोसा न मायंति प्रतीहि दोषा न मान्ति। यथा क्वचित् पात्रे परितः पूरिते न अर्थान्तरम् अव-

[1] W. पूरिआ अज्ज जेण रे सुहअ. [2] W. वीसद्धं.

W377 ३३१) भरिउच्चरंतपसरियपियसंभरणपिसुणिओ वराईए ।
परिवाहो विय दुक्खस्स वहइ नयणट्ठिओ बाहो ॥३१॥
W378 ३३२) जं जं करेसि [2]जं जं च जंपसे जह तुमं नियंसेसि ।
तं तमणुसिक्खिरीए दीहो दियहो न संपडइ ॥३२॥

काशमासादयति, तथा मे हृदयेऽपि त्वद्गुणपूरिते नापराधाः प्रवेशं प्राप्नुवन्ति इति । उत्तमा नायिका । दोषानुरूपकोपाऽनुनीयमाना प्रसीदति क्षिप्रम् । रागप्रवणा प्रवरा गुणहार्या चोत्तमा नारी ॥ पत्यनुनयः खण्डिताकोपाङ्गम् ॥३३०॥

३३१) मातृराजस्य । [भृतोच्चरत्प्रसृतप्रियसंस्मरणपिशुनितो वराक्याः । परिवाह इव दुःखस्य वहति नयनस्थितो बाष्पः ॥] वराईए नयणट्ठिओ बाहो वहइ वराक्या नयनस्थितो बाष्पो वहति । कथंभूतोऽसौ । भरिउच्चरंतपसरियपियसंभरणपिसुणिओ नयनयोः परिपूर्णः, निर्यन्, प्रसृतः प्रियसंस्मरणपिशुनितश्चेति कर्मधारयः। स इत्थंभूतो बाष्पो वहति। क इव। परिवाहो विय दुक्खस्स परिवाह इव दुःखस्य । यथा प्रचुरपयःपरिपूर्णस्य तडागादेः शेषोदकं स्यन्दते तथाऽयमपीत्यर्थः । परिवाहो जलनिर्गमः । उत्प्रेक्षालंकारः । प्रोषितपतिका नायिका। निःश्वसिति रुदितचित्ता (?) संतापैः कृशतनुर्विपाण्डुमुखी । सावधिदिवसगणनया गमयति कालं प्रियतमस्य ॥३३१॥

३३२) विशेषरसिकस्य । [यद्यत् करोषि यद्यच्च जल्पसे यथा त्वं निवस्से । तत्तदनुशिक्षणशीलाया दीर्घो दिवसो न संपद्यते ॥] तं तमणुसिक्खिरीए दीहो दियहो न संपडइ तत्तदनुशिक्षणशीलायास्तस्या दीर्घो दिवसो न संपद्यते । किं तद् इत्याह । जं जं करेसि यद्यत्करोषि, जं जं च जंपसे यद्यच्च जल्पसे, जह तुमं नियंसेसि यथा त्वं परिदधासि वाससी, तस्यास्त्वदनुरागयोगात् त्वत्कृतानुकरणं कुर्वत्या झगित्येव दिवसः

१W. उव्वरंत, २W जं जं जंपसि जह जह तुमं णिअच्छेसि.

W131 ३३३) वाहरउ मं सहीओ तिस्सा गुत्तेण, किं[1] व भणिएण ।
थिरपिम्मो होउ जहिं तहिं [2]व [3]मा कुप्पइ कया वि ॥३३॥

W134 ३३४) परिभूएण दियसियं [4]परघरभमिरेण अन्नकज्जम्मि ।
चिरजीविएण इमिणा खवियम्हे[5] डड्ढकाएण ॥३४॥

समाप्यत इत्यर्थः । अन्ये तु त्वदनुकरणेन तस्या दीर्घोऽपि दिवसो न समाप्तये भवतीत्याचक्षते। एषा लीला नाम चेष्टालंकारः । तस्य लक्षणम्-हृदयविनोदनहेतोः सखीसमक्षं प्रियस्य यानुकृतिः । गतहसितवीक्षितोक्तैः सा लीला विंशतिविधा तु ॥३३२॥

३३३) कल्याणसिंहस्य । [व्याहरतु मां सख्यस्तस्या गोत्रेण किमिव भणितेन । स्थिरप्रेमा भवतु यत्र तत्र वा मा कुप्यत कदापि ॥] काचिन्नायिका विपक्षगोत्रेण व्याहरन्तं कान्तं निवारयन्तीः सखीराह । हे सहीओ सख्यः, तिस्सा गुत्तेण मं वाहरउ तस्या नाम्ना मां व्याहरतु । किं व भणिएण किमिव भणितेन । यतः थिरपिम्मो होउ जहिं तहिं व मा कुप्पह कया वि स्थिरप्रेमा भवतु यत्र तत्रैव, मा कुप्यत कदापि । नायं स्थिरानुरागो भविष्यतीति भावः ॥३३३॥

३३४) योगराजस्य । [परिभूतेन नित्यं परगृहभ्रमणशीलेन अन्य (अन्न)–कार्ये । चिरजीवितेनानेन क्षपिता वयं दग्धकायेन (दग्धकाकेन) ॥] काचिद् एकया उक्त्या स्वकायवायसौ निन्दन्ती सखेदमिदमाह । अनेन क्षपिता वयं दग्धकायेन दग्धकाकेन च । कायेन कथंभूतेन । परिभूएण परिभूतेन । प्रियस्यानागमनात परिभूतता कायस्य । भूयः किंभूतेन । दियसियं नित्यं परघरभमिरेण परगृहभ्रमणशीलेन । किमर्थम् । अन्नकज्जम्मि अन्यस्य कार्ये प्रियतमस्य वार्त्ता प्रष्टुं परगृहेषु भ्राम्यतेति भावः । पुनरपि कीदृशेन । चिरजीविएण चिरं जीवितेन । वयं कायेन क्षपिताः कष्टं प्रापिताः । दग्धकाकेन च कीदृशेन । परि-

१W. किं त्थ; २W. पि; ३W. मा किं पि णं भणह; ४W. घरघरभमिरेण; ५W. खविअम्हो.

W135 ३३५) वसइ जहिं चेय खलो पोसिज्जंतो [1]सिणेहदाणेण ।
तं चेय आलयं दीवउ व्व अइरेण मइलेइ ॥३५॥

W136 ३३६) हुंती वि निप्फल च्चिय धणरिद्धी होइ [2]दाणरहियस्स ।
गिम्हायवसंतत्तस्स निययछाहि व्व [3]वच्छस्स ॥३६॥

भूतेन, नित्यं परगृहभ्रमणशीलेन । किमर्थम् । अन्नकार्येण । बलिवाञ्छया हि काकाः प्रतिभवनं भ्राम्यन्ति । पुनरपि कीदृशेन । चिरजीविना । चिरं हि काका जीवन्तीति लोकप्रसिद्धिः । दियसियं सर्वदा । विवक्षितान्यपरवाच्यलक्षणक्रमोद्द्योतस्य शब्दशक्तिमूलानुरणनव्यापारव्यङ्ग्यस्यायं ध्वनेः प्रभेदः । अविशेषः श्लेषोऽयमिति रुद्रटः । अविशेषःश्लेषोऽसौ विज्ञेयो यत्र वाक्यमेकस्मात् । अर्थादन्यं गमयेदविशिष्टविशेषणोपेतम् ॥ (रुद्रट, १०, ३) ॥३३४॥

३३५) [वसति यस्मिन्नेव खलः पोष्यमाणः स्नेहदानेन । तमेवालयं दीपक इवाचिरेण मलिनयति ॥] तं चेय आलयं अइरेण खलो मइलेइ तमेवालयम् अचिरेण खलो जनो मलिनयति । तं कम् । जहिं चेय वसइ यस्मिन्नेव वसति । किं क्रियमाणः । पोसिज्जंतो सिणेहदाणेण पोष्यमाणः स्नेहदानेन । कं क इव । आलयं दीवउ व्व आलयं दीपक इव । यथा हि दीपकः स्नेहेन वर्धमानो यत्रैव वसति तमेवालयं मलिनयति, तथा खलजनोऽपीति । उपमालंकारः ॥३३५॥

३३६) कीर्तिरसिकस्य । [भवन्ती अपि निष्फलैव धनर्द्धिर्भवति दानरहितस्य । ग्रीष्मातपसंतप्तस्य निजकच्छायेव वृक्षस्य ॥] दाणरहियस्स धणरिद्धी हुंती वि निप्फल च्चिय होइ दानरहितस्य धनर्द्धिः भवन्ती अपि निष्फलैव भवति । केव कस्य । निययछाहि व्व वच्छस्स निजकच्छायेव वृक्षस्य । कथंभूतस्य । गिम्हायवसंतत्तस्स ग्रीष्मातपसंतप्तस्य । यथा तरोः स्वच्छाया न संतापशान्त्यै उपपद्यते एवं दानशून्यस्य धनर्द्धिर्न

१W. सिणेहदाणेहिं; २W किविणपुरिस्स; ३W. पहिअस्स.

W137 ३३७) फुरिए वामच्छि तए जइ[1] एइ पिउ त्ति मज्झ ता सुइरं ।
मीलियदाहिण[2]णयणा तइ[3] अवियण्हं पलोइस्सं ॥३७॥

W138 ३३८) सुणयपउरम्मि[4] गामे हिंडती तुह कएण[5] सा बाला ।
पासयसारि व्व घरंघरेण केणावि खज्जिहिइ ॥३८॥

सुखाय जायत इत्यर्थः ।। अन्ये तु 'छाहि व्व किविणस्स' इति पठन्ति । तत्र च यथा स्वच्छाया ग्रीष्मातपतप्तस्य (कृपणस्य) तथा धनर्द्धिर्दानशून्यस्य कृपणस्य शान्तये न भवतीति योध्यम् । उपमालंकारः ॥३३६॥

३३७) कन्दुट्टकस्य । [स्फुरिते वामाक्षि त्वयि यद्येति प्रिय इति मम तत् सुचिरम् । मीलितदक्षिणनयना त्वयाऽवितृष्णं प्रलोकयिष्यामि ॥] हे वामच्छि, तए फुरिए जइ एइ मज्झ पिउ त्ति हे वामाक्षि त्वयि स्फुरिते यद्येति मम प्रियः, ता तइ सुइरं पलोइस्सं तत् त्वया सुचिरं प्रलोकयिष्यामि । अवियण्हं अवितृष्णं सस्पृहमिति यावत् । प्रियतमानयनतः त्वत्कृतोपकारस्य सुन्दरस्वकान्तसंदर्शनं प्रत्युपकारं करिष्यामीति भावः । वामाङ्गभागस्फुरणे पुरन्ध्रीणां समीहितसिद्धिः स्यादिति हि अङ्गविद्यायाम् । श्रीभोजदेवमतेन अन्योन्यमलंकारः । अन्योन्यमुपकारो यस्तदन्योन्यमितीष्यते (cf. सरस्वतीकण्ठाभरण, ३ ९) । परिवृत्तिरित्यन्ये । वयं तु मन्यामहे अन्योन्यपरिवृत्तिसंकरम् ॥३३७॥

३३८) माधवस्य । [श्वप्रचुरे ग्रामे हिण्डमाना तव कृते सा बाला । पाशकमारिरिव पतिगृहं केनापि खादिष्यते ॥] श्वप्रचुरे ग्रामे भ्राम्यन्ती तव कृते सा बाला शुना केनापि खादिष्यते । पासयसारि व पाशकसारिरिव । यथा हि सारिः प्रतिगृहं भ्राम्यन्ती केनापि खाद्यते तथा सापीत्यर्थः । उपमालंकारः ॥३३८॥

१W. जइ एहइ सो पिओ ज्ज ता सुइरं; २W. संमीलिअ दाहिणअं; ३W. तुइ; ४W. सुणहपउरम्मि ५W. कइआ वि

W369 ३३९) फग्गुच्छणणिद्दोसं तेण इमं तुह पसाहणं दिन्नं ।
थणयलसमुहपलुट्टंतसेयधोयं किणो धुयसि ॥३९॥
W139 ३४०) अन्नन्नं कुसुमरसं जं किर सो महइ पाणलोहिल्लो ।
सो नीरसाण दोसो कुसुमाणं नेय भमरस्स ॥४०॥
W140 ३४१) रच्छापइण्णणयणुप्पला तुमं सा पडिच्छए इंतं ।
दारणिमिएहिँ बालय मंगलकलसेहि व थणेहिं ॥४१॥

३३९) देवराजस्य । [फाल्गुनीक्षणनिर्दोषं तेनेदं तव प्रसाधनं दत्तम् । स्तनकलशमुखप्रवर्तमानस्वेदधौतं किं नु धावयसि ॥] कांचित् फाल्गुन्युत्सवदिवसे दयितस्वहस्तन्यस्तं कुचतटेऽङ्गरागपङ्कं प्रक्षालयन्तीं सखी सोत्प्रासमिदमाह । तेण इमं तुह पसाहणं दिन्नं तेन दयितेनेदं तुभ्यं मण्डनं दत्त किणो धुयसि प्रक्षालयसि । कथं दत्तम् । फग्गुच्छणणिद्दोसं फाल्गुनीक्षणनिर्दोषम् । फाल्गुन्यां किल परिहासपदेन पराङ्गनाङ्गसंगोपनसङ्गास्पदं (?) भवतीति । कीदृशम् । थणयलसमुहपलुट्टंतसेयधोयं स्तनकलशमुखप्रवर्तमानस्वेदधौतम् । किं पुनः धावयसि प्रक्षालयसीत्यर्थः । परस्परानुगः प्रयुक्त्याभिहितो भवति ॥३३९॥

३४०) अनुद्धृद्वस्य । [अन्यान्यं कुसुमरसं यत् किल स वाञ्छति पानलोभिकः । स नीरसानां दोषः कुसुमानां नैव भ्रमरस्य ॥] अन्नन्नं कुसुमरसं जं किर सो महइ अन्यमन्यं कुसुमरसं यत् किल स मधुकरो वाञ्छति पातुं, सो कुसुमाणं दोसो नेय भमरस्स स कुसुमानां दोषो नैव भ्रमरस्य । कीदृशानां कुसुमानाम् । नीरसाणं नीरसानाम् । भ्रमरश्च कीदृशः । पाणलोहिल्लो पानलोभिकः । याः किल निर्गुणतया नितम्बिन्यो रतिसुखलाभलालसस्य पत्युरीप्सितं न पूरयन्ति, ताः प्रयुक्त्या एवमभिधीयन्त इति । लोहिल्लो लोभवान् । अन्यापदेशोऽलंकारः ॥३४०॥

३४१) अनुरागस्य । [रथ्याप्रकीर्णनयनोत्पला त्वां सा प्रतीक्षत आयन्तम् । द्वारनिमिताभ्यां बालक मङ्गलकलशाभ्यामिव स्तनाभ्याम् ॥]

१W. फग्गुच्छवणिद्दोसं केण वि कद्दमपसाहणं दिण्णं; २W. महुअरो पाउं; ३W. दारणिहिएहिं; ४W. दोहि वि.

W141 ३४२) ता रुन्नं जा रुव्वइ ता झीणा जाव झिज्जए अंगं ।
[1]ता नीससियं वरईए [2]जाव सासा समप्पंति ॥४२॥

W142 ३४३) [3]समदुक्खसुक्खसंवड्ढियाण कालेण [4]रूढपणयाणं ।
मिहुणाण मरइ जं तं खु जियइ इयरं मुयं होइ ॥४३॥

हे बालय, बालक सा तुमं पडिच्छए सा त्वां प्रतीक्षते । कथंभूतम् । इंतं आगच्छन्तम् । काभ्याम् । थणेहिं स्तनाभ्याम् । कथंभूताभ्याम् । दारणिमिएहिं द्वारनिमिताभ्याम् । काभ्यामिव । मंगलकलसेहिं व मङ्गलकलशाभ्यामिव । कीदृशी । रच्छापइण्णणयणुप्पला रथ्याप्रकीर्णनयनोत्पला । यस्य किल आगमनमभीष्टं भवति स स्वमन्दिरद्वाराधिरोपितमङ्गलकलशया रथ्याप्रकीर्णकुसुमोत्करया च प्रतीक्ष्यत इति । सा द्वारदेशावलग्ना त्वन्मार्गं मृगयमाणा तिष्ठतीति भावः ॥३४१॥

३४२) हालस्य । [तावद्रुदितं यावद्रुद्यते, तावत्क्षीणा यावत्क्षीयते अङ्गम् । तावन्निःश्वसितं वराक्या यावच्छ्वासाः समाप्यन्ते ॥] ता रुन्नं जा रुव्वइ तावद्रुदितं यावद्रुद्यते । किमेतावदेव । नेत्याह । ता झीणा जाव झिज्जए अंगं तावत् क्षीणा यावत् क्षीयतेऽङ्गम् । ता नीससियं वरईए जाव सासा समप्पंति तावन्निःश्वसितं वराक्या यावच्छ्वासाः समाप्यन्ते । सा वराकी रोदितुमक्षमा चर्मास्थिशेषितशरीरा निःश्वसितुमपारन्ती दशमीं दशां प्राप्तकल्पा वर्तते, इति प्रयुक्त्या नायकस्योपालम्भोऽभिहित इति ॥३४२॥

३४३) रवशक्तेः । [समदुःखसौख्यसंवर्धितानां कालेन रूढप्रणयानाम् । मिथुनानां म्रियते यत् तत्खलु जीवति , इतरन्मृतं भवति ॥] मिहुणाण मरइ जं तं खु जियइ इयरं मुयं होइ मिथुनानां म्रियते यत् तत् खलु जीवति, इतरन्मृतं भवति । कीदृशानाम् । समदुक्खसुक्खसंवड्ढियाण समदुःखसौख्यं यथा भवति, एवं संवर्धितानाम् । भूयः किंभूतानाम् । कालेण रूढपणयाणं कालेन रूढप्रणयानाम् । यो हि म्रियते स दुःखं नानुभवति, जीवतीत्युच्यते । यश्च जीवति स दुःखभाजनं भवति । जीवितमृतयोर्जीवनमरणधर्मयोगात् तथा व्यवहार इति ॥३४३॥

१ W. ता णीससिअ वराइअ; २ W. जाव अ सासा पहुप्पंति; ३ W. समसोक्खदुक्खपरिवड्ढिआण; ४ W. रूढपेम्माण.

W143 ३४४) हरिहिइ पियस्स नवचूयपल्लवो पढममंजरिसणाहो ।
मा रुयसु पुत्ति पत्थाणकलसमुहसंठिओ गमणं ॥४४॥

W144 ३४५) जो कह वि स[1]हीहि महं छिद्दं लहिऊण पेसिओ हियए।
सो माणो चोरियकामुउ व्व दिट्ठे पिए नट्ठो ॥४५॥

W145 ३४६) सहियाहिँ [2]भणमाणी थणए लग्गं कुसुंभपुप्फं ति ।
मुद्धवहुया हसिज्जइ पप्फोडंती नहवयाइं ॥४६॥

---

३४४) बन्धुधर्मणः । [हरिष्यति प्रियस्य नवचूतपल्लवः प्रथममञ्जरीसनाथः । मा रोदीः पुत्रि प्रस्थानकलशमुखसंस्थितो गमनम् ॥] काचित् भविष्यत्प्रियप्रवासाक्रान्तां कांचित् समाश्वासयितुम् इदमाह । मा रुयसु पुत्ति मा रुदः पुत्रि । यतः नवचूयपल्लवो पियस्स गमणं हरिहिइ नवचूतपल्लवः प्रियस्य गमनं हरिष्यति । कीदृशः । पढममंजरिसणाहो प्रथममञ्जरीसनाथः । भूयश्च कीदृशः । पत्थाणकलसमुहसंठिओ प्रस्थानकलशमुखसंस्थितः । अत एवासौ गमनं हरिष्यति । चूतमञ्जरीं निरीक्ष्य वसन्तागमनं मन्यमानस्त्वत्प्रियः प्रवासवासनां न विधास्यति । को हि नाम पुनर्गमनचिन्तां चित्तेऽपि करोतीति भावः । समाश्वासनं सखीकर्म । हेतुरलंकारः ॥३४४॥

३४५) [यः कथमपि सखीभिर्मे छिद्रं लब्ध्वा प्रेषितो हृदये । स मानश्चौर्यकामुक इव दृष्टे प्रिये नष्टः ।] सो माणो दिट्ठे पिए नट्ठो स मानो दृष्टे प्रिये नष्टः । कोऽसावित्याह । जो कह वि सहीहि महं हियए पेसिओ यो मानः कथमपि कृच्छ्रात् सखीभिर्मम हृदये प्रवेशितः । किं कृत्वा । छिद्दं लहिऊण छिद्रं प्रियापराधलक्षणं लब्ध्वा । क इव नष्टः । चोरियकामुउ व्व चौर्यकामुक इव । यथा हि चौर्यकामुकः छिद्रमासाद्य प्रवेशितः प्रियेणावलोकिते नश्यति, तथा मान इत्यर्थः ॥३४५॥

३४६) मालवाधिपस्य । [सखीभिर्भण्यमाना स्तने लग्नं कुसुम्भपुष्पमिति । मुग्धवधूर्हस्यते प्रस्फोटयन्ती नखपदानि ॥] मुद्धवहुया हसिज्जइ

---

[1]W. मह सहीहिं; [2]W. भणमाणा.

W146 ३४७) उम्मूलंति[1] व हिययं इमाइँ[2] हो हे विरज्जमाणस्स ।
अवहेरिवसविसंठुलवलंतणयणद्धदिट्ठाइं[3] ॥४७॥

W147 ३४८) न मुयंति दीहसासे न रुयंति न हुंति[4] विरहकिसियाओ ।
धन्नाउ ताउ जासिं बहुवल्लह वल्लहो न तुमं ॥४८॥

मुग्धवधूर्हस्यते । किं कुर्वती । पप्फोडंती नहवयाइं । प्रस्फोटयन्ती नखपदानि । किं क्रियमाणा सती । सहियाहिँ भण्णमाणी सखीभिर्भण्यमाना । किं तदित्याह । थणए लग्गं कुसुंभपुप्फं ति स्तने लिग्नं कुसुम्भपुष्पमिति । अत्र कुसुमबुद्धया नखक्षताक्षेपणं सखीनां हासहेतुः । हासः स्थायी भावः । मुग्धा नायिका । तदाश्रयो जातिरलंकारः ॥३४६॥

३४७) तस्यैव (मालवाधिपस्य) । [उन्मूलयन्तीव हृदयम् इमानि हो हे विरज्यमानस्य । अवधीरणावशविसंष्ठुलवलमाननयनार्धदृष्टानि ॥] तव अवधीरणावशविसंष्ठुलवलन्नयनार्धनिरीक्षितानि उन्मूलयन्तीव हृदयम् । किंभूतस्य तव । विरज्यमानस्य । पूर्वं खलु मयि भवदीयाः स्नेहार्द्रा दृष्टिनिपाताः प्रादुरासन् । संप्रति त एव अन्यथाभूता व्यथयन्ति माम् इति भावः । उत्प्रेक्षाहेतुभ्यां संसृष्टिरलंकारः । शृङ्गाराभासः ।।३४७॥

३४८) विजयशक्तेः । [न मुञ्चन्ति दीर्घश्वासान् न रुदन्ति न भवन्ति विरहकृशाः । धन्यास्ता यासां बहुवल्लभ वल्लभो न त्वम् ।।] धन्नाउ ताउ धन्यास्ता नायिकाः जासिं बहुवल्लह वल्लहो न तुमं यासां बहुवल्लभ वल्लभो न त्वम् । यतः ता न मुयंति दीहसासे न मुञ्चन्ति दीर्घनिःश्वासान् । किमेतावदेव, नेत्याह । न रुयंति न हुंति विरहकिसियाओ न रुदन्ति न भवन्ति विरहकृशाः । अहमधन्या या त्वदनुरागयोगाद् ईदृशीं दशां प्राप्तेति भावः । बहुवल्लभ इति साभिप्रायमामन्त्रणम् । त्वं किल बह्वीनां वल्लभो नास्माभिर्लभ्यसे, इति । रुद्रटमते लेशो नामालंकारः । (रुद्रट,६, १००) ॥३४८॥

१W. उम्मूलेंति ; २W. इमाइ रे तुह विरज्जमाणम्स; ३W. अवहीरणवसविसंठुल; ४W. ण रुअंति चिरं ण होंति किसिआओ.

W148 ३४९) निद्दालस[1]परिघोलिरतंसवलंतद्धतारयालोया ।
कामस्स वि दुव्विसहा दिट्ठिणिवाया ससिमुहीए ॥४९॥

W149 ३५०) जीवियसेसाइ मए गमिया कह कह वि पिम्मदुद्दोली ।
[2]ईन्हि विरमसु रे [3]दड्ढहियय मा रज्जसु [4]कहं पि ॥५०॥

---

३४९) हालस्य । [निद्रालसपरिघूर्णनशीलतिर्यग्वलमानार्धतार-कालोकाः । कामस्यापि दुर्विषहा दृष्टिनिपाताः शशिमुख्याः ॥] दिट्ठि-णिवाया ससिमुहीए कामस्स वि दुव्विसहा दृष्टिनिपाताः शशिमुख्याः कामस्यापि दुर्विषहाः । काममपि सकामं कुर्वन्तीत्यर्थः । कीदृशास्ते । निद्दालसपरिघोलिरतंसवलंतद्धतारयालोया निद्रालसपरिघूर्णनशीलाः त्र्यस्र-वलमानार्धतारकालोकाः । ईदृशा दृष्टिनिपाताः स्मरस्यापि दुस्सहाः, का कथा पुनरन्येषाम् इति । तंसं त्र्यस्रं, वक्रादिपाठात् (वररुचि, ४,१५) अनुस्वारः । इदं ललितं नाम हर्ष्ये हर्ष्याभावोद्भवः (?) चेष्टालंकारः । तस्य लक्षणम् - गमनं चंक्रमणक्रमहेलाशिञ्जानमञ्जुमञ्जीरम् । जघनविव-र्तनलीलाक्वणन्मेखलावलयम ॥ अलसविवर्तितवदनं स्कन्धारोहैककुण्डल-प्राप्तम् (?) । भिन्नत्रिवलीलेखासमुन्नमद्वामकुचकलशम् ॥ ईषद्दष्टौष्ठं परिस्फुरद्गण्डमण्डलच्छायम् । किञ्चित्कम्पपयोधरसूचितनिभृतनिःश्वासम् ॥ हसितं सिचयैकाञ्चलनिरुद्धवदनेन्दुचन्द्रिकाप्रसरम् । क्षणमेव विधिविलो-कितं (?) च सभ्रूलतालास्यम् ॥ मनसि नगुरूपदिष्टं चेष्टितमित्यादि यत्र समुद्भवति । स्त्रीणां स्वभावसिद्धं ललितं तत्कीर्तितं कविभिः ॥३४९॥

३५०) विरहानलस्य । [जीवितशेषया मया गमिता कथं कथ-मपि प्रेमदुर्विनयदशा । इदानीं विरम रे दग्धहृदय मा रज्य कथमपि ॥] काचिदभीष्टं कष्टादपि जनमनासादयन्ती हृदयं स्वगतम् इदम् आह । रे दड्ढहियय रे दग्धहृदय, जीवियसेसाइ मए जीवितशेषया मया गमिया कह कह वि पिम्मदुद्दोली गमिता अतिवाहिता कथं कथमपि प्रेम्णः स्ने-

---

१ w. परिघुम्मिर; २ w. इण्हिं; ३ w. डड्ढहिअअ, ४ w. कहिं वि.

W150 ३५१) अज्झाएँ नवणहक्खयणियच्छणे गरुयजुव्वणुत्तुंगं ।
पडिमागयणियणयणुप्पलच्चियं होइ थणवट्टं ॥५१॥
W151 ३५२) तं नमह जस्स वच्छे लच्छिमुहं कुत्थुहम्मि संकंतं ।
दीसइ मयपरिहीणं ससिबिंबं सूरबिंब व्व ॥ ५२ ॥

हस्य दुद्दोली दुर्विनयदशा । अतश्च इन्हि विरमसु इदानीं विरम मा रज्जसु कहं पि मा रज्य त्वं कथमपि, इति हृदयप्रार्थना । परकीया नायिकेति । रे इति निपातः क्षेपे । दुद्दोली दुर्नयं वस्तु । आक्षेपोऽलंकारः ॥ ३५० ॥

३५१) अवटङ्कस्य । [प्रौढयुवत्या नवनखक्षतावेक्षणे गुरुकयौवनोत्तुङ्गम् । प्रतिमागतनिजनयनोत्पलार्चितं भवति स्तनपृष्ठम् ॥] अज्झाएँ थणवट्टं होइ प्रौढयुवत्याः स्तनपृष्ठं भवति । कीदृशम् । पडिमागयणियणयणुप्पलच्चियं प्रतिमागतनिजनयनोत्पलार्चितम् । क्व । नवणहक्खयणियच्छणे नवनखक्षतावेक्षणे । कीदृशं स्तनपृष्ठम् । गरुयजुव्वणुत्तुंगं गुरुकयौवनोत्तुङ्गम् । संक्रान्तनेत्रतया नीलोत्पलपलाशकीर्णमिव कुचकुम्भपीठं भवति । स्वच्छताप्रतिपादनपरेयमुक्तिः । अज्झा प्रौढयुवतिः । प्रतिमा बिम्बम् ॥ ३५१ ॥

३५२) केशवराजस्य । [तं नमत यस्य वक्षसि लक्ष्मीमुखं कौस्तुभे संक्रान्तम् । दृश्यते मृगपरिहीनं शशिबिम्बं सूर्यबिम्ब इव ॥] तं नमह तं नमत । जस्स वच्छे लच्छिमुहं दीसइ यस्य वक्षसि लक्ष्मीवक्त्रं विलोक्यते । कीदृशम् । कुत्थुहम्मि संकंतं कौस्तुभे संक्रान्तम् । किं कस्मिन्निव । ससिबिंबं सूरबिंब व्व शशिबिम्बं सूर्यबिम्ब इव । कीदृशं शशिबिम्बम् । मयपरिहीणं मृगपरिहीनं मुक्तकलङ्कमित्यर्थः । लक्ष्मीमुखेन्दुकौस्तुभनैर्मल्यप्रतिपादनपरेयमुक्तिः । अयम् अभूतोपमालंकारः । सर्वपद्मप्रभासारः समाहृत इव क्वचित् । तदाननं विभातीति तामभूतोपमां विदुः (काव्यादर्श, २,३८) ॥ ३५२ ॥

१W. णिरिक्खणे,

W155 ३५६) निव्वेत्तरया वि वहू सुरयविरामट्ठिइं अयाणंती ।
अविरयहियया अन्नं पि किं पि अत्थि त्ति चिंतेइ॥५६॥

W156 ३५७) नंदंतु सुरयसरहसतण्हावहराइँ सयललोयस्स ।
बहुमग्गविणिम्मवियाइँ वेसविलयाण हिययाइं ॥५७॥

काचित् क्वचित् शोभासौभाग्यभाजि यूनि मनो विनिवेशयन्ती कयाचिद् इदम् उच्यते । पुत्तय मा साहसं करिज्जासु पुत्रि मा साहसं कृथाः । यतो दुन्निक्खेवयमेयं दुर्निक्षेपकमिदम् । एतदेव विवृणोति । इत्थ निहित्ताइँ वणे हिययाइँ पुणो न लब्भंति । अत्र निहितानि सखे (? सखि) हृदयानि पुनर्न लभ्यन्ते । माऽस्मिन् स्वहृदयं निधास्यसीति भावः । यद् हि वस्तु न्यस्तं हस्ते न भवति, तद् दुर्निक्षेपकमित्युच्यते । नायकगुणवर्णनपरेमुक्तिः । आक्षेपपर्यायोक्तिभ्यां संसृष्टिरलंकारः ॥३५५॥

३५६) सवज्ञस्य (or सर्वज्ञस्य) । [निर्वृत्तरताऽपि वधूः सुरतविरामस्थितिमजानती । अविरतहृदया अन्यदपि किमप्यस्तीति चिन्तयति ॥] निव्वत्तरया वि वहू निर्वृत्तसुरताऽपि वधूः अन्नं पि किं पि अत्थि त्ति चिंतेइ अन्यदपि किंचिदतोऽप्यधिकमस्तीति चिन्तयति । कीदृशी । अविरयहियया अविरतहृदया । निर्वृत्तरता किमन्यदपि अभिलषतीत्याह । सुरयविरामट्ठिइं अयाणंती सुरतविरामस्थितिमजानती । एतदन्तमेव मोहनं भवतीति न जानातीत्यर्थः । मध्या नायिका ॥३५६॥

३५७) मङ्गलकलशस्य । [नन्दन्तु सुरतसरभसतृष्णापहरणानि सकललोकस्य । बहुमार्गविनिर्मितानि वेशवनितानां हृदयानि ॥] वेसविलयाण हिययाइं नंदंतु वेशवनितानां हृदयानि नन्दन्तु । कीदृशानि । बहुमग्गविणिम्मवियाइँ विनिर्मिता बहव आलिङ्गनचुम्बनश्वसितमणितसीत्कृतादयो मार्गाः प्रकारा यैः (तादृशानि) । पुनश्च कीदृशानि । सुरयसरहसत-

१ W. णिव्वुत्तरआ. २ W. सुरअसुहरसतण्हा; ३ W. बहुकइअवमग्गविणिम्मिआइ वेसाण.

W152 ३५३) मा कुण पडिवक्खसुहं अणुणेसु पियं पसायलोहिल्लं ।
अइगरुयगहियमाणेण पुत्ति रासि व्व झिज्जिहिसि ॥५३॥

W153 ३५४) विरहकरवत्तदूसहफालिज्जंतस्स तीइ हिययस्स ।
अंसु सकज्जलमोसं पमाणसुत्तं वै से पडियं ॥५४॥

W154 ३५५) दुन्निक्खेवयमेयं पुत्तय मा साहसं करिज्जासु ।
इत्थ निहित्ताइँ वणे हिययाइँ पुणो न लब्भंति ॥५५॥

३५३) निष्कलङ्कस्य । [मा कुरु प्रतिपक्षसुखम्, अनुनय प्रियं प्रसादलोभवन्तम् । अतिगुरुकगृहीतमानेन पुत्रि राशिरिव क्षेष्यसि ॥] हे पुत्ति पुत्रि, मा कुण पडिवक्खसुहं मा कार्षीः प्रतिपक्षसुखम् । अणुणेसु पियं पसायलोहिल्लं अनुनय प्रियं प्रसादलोभिनम् । प्रियः प्रसादे लोभवान् भवति । अइगहियगरुयमाणेण झिज्जिहिसि अतिगुरुकगृहीतमानेन क्षीणा भविष्यसि । केव ; रासि व्व राशिरिव । यथा राशिः अतिगुरुणा गृहीतेन मानेन क्षीयते तथा त्वमपि, इति मानं मा कार्षीरिति । मानो मानिनीपक्षे अहंकारः । राशिपक्षे कुडवादीनामन्यतमः । आक्षेपोपमाभ्यां संसृष्टिरलंकारः । सखीभिः शिक्षोक्तिः ॥ ३५३ ॥

३५४) मातङ्गस्य । [विरहदुस्सहकरपत्रपाट्यमानस्य तस्या हृदयस्य । अश्रु सकज्जलमिश्रं प्रमाणसूत्रमिव तस्याः पतितम् ॥] अश्रु सकज्जलमिश्रं पतितम् । किमिव । पमाणसुत्तं व प्रमाणसूत्रमिव । कस्य । हिययस्स हृदयस्य । कीदृशस्य । विरहकरवत्तदूसहफालिज्जंतस्स विरहदुस्सहकरपत्रपाट्यमानस्य । प्राकृते पूर्वनिपातानियमाद् दुस्सहशब्दस्य परनिपातः । यत् करपत्रेण पाटयितुमिष्यते तस्य किल कृष्णं प्रागेव प्रमाणसूत्रं पात्यत इति । उत्प्रेक्षालंकारः । विरहिणी नायिका ॥३५४॥

३५५) मातुलस्य (or माहिलस्य) । [दुर्निक्षेपकमेतत् पुत्रि मा साहसं कुर्याः । अत्र निहितानि सखि हृदयानि पुनर्न लभ्यन्ते ॥]

१W. अइगहिअगरुअमाणेण; २W. फालिज्जंतम्मि तीअ हिअअम्मि; ३W. कज्जलमइलं; ४W. व पडिहाइ; ५. मणे.

W157 ३५८) अप्पेत्तमन्नुदुक्खय किं मं किसिय त्ति पुच्छसि हसंतो ।
पावॆसु याचलचित्तं पियं जणं ता तु पुच्छिस्सं ॥५८॥
W158 ३५९) अवहत्थिऊण सहिजंपियाइँ जाणं कएण रमिओ सि ।
एयाइँ ताइँ सुक्खाइँ संसओ जेहि जीयस्स ॥५९॥

ण्हावहराइँ सरभससुरततृष्णापहरणानि । कस्य । सयल्लोयस्स सकललोकस्य । प्राकृते पूर्वनिपातस्यानियमात् 'सरहस'शब्दस्य परनिपातः । तृष्णापाद्य (? तृष्णायाः) सरभस इति विशेषणम् । वेसविलया वेशवनिता । तस्या लक्षणम् – पण्याङ्गना तु बाढं रमयति यूनां (मनांसि) कृतककृतैः । रसभावहावहेलाविलासकिलकिञ्चितैः सुरतैः ॥ अस्यास्तु भवति भूयो रतिः सकलकलाकलापकुशलायाः । शृङ्गारस्याभासैः केवलधनहार्यहृदयायाः ॥३५७॥

३५८) हालस्य । [अप्राप्तमन्युदुःखक किं मां कृशेति पृच्छसि हसन् । प्राप्नुहि चञ्चलचित्तं प्रियं जनं ततस्ते प्रक्ष्यामि ॥] हे अप्पत्तमन्नुदुक्खय अप्राप्तमन्युदुःखक, किं मं किसिय त्ति पुच्छसि हसंतो किं मां कृशेति पृच्छसि हसन् । पावसु याचलचित्तं प्राप्नुहि आचलचित्तं चञ्चलस्वभावं पियं जणं ता तु पुच्छिस्सं प्रियं जनं ततस्त्वां प्राप्तमन्युदुःखं प्रक्ष्यामीति । एतदुक्तं भवति । न मया कदाचिदपि तवापराद्धम् । अतो अप्राप्तदुःखतया अपरवेदनानामज्ञानात् किं त्वं कृशेति मां पृच्छसि । यदा चञ्चलचित्ताम् अन्यां प्रेयसीं प्राप्स्यसि, ता ततः, तु इति कर्मणि षष्ठी द्रष्टव्या (तव प्रक्ष्यामीत्यर्थः) । मन्युरपराधः । विप्रलम्भे मानिनी मध्या नायिका । धृष्टो नायकः । अमर्षेर्ष्याविषादादिव्यभिचारिभावाः । सूत्रकोपरानुभावः (?), देहदौर्बल्यं शरीरानुभावः ॥३५८॥

३५९) प्रवरराजस्य । [अपहस्त्य सखीजल्पितानि येषां कृते रमितोऽसि । एतानि तानि सौख्यानि संशयो यैर्जीवस्य ॥] काचित्

१W. अप्पत्तमण्णुदुक्खो; २W. पावसि जा चलचित्तं; ३W. ता तुह कहिस्सं.

W159 ३६०) ईसालुओ पई से रत्तिं महुए न देइ उच्चेउं ।
उच्चेइ अप्पण च्चिय माए अइउज्जुयसहावो ॥६०॥
W160 ३६१) अच्छोडियवत्थद्धंतपत्थिए मंथरं पिए वच्च ।
चिंतेसि थणहरायासियस्स मज्झस्स वि न भंगं ॥६१॥

क्षणभङ्गुरानुरागं नायकम् उपालम्भेनेदमाह । एयाइँ ताइँ सुक्खाइँ एतानि तानि प्रत्यक्षप्रमाणानि सौख्यानि । जाणं कएण रमिओ सि यदर्थे त्वं रमितोऽसि । किं कृत्वा । अवइत्थिऊण सहिजंपियाइँ अनादृत्य सखीजल्पितानि । कानि तानि सौख्यानीत्याह । संसओ जेहि जीयस्स संशयो यैर्जीवस्य (?जीवितस्य) । एतदुक्तं भवति । मया खलु अलीकसंभोगसुखाग्रहगृहीतया सखीजनजल्पितानि अवधीर्य त्वयि अनुरज्य देहसंदेहदशेयमासादिता, इति । निर्वेदविषादवित्तानि (?) आदायावागभाव्व्यङ्ग्या(?) व्यभिचारिणो भावाः । विप्रलम्भशृङ्गारभावोऽयम् (?) । विषमोऽलंकारः । यत्र क्रियाविपत्तेर्न भवेदेव क्रियाफलं तावत् । कर्तुरनर्थश्च भवेत् तदपरमभिधीयते विषमम् ॥ (रुद्रट, ७,५४)॥३५९॥

३६०)[ईर्ष्यालुः पतिस्तस्या रात्रिं मधूकानि न ददात्युच्चेतुम् । उच्चिनोत्यात्मनैव मातरतिऋजुकस्वभावः ॥] से पई रत्तिं महुए न देइ उच्चेउं तस्याः पतिः रात्रिं मधूकानि न ददाति उच्चेतुम् । कीदृशः पतिः । ईसालुओ ईर्ष्यावान् । अत एव निजवध्वा मधूकानि उच्चेतुं न ददाति । किं तर्हि करोतीत्याह । उच्चेइ अप्पण च्चिय उच्चिनोति स्वयमेव । माए अइउज्जुयसहावो मातरतीव ऋजुस्वभावः । रात्रौ बहिर्गमने शङ्कते, न पुनर्निर्जने गृहे गृहिण्या दुश्चरितम्, इति सरलस्वभावत्वं तस्येति । स्वैरिणी नायिका ॥३६०॥

३६१) हरिकेशवस्य । [आक्षिप्तवस्त्रार्धान्तप्रस्थिते मन्थरं प्रिये व्रज । चिन्तयसि स्तनभरायासितस्य मध्यस्यापि न भङ्गम् ॥] अच्छोडियव-

१W महुअं, २W तुमं.

W161 ३६२) उद्धच्छो पियइ जलं जह जह विरलंगुली चिरं पहिओ ।
पावालिया वि तह तह धारं तणुयं पि तणुएइ ॥६२॥

W162 ३६३) सा तस्स पिच्छइ मुहं भिच्छयरो नाहिमंडलं तिस्सा[1] ।
दुन्हं पि करंकं चडुयं च काया विलुंपंति ॥६३॥

त्थद्धंतपत्थिए मंथरं पिए वच्च आक्षिप्तवस्त्रार्धान्तं यथा भवति एवं प्रस्थिते प्रिये मन्थरं मन्दं व्रज । मज्झस्स वि भंगं न चितेसि मध्यस्यापि भङ्गं न चिन्तयसीति । कथंभूतस्य मध्यस्य । थणहरायासियस्स स्तनभरायासितस्य । एतदुक्तं भवति । यदि मामपि (? मय्यपि) अनुरोधबुद्धिः (नास्ति) तद् एतस्य स्तनभारभङ्गुरस्य मध्यभागस्य भङ्गभयमपि नास्तीति, येन त्वरितमितो गन्तुं प्रवृत्तासीति भङ्ग्या प्रियाप्रसादनपरेयमुक्तः ॥३६१॥

३६२) गुणाढ्यस्य । [ऊर्ध्वाक्षः पिबति जलं यथा यथा विरलाङ्गुलिश्चिरं पथिकः । प्रपापालिकाऽपि तथा तथा धारां तन्वीमपि तनयति ॥] जह जह पहिओ चिरं जलं पियइ यथा यथा पथिकश्चिरं जलं पिबति । कथंभूतः । उद्धच्छो ऊर्ध्वाक्षः । भूयः कथंभूतः । विरलंगुली विरलाङ्गुलिः । पावालिया वि तह तह प्रपापालिकाऽपि तथा तथा धारं तणुयं पि तणुएइ धारां तन्वीमपि तनयति । अत्र विरलाङ्गुलीभिः पयःपानं मुखनिरीक्षणं च पथिकस्य वारिधारासंतानतानवं च तदिङ्गितवेदिन्याः प्रपापालिकाया अन्योन्यानुरागज्ञापकम् । ज्ञापको हेतुरलंकारः । ३६२॥

३६३) भ्रातृकस्य । [सा तस्य प्रेक्षते मुखं भिक्षुको नाभिमण्डलं तस्याः । द्वयोरपि भिक्षापात्रं दर्वीं च काका विलुम्पन्ति ॥] सा तस्स पिच्छइ मुहं सा तस्य भिक्षोः प्रेक्षते मुखम् । भिच्छयरो नाहिमंडलं तिस्सा भिक्षुकस्तु नाभिमण्डलं तस्याः । दुन्हं पि करंकं चडुयं च द्वयोरपि भिक्षाभाजनं दर्वीं च काया विलुंपंति काका विलुम्पन्ति । एवं नाम तौ द्वावपि अन्योन्यविलोकनैकतानमानसौ जातौ यथा वाय-

[1] W भिच्छअरो पेच्छइ णाहिमंडलं सा वि तस्स मुहअंदं । तं चट्टुअं करंकं दोण्ह वि काआ विलुंपंति ॥

W163 ३६४) जेण विणा न वेलिज्जइ अणुणिज्जइ सो कयावराहो वि।
पत्ते वि नयरडाहे भण कस्स न वल्लहो अग्गी ॥६४॥
W164 ३६५) वंकं को पुलइज्जइ कस्स कहिज्जइ सुहं व दुक्खं वा।
केणं व समं हसिज्जइ पामरपउरे हयग्गामे ॥६५॥

सैर्विलुप्यमानम् अभीक्ष्णं भिक्षान्नमपि न बुध्यत इति। जडता व्यभिचारी भावः। तस्य लक्षणम्—जडताऽत्र सर्वकार्याप्रतिपत्तिश्चेति सा (चेतसो) मनुष्याणाम्। इष्टानिष्टश्रवणावलोकनव्याधिभिर्ज्ञेया॥ नामनिनिमिषप्रेक्षण (?) तूष्णींभावैरनुत्तरादानात्। परवशतयाप्यभिनयेत् चित्राऽलिखितैरिवावयवैः ॥३६३॥

३६४) स्वधर्मणस्य। [येन विना न वल्यते अनुनीयते स कृतापराधोऽपि। प्राप्तेऽपि नगरदाहे भण कस्य न वल्लभो अग्निः॥] काचित् कांचित् सापराधमपि प्रियमनुवर्तयितुमिदमाह सखी। सो कयावराहो वि अणुणिज्जइ स कृतापराधाऽप्यनुनीयते। कोऽसावित्याह। जेण विणा न वलिज्जइ येन विना न वर्त्यते (?)। अमुमेवार्थं समर्थयन्नाह। पत्ते वि नयरडाहे भण कस्स न वल्लहो अग्गी प्राप्तेऽपि नगरदाघे भण कस्य न वल्लभोऽग्निः। तस्मान्मुञ्च मानं प्रियमनुवर्तस्वेत्यर्थः। सखीशिक्षोक्तिः। अर्थान्तरन्यासोऽलंकारः ॥३६४॥

३६५) रेहायाः (? रेवायाः)। [वक्रं कः प्रलोक्यते कस्य कथ्यते सुख वा दुःखं वा। केन वा समं हस्यते पामरप्रचुरे हतग्रामे॥] काचिद् विदग्धवनिता स्वगुणानुगुणं कान्तमलभमाना इदमाह। पामरपउरे हयग्गामे पामरप्रचुरे हतग्रामे वंकं को पुलइज्जइ वक्रं कोऽवलोक्यते। कस्स कहिज्जइ सुहं व दुक्खं वा कस्य कथ्यते सुखं वा दुःखं वा। केण व समं हसिज्जइ केन वा समं हस्यते। न केनापीत्यर्थः। वैदग्ध्यबन्ध्ये ग्राम्यजने न संगतिरेवोचितेति भावः ॥३६५॥

१W. जिविज्जइ,. २W. पुलइज्जउ; ३W. कहिज्जउ, ४W. केण समं व हसिज्जउ.

W165 ३६६) फ¹लहीवाडयपुण्णाहमंगले मंगलं कुणंतीए ।
असईए मणोरहगब्भिणाएँ हत्था थरहरंति ।।६६।।
W167 ३६७) भंजंतस्स वि तुह सग्गगामिणो नइकरंजसाहाओ ।
²पाया दुन्नि वि धम्मिय अज्ज वि धरणिं चिय छिवंति ।६७।।
W166 ३६८) पहिउल्लूरणसंकाउलाहिँ असईहिँ बहलतिमिरस्स ।
³आयंपणेण निहुयं वडस्स सित्ताइँ पत्ताइं ।।६८।।

३६६) हालस्य । [कर्पासबाटकपुण्याहमङ्गले मङ्गलं कुर्वत्याः । असत्या मनोरथगर्भिताया हस्तौ कम्पेते ।।] असईए हत्था थरहरंति असत्या हस्तौ थरथरायेते कम्पेते । किंभूतायाः । मंगलं कुणंतीए मङ्गलं कुर्वत्याः । क्व । फलहीवाडयपुण्णाहमंगले कर्पासवाटके यत् पुण्याहमङ्गलं तस्मिन्नुपस्थिते । कथंभूताया असत्याः । मणोरहगब्भिणाएँ मनोरथगर्भितायाः । अत्र मया स्वेच्छाप्रच्छन्नकामित कर्तव्यमिति रागयोगात् बीजवपनपुण्याहमङ्गले करकमलकम्पः सात्त्विको भावस्तस्या इति ।।३६६।।

३६७) काढिल्लकस्य । [भञ्जतोऽपि तव स्वर्गगामिनो नदीकरञ्जशाखाः । पादौ द्वावपि धार्मिक अद्यापि धरणीमेव स्पृशतः ।।] काचित् नदीकूञ्जशाखाक्षयकरं वीक्ष्य भिक्षुकं निर्भर्त्सयन्तीदमाह । हे धम्मय तुह पाया दुन्नि वि अज्ज वि धरणिं चिय छिवंति, हे धार्मिक तव द्वावपि पादौ अद्यापि धरणीमेव स्पृशतः । किंभूतस्य तव । भंजंतस्य वि नइकरंजसाहाओ भञ्जतोऽपि नदीकरञ्जशाखाः । कीदृशस्य । सग्गगामिणो स्वर्गगामिनः । अत्युल्लुण्ठनया असंभाव्यार्थपात्रत्वगर्भं विशेषणम् । वागनुभावव्यङ्ग्यः संकेतकरञ्जशाखाभङ्गोद्भवोऽमर्षो नाम व्यभिचारी भावः । तदनुभावो निर्भर्त्सनं नायकाः (? नायिकायाः) ।।३६७।।

३६८) स्वामिनः । [पथिकच्छेदनशङ्काकुलाभिरसतीभिर्बहलतिमिरस्य । हरिद्रोदकेन निभृतं वटस्य सिक्तानि पत्राणि ।।] असईहिँ

१W. फलहीवाहणपुण्णाहमंगलं लंगले; २W. पाआ अज्ज वि धम्मिअ तुह कह धरणिं चिअ छिवंति. ३W. आइप्पणेण.

W169 ३६९) निक्कम्माहि वि छेत्ताहि पामरो नेय वच्चए वसहिं ।
मयपियजायासुन्नइयगेहदुक्खं परिहरंतो ॥६९॥

W170 ३७०) झंझावाउत्तिणियघरविवरपलुट्टंसलिलधाराहिं ।
कुड्डलिहिओहिदियहे रक्खइ मुद्धा करयलेहिं ॥७०॥

निहुयं वडस्स सित्ताइँ पत्ताइं असतीभिर्निभृतं वटस्य सिक्तानि पत्राणि । केन । आयंपणेण हरिद्रारसेन । किंभूतस्य वटस्य । बहलतिमिरस्स प्रचुरतिमिरस्य । कीदृशीभिरसतीभिः । पहिउल्लूरणसंकाउलाहिँ पथिकैर्यद् उल्लूरणं भञ्जनं, तच्छङ्किनीभिः । हरिद्रोदकसिक्तपत्रस्य हि देवतायाः कस्याश्चिदयम् इति शङ्कया पथिका न वटशाखिशाखां गमिष्यन्तीति भावः । घनतिमिरान्धकारितदिङ्मुखत्वाद् अयं बहलतिमिरसंगमसुखायत (न) मिति प्रियतमसुविशङ्कतया (?) वटवृक्षरक्षापक्षपातः पंसुलोनाम् इति । उल्लूरणं भञ्जनम् ॥३६८॥

३६९) आढ्यराजस्य । [निष्कर्मणोऽपि क्षेत्रात् पामरो नैव व्रजति वसतिम् । मृतप्रियजायाशून्योकृतगेहदुःखं परिहरन् ॥] पामरो नेय वच्चए वसहिं पामरो ग्रामणीर्नैव व्रजति वसतिम् । कस्मात् । छेत्ताहि क्षेत्रात्। कथंभूतात । निक्कम्माहि वि निष्कर्मणोऽपि । किं कुर्वन् । परिहरंतो परित्यजन् । किं तत् । मयपियजायासुन्नइयगेहदुक्खं मृतप्रियजायाशून्यीकृतगेहदुःखम् । बहिरेव ताम्यतीत्यर्थः । करुणो रसः । तस्य स्वप्रमदामरणम् आलम्बनविभावः । शोकात्मवस्तुकरुणः प्रियपुत्रकलत्रमित्रधनहान्याः । सर्वत्र दैवहतकस्तत्र नायको ज्ञेयः ॥ क्षितिपतनदैवनिन्दारोदनप्रविलापमुखशोषैः । शोर्षोरःस्थलताडनवैवर्ण्यानि च भवन्त्यस्मिन् ॥३६९॥

३७०) पुण्डरीकस्य । [झञ्झावातोत्तृणितगृहविवरप्रवृत्तसलिलधाराभ्यः । कुड्यलिखितावधिदिवसान् रक्षति मुग्धा करतलाभ्याम् ॥] कुड्यलिखितावधिदिवसान् रक्षति मुग्धा करतलाभ्याम् । कुतो रक्षति ।

१W. मुअ; २W. झंझावाउत्तिणघर; ३W. पलोट्टंत; ४W. दिअहं; ५W. अज्जा.

W171 ३७१) गोलाणईऍ कच्छे चक्खंतो राइयाइ पत्ताइं ।
अब्भिडइ मक्कडो खुक्खुएइ पुट्टं च पिट्टेइ ॥७१॥

W172 ३७२) गहवइणा मयसेरिहिहिंदुंदुमदामं चिरं वहेऊण ।
वग्गसँयाइँ निएऊण नवर अज्जाहरे बद्धं ॥७२॥

झंझावाउत्तिण्णियघरविवरपलुट्टसलिलधाराहिं झञ्झावातेन उत्तृणितं यद् गृहं, तस्य यद् विवरं, तेन प्रवर्तमानाः (? प्रवृत्ताः) याः वारिधाराः, ताभ्यः । विरहिणी नायिका ॥३७०॥

३७१) [गोदानद्याः कच्छे, आस्वदमानो राजिकायाः पत्राणि । उल्ललति मर्कटः खोखोशब्दं करोति, उदरं च ताडयति ॥] अब्भिडइ मक्कडो उल्ललति मर्कटः, पुट्टं च पिट्टेइ जठरं च ताडयति । किं कुर्वन् । चक्खंतो राइयाइ पत्ताइं आस्वादयन् राजिकायाः पत्राणि । क्व । गोलाणईऍ कच्छे गोदावर्याः कच्छे । इति जातिरलंकारः । अन्ये तु पुनः । गोदावरीशब्दसंशब्दनात् 'अहं तत्र गता न तु त्वम्' इति वीतसंकेततां सूचयितुं नायिकेदमाह । तदा तु सूक्ष्मालंकारः । अपरे तु, यथा मनोहरहरितिम्ना हृतहृदयो गोदावरीतटैकभागभाजि राजिकाकन्दलीकन्दे कवलिते कष्टं कपिरवाप तथाऽन्योऽपि दर्शनमात्रमनोहरे अनुभवदुःखदायिनि जने दुःखं पश्चात्तापेन तप्यत इति अन्यापदेशेनोक्तं भवतीत्याहुः । पुट्टं उदरम् ॥३७१॥

३७२) नरवाहनस्य । [गृहपतिना मृतसैरिभीघण्टादाम चिरम् ऊढ्वा । वर्गशतानि दृष्ट्वा तत आर्यागृहे बद्धम् ॥] गहवइणा मयसेरिहिदुंदुमदामं अज्जाहरे बद्धं गृहपतिना मृतसैरिभीघण्टादाम आर्यागृहे बद्धम् । किं कृत्वा । चिरं वहेऊण चिरम् ऊढ्वा । पुनः किं कृत्वा । वग्गसयाइँ निएऊण वर्गशतानि दृष्ट्वा । मृतमहिषीघण्टादाम प्रेम्णा कण्ठक-

१W. उप्फडइ; २W. मयसेरिहदुंदुमदामं; ३W. वग्गसआइं णेऊण.

W173 ३७३) सिहिपेहुणावयंसा वहुया वाहस्स गव्विरी भमइ ।
गयमुत्तियगेहियपसाहणाण मज्झे सवत्तीणं ॥७३॥

W174 ३७४) वंकच्छिपिच्छिरीणं वंकुल्लविरीण वंकभमिरीणं ।
वंकहसिरीण पुत्तय पुण्णेहि जणो पिओ होइ ॥७४॥

न्दलेऽवलम्ब्य, ततो महिषी तत्सदृशी नास्तीति विदित्वा हृदि, ततोऽम्बिकावेश्मनि बद्धवान् इत्यर्थः। सैरिभी महिषी। दुंदुमं घण्टा। अज्जा आर्या। अन्यापदेशोऽलंकारः ॥३७२॥

३७३) सर्व (? शर्व) स्वामिनः। [शिखिपिच्छकर्णपूरा वधूर्व्याधस्य गर्विता भ्राम्यति । गजमौक्तिकगृहीतप्रसाधनानां मध्ये सपत्नीनाम् ॥] वहुया वाहस्स गव्विरी भमइ वधूर्व्याधस्य गर्वोद्वहनशीला भ्राम्यति। कीदृशी। सिहिपेहुणावयंसा शिखिपक्षावतंसा। क्व भ्राम्यति। मज्झे सवत्तीणं मध्ये सपत्नीनाम्। कथंभूतानाम्। गयमुत्तियगहियपसाहणाण गृहीतगजमौक्तिकप्रसाधनानाम्। मद्भर्ता भवतीष्वनुरक्तः सन् हस्तिहननेन कर्मक्षम आसीत्। मय्यासक्तस्तु शक्तिक्षयान् मयूरमारणशक्तो वर्तत इति भावः। सपत्नीजनमध्ये पुनः गर्वोद्धुरकन्धरं पर्यटनम् अनुभावः। पेहुणो पक्षः। अवतंसः कर्णपूरः। स्वीया नायिका ॥३७३॥

३७४) [वक्राक्षिप्रेक्षिणीनां वक्रोल्लापिनीनां वक्रभ्रमणशीलानाम्। वक्रहासिनीनां पुत्रक पुण्यैर्जनः प्रियो भवति ॥] हे पुत्तय पुत्रक पुण्णेहि जणो पिओ होइ पुण्यैर्जनः प्रियो भवति। कासाम्। वंकच्छिपिच्छिरीणं वक्राक्षिप्रेक्षणशीलानाम्। वंकभमिरीणं वक्रभ्रमणशीलानाम्। वंकहसिरीणं वक्रहसनशीलानाम्। एवंभूतानां विदग्धवनितानां पुण्यैर्जनः प्रियो भवति ॥३७४॥

W176 ३७५) वाएँरियस्स भरियं अच्छि कंडूयउप्पलरयस्स ।
फूमित्तविसुद्धं चुंबमाण को होसि देवाणं ॥७५॥

W179 ३७६) तीएँ मुहाउ तुह मुहं तुज्झ मुहाओ वि मज्झ चरणेसु ।
हत्थाहत्थिमुवगओ अइदुक्करयारओ तिलओ ॥७६॥

३७५) व्याघ्रस्वामिनः । [वातेरितस्य पूर्णम् अक्षि कण्डूकृदुत्पलरजसः । फूत्कारमात्रविशुद्धं चुम्बमान को भवसि देवानाम् ॥] हे अच्छि चुंबमाण को होसि देवाणं अक्षि चुम्बमान को भवसि देवानाम् । कीदृशम् अक्षि । वाएरियस्स कंडूयउप्पलरयस्स भरियं वातेरितस्य कण्डूकृदुत्पलरजसो भृतं पूर्णम् । पुनश्च कीदृशम् । फूमित्तविसुद्धं फूत्कारमात्रविशुद्धम् । फूत्कारमारुतमात्रविशुद्धस्यापि चक्षुषः चुम्बनेन मम मनोगतं भावम् उद्भाव्य तथैवाचरन् देवानां मध्ये कोऽपि भवसीति भावः । कंडूयउप्पलरयस्स इति पूर्णार्थयोगे तृतीयार्थे षष्ठी । अन्ये तु कंडूमं इति पठन्ति व्याचक्षते च । कीदृशम् अक्षि । कंडूमदिति । पृष्ठाक्षिकुक्षिप्रस्तावा (?) स्त्रियामिति स्त्रियां कंडूमं इति भवति ॥३७५॥

३७६) अन्ध्रलक्ष्म्याः । [तस्य मुखात्तव मुखं तव मुखादपि मम चरणयोः । हस्ताहस्तिमुपगतो अतिदुष्करकारकस्तिलकः ॥] काचित् सिन्दूरेण प्रियं तिलकितं वीक्ष्य सप्रतिभेदमिदमाह । अइदुक्करयारओ तिलओ अतिदुष्करकारकस्तिलकः तीएँ मुहाउ तव मुहं तस्या मुखात्तव मुखं, तुज्झ मुहाओ वि मज्झ चरणेसु तव मुखादपि मम चरणयोः, हत्थाहत्थिमुवगओ हस्ताहस्तिमुपगतः । एतदुक्तं भवति । तद्वदनचुम्बनेन त्वन्मुखे संक्रान्तः पादपातक्रमेण च मच्चरणयोः संक्रान्तः, एवं तिलकः अतिदुष्करकारक इति तिलकनिर्भर्त्सन (?प्रशंसा) मुखेन नायकनिकारः कृतो भवति, इति । त्वं किल तदनुरक्तो मयि पुनर्मिथ्यानुनयमेव दर्शयसीत्यर्थः । हत्थाहत्थि इति लोकोक्तिः । पर्यायोक्तिलंकारः । खण्डिता स्वीया प्रगल्भा नायिका । विप्रलम्भभेदो मानोऽयम् ॥३७६ ॥

१W. वाएरिएण. २W. मुहाहि; ३W. चलणम्मि; ४W. हत्थाहत्थीअ गओ.

W180 ३७७) सामाएँ सामलीए अद्धच्छिपुलोइरीएँ मुहसोहा ।
जंबूदलकयकण्णावयंसभमिरे हलियउत्ते ॥७७॥

W181 ३७८) दूइ तुमं चिय कुसला कक्खडमउयाइ जाणसे वत्तुं ।
कंडुइयपंडुरं जह न होइ तह तं कुणिज्जासु ॥ ७८ ॥

३७७) हालस्य । [श्यामायते श्यामलाया अर्धाक्षिप्रेक्षिण्या मुखशोभा । जम्बूदलकृतकर्णावतंसभ्रमणशीले हालिकपुत्रे ॥] सामलीए मुहसोहा सामा श्यामाया मुखशोभा श्यामायते । कीदृश्याः । अद्धच्छिपुलइरीएँ अर्धाक्षिप्रेक्षणशीलायाः । क्व । हलियउत्ते हालिकपुत्रे । कीदृशे । जंबूदलकयकण्णावयंसभमिरे जम्बूदलकृतकर्णावतंसभ्रमणशीले । अत्र किल सहसैव श्यामायाः समुत्पन्नं मुखकमलमालिन्यं कार्यत्वात् कारणं कलयति । न च पुरः परिदृश्यमानानां मध्यादन्यतमेन केनचिद् भवितव्यम् । यतः संनिहितपरित्यागे व्यवहितं प्रतिकारणं वाच्यम्(?) । तत्र किं जम्बूदलम् उत हालिकसुत आहोस्विन्न सं ...गः (?) । किं वा तस्यैव....रि...सुतस्य जम्बूदलकृतकर्णावतंसदर्शनपिशुनं (?पिशुनितं) तत्र रतिसंकेतके प्रथमगमनं, किं वा आत्मनो अगमनम् इति । न तावन्निसर्गरमणोयं जम्बूदलं कारणम् । न चासौ सकलनयनानन्दनो युवा । नापि तयोः जम्बूदलहालिकयोः संयोगः । न वा तस्यास्तन्वङ्ग्या रतिसुखलाभलालसाया मनोषितम् । अपि तु तस्य यूनस्तत्र गमनम् । किं तर्हि । पारिशेष्याद् आगमनमेव यूनः तस्याः पश्चात्तापतपनतप्यमानमानसायाः वदनवैवर्ण्यस्य कारणं कल्प्यते इति । तदुक्तमस्माभिरेव । जंबूदलं न उव्वेयकारणं नेय हालियसुओ वि । गमणं च तस्स ताय (? तत्था) गमणं(=अगमणं) नियं चेय ॥ भावो नाम अलंकारः । तस्य लक्षणम्—यस्य विकारः प्रभवन् अप्रतिबद्धेन हेतुना येन । (गमयति तदभिप्रायं तत्प्रतिबन्धं च भावोऽसौ ॥) (रुद्रट,७, ३८) । सूक्ष्मोऽयम् आचार्यदण्डिनः । (काव्यादर्श, २,२४९–२५०) ॥ ३७७ ॥

१W. सामाइ; २W. सामलिज्जइ.

W182 ३७९) महिलासहस्सभरिए तुह हियए सुहय ठाणमलहंती।
दियहं अणन्नयम्मा अंगं तणुयं पि तणुएइ ॥७९॥

W183 ३८०) खणमेत्तं पि न चुक्कइ अणुदियहविइण्णगरुयसंतावा।
पच्छन्नपावसंक व्व सामली मज्झ हियथाहि ॥ ८० ॥

३७८) अविरतस्य। [दूति त्वमेव कुशला कर्कशमृदुकानि जानासि वक्तुम्। कण्डूयितपाण्डुरं यथा न भवति तथा त्वं कुर्वीथाः॥] हे दूइ तुमं चिय कुसला हे दूति त्वमेव कुशला। अन्यच्च, वत्तुं जाणसे वक्तुं जानासि। कीदृशानि। कक्खडमउयाइँ कर्कशमृदुकानि। कंडुइयपंडुरं जह न होइ तह तं कुणिज्जासु कण्डूयितपाण्डुरं यथा न भवति तथा त्वं कुर्वीथाः। यथा काचित् हस्तकलया काये कण्डूयनसुखं संपादयति, न च तं पाण्डिमानमानयति, एवम् असौ त्वया तावदुपलम्भनीयो, यथा न विरज्यते तथा कार्यमित्यर्थः॥ ३७८॥

३७९) माधवशक्तेः। [महिलासहस्रभृते तव हृदये सुभग स्थानमलभमाना। दिवसमनन्यकर्मा अङ्गं तन्वपि तनयति॥] काचित् कस्याश्चित् प्रियतमेऽनुरागं प्रियस्य चान्यासक्तत्वं भङ्ग्याऽभिधातुमिदमाह। हे सुहय सुभग, सा अंगं तणुयं पि तणुएइ सा अङ्गं तनुकमपि तनूकरोति। कीदृशी सा। दियहं अणन्नयम्मा दिवसम् अनन्यकर्मा प्रतिदिनं कार्श्यमानयति इत्यर्थः। किं कुर्वती। तुह हियए ठाणमलहंती तव हृदये स्थानमवकाशम् अलभमाना। कीदृशे हृदये। महिलासहस्सभरिए महिलासहस्रभृते। अत एव तत्र अवकाशमनासादयन्ती तन्वी तनुमपि तनूकरोतीत्यर्थः। दियहं इति कालाध्वनोरत्यन्तसंयोगे इति कर्मत्वम्। उत्प्रेक्षालंकारः॥३७९॥

३८०) नागभट्टस्य। [क्षणमात्रमपि न भ्रश्यति अनुदिवसवितीर्णगुरुसंतापा। प्रच्छन्नपापशङ्केव श्यामला मम हृदयात्॥] सामली मज्झ

१W. सुहअ सा अमाअंती; २W. ण फिट्टइ; ३W. हिअआओ.

W184 ३८१) उन्नम नाह कुविया अवऊहसु किं मुहा पसाएसि।
तुह मन्नुसमुप्पन्नेण मज्झ माणेण वि न कज्जं ॥८१॥[१]

W14 ३८२) घरिणीएँ महाणसकम्मलग्गमसिमइलिएण हत्थेण।
छिक्कं[२] मुहं हसिज्जइ चंदावत्थं गयं पइणा ॥८२॥

हिययाहि खणमित्तं पि न चुक्कइ श्यामाङ्गी मम हृदयात् क्षणमपि न स्खलति, न च्यवते। कीदृशी। अणुदियहविइण्णगरुयसंतावा अनुदिवसं वितीर्णो गुरुकः संतापो व्यथा ययेति सा तथोक्ता। केव। पच्छन्नपावसंक व्व प्रच्छन्नपापशङ्केव। यथा गुप्तकृतदुष्कर्मशङ्का अनुदिनं वितीर्णगुरुसंतापा न हृदयादपसर्पति तथा सा मम श्यामाङ्गीति। तामेव नक्तंदिनं चेतसि चिन्तयामीत्यर्थः। चुक्कइ इति स्खलतीत्यर्थे देशीपदम्। उपमालंकारः ॥३८०॥

३८१) अचलस्य। [उन्नम नाहं कुपिता अवगूहस्व किं मुधा प्रसादयसि। तव समुत्पन्नमन्युना मम मानेनापि न कार्यम् ॥]काचिद् दीनाननं प्रियमनुनयन्तमिदमाह। उन्नम उत्तिष्ठ, नाहं कुविया नाहं कुपिता। अतश्च अवऊहसु उपगूहस्व किं मुहा पसाएसि किं मुधा प्रसादयसि। यतः तुह मन्नुसमुप्पन्नेण मज्झ माणेण वि न कज्जं तवोत्पन्नमन्युना मम मानेनापि न कार्यम्। तव मन्युर्दैन्यं क्रोधो वा येनोत्पद्यते तेन मानेनापि न मे प्रयोजनमस्ति। पूर्वनिपातानियमात् समुत्पन्नशब्दस्य परनिपातः। दयितस्यानुकम्पनं खण्डिताकोपाङ्गम् ॥३८१॥

३८२) हालस्य। [गृहिण्या महानसकर्मलग्नमषीमलिनितेन हस्तेन। स्पृष्टं मुखं हस्यते चन्द्रावस्थां गतं पत्या ॥] घरिणीएँ मुहं पइणा हसिज्जइ गृहिण्या मुखं पत्या हस्यते। कथंभूतं मुखम्। छिक्कं हत्थेण स्पृष्टं हस्तेन। कीदृशेन। महाणसकम्मलग्गमसिमइलिएण महानसकर्मलग्नमषीमलिनितेन। कीदृशं मुखम्। चंदावत्थं गयं चन्द्रावस्थां गतम्। मुखं निस-

१ W अण्णुअ; २ W. छित्तं.

W185 ३८३) दीहुन्हपउरणीसासपर्यलिओ बाहसलिलसिंप्पंतो।
साहेइ सामैसबलो तीए अहरो तुह विँओअं ॥८३॥
W696 ३८४) संकेलिउँ व्व नज्जइ खंडं खंडं कउ व्व पीउ व्व।
वासागमम्मि ⁶पंथो घरहुत्तमणेण पहिएण ॥८४॥

र्गनिर्मलमपि मलिनेन (समलेन) शशिना तुल्यं वर्तते, इति पतिः कान्तामुपहसतीत्यर्थः। प्रतीपं नाम अलंकारः। तस्य लक्षणम्—यत्रानुकम्प्यते सममुपमानेनेति निन्द्यते वापि। उपमेयमति स्तोतुं दुरवस्थमिति प्रतीपं तत् (रुद्रट, ८, ७६) ॥३८२॥

३८३) तस्यैव (हालस्य)। [दीर्घोष्णप्रचुरनिःश्वासप्रकलितो बाष्पसलिलसिच्यमानः। कथयति श्यामशबलस्तस्या अधरस्तव वियोगम् ॥] काचित् कस्याश्चिद दुःखं प्रिये प्रकाशयितुमिदमाह। तीए अहरो तुह विओअं साहेइ तस्या अधरस्तव वियोगं साधयति कथयति। कीदृशः। दीहुन्हपउरणीसासपयलिओ दीर्घोष्णप्रचुरनिःश्वासप्रकलितः। भूयश्च किंभूतः। बाहसलिलसिंप्पंतो बाष्पसलिलसिच्यमानः, अविरतरोदनात्। अत एव सामसबलो श्यामशबलः। सा त्वद्वियोगे बाष्पभरमन्थरं दीर्घोष्णं निःश्वसितीत्यर्थः ॥३८३॥

३८४) भाहसस्य (?भासस्य?)। [संकोचित इव ज्ञायते खण्डशः कृत इव पीत इव। वर्षागमे पन्था गृहाभिमुखमनसा पथिकेन ॥] पहिएण पंथो संकेलिउ व्व नज्जइ पथिकेन पन्थाः संकोचित इव नीयते (?ज्ञायते)। खंडं खंडं कउ व्व खण्डं खण्डं कृत इव पीउ व्व पीत इव लघु लङ्घनात्। कथंभूतेन। घरहुत्तमणेण गृहाभिमुखमनसा। कदा। वासारंभम्मि वर्षागमे। स्वदयितादर्शनोन्मुखेन दूरं दुरतिक्रमोऽपि पन्थाः पथिकेन लघु लङ्घित इत्यर्थः। उत्प्रेक्षालंकारः ॥३८४॥

१W. पअविओ; ४W परिसिन्तो; ३W. सामसबलं व तीइ; ४W. विओए; ५W. संकेल्लिओ व्व णिज्जइ; ६W. मग्गो.

W717 ३८५) अह सुयइ दिन्न[1]पडिवक्खवेयणं पसिढिलेहिँ अंगेहिं।
निव्वत्तियसुरयरसाणुबंधसुहणिब्भरं वहुया ॥८५॥

W186 ३८६) सरए महद्दहाणं अंतो[2]सीयाइँ बाहिरुन्हाइं।
जायाइ कुवियसज्जणहिययसरिच्छाइँ सलिलाइं ॥८६॥

W187 ३८७) अय[3]सस्स किं नु काहं कह वुच्छं कह नु होहिइ इम ति।
पढमु[4]ल्लयसाहसकारियाएँ हिययं थरहरेइ ॥८७॥

३८५) कमलस्य। [असौ स्वपिति दत्तप्रतिपक्षवेदनं प्रशिथिलैरङ्गैः। निर्वर्तितसुरतरसानुबन्धसुखनिर्भरं वधूः ॥] अह वहुया सुयइ असौ वधूः स्वपिति। कथम्। निव्वत्तियसुरयरसाणुबंधसुहणिब्भरं निर्वर्तितसुरतरसानुबन्धसुखनिर्भरम्। कैः। पसिढिलेहिँ अंगेहिं प्रशिथिलैरङ्गैः। कथम्। दिन्नपडिवक्खवेयणं दत्तप्रतिपक्षवेदनं यथा भवति, एवं स्वपितीत्यर्थः। रात्रिजागरसूचकं हि दिवाशयनं सपत्नीनां दुःखाय जायत इति। अह इत्यदसो रूपं त्रिष्वपि लिङ्गेषु तुल्यम्। निद्रा व्यभिचारी भावः। प्रशिथिलताऽनुभावः ॥३८५॥

३८६) सिंहविक्रमस्य। [शरदि महाह्रदानाम् अन्तःशीतानि बहिरुष्णानि। जातानि कुपितसज्जनहृदयसदृशाणि सलिलानि ॥] सरए महद्दहाणं सलिलाइं जायाइँ शरदि महाह्रदानां सलिलानि जातानि। कीदृशानि। अंतोसीयाइँ बाहिरुन्हाइं अन्तःशीतानि बहिरुष्णानि। अतः कथंभूतानि। कुवियसज्जणहिययसरिच्छाइँ कुपितसज्जनहृदयसदृशानि। कुपितसज्जनहृदयानि हि अन्तःशीतलानि बहिरुष्णानीति तीव्राणि भवन्ति। उपमालंकारः ॥३८६॥

३८७) निःकोपस्य। [अयशसः किं नु करिष्यामि कथं वक्ष्यामि कथं नु भविष्यतीदमिति। प्रथमसाहसकारिण्या हृदयं वेपते ॥] हिययं थरहरेइ

१W. दिण्णपडिवक्खवेअणा;
२W. अंतोसिसिराइ; ३W. आअस्स; ४W. पढमुग्गयसाहसआरिआइ.

W706 ३८८) अवसर[1] रुत्तुं चिय निम्मियाइँ मा पुससु मे हयच्छीइं।
दंसणमित्तुम्मइएहिँ जेहिँ[2] सीलं तुह न नायं ॥८८॥

W707 ३८९) रणरणयसुन्नहियओ चिंतंतो विरहदुब्बलं जायं।
आसंघियवसही[3] गामयस्स मज्झेण वोलीणो ॥८९॥

हृदयं थरथरायते। कस्याः। पढमुल्लयसाहसकारियाएँ प्रथमतः साहसकारिण्याः। कथम्। अयसस्स किं नु काहं अयशसः किं नु करिष्यामि किं वुच्छं पृच्छ्यमाना किं वदिष्यामि। कह नु होहिइ इमं ति कथं नु भविष्यत्येतदिति। इति बहुविकल्पैर्वेपते हृदयम्। साहसमिह शीलखण्डनम्॥३८७॥

३८८) शल्लस्य(?शल्यस्य?)। [अवसर रोदितुमेव निर्मिते मा प्रोञ्छय मे हताक्षिणी। दर्शनमात्रोन्मत्ताभ्यां याभ्यां शीलं तव न ज्ञातम्॥] काचित् कृतव्यलीकं सानुनयम् इदमाह। अवसर मा पुससु मे हयच्छीइं अपसर मा मार्जय मे हताक्षिणी। रुत्तुं चिय निम्मियाइँ रोदितुमेव निर्मिते। के ते इत्याह। जेहिँ सीलं तुह न नायं याभ्यां शीलं चरित्रं तव न ज्ञातम्। कीदृशाभ्याम्। दंसणमित्तुम्मइएहिँ दर्शनमात्रादुन्मत्ताभ्याम्। एतदुक्तं भवति। एते हि मम हतनेत्रे त्वत्सौन्दर्यैकदर्शिनी रते (? तव) चलचित्तं न ज्ञातवती, अत एव दुःखं सहेते इति भावः॥३८८॥

३८९) विरलस्य। [रणरणकशून्यहृदयश्चिन्तयन् विरहदुर्बलां जायाम्। संभावितवसतिर्ग्रामस्य मध्येन अतिक्रान्तः।] कश्चित् पथिकः आसंघियवसहो गामयस्स मज्झेण वोलीणो संभाविवसतिः ग्रामस्य मध्येन एव गतः। कथंभूतः। रणरणयसुन्नहियओ रणरणकशून्यहृदयः। किं कुर्वन्। चिंतंतो विरहदुब्बलं जायं चिन्तयन् विरहदुर्बलां जायां, स्वप्रियासंगमसुखलालसतया। अत्र ग्रामे मया वस्तनीयम् इति कृतमपि निश्चयं न स्मृतवानिति भावः॥३८९॥

1W. ओसर; 2W. दिट्ठ'. 3W. अमुणिअणिअवसही सो वोलीणो गाममज्झेण.

W714 ३९०) जं असरणो व्व दड्ढो गामो साहीणबहुजुवाणो वि ।
संभमविसंठुलाणं तं दुच्चरियं तुह थणाणं ॥९०॥

W715 ३९१) सो वि जुवा माणहणो तुमं पि माणस्स असहणा पुत्ति ।
मत्तच्छलेण गम्मउ सुराएँ अवरिं पुससु हत्थे ॥९१॥

W379 ३९२) भंडंतीएँ तणाइं सोत्तुं दिन्नाइँ जाइँ पहियस्स ।
ताइं च्चेय पहाए अज्झा आयड्ढइ रुयंती ॥९२॥

३९०) हालस्य । [यदशरण इव दग्धो ग्रामः स्वाधीनबहुयुवकोऽपि । संभ्रमविसंष्ठुलयोस्तद् दुश्चरितं तव स्तनयोः ॥] तं दुच्चरियं तुह थणाणं तद् दुश्चरितं तव स्तनयोः । कीदृशयोः । संभमविसंठुलाणं संभ्रमविसंष्ठुलयोः । किं तद् इत्याह । जं असरणो व्व गामो दड्ढो यदशरण इव अनाथ इव ग्रामो दग्धः । कीदृशः । । साहीणबहुजुवाणो वि स्वाधीनबहुयुवाऽपि । त्वदीयस्तनावेक्षणाक्षिप्तचक्षुः सन् युवजनो ग्रामदाहमप्युपेक्षितवान् इति स्तनवर्णनपरेयमुक्तिः । संभ्रमः त्वरा । पर्यायोक्तिरलंकारः ॥३९०॥

३९१) सुरतदुर्विदग्धस्य । [सोऽपि युवा मानधनस्त्वमपि मानस्य असहना पुत्रि । मत्तच्छलेन गम्यतां सुराया उपरि प्रोञ्छय हस्तौ ॥] काचित् सखीं संशिक्षयितुमिदमाह । सो वि जुवा माणहणो सोऽपि युवा मानधनः तुमं पि माणस्स असहणा पुत्ति त्वमपि मानस्यासहना पुत्रि । मत्तच्छलेण गम्मउ मत्तापदेशेन गम्यतां, सुराएँ अवरिं पुससु हत्थे सुराया उपरि उत्प्रोञ्छय हस्तौ । मत्ताऽहं किलाऽऽजगामेति तदीयसद्म च्छद्मना गम्यतामिति अञ्चुसुणं (?) अयशोदामम् (?) ॥ ३९१ ॥

३९२) हालस्य । [कलहायमानया तृणानि स्वप्तुं दत्तानि यानि पथिकस्य । तान्येव प्रभाते तरुणी आकर्षति रुदती ॥] तान्येव तृणानि तरुणी आकर्षति चिरं रुदती । कदा । पहाए प्रभाते । कानि तानीत्याह । जाइँ पहियस्स सोत्तुं दिन्नाइँ यानि पथिकस्य शयितुं दत्तानि । कथं-

१W. डड्ढो, २W. जुआणो.

W380 ३९३) वसणम्मि अणुव्विग्गा[1] विहवम्मि अगव्विरा भए धीरा ।
हुंति अभिन्नसहावा समेसु विसमेसु य समत्था[2] ॥९३॥

W381 ३९४) महि[3] केण अज्ज गासे कं पि मणे वल्लहं भरंतेण ।
अम्हं मयणसराहय[4]हिययव्वणफोडणं गीयं ॥९४॥

मूनया तया । भंडंतीए कलहायमानया । एतदुक्तं भवति । । प्रथमं तया कलहायमानया कथं कथमपि प्रस्तराय तृणानि यानि पथिकस्य प्रदत्तानि, तान्येव तदुपभोगसुखामृतमग्ना कृतप्रस्थाने पथिके सति रुदती संचिनोति इति । भंडंती कलहायमाना शपमाना ॥३९२॥

३९३) संवत्सरस्य । [व्यसनेऽनुद्विग्ना विभवेऽगर्वशीला भये धीराः । भवन्ति अभिन्नस्वभावाः समेषु विषमेषु च समर्थाः ॥] अभिन्नसहावा हुंति समत्था अभिन्नस्वभावा भवन्ति समर्थाः । केषु । समेसु विसमेसु य समेषु विषमेषु च । संपत्सु विपत्सु च तुल्यस्वरूपा भवन्ति । कीदृशाः । वसणम्मि अणुव्विग्गा व्यसने अनुद्विग्नाः, विहवम्मि अगव्विरा विभवे सति न गर्वोद्वहनशीलाः, भए धीरा भए समुत्थिते धीरा अविचलितवृत्तयः । अत एव अभिन्नस्वभावा इत्युक्तम् । समुच्चयोऽलंकारः ॥३९३॥

३९४)) मृणालस्य । [सखि केनाद्य प्रभाते कामपि मन्ये (मनसि) वल्लभां स्मरता । अस्माकं मदनशराहतहृदयव्रणस्फोटनं गीतम् ॥] सखि केनाद्य अस्माकं मदनशराहतहृदयव्रणस्फोटनं गीतम् । किं कुर्वता । कं पि मणे वल्लहं भरंतेण कामपि वल्लभां मनसि संस्मरता । तथा कथंचित् करुणं स्वकान्तां संस्मृत्य गीतं यथा चिरप्ररूढान्यपि मम हृदि मदनबाणव्रणानि विदीर्णानीत्यर्थः । गीते हि द्वाविंशतिः श्रुतयः । षड्जर्षभगान्धारमध्यपञ्चमधैवतनिषादाः सप्त स्वराः । तदाश्रितौ ग्रामौ

---

१ W. अणुव्विआ; २ W. सप्पुरिसा; ३ W. अज्ज सहि केण गोसे; ४ W हिअअव्वणप्फोडणं.

W382 ३९५) उट्ठंतमहारंभे थणए दट्ठूण मुद्धवहुयाए ।
ओसिन्नकवोलाए नीससियं पढमघरिणीए ॥९५॥

W383 ३९६) गरुयछुहाउलियस्स वि वल्लह[1]करिणीसुहं भरंतस्स ।
सरसो मुणालकवलो गयस्स हत्थिं[2] च्चिय मिलाणो ॥९६॥

षड्जमध्यमौ ! तद्भवाश्चतुर्दश मूर्छनाः । तदुक्तम् । उत्तरं मन्द्रा रजनी तृतीया चोत्तरायता । चतुर्थो शुद्धषड्जा स्यात् पञ्चमी समरीकृता । अस्वकान्ता च षष्ठो स्यात् सप्तमी चाभिरुद्गता । स्वक्रमेण कृता ह्येता मूर्छनाः षड्जतो मताः ॥ सौवीरीयर्षभग्रामहारिणी स्यात्तथैव च । कोपानता तृतीयेति चतुर्थी शुद्धमध्यमा ॥ मार्गी च पौरवी चेति हृष्यकाश्च (? हृद्यकाश्च) यथाक्रमम् । आरोह्यवरोहिस्थायिसंचारिभेदेन वर्णाश्चत्वारस्तदाश्रिताः । प्रसादाद्याः त्रयस्त्रिंशदलंकाराः, एवमन्येऽपि भवन्ति । न चैनेषां मध्यादन्यतमेन हृदयहारिता विवक्षिता, केवलं कारुण्यमेव । विरहिण्याः स्मरशरशताहतहृदयव्रणस्फोटनहेतुरिति हेतुरलंकारः ॥३९४॥

३९५) केशवस्य । [उत्तिष्ठन्महारम्भौ स्तनौ दृष्ट्वा मुग्धवध्वाः । अवस्विन्नकपोलया निःश्वसितं प्रथमगृहिण्या ॥] नीससियं पढमघरिणीए निःश्वसितं प्रथमगृहिण्या । किंभूतया । ओसिन्नकवोलाए अवस्विन्नकपोलया । किं कृत्वा । थणए दट्ठूण स्तनौ दृष्ट्वा । कस्याः । मुद्धवहुयाए मुग्धवध्वाः । कीदृशौ स्तनौ दृष्ट्वा । उट्ठंतमहारंभे उत्तिष्ठन्महारम्भौ । उत्तिष्ठन्तौ च तौ महारम्भौ च इति कर्मधारयः । अनया किल ईदृशेन स्तनभरगौरवगुणेन सौभाग्यभाजिन्या भवितव्यम् इति भयेन स्वेदोदकार्द्रकपोला प्रथमजाया जातेति । अत्र विषादो व्यभिचारी भावः । तस्य महारम्भमुग्धवधूपयोधरदर्शनम् आलम्बनविभावः । निःश्वसितम् अनुभावः ॥३९५॥

३९६) शिलोन्ध्रस्य । [गुरुक्षुधाकुलितस्यापि वल्लभकरिणीसुखं स्मरतः । सरसो मृणालकवलो गजस्य हस्त एव म्लानः ॥] सरसो

---

[1] W. ०करिणीमुहं, [2] W. हत्थ च्चिअ.

W384 ३९७) पसिय पिए, का कुविया ? सुयणु तुमं, परजणम्मि को कोवो ?
को ये परो ? नाह तुमं, कीस ? अउण्णाण मे सत्ती ॥९७॥

W 385 ३९८) एहिसि तुमं ति वॅरिसं व जग्गियं जामिणीऍ पढमद्धं ।
सेसं संतावपरव्वसाऍ कॅप्पं व वोलीणं ॥९८॥

मुणालकवलो गयस्स हत्थि च्चिय मिलाणो सरसो मृणालकवलो गजस्य हस्त एव म्लानः । कथंभूतस्य । गरुयछुहाउलियस्स वि गुरुक्षुधाकुलितस्यापि । कथं तर्हि मृणालकवलस्य म्लानता इत्याह । वल्लहकरिणीसुहं भरंतस्स वल्लभकरिणीसुखं स्मरतः, तदेकतानमानसस्य करिणः करार्पितमपि काण्ड-कवलं क्षुधा बाध्यमानस्यापि विस्मृतमित्यर्थः । अन्योक्तिरलंकारः॥३९६॥

३९७) मत्तगजेन्द्रस्य । [प्रसीद प्रिये, का कुपिता ? सुतनु त्वं, परजने कः कोपः । कश्च परः ? नाथ त्वम्, कस्मात् ? अपुण्यानां मे शक्तिः॥] पसिय पिए प्रसीद प्रिये, का कुविया का कुपिता यां त्वं प्रसादयसि ? सुयणु तुमं सुतनु त्वं कुपिता । परजणम्मि को कोवो परजने कः कोपः ? को य परो कश्च परः ? नाह तुमं नाथ त्वं परः । कीस कस्मात् ? अउण्णाण मे सत्ता अपुण्यानां मे शक्तिः । यत् त्वम् आत्मीयोऽपि सन् परः संजातः तदिदं पूर्वोपार्जितानां ममापुण्यानां सामर्थ्यम् इति । .... व्यङ्ग्या ईर्ष्या व्यभिचारी भावः । वैदर्भीरीतिप्रायेयं गाथा । एतत् प्रश्नोत्तररूपं वाकोवाक्यम् अलंकारविदो वदन्ति ॥३९७॥

३९८) कुविदस्य (? कुविन्दस्य)।[एष्यसि त्वमिति वर्षमिव जागरितं यामिन्याः प्रथमार्धम् । शेषं सन्तापपरवशायाः कल्प इवातिक्रान्तम् ॥] काचित् प्रियतममुपालभमाना इदमाह । एहिसि तुमं ति वरिसं व जग्गियं जामिणोऍ पढमद्धं एष्यसि त्वमिति वर्षमिव जागरितं यामिन्याः प्रथमार्धम् । सेसं संतावपरव्वसाऍ कप्पं व वोलीणं शेषं तु द्वितीयं यामिन्या अर्धं मम कल्पवदतिक्रान्तम् । उत्कण्ठिता नायिका । नैवागतः समुचितेऽपि हि

१ W. हु, २ W. णिमिसं व. ३ W. वरिसं व.

W 386 ३९९) अवलंबह मा संकह नेसा गहलंघिया परिब्भमइ ।
अत्थक्कगज्जिउब्भंतहित्थहियया पहियजाया ।।९९।।

W 387 ४००) केसररयबिच्छड्डे कुसुंमरसो होइ जित्तिओ कमले ।
जइ भमर तित्तिओ अन्नहिं पि ता सोहसि भमंतो ।।१००।।

पंचमं सयं

W388 ४०१) [3]जोयंति अणिमिसच्छा पहिया हलियस्स पिट्ठपंडुरियं ।
धूयं दुद्धसमुद्दुच्छलंतलच्छिं पिव घरौओ ।।१।।

वासरेऽस्मिन् प्राणेश्वरो गुरुककार्यवशेन यस्याः । दुर्वारदुःखदहनप्रविदोपिताङ्गीम् उत्कण्ठितां वदति तां विरहे विदग्धः ।।३९८।।

३९९) [अवलम्बध्वं मा शङ्कध्वं नैषा ग्रहलङ्घिता परिभ्राम्यति । अनवरतगर्जितोद्भ्रान्तत्रस्तहृदया पथिकजाया ।।] अवलंबह मा संकह अवलम्बध्वं मा शङ्कध्वं नेसा गहलंघिया परिब्भमइ नैषा ग्रहलङ्घिता परिभ्रमति । का तर्हि इयम् इत्याह । पहियजाया । कीदृशी । अत्थक्कगज्जिउब्भंतहित्थहियया अनवरतगर्जितोद्भ्रान्तत्रस्तहृदया । वर्षास्वपि न मम प्रियः प्रत्यावृत्त इत्युद्भ्रान्तचित्तेन नेयमात्मानं परं च वेत्ति इति भावः । अत एव ग्रहगृहीतेति शङ्काकलितचित्ता मा मुधा मुह्यतेति । तत्त्वोपमालंकारः ।।३९९।।

४००) दुर्धस्य । [केसररजःसमूहे कुसुमरसो भवति यावान् कमले । यदि भ्रमर तावान् अन्यत्रापि तत् शोभसे भ्रमन् ।।] गतार्था गथा । विच्छड्डो समूहः । अन्यापदेशाक्षेपाभ्यां संसृष्टिरलंकारः ।।४००।।

इति हालविरचिते गाथाकोशे श्रीभुवनपालवृत्तौ छेकोक्तिविचारलीलायां चतुर्थमेतच्छतं परिसमाप्तम् । मङ्गलं महाश्रीः । श्रीगौतमाय नमः । श्रीमहावीरश्रीवीतरागाय नमः ।

४०१) [पश्यन्ति अनिमिषाक्षाः पथिकाः हालिकस्य पिष्टपाण्डुरिताम् । दुहितरं दुग्धसमुद्रोच्छलल्लक्ष्मीमिव गृहात् ।।] पहिया हलियस्स धूयं जोयंति

१W ण इमा २W. मअरंदी; ३W. पेच्छति, ४W. सअण्हा.

W 389 ४०२) कस्स भरसि त्ति भणिए को मे अत्थि त्ति जंपमाणीए ।
तुह विरह रुयंतीए अम्हे वि रुयाविया तीए ॥ २ ॥

W 390 ४०३) पायवडियं [2]अहन्ने किं दाणि न उट्ठवेसि भत्तारं ।
[3]एवं चिय अवसाणं दूरं पि गयस्स पिम्मस्स ॥ ३ ॥

पथिका हालिकस्य दुहितरं पश्यन्ति । कस्मात् । घराओ गृहात्, निर्यान्तीमिति अध्याहार्यम् । कथंभूताः । अणिमिसच्छा अनिमिषाक्षाः । कथंभूताम् । पिट्ठपंडुरियं पिष्टपाण्डुरिताम् । कामिव । दुद्धसमुद्दुच्छलंतलच्छिं पिव दुग्धसमुद्राद् उच्छलल्लक्ष्मीमिव । पिष्टरजोरुषितत्वाद् दुग्धाब्धिसमुत्थितया लक्ष्म्या सह सादृश्यं सरिकसुतायाः । लक्ष्मीपक्षे अनिमिषाक्षा देवाः । जोयंति अणिमिसच्छा धूयं हलियस्स पिट्ठपंडुरियं । दुध्दोवहीहि एहि य निंति लच्छि पिव घराओ ॥ इति पाठः । उपमापर्यायोक्तिभ्यां संसृष्टिरलंकारः । विस्मयोऽत्र स्थायी भावः । स्याद् विस्मयोऽत्र नो समानुषं (?) मायेन्द्रजालकुहकाद्यैः । निरतिशयशिल्पचित्रादिकर्मनिर्माणनिर्वर्त्यैः ॥ तस्य च वस्तूत्क्षेपैरनिमिषप्रेक्षणैः सरोमाञ्चैः । कार्योऽभिनयो लोचनविस्तारैः साधुवादैश्च ॥ अस्यानुपमरूपमालम्बनविभावः । अनिमिषेक्षणम् अनुभावः ॥४०१॥

४०२) [कस्य स्मरसीति भणिते को मेऽस्तीति जल्पन्त्या । तव विरहे रुदत्या वयमपि रोदितास्तया ॥] काचित् कस्याश्चित् पत्युः पुरतः सनिर्वेदमिदमाह । तव विरहे रुदत्या तया वयमपि रोदिताः । किंभूतया तया । को मे अत्थि त्ति जंपमाणीए को मेऽस्तीति जल्पन्त्या । क्व सति । कस्स भरसि त्ति भणिए कस्य स्मरसीति भणिते । सकरुणं वयं रोदिताः । तद् गत्वाऽसौ त्वया समाश्वास्यतामिति भावः। पर्यायोक्तिरलंकारः ॥ ४०२ ॥

४०३) विरहानलस्य । [पादपतितम् अधन्ये किमिदानीं नोत्थापयसि भर्तारम् । एवमेवावसानं दूरमपि गतस्य प्रेम्णः॥] हे अहन्ने अधन्ये किं दाणि न उट्ठवेसि भत्तारं किमदानीं नोत्थापयसि भर्तारम् । किंभू-

१ W उव्विग्गरोइरीए; २ W अहव्वे; ३ W एअं.

W 750 ४०४) सद्धा मे तुज्झ पियत्तणस्स अहयं तु तं न याणामि ।
दे पसिय तुमं चिय सिक्खवेसु जह ते पिया होमि ॥ ४॥

W 43 ४०५) पायवडिओ न गणिओ पियं भणंतो वि [1]विप्पियं भणिओ ।
वच्चंतो न [2]निरुद्धो भण कस्स कए कओ माणो ॥५॥

तम् । पायवडियं पादपतितम् । यतः एवं चिय अवसाणं दूरं पि गयस्स पिम्मस्स एतदेवावसानं दूरमपि गतस्य प्रेम्णः । प्रणामान्तो मान इत्यर्थः । कलहान्तरिता नायिका । चाटुकारमपि जीवितनाथं कोपनस्य (? पाद-लग्नम् ?) अवधोर्य पुनर्या । तप्यते अनुशयस्स वितानैरुच्यते तु कल-हान्तरिता सा ॥ ४०३ ॥

४०४) ताराभट्टस्य । [श्रद्धा मे तव प्रियत्वस्य, अहं तु तन्न जानामि । प्रार्थये प्रसीद, त्वमेव शिक्षय यथा ते प्रिया भवामि ॥] काचिद् हृदयानुवर्तनेनापि अननुवर्तमानं प्रियं सखेदमिदमाह । सद्धा मे तुज्झ पियत्तणस्स श्रद्धा मे तव प्रियत्वस्य, कथं नाम तव प्रिया भवामीति । अहयं तु तं न याणामि अहं तु तन्न जानामि । दे पसिय तुमं चिय सिक्खवेसु प्रार्थये प्रसीद त्वमेय शिक्षय जइ ते पिया होमि यथा तव प्रिया भवामि । दे इति प्रार्थनायां निपातः ॥ ४०४ ॥

४०५) देंभिलस्य (? दम्भिलस्य ?) [पादपतितो न गणितः प्रियं भणन्नपि विप्रियं गणितः । व्रजन्नपि न निरुद्धः भण कस्य कृते कृतो मानः ॥] पायवडिओ न गणिओ पादपतितो न गणितो नादृतः । प्रियं भणंतो वि विप्पियं भणिओ प्रियं भणन्नपि विप्रियं भणितः परुषाक्षरं गिरा निराकृतः । वच्चंतो न निरुद्धो व्रजन्न निरुद्धो न सिचयाञ्चले धृतः । एवं च कुप्यन्त्या त्वया भण कस्स कए कओ माणो भण कस्य कृते कृतो मानः, इति सखीशिक्षोक्तिः । कलहान्तरिता नायिका ॥ ४०५ ॥

---

१ W अप्पिअं, २ W. वि ण रुद्धो.

W 391 ४०६) तडविणिहियग्गहत्था वारितरंगेसु दोलिरणियंबा ।
सालूरी पडिबिंबे पुरिसायंति व्व पडिहाइ ॥ ६ ॥

W 392 ४०७) सिक्करियमणियदरवेवियाइँ धुयहत्थसिज्जियव्वाइं ।
सिक्खंतु वोद्दहीओ कुसुंभि तुम्हं पसाएण ॥ ७॥

W 393 ४०८) जित्तियमित्ता रच्छा नियंब कह तित्तिओ न जाओ सि।
जहँ छिप्पइ गुरुयणलज्जिओसरंतो वि सो सुहओ ॥८॥

४०६) पालित्तकस्य । [तटविनिहिताग्रहस्ता वारितरङ्गेषु दोलनशीलनितम्बा । मण्डूकी प्रतिबिम्बे पुरुषायमाणेव प्रतिभाति ॥] मण्डूकी पुरुषायमाणेव प्रतिभाति । क्व । पडिबिंबे निजप्रतिबिम्बे । कीदृशी । तडविणिहियग्गहत्था तटविनिहिताग्रहस्ता । भूयश्च कीदृशी । दोलिरणियंबा दोलनशीलनितम्बा । क्व । वारितरंगेसु वारितरङ्गेषु । अत्र लोलकल्लोलान्दोलनक्रमावाञ्चितोदञ्चितनितम्बता भेकभार्यायाः पुरुषायितस्योत्प्रेक्षाबीजम् । सालूरी मण्डूकी । उत्प्रेक्षालंकारः ॥ ४०६ ॥

४०७) हालस्य । [सीत्कृतमणितेषद्वेपितानि स्वेदितव्यहस्तधूतानि । शिक्षन्तां तरुण्यः कुसुम्भि तव प्रसादेन ॥] सिक्खंतु वोद्दहीओ कुसुंभि तुम्हं पसाएण शिक्षन्तां कुमार्यः कुसुम्भि युष्माकं प्रसादेन । किं तदित्याह । सिक्करियमणियदरवेवियाइँ सीत्कृतमणितदरवेपनानि, धुयहत्थसिज्जियव्वाइं पूर्वनिपातानियमात् स्वेदितव्यानि हस्तधूतानि । ताः किल कुसुम्भोच्चयने कण्टककोटिक्षतकरतलाः सीत्कृतादिकं सर्वं कुर्वन्तीति भावः । अतः एवमुच्यते। वोद्दहीओ प्रथमवयसो नायिकाः ॥ ४०७ ॥

४०८) [यावन्मात्रा रथ्या नितम्ब कथं तावान्न जातोऽसि । यथा स्पृश्यते गुरुजनलज्जितापसरन्नपि स सुभगः ॥] गतार्था गाथा । स्त्रीणां पूर्वापरौ कटीभागौ जघननितम्बाख्यौ ॥४०८॥

१ W घोलिर; २ W मुह; ३W सिजिअव्वाइ; ४W कुसुंभ,
५W. जेण छिविज्जइ; ६W. गुरुअणलज्जोसरिओ.

W394 ४०९) मरगयसूईविद्धं व मुत्तियं पियइ आययग्गीवो ।
मोरो पाउसयाले तणग्गलग्गं उययबिंदुं ॥९॥

W397 ४१०) धन्ना ता महिलाओ जाओ[१] पियं सिविणए वि पिच्छंति ।
निद्द च्चिय तेण विणा न एइ को पिच्छए सिविणं ॥१०॥

W399 ४११) मज्झन्हपत्थियस्स वि गिम्हे पहियस्स हरइ संतावं ।
हिययट्ठियजायामुहमियंकजुन्हाजलप्पवहो ॥११॥

४०९) पालित्तकस्य । [मरकतसूचीविद्धमिव मौक्तिकं पिबत्यायतग्रीवः । मयूरः प्रावृट्काले तृणाग्रलग्नम् उदकबिन्दुम् ॥] मोरो तणग्गलग्गं उययबिंदुं पियइ मयूरस्तृणाग्रलग्नम् उदकबिन्दुं पिबति । कीदृशः । आययग्गीवो आयतग्रीवः । कदा । पाउसयाले प्रावृट्काले । किमिव । मरगयसूईविद्धं व मुत्तियं मरकतसूचीविद्धम् इव मौक्तिमम् । मयूरमयूखयोर्वा (वररुचि,१,८) इति मोरशब्दस्य सिद्धिः । उपमालंकारः ॥४०९॥

४१०) वयस्यस्य । [धन्यास्ता महिला याः प्रियं स्वप्नेऽपि प्रेक्षन्ते । निद्रैव तेन विना नैति कः प्रेक्षते स्वप्नम् ॥] धन्ना ता महिलाओ धन्यास्ता महिलाः जाओ पियं सिविणए वि पिच्छंति याः प्रियं स्वप्नेऽपि पश्यन्ति । निद्द च्चिय तेण विणा न एइ निद्रैव तेन विना नैति को पिच्छए सिविणं कः प्रेक्षते स्वप्नम् । अस्माकमधन्यानां स्वप्नेऽपि प्रियो दुर्दर्शो जायत इत्यर्थः । सिविणं इति ईषत्पक्वस्वप्नवेतसव्यजनमृदङ्गाङ्गारेषु (वररुचि,१,३) इत्यत इत्वे सति रूपम् ॥४१०॥

४११) मलयशेखरस्य । [मध्याह्नप्रस्थितस्यापि ग्रीष्मे पथिकस्य हरति संतापम् । हृदयस्थितजायामुखमृगाङ्कज्योत्स्नाजलप्रवाहः ।] पहियस्स हरइ संतावं पथिकस्य हरति संतापम् । किंभूतस्य । मज्झन्हपत्थियस्स वि मध्याह्नप्रस्थितस्यापि । कदा । गिम्हे ग्रीष्मे । कोऽसावित्याह । हिययट्ठियजायामुहमियंकजुन्हाजलप्पवहो हृदयस्थितजायामुखमृगाङ्कज्योत्स्नाजलप्रवाहः । स हि स्वकान्तामुखमृगाङ्कस्मरणसुखामृतमग्नो न घोर-

१W. जा दइअं.

W400 ४१२) भण को न रूसइ च्चिय पत्थिज्जंतो अएसयालम्मि ।
रइवावडा रुयंतं[2] पियं पि पुत्तं सवइ माया ॥१२॥

W401 ४१३) सुप्पउ तइओ वि गओ जामु त्ति सहीउ कीस मं भणह ।
सेहालियाण गंधो न देइ सुत्तुं सुयह तुम्हे ॥१३॥

W396 ४१४) रायविरुद्धं व कहं पहिओ पहियस्स साहइ ससंको[3] ।
जत्तो अंबाण फलं[4] तत्तो दरणिग्गयं किं पि ॥१४॥

मपि घर्मक्रमं गणयतीत्यर्थः । पवहो इति प्रवाहः, यथादिपाठात् (वररुचि १,१०) ह्रस्वत्वम् । हेतुरलंकारः ॥४११॥

४१२) मङ्गलकलशस्य । [भण को न रुष्यत्येव प्रार्थ्यमानोऽदेशकाले । रतिव्यापृता रुदन्तं प्रियमपि पुत्रं शपति माता ।।] भण को न रुष्यत्येव । किं क्रियमाणः । पत्थिज्जंतो अभ्यर्थ्यमानः । किं सर्वदा । नेत्याह । अएसयालम्मि अदेशकाले, अदेशे अकाले च । अमुमेवार्थं समर्थयन्नाह । रइवावडा रुयंतं पियं पि पुत्तं सवइ माया रतिव्यापृता रुदन्तं प्रियमपि पुत्रं शपति माता । सर्वमेव देशकाले सुखावहमित्यर्थः । अर्थान्तरन्यासोऽलंकारः ॥४१२॥

४१३) महोदधेः । [सुप्यतां तृतीयोऽपि गतो याम इति सख्यः कस्मान्मां भणथ । शेफालिकानां गन्धो न ददाति स्वप्तुं, स्वपित यूयम् ॥] हे सहीउ सख्यः सुप्पउ तइओ वि गओ जामु त्ति सुप्यतां तृतीयोऽपि गतो यामः प्रहर इति कीस मं भणह कस्मान्मां भणथ । यत सेहालियाण गंधो न देइ सुत्तुं शेफालिकानां गन्धो न ददाति स्वप्तुं, सुयह तुम्हे स्वपित यूयम् । अनेन शेफालिकापरिमलेन उद्दीपनविभावेन अधिकं मम मनसिजो विजृम्भित इति भावः । हेतुरलंकारः ॥४१३॥

४१४) नीलस्य । [राजविरुद्धामिव कथां पथिकः पथिकस्य कथयति सशङ्कः । यत आम्राणां फलं तत ईषन्निर्गतं किमपि ॥] पहिओ पहियस्स

१W.जणो, २W. रुवंतं. ३W. ससंकं; ४W. दलं.

W413 ४१५) कह सो न संभरिज्जइ जो मे तह संठियाइँ अंगाइं।
निव्वत्तिए वि सुरए निज्झायइ सुरयरसिउ व्व ॥१५॥

W414 ४१६) वायंतबहलकद्दमघम्मविसूरंतकमढपाढीणं ।
दिट्ठं अदिट्ठउव्वं कालेण तलं तलायस्स ॥१६॥

W415 ४१७) चोरियरयसद्धालुइणि पुत्ति मा भमसु अद्धरत्तम्मि ।
अहिययरं लक्खिज्जसि तमभरिए दीवयसिह व्व ॥१७॥

साहइ पथिकः पथिकस्य कथयति । किं कथयतीत्याह । जत्तो अंबाण फलं यत आम्राणां फलं निर्याति तत्तो दरणिग्गयं किं पि ततः प्रदेशाद् ईषन्निर्गतं किमपि । इति संवृतिमुद्रया माकन्दमञ्जर्युद्गमं कथयति । कीदृशः । ससंको सशङ्कः । कामिव कथयतीत्याह । रायविरुद्धं व कहं राजविरुद्धामिव कथाम् । यथा कश्चिद् राजविरुद्धां कथां सशङ्कं पथिकः पथिकाय कथयति तथा चूतमञ्जरीमित्यर्थः । उपमालंकारः॥४१४॥

४१५) श्रीदत्तस्य । [कथं स न संस्मर्यते यो मे तथा संस्थितान्यङ्गानि । निर्वर्तिते ऽपि सुरते निर्ध्यायति सुरतरसिक इव ।।] गतार्था गाथा । संभरिज्जइ संस्मर्यते । निज्झायइ पश्यति । अनुरागसूचनम् ॥ ४१५ ॥

४१६) तस्यैव (श्रीदत्तस्य) । [शुष्यद्बहलकर्दमघर्मखिद्यमानकमठपाठीनम् । दृष्टमदृष्टपूर्वं कालेन तलं तडागस्य ।।] दिट्ठं अदिट्ठउव्वं कालेण तलं तलायस्स दृष्टम् अदृष्टपूर्वं कालेन कालवशेन तलं तडागस्य । कीदृशं तत् । वायंतबहलकद्दमघम्मविसूरंतकमढपाढीणं शुष्यद्बहलकर्दमं घर्मखिद्यमानकमठपाठीनम् इति कर्मधारयः । यः किल समस्तसंपत्संपन्नः कालेन विभवभ्रंशाद् विसंष्ठुलविलपद्बन्धुवर्गो भवति सोऽनया भङ्ग्याभिधीयत इत्यन्यापदेशोऽलंकारः । वायंतं शुष्यत् । कमठाः कच्छपाः । पाठीना मीनविशेषाः ॥४१६॥

४१७) स्वभावस्य । [चौर्यरतश्रद्धालुके पुत्रि मा भ्रमार्धरात्रे । अधिकतरं लक्ष्यसे तमोभृते दीपकशिखेव ।।] काचित् स्वदेहकान्तिद्यो-

१W. सुक्खंत २W. अइट्ठउव्वं. ३W. सद्धालुणि; ४W. मा पुत्ति भम्मसु अंधआरम्मि.

W416 ४१८) वाहित्ता पडिवयणं न देइ रूसेइ इक्कमिक्कस्स ।
अज्झा कज्जेण विणा पलिप्पमाणे नईकच्छे ॥१८॥

W417 ४१९) आम असइ म्ह उवरम, पइव्वयाणं पि मइलियं गुत्तं ।
किं पुण जणस्स जाय व्व चंडिलं ता न कामेमो ॥१९॥

तितदिङ्मुखी निशाभिसारिका कयाचिद् एवमुच्यते । हे पुत्ति पुत्रि चोरियरयसद्धालुइणि चौर्यरतश्रद्धालुके, मा भमसु अद्धरत्तम्मि मा भ्रमार्धरात्रे । कीदृशे । तमभरिए तमोभृते । यतो हि अहिययरं लक्खिज्जसि अधिकतरं लक्ष्यसे । केव । दीवयसिह व्व दीपकशिखेव । कायकान्तिव्यावर्णनपरेयमुक्तिः । आक्षेपपर्यायोक्तिभ्यां संसृष्टिरलंकारः ॥४१७॥

४१८) ब्रह्मदत्तस्य । [व्याहृता प्रतिवचनं न ददाति रुष्यत्येकैकस्य । तरुणी कार्येण विना प्रदीप्यमाने नदीकच्छे ॥] अज्झा तरुणी वाहित्ता पडिवयणं न देइ व्याहृता नोत्तरं प्रतिसंधत्ते । रूसेइ इक्कमिक्कस्स रुष्यति ऐकैकस्य । कदाचित् कोपकारणं स्याद् इत्याह । कज्जेण विणा परपरिभवादिना कार्येण विना । पलिप्पमाणे नईकच्छे प्रदीप्यमाने नदीकच्छे । अत्र कार्यं संबद्धकारणविरहाद असंबद्धमपि कारणं कल्पयति । तदत्र स्वसंकेतभवनभङ्गो वृथाकोपकारणं कुलटायाः, तस्य च ज्ञापको नदीतटदावपावकः पलिप्पमाणे नईकच्छे इति वचनादवसीयत इति । भावोऽलंकारः । अज्झा प्रौढयुवतिः । अत्र क्रोधो व्यभिचारी भावः । तस्य नदीकच्छात् निरालम्बनभावेन व्याहारोऽनुभावः । परस्त्री इयम् ॥४१८॥

४१९) रोलदेवस्य । [सत्यमसत्यो वयम्, उपरम, पतिव्रतानामपि मलिनितं गोत्रम् । किं पुनर्जनस्य जायेव नापितं तावन्न कामयामहे ॥] काचिद् अभिसरन्ती असती स्वदोषेण परिह्रियमाणा कंचित् प्रत्याह । आम असइ म्ह उवरम । आम इति संप्रतिपत्तौ । सत्यं स्वैरिण्यो वयम् । तस्मादुपरम, अस्माभिः समं संगमो न कार्यः । किं च पइ-

१W. असई; २W. ओसर पइव्वए ण तुह मइलिअं गोत्तं.

W419 ४२०) बालय तुमाइ दिन्नं कण्णे काऊण बोरसंघाडिं ।
लज्जालुइणी वेहुया घरं गया गामरच्छाओ ।।२०।।

W420 ४२१) अह सो विलक्खहियओ मए अहव्वाएँ अगहियाणुणओ ।
परवज्जणच्चिरीहिं तुम्हेहिँ उविक्खिओ जंतो ।।२१।।

त्वय णं पि मइलियं गुत्तं पतिव्रतानामपि मलिनितं गोत्रम् । याऽपि त्वया सतीत्वेन स्वभार्या प्रतिष्ठापिता साप्यसतीत्यर्थः । पुनरक्षममाणा आह । किं पुण जणस्स जाय व्व चंडिलं ता न कामेमो किं पुनर्जनजायेव नापितं तावन्न कामयामहे । त्वद्भार्या साऽपि तेन नापितेन सह तिष्ठतीत्यर्थः । जाया भार्या । चंडिलो नापितः ॥४१९॥

४२०) देवदेवस्य । [बालक त्वया दत्तां कर्णे कृत्वा बदरसंघाटिकाम् । लज्जावती वधूर्गृहं गता ग्रामरथ्यायाः ॥] हे बालय बालक, गामरच्छाओ वहुया घरं गया ग्रामरथ्याया वधूर्गृहं गता । किं कृत्वा । तुमाइ दिन्नं बोरसंघाडिं कण्णे काऊण त्वया दत्तां बदरसंघाटिकां कर्णे कृत्वा । कीदृशी । लज्जालुइणी लज्जावती । अत एव गृहं गता । सा हि त्वया दत्तेति तां न परिहर्तुं पारयति, नापि लोकलज्जया तत्रैव स्थातुं शक्नोति । अत्र व्रीडा व्यभिचारी भावः । प्रथमानुरागे गाथेयम् । उदरबदर्याद् बदरास्वामिनि (?) । बोरं बदरम् । बोरसंघाडी एकनाललग्नं बदरद्वयम् । ॥४२०॥

४२१) भुजङ्गस्य । [अथ स विलक्षहृदयो मयाऽभव्ययाऽगृहीतानुनयः । परावद्यनर्तनशीलाभिर्युष्माभिरुपेक्षितो निर्यन् ॥] काचित् कलहान्तरिता पादपतितमपि प्रियतममवधीर्य पश्चात्तापदहनदह्यमानमानसा सखीः सखेदमिदमाह । अह सो अथासौ मद्भर्ता तुम्हेहिँ युष्माभिरपि जंतो निर्यन् गृहाद् गच्छन् उविक्खिओ उपेक्षितः । किंभूतः । मए अहव्वाएँ अगहियाणुणओ मया अभव्यया अगृहीतानुनयः । अत एव विलक्खहियओ विलक्षहृदयः । कीदृशीभिर्भवतीभिः । परवज्जणच्चिरीहिं परस्य अवद्येन हर्षेण नर्तनशीलाभिः । इदं परितपनं नाम चेष्टालंकारः । तस्य लक्ष-

१W. वि वहू; २W. गामरच्छाए; ३W. णिंतो.

W421 ४२२) [1]दीसंत नयणसुहओ [2]निव्वुइजणणो करेहि वि छिवंतो ।
अब्भत्थिओ न लब्भइ चंदु व्व पिओ कलाणिलओ ॥२२॥

W724 ४२३) तुह [3]दूइकहायण्णणपडिरोहं मा करेहिइ इमं ति ।
[4]उच्छुंप्पेइ व तुरियं तिस्सा कण्णुप्पलं पुलओ ॥२३॥

णम्–बाष्पाकुलनयनयुगं मडमडितनितम्बलग्नकरशाखम् । मातर्भवतु सकामा (?) पुनःपुनःखेदितसखीकम् ॥ आत्माऽऽक्रोशपरायणमाविष्कृतरोषमत्सरोत्कर्षम् । खेदाद् दयितालाभे परितपनमिहोदितं तज्ज्ञैः ॥४२१॥

४२२) [दृश्यमानो नयनसुभगो निर्वृतिजननः कराभ्यां (करैः) अपि स्पृशन् । अभ्यर्थितो (अभ्रस्थितो) न लभ्यते चन्द्र इव प्रियः कलानिलयः ॥] अब्भत्थिओ न लब्भइ पिओ अभ्यर्थितो न लभ्यते प्रियः । कीदृशः । दीसंत नयणसुहओ दृश्यमानो नयनसुभगः । निव्वुइजणणो करेहि वि छिवंतो निर्वृतिजननः कराभ्यामपि स्पृशन् । कलाणिलओ कलानां गीतवादितादीनाम् आलिङ्गनादीनां (कामकलानां) निलयः स्थानम् । क इव न लभ्यत इत्याह । चंदु व्व चन्द्र इव । सोऽपि अब्भत्थिओ अभ्रस्थितो भवति, दृश्यमानो नयनसुखदः, निर्वृतिजननः करैः किरणैरपि स्पृशन्, कलानिलयश्च भवति । यथा चन्द्रो न लभ्यते तथ प्रियोऽपि ति । श्लेषोऽलंकारः ॥४२२॥

४२३) प्रवरराजस्य । [तव दूतीकथाऽऽकर्णनप्रतिरोधं मा करिष्यतीदमिति । उत्क्षिपतीव त्वरितं तस्याः कर्णोत्पलं पुलकः ॥] काचित् कस्यचिन्नायकस्य संदेशाकर्णनकुतूहलिनीत्वं स्वसख्याः प्रज्ञापयितुम् इदमाह । त्वदीयदूत्या या कथा, तस्या आकर्णनप्रतिरोधं मा करिष्यतीदमिति उत्क्षिपतीव तूर्णं तस्याः कर्णोत्पलं पुलकः । तत्कथाऽऽकर्णनकुतूहलत्वरितं, श्रोत्रस्य देशं प्राप्तं सहृदयं कर्णोत्पलम् उत्क्षिपतीव (पुलकः) इति उत्प्रेक्ष्यते । उच्छुप्पेइ उत्क्षिपति । उत्प्रेक्षाऽलंकारः ॥४२३॥

१W. दीसंतो णअणसुहो; २W. णिव्वुइजणओ; ३W. दूईकज्जाअण्णण; ४W. उत्थंघेइ.

W423 ४२४) खणभंगुरेण पिम्मेण माउया दूमिय म्हे इत्ताहे ।
सिविणयणिहिलंभेण व दिट्ठपणट्ठेण लोयम्मि ॥२४॥

W424 ४२५) चावं[1] जइ वि विसुद्धं विच्छुहइ सरो[2] गुणम्मि वि[3] घडंतं[4]।
वंकस्स उज्जुयस्स य संबंधो किं चिरं होइ ॥२५॥

W425 ४२६) पढमं वामणविहिणा पच्छा हु कओ वियंभमाणेण ।
थणजुयलेणं[5] मज्झस्स महुमहेणेव वलिबंधो ॥२६॥

४२४) माधवस्य । [क्षणभङ्गुरेण प्रेम्णा मातर्दूनाः स्म इदानीम् । स्वप्ननिधिलाभेनेव दृष्टप्रणष्टेन लोके ॥] हे माउया मातः, इमिणा पिम्मेण दूमय म्ह अनेन प्रेम्णा दूनाः पीडिताः स्मः । कीदृशेन । खणभंगुरेण क्षणभङ्गुरेण । कीदृशेन केनेव । दिट्ठपणट्ठेण सिविणयणिहिलंभेण व दृष्टप्रणष्टेनेव स्वप्ननिधिलाभेन । क । लोयम्मि लोके । यथा क्षणदृष्टनष्टेन स्वप्ननिधिलाभेन जनो दूयते तथा क्षणक्षयिणा प्रेम्णा वयम् इत्यस्थायित्वं प्रेम्णः प्रतिपादितं भवति । उपमाऽलंकारः ॥४२४॥

४२५) परवल्लस्य (?) । [चापं यद्यपि विशुद्धं त्यजति शरो गुणेऽपि घटमानम् । वक्रस्य ऋजुकस्य च संबन्धः किं चिरं भवति । ॥] चावं जइ वि विसुद्धं चापं यद्यपि विशुद्धं विच्छुहइ सरो तथाऽपि त्यजति शरः । कदाचिन्निर्गुणं तद्भवेदित्याह । गुणम्मि वि घडंतं गुणेऽपि घटमानम् । अमुमेवार्थं समर्थयन्नाह । अथवा वंकस्स उज्जुयस्स य संबंधो किं चिरं होइ वक्रस्य ऋजुकस्य च संबन्धः किं चिरं भवति । कियन्तमेव कालं भवतीत्यर्थः । अर्थान्तरन्यासोऽलंकारः ॥४२५॥

४२६) काञ्चनतुरङ्गस्य । [प्रथमं वामनविधिना पश्चात् खलु कृतो विजृम्भमाणेन । स्तनयुगलेन मध्यस्य मधुमथेनेव वलिबन्धः ॥] थणजुयलेणं मज्झस्स वलिबंधो कओ स्तनयुगलेन मध्यस्य वलिबन्धः कृतः । किंभूतेन । पढमं वामणविहिणा प्रथमं वामनविधिना, पच्छा हु वियंभमाणेण पश्चात् खलु उन्नतिं व्रजता । केनेव । महुमहेणेव मधुमथेनेव पूर्वं

१W. म्हि. २W. चाओ; ३W. सहावसरलं; ४W. सरं; ५W. णिवडंतं; ६W. थणजुअलेण इमीए महुमहणेण व्व.

W427 ४२७) तुंगाण विसेसणिरंतराण सरसवणबद्धसोहाणं ।
कयकज्जाण भडाण व थणाण पडणं पि रमणिज्जं ॥२७॥

W428 ४२८) परिमलियसुहा गरुया अलद्धविवरा सलक्खणाहरणा ।
थणया कव्वालाव व्व कस्स हियए न लग्गंति ॥२८॥

वामनवेषेण तदनु च विजृम्भमाणेन विश्वं व्याप्नुवता बलिबन्धः कृतः, तथाऽनेन (स्तनयुगलेन) इत्यर्थः । एकत्र वलिशब्द उदरलेखावाची, अन्यत्र वैरोचनवचनः । श्लेषोपमाऽलंकारः ॥४२६॥

४२७) स्फुटिकस्य । [तुङ्गानां विशेषनिरन्तराणां सरसव्रणबद्धशोभानाम् । कृतकार्याणां भटानामिव स्तनानां पतनमपि रमणीयम् ॥] स्तनानां पतनमपि रमणीयम् । केषामिव । भडाणं व भटानामिव । स्तनानां तावत् किंभूतानाम् । तुंगाण तुङ्गानाम् उन्नतानाम् । विसेसणिरंतराण विशेषेण निरन्तराणाम् । सरसवणबद्धसोहाणं सरसव्रणैर्नखदशनपदैः बद्धा शोभा यैः, तेषां तथोक्तानाम् । कयकज्जाण कृतं कार्यं युवजनावर्जनलक्षणं यैः तेषां कृतकार्याणाम् । भटानां च कीदृशानाम् । तुङ्गानां महाशयानाम् । विशेषेण निरन्तरा निर्भेदा ये तेषाम् । सरसव्रणैर्निशितशरशक्तिप्रासपट्टिशानां प्रहारैर्बद्धा शोभा येषां तेषाम् । कृतकार्याणां संपादितस्वस्वामिप्रयोजनानाम् । पतनमपि रमणीयमित्यर्थः । श्लेषोपमालंकारः ॥४२७॥

४२८) तस्यैव (स्फुटिकस्य) । [परिमृदितसुखा गुरवो अलब्धविवराः स्व (स) लक्षणाभरणाः । स्तनाः काव्यालापा इव कस्य हृदये न लगन्ति ॥] स्तनाः कस्य हृदये न लगन्ति चित्तं नारोहन्ति । के इव कव्वालाव व्व काव्यालापा इव । स्तनास्तावत् कीदृशाः । परिमलियसुहा परिमर्दितसुखाः परिमर्देनेन सुखदायिन इत्यर्थः । सलक्खणाहरणा स्वकीयं यत् लक्षणं सामुद्रिकोक्तं तदेवाभरणं येषां ते तथोक्ताः । काव्यालापा अपि परिमलितशुभाः (परिमृदितशुभाः) क्षोदक्षमाः, गुरवो गुणान्विताः,

१ W' परिमलणसुहा.

W566 ४२९) गंधं अग्घायंतय पंथकलंबाण, बाहभरियच्छ ।
आसस पहियजुवाणय मा घरिणिमुहं न पिच्छिहिसि ॥२९॥

W567 ४३०) गज्ज महं चिय अवरिं सव्वत्थामेण लोहहिययस्स ।
जलहर लंबालइयं मा रे मारेहिसि वराइं ॥३०॥

अलब्धविवराः अलब्धच्छिद्राः, सलक्षणाभरणाः सालंकाराः । कस्य हृदये न लगन्ति, सर्वेषामेवेत्यर्थः । श्लेषोपमालंकारः ॥४२८॥

४२९) विषग्रन्थेः । [गन्धं जिघ्रन् पथिकदम्बानां, बाष्पभृताक्ष । आश्वसिहि पथिकयुवन् मा गृहिणीमुखं न प्रेक्षिष्यसे ॥] हे पहियजुवाणय पथिकयुवन् । पंथकलंबाण गंधं अग्घायंतय पान्थ (? पथि-) कदम्बानां गन्धं जिघ्रन् । बाहभरियच्छ बाष्पभृताक्ष । आसस आश्वसिहि । मा घरिणिमुहं न पिच्छिहिसि मा गृहिणीमुखं न प्रेक्षसे (? प्रेक्षिष्यसे) । तत् समाश्वसिहि । एष परापतित एव वर्षासमयः, मुधा मा मुह्येत्यर्थः ॥४२९॥

४३०) प्रवरस्य । [गर्ज ममैवोपरि सर्वस्थाम्ना लोभ (लोह) हृदयस्य । जलधर लम्बालकां मा रे मारयिष्यसि वराकीम् ॥] कश्चिद् वर्षास्वप्यप्रत्य वृत्तो घनरवश्रवणान्निजभार्याया अनिष्टं शङ्कमान इदमाह । हे जलहर जलधर, गज्ज महं चिय अवरिं गर्ज ममैवोपरि । कथम् । सव्वत्थामेण सर्वबलेन । कथंभूतस्य मम । लोहहिययस्स लोभहृदयस्य । यो हि बालां विसृज्य धनलाभलालसो देशान्तरम् अवतीर्णः, तस्यैव अन्यायपरस्योपरि सर्वात्मना गर्ज इति आत्माक्रोशेन (? आत्माक्रोशनम्) । लोहहिययस्स लोहहृदयस्य इत्यपि श्लेषच्छाययाऽभिहितं भवति । यः किल लोहहृदयः सोऽभ्रगर्जिताऽऽडम्बरं सोढुं शक्नोतीति तन्ममैवोपरि गर्ज । मा रे मारेहिसि वराइं तां वराकीं मा रे मारयिष्यसि । कीदृशीम् । लंबालइयं लम्बालकाम् । मा तस्याः शिरीषकुसुमसुकुमारमूर्तेरुपरि गर्जेत्यर्थः । थामो बलम् । त्यक्ताङ्गुलीयवलयां लम्बालकवेणिकासमायुक्ताम् । अतिमलिनाम्बरवेषां प्रोषितपतिकां निबध्नीयात् ॥ ४३० ॥

१ W. पिक्ककलंबाण; २ W. आससु; ३ W. उवरिं.

W568 ४३१) पंकमइलेण छीरिक्कधाइणा दिन्नउन्नयवएण ।
आणंदिज्जइ हलिओ पुत्तेण व सालिछित्तेण ॥३१॥
W569 ४३२) कह मे परिणइयाले खलसंगो होहिइ त्ति चिंततो ।
ओणयमुहो ससूओ रुयइ व साली तुसारेहिं ॥३२॥

४३१) कलशचिह्नस्य । [पङ्कमलिनेन क्षीरैकधायिना दत्तोन्नतपयसा (पदेन) । आनन्द्यते हालिकः पुत्रेणेव शालिक्षेत्रेण ॥] हलिओ आणंदिज्जइ सालिछित्तेण शालिक्षेत्रेण हालिक आनन्द्यते । पुत्तेण व पुत्रेणेव । कीदृशेन क्षेत्रेण । पंकमइलेण पङ्कमलिनेन छीरिक्कधाइणा क्षारैकधायिना क्षीरमेकं धातीति (? धयतीति) एवंशालेन । दिन्नउन्नयवएण दत्तम् उन्नतं पयो यस्मिन् । शालिक्षेत्रे हि प्रचुरं पयः प्रवेश्यते । पुत्रेण च कीदृशेन । पङ्कमलिनेन क्षीरैकधायिना क्षीरमेकं धयतीत्येवंशीलेन। दत्तोन्नतपदेन । पुत्रवान् हि उन्नतं पदं प्राप्नोति । अन्ये तु दिन्नजन्नुयवएण इति पठन्ति, व्याचक्षते च दत्तं कृतं जन्नुयवयं पतितमिव प्रत्युत्थापनं (?) यस्य तत् तथोक्तम् । अथवा दत्तं जानुप्रमाणं पयो यस्मिन् इति योज्यम् । तेन शालिक्षेत्रेण । दत्तजानुभ्यां किल शिशुर्भ्राम्यतीति । एवं च पुत्रशालिक्षेत्रयोः साधर्म्यम् । उपमालंकारः ॥४३१॥

४३२) बहुगुणस्य । [कथं मे परिणतिकाले खलसङ्गो भविष्यतीति चिन्तयन् । अवनतमुखः सशूकः (सशोकः) रोदितीव शालिस्तुषारैः॥] रोदितीव शालिः । कैः । तुसारेहिं तुषारैः अवश्यायसलिलैः । किंभूतः । ओणयमुहो अवनतमुखः । भूयश्च कीदृशः । ससूओ सशूकः । किं कुर्वन् रोदितीव । कह मे परिणइयाले खलसंगो होहिइ त्ति चिंततो कथं मे परिणतिकाले खलसङ्गो भविष्यतीति चिन्तयन् । यस्य किल परिणतिकाले वृद्धावस्थायां दुर्जनसङ्गो भावी सोऽवनतमुखः सशोकः शङ्कां वहन् रोदितीति श्लेषच्छाया काऽपि तत्र सहृदयचमत्कारिणी समुल्लसति । एकत्र शूकः किंशारः (किंशारुः), अन्यत्र शोकः अशुभसंक्रमणशङ्का । एकत्र

१W. दिण्णजाणुवडणेण; २W. तुसारेण.

W443 ४३३) कुरुणाहो विय पहिओ दूमिज्जइ[1] माहवस्स मिलिएण ।
भीमेण जहिच्छाए दाहिणवाएण छिप्पंतो ॥ ३३ ॥
W570 ४३४) संझारायत्थइओ[2] दीसइ गयणम्मि पडिवयायंदो ।
रत्तदुऊलंतरिओ नहअणिवाउ[3] व नहसिरीए ॥ ३४ ॥
W433 ४३५) पुसइ खणं धुयइ खणं पप्फोडइ तक्खणं अयाणंती ।
मुद्धवहू थणवट्टे रइयं[4] दइएण नक्खवयं ॥ ३५ ॥

परिणतिः पाककालः, अन्यत्र वयोऽवस्था । एकत्र खलो यत्र निष्पन्नमन्नं नीत्वा निक्षिप्यते, अन्यत्र दुर्जनः। उत्प्रेक्षाश्लेषाभ्यां संसृष्टिरलंकारः ॥४३२॥

४३३) प्रेमराजस्य । [कुरुनाथ इव पथिको दूयते माधवस्य मिलितेन । भीमेन यथेच्छं दक्षिणवातेन (० पादेन) स्पृश्यमानः ॥] पहिओ दूमिज्जइ पथिको दूयते । किं क्रियमाणः । भीमेण दाहिणवाएण जहिच्छाए छिप्पंतो भीमेन भीषणेन दक्षिणवातेन यथेच्छं स्पृश्यमानः । किंभूतेन तेन । माहवस्स मिलिएण माधवस्य वैशाखस्य मिलितेन । क इव । कुरुणाहो विय कुरुनाथ इव । स किल माधवस्य विष्णोर्मिलितेन भीमेन वृकोदरेण दक्षिणपादेन स्पृश्यमानो दूयते स्म, इत्यागमः । श्लेषोपमालंकारः ॥४३३॥

४३४) दोसीरस्य । (सन्ध्यारागस्थगितो दृश्यते गगने प्रतिपच्चन्द्रः । रक्तदुकूलान्तरितो नखकनिपात इव नभःश्रियः ॥) दीसइ गयणम्मि पडिवयायंदो दृश्यते गगने प्रतिपच्चन्द्रः । कीदृशः । संझारायत्थइओ सन्ध्यारागस्थगितः । क इव । रत्तदुऊलंतरिओ नहअणिवाउ व रक्तदुकूलान्तरितो नखनिपात इव । कस्याः । नहसिरीए नभःश्रियः । दुकूलं कौशेयम् । उपमालंकारः ॥ ४३४ ॥

४३५) अर्जुनस्य । (प्रोञ्छति क्षणं प्रक्षालयति क्षणं प्रस्फोटयति तत्क्षणम् अजानती । मुग्धवधूः स्तनपृष्ठे रचितं दयितेन नखपदम् ॥)

1w. दुम्मिज्जइ; 2w. संझाराओत्थइओ; 3w. थणणहलेहो ०व णयवट्टए; 4w.दिण्णं.

W571 ४३६) अइ दिअर किं न पिच्छसि आयासं किं मुहा पलोएसि ।
जायाएँ बाहुमूलम्मि [1]मुद्धयंदाण रिंछोलिं ॥ ३६ ॥

W572 ४३७) वायाएँ किं[2] व भणइ कित्तियमित्तं य लिक्खए लेहे ।
तुह विरहे जं दुक्खं तस्स [3]तुयं चेव गहियत्थो ॥३७॥

मुद्धवहू मुग्धवधूः नक्खवयं नखपदं रइयं दइएण थणवट्टे रचितं दयितेन स्तनपृष्ठे । पुसइ खणं परिमार्ष्टि क्षणं, धुयइ खणं धावयति प्रक्षालयति क्षणं, पप्फोडइ तक्खणं प्रस्फोटयति तत्क्षणम् । कीदृशी । अयाणंती अजानती । सुरतसमये नखक्षतानि दीयन्त इति नासौ जानातीत्यर्थः । मुग्धा नायिका । तदाधारा जातिरलंकारः । शिशुमुग्धयुवतिकातरतिर्यक्संभ्रान्तहीनपात्राणाम् । सा कालावस्थोचितचेष्टासु विशेषतो रम्या (रूद्रट, ७,३१) ॥ ४३५ ॥

४३६) कुमारदेवस्य । अयि देवर किं न प्रेक्षसे, आकाशं किं मुधा प्रलोकयसि । जायाया बाहुमूले मुग्धचन्द्राणां पङ्क्तिम् ॥) काचिद् द्वितीयेन्दुदर्शनकुतूहलिनं देवरं सपरिहासमिदमाह । अइ दियर जायाएँ बाहुमूलम्मि अयि देवर जायाया बाहुमूले मुद्धयंदाण रिंछोलिं मुग्धचन्द्राणां मालां किं न पिच्छसि किं न प्रेक्षसे । आयासं किं मुहा पलोएसि आकाशं किं मुधा प्रलोकयसि । किम् एकेनामुना द्वितीयाचन्द्रेण । नन्वेतां स्वकान्ताकक्षान्तरे अर्धचन्द्रावलिं विलोकयेति । रिंछोली पङ्क्तिः ॥४३६॥

४३७) अर्जुनस्य । [वाचा किं वा (किमिव) भण्यते कियन्मात्रं च लिख्यते लेखे । तव विरहे यद् दुःखं तस्य त्वमेव गृहीतार्थः ॥) वायाएँ किं व भणइ वाचा किमिव भण्यते, कित्तियमित्तं य लिक्खए लेहे कियन्मात्रं च लिख्यते लेखे । तुह विरहे जं दुक्खं तव विरहे यद् दुःखं भवति, तस्स तुयं चेव गहियत्थो तस्य त्वमेव गृहीतार्थः । त्वं मम हृदये वससीत्यर्थः । मयि विरहवेदनां कथं न जानासीति भावः ॥४३७॥

1w. अद्धअंदाण परिवाडिं; 2w. वाआइ किं भणिज्जइ; 3w तुअं चेअ.

W452 ४३८) कह सा सोहग्गगुणं मए समं वहइ निग्घिण तुमम्मि ।
जाए हरिज्जइ नामं [1]हरिऊणं दिज्जए मज्झ ॥ ३८॥

W 442 ४३९) नियपक्खारोवियदेहभारणिउणं रसं लहंतेण ।
वि[2]यसाविज्जइ पिज्जइ कुंद[3]क्कलिया महुयरेण ॥३९॥

W 444 ४४०) जाव न कोसवियासं पावइ ईसं[4] वि मालईमउलं[5] ।
आरु[6]हणपाणलोहिल्ल भमर ताव च्चिय मलेसि ॥४०॥

४३८) तस्यैव (i.e. अर्जुनस्य) । (कथं सा सौभाग्यगुणं मया समं वहति निर्घृण त्वयि । यस्या ह्रियते नाम हृत्वा च दीयते मम ॥) गतार्था गोत्रस्खलने गाथा ॥ ४३८ ॥

४३९) कुन्ददन्तस्य । [निजपक्षारोपितदेहभारनिपुणं रसं लभमानेन । विकास्यते पीयते कुन्दकलिका मधुकरेण ॥] वियसाविज्जइ कुंदक्कलिया महुयरेण मधुकरेण कुन्दकलिका विकासं नीयते । कथंभूतेन मधुकरेण । नियपक्खारोवियदेहभारणिउणं रसं लहंतेण निजपक्षारोपितदेहभारनिपुणं रसं लभमानेन । अनया भङ्गभणित्या यो मुग्धवधूं निजकलाकौशलेन रमते (? रमयति) न च तामायासयति स एवमुच्यते । अन्यापदेशोऽलंकारः ॥४३९॥

४४०) उत्तस्य (?) । [यावन्न कोशविकासं प्राप्नोतीषदपि मालतीमुकुलम् । आरोहणपानलोभाविष्ट भ्रमर तावदेव मृद्नासि ॥] हे आरुहणपाणलोहिल्ल महुयर आरोहणपानलोभिक मधुकर, जाव न कोसवियासं पावइ ईसं पि मालईमउलं यावन्न कोशविकासम् ईषदपि मालतीमुकुलं प्राप्नोति, ताव च्चिय मलेसि गृह्णासि (? मृद्नासि) इति । कान्तामन्यां मृगयसीत्यर्थः । अनया भङ्गभणित्या यो अप्राप्तयौवनामङ्गनां रिरमिषति

१W. हरिऊण अ; २W. विअसाविऊण; ३W. मालईकलिआ;
४W. ईसीसि; ५W. मालईकलिआ; ६W. मअरंदपाणलोहिल्ल.

W 753 ४४६) कत्तो कमलाण रई कत्तो कुमुयाण सेहयरो चंदो ।
तह सज्जणाण नेहो न चलइ दूरट्ठियाणं पि ॥४६॥
W 494 ४४७) रोयंति व ओ रण्णे दिणयरकरणियरफरुससंतत्ता ।
अइतारझीरुविरुएहिँ पायवा गिम्हमज्झन्हे ।४७॥
W 446 ४४८) रेहइ वियलंबरकेसहत्थकोंडलल्लुलंतहारलया ।
अद्धुप्पइया विज्जाहरि व्व पुरिसाइरी बाला ॥४८॥
W 496 ४४९) गुत्तक्खलणं सोऊण पिययमे अज्ज मामि छणदियहे ।
वज्झमहिसस्स माल व्व मंडणं से न पडिहाइ ॥४९॥

४४६) गोज्जस्य (?गार्ग्यस्य)। [कुतः कमलानां रविः कुतः कुमुदानां सहचरश्चन्द्रः । तथा सज्जनानां स्नेहो न चलति दूरस्थितानामपि ॥] गतार्था गाथा । दृष्टान्तालंकारः ॥४४६॥

४४७) वामनस्य । [रुदन्तीव ओ अरण्ये दिनकरकरनिकरपरुषसंतप्ताः । अतितारझिल्लीकाविरुतैः पादपा ग्रीष्ममध्याह्ने ।] ओ रण्णे पायवा रोयंति व अरण्ये पादपा रुदन्तीव । कैः । अइतारझीरुविरुएहिँ अतितारझिल्लीविरुतैः । कीदृशाः पादपाः । दिणयरकरणियरफरुससंतत्ता परुषरविकरनिकरसंतप्ताः । कदा । गिम्हमज्झन्हे ग्रीष्ममध्याह्ने । पूर्वनिपातानियमात् परुषशब्दस्य परनिपातः । झीरू झिल्लीका । ओ इति सूचनायाम् । उत्प्रेक्षालंकारः ॥४४७॥

४४८) हालस्य । [शोभते विगलदम्बरकेशहस्तकुण्डलुलुलद्धारलता । अर्धोत्पतिता विद्याधरीव पुरुषायमाणा बाला ।] गतार्था गाथा ॥४४८॥

४४९) देवस्य । [गोत्रस्खलनं श्रुत्वा प्रियतमेऽद्य सखि क्षणदिवसे । वध्यमहिषस्य मालेव मण्डनं तस्या न प्रतिभाति ।] हे मामि

१W. सीयलो; २W. रोवंति व्व अरण्णे; ३W. दूसहरइकिरणफंससंतत्ता; ४W. 'झिल्लि'; ५W. गलंतकेसक्खलंतकुंडलललंतहारलआ; ६W. तीअ; ७W उअह पडिहाइ.

W497 ४५०) महमहइ मलयवाओ अत्ता वारेह नं घरा निंतिं ।
अंकुल्लपरिमलेण वि जो हु मओ सो मउ च्चेय ॥५०॥

W449 ४५१) गामणिणो सव्वासु वि पियासु अनुमरणगहियवेसासु ।
मम्मच्छेएसु वि वल्लहाएँ अवरिं वलइ दिट्ठी ॥५१॥

सखि, अज्ज छणदियहे से मंडणं न पडिहाइ अद्य उत्सवदिवसे तस्या मण्डनं न प्रतिभाति । किं कृत्वा । पियपमे गुत्तक्खलणं सोऊण प्रियतमे सपत्नीनाम श्रुत्वा । किमिव मण्डनम् । वज्झमहिसस्स माळ व्व वध्यमहिषस्य मालेव । यथा वध्यमहिषस्य माला तथा तत् (मण्डनं) तस्या इत्यर्थः ॥४४९॥

४५०) दुर्गस्वामिनः । [गन्धेन प्रसरति मलयवातः पितृष्वसर्वारयतैनां गृहान्निर्यान्तीम् । अङ्कोठपरिमलेनापि यः खलु मृत स मृत एव ॥] हे अत्ता पितृष्वसः, वारेह नं घरा निंतिं वारयतैनां गृहान्निर्यान्तीम् । यतः महमहइ मलयवाओ महमहायते मलयवातः । यदि मलयवातो वाति, किमिति गृहान्निर्यान्ती निवार्यत इत्याह । अंकुल्लपरिमलेण वि जो हु मओ सो मउ च्चेय अङ्कोठपरिमलेनापि यः खलु मृतः स मृत एव । मलयमारुताहृतं वसन्तसमयसूचकम् अङ्कोठकुसुमामोदमाघ्राय सा मा म्रियताम् इति । विरहिणी नायिका । अङ्कोठे ल्लः (वररुचि ,२,२५, हेमचन्द्र, ८,१,२००) इति अंकुल्लशब्दस्य व्युत्पत्तिः ॥४५०॥

४५१) विन्ध्यराजस्य । [ग्रामण्यः सर्वास्वपि प्रियास्वनुमरणगृहीतवेषासु । मर्मच्छेदेष्वपि वल्लभाया उपरि वलते दृष्टिः ॥] गामणिणो ग्रामनायकस्य वल्लहाएँ अवरिं वलइ दिट्ठी तन्मध्याद् वल्लभायां परिवलते दृष्टिः । क्व सति । सव्वासु वि पियासु अणुमरणगहियवेसासु सर्वास्वपि प्रियासु अनुमरणगृहीतवेषासु । मर्मच्छेदवशविवशवपुष्यसौ किमियं मया

१W. अत्ता वारेह मं घरा इंतिं; २W. वल्लहाइ उवरिं.

W450 ४५२) मामि सरिसेक्खराणं अत्थि विसेसो पयंपियव्वाणं ।
नेहमइयाण अन्नो अन्नो उवरोहमइयाणं ॥५२॥

W451 ४५३) हिययाहिंतो पसरंति जाइँ अन्नाइँ ताइँ वयणाइं ।
उवरमसु किं इमेहिं अहरंतरमित्तभणिएहिं ॥५३॥

W453 ४५४) सहि साहसु सब्भावेण पुच्छिमो किं असेसमहिलाणं ।
वड्ढंति करत्थ च्चिय वलया दइए पउत्थम्मि ॥५४॥

समं मरिष्यति न वेति अनुमरणमपि तदीयमेव मृगयत इति भावः ॥४५१॥

४५२) तस्यैव (विन्ध्यराजस्य) । [सखि (मातुलानि वा) सदृशाक्षराणामस्ति विशेषः प्रजल्पितव्यानाम् । स्नेहमयानामन्यो अन्य उपरोधमयानाम् ॥] स्नेहमयानामन्यो विशेषो अन्यश्चोपरोधमयानाम् उपरोधकानामिति वा । तान्येवाक्षराणि स्नेहेनोच्यमानानि मनसि निर्वृतिं जनयन्ति, उपरोधाभिधानेन उद्वेगाय जायन्त इत्यर्थः । मामिशब्दः सखीमातुलान्योः प्रसिद्धः ॥४५२॥

४५३) तस्यैव (विन्ध्यराजस्य) । [हृदयात् प्रसरन्ति यानि, अन्यानि तानि वचनानि । उपरम किमेभिरधरान्तरमात्रभणितैः॥] काचित् कपटचाटुकारं कान्तं प्रति सखेदमिदमाह । उवरमसु किं इमेहिं उपरम किमेभिः अहरंतरमित्तभणिएहिं अधरान्तरमात्रभणितैः । यतः हिययाहिंतो पसरंति जाइँ हृदयात् प्रसरन्ति यानि, अन्नाइँ ताइँ वयणाइं अन्यानि तानि वचनानि । इमानि पुनरन्यान्येवेति सद्भावरहितानि कृत्रिमाणीति भावः ॥४५३॥

४५४) विष्णुनाथस्य । [सखि कथय सद्भावेन पृच्छामः किमशेषमहिलानाम् । वर्धन्ते करस्थान्येव वलयानि दयिते प्रोषिते ॥] काचिन्मुग्धा प्रियविरहकृतकायकार्श्येन करमूलप्रस्खलद्वलया सखीमिदमाह ।

१W. सरिसक्खराण वि २W. ओसरसु.

W454 ४५५) भमइ परित्तो जूरइ उक्खिविउं से करं पसारेइ ।
करिणो पंकक्खुत्तस्स नेहणियलाविया करिणी ॥५५॥

W455 ४५६) रइकेलिहियणियंसणकरकिसलयरुद्धणयणजुयलस्स ।
रुद्दस्स तइयणयणं गोरीपरिचुंबियं जयइ ॥५६॥

सहि साहसु सखि कथय सब्भावेण पुच्छिमो सद्भावेन पृच्छामः, किं असेसमहिलाणं वड्ढंति करत्थ च्चिय वर्धन्ते करस्थिता एव वलया दइए पउत्थम्मि वलयानि दयिते प्रोषिते सतीति । साहियं कथितम् ॥४५४॥

४५५)श्रीकर्णराजस्य । [भ्रमति परितः, खिद्यते, उत्क्षिप्य तस्य करं प्रसारयति । करिणः पङ्कमग्नस्य स्नेहनिगडिता करिणी ॥] करिणी परित्तो भमइ हस्तिनी परितो भ्राम्यति । कस्य । करिणो करिणः । कीदृशस्य । पंकक्खुत्तस्स कर्दममग्नस्य । किमेतावदेव, नेत्याह । जूरइ खिद्यते । उक्खिविउं करं पसारेइ उत्क्षिप्य करं प्रसारयति । कीदृशी करिणी । नेहणियलाविया स्नेहनिगडाकलिता । कथं नामायम् उद्ध्रियेतेति तात्पर्याकुला करिणी । नेहणियलाविया स्नेहनिगडाकलिता करिणी सर्वमेवं करोतीति । जातिरलंकारः । परित्तो इति द्वित्वादनुस्वारः (?) । से इति कर्मणि षष्ठी प्राकृतत्वात् ॥४५५॥

४५६) दुर्गराजस्य । [रतिकेलिहृतनिवसनकरकिसलयरुद्धनयन-युगलस्य । रुद्रस्य तृतीयनयनं गौरीपरिचुम्बितं जयति ॥] रुद्दस्स तइय-णयणं जयइ रुद्रस्य तृतीयनयनं जयति । कीदृशम् । गोरीपरिचुंबियं गौरीपरिचुम्बितम् । किंभूतस्य रुद्रस्य । रइकेलिहियणियंसणकरकिसलय-रुद्धणयणजुयलस्स रतिकेलिहृतनिवसनकरकिसलयरुद्धनयनयुगलस्य । रति-केलिहृतनिवसनतापाणिपल्लवविहितोभयनेत्रोऽपि त्र्यम्बको मा मां तृतीयदृशा द्राक्षीदिति तृतीयनयनचुम्बनमम्बिकायाः । रतिकेलिहृतनिव-सनतयेति ताप्रत्ययो लुप्तो द्रष्टव्यः । "रुद्दस्स तइयणयणं करकिसलयरुद्ध-

१W. परिदो विसूरइ; २W. पव्वइपरिचुंबिअं.

W456 ४५७) धावइ पुरओ पासेसु भमइ दिट्ठीवहम्मि संठाइ ।
नवेलयपहारभीया सा देउरस्स वव्वलगइ ॥५७॥

W457 ४५८) कारिममाणंदवडं भामिज्जंतं वहूए बंधूहिं ।
पिच्छइ कुमरीजारो हासुम्मीसेहिँ अच्छीहिं ॥५८॥

णयणजुयलस्स । रइकेळिहियणियंसणपव्वइपरिचुंबियं जयइ ॥" इति वा पाठः । समाहितमलंकारः । कार्यारम्भे सहायाप्तिर्दैवाद्दैवकृतेह वा । आकस्मिकी बुद्धिपूर्वोभयी वा तत्समाहितम् । (सरस्वतीकण्ठाभरण, ३, ३४) ॥४५६॥

४५७) वसन्तस्य । [धावति पुरतः पार्श्वयोर्भ्राम्यति दृष्टिपथे संतिष्ठते । नवलताप्रहारभीता सा देवरस्य व्यवलगति ॥] देवरो नवलतायुक्त एतां वराकीं प्रहरति यतः, (अतः) धावइ पुरओ द्रवति पुरतः, पासेसु भमइ पार्श्वयोर्भ्राम्यति, दिट्ठीवहम्मि संठाइ दृष्टिपथे संतिष्ठते । नवलताप्रहारभीता । ....करोति, इत्येतस्या मनीषितं क्रियतामिति परिहासोक्तिः । दे इति प्रार्थनायां निपातः । चपलता व्यभिचारी भावः । आत्मप्रकाशनपरा चेष्टा चपलतोच्यते ॥४५७॥

४५८) तस्यैव (वसन्तस्य) । (कृत्रिममान्दपटं भ्राम्यमाणं वध्वा बन्धुभिः । प्रेक्षते कुमारीजारो हासोन्मिश्राभ्यामक्षिभ्याम् ॥] वहूए कारिमं आणंदवडं कुमरीजारो पिच्छइ वध्वाः कृत्रिमम् आनन्दपटं कुमारीजारः प्रेक्षते । कीदृशम् । भामिज्जंतं वहूए बंधूहिं भ्राम्यमाणं बध्वा बन्धुभिः। काभ्यां प्रेक्षते । हासुम्मीसेहिँ अच्छीहिं हासोन्मिश्राभ्यामक्षिभ्याम् । तस्याः प्रथमविप्लुतायाः (?) इयमस्मिन् रक्तेति वृथा रक्तांशुकभ्रमणं हासहेतुः कुमारीजारस्य ॥४५८॥

१W. णवलइकरस्स तुह हलिअउत्त दे पहरसु वराइं; २W. सुहिआहिं.

W458 ४५९) सणियं सणियं मेयणंगुलीऍ मयणवडरोहणणिहेणं ।
बंधेइ धवलवणपट्टयं व वणियाहरे तरुणी ॥५९॥

W459 ४६०) रइविरमलज्जियाओ अप्पत्तणियंसणाओ सहस त्ति ।
ढक्कंति पिययमालिंगणेण जहणं कुलवहुओ ॥६०॥

W460 ४६१) पायडियं सोहग्गं तंबाए सयँलगुट्ठमज्झम्मि ।
दुट्ठवसहस्स सिंगे अच्छिउडं कंडुयंतीए ॥६१॥

४५९) वासुदेवस्य । [शनैः शनैर्मदनाङ्गुल्या मदनपटरोपणनिभेन । बध्नाति धवलव्रणपट्टकमिव व्रणिताधरे तरुणी ॥] तरुणी सणियं सणियं धवलवणपट्टयं बंधेइ तरुणी शनैः शनैर्धवलव्रणपट्टकमिव बध्नाति । क्व । वणियाहरे व्रणिताधरे । केन । मयणवडरोहणणिहेणं मदनपटरोपणनिभेन । कया । मयणंगुलीऍ मदनाङ्गुल्या । अधरलेपनमदनपटो हिमसमये निवेश्यते इति स्त्रीणाम् आचारः । स च मदनपटोऽधरदत्तदन्तव्रणपट्टकत्वेन उत्प्रेक्षित इति । उत्प्रेक्षाऽलंकारः ॥४५९॥

४६०) चुल्लोडकस्य । [रतिविरमलज्जिता अप्राप्तनिवसनाः सहसेति । प्रच्छादयन्ति प्रियतमालिङ्गनेन जघनं कुलवध्वः ॥] ढक्कंति जहणं कुलवहूओ प्रच्छादयन्ति जघनं कुलाङ्गनाः । केन । पिययमालिंगणेण प्रियतमालिङ्गनेन । कथंभूतास्ताः । अप्पत्तणियंसणाओ सहस त्ति अप्राप्तनिवसनाः सहसैव । किंभूताः । रइविरमलज्जियाओ रतिविरमलज्जिताः । अत एव प्रियतमावगूहनेन जघनं प्रच्छादयन्तीति । ढक्कियं आवृतम् । समाहितमलंकारः । तस्य लक्षणम्—कार्यारम्भ इत्यादि (सरस्वतीकण्ठाभरण, ३,३४) ॥४६०॥

४६१) धवलस्य । [प्रकटीकृतं सौभाग्यं धेन्वा सकलगोष्ठमध्ये । दुष्टवृषभस्य शृङ्गे अक्षिपुटं कण्डूयमानया ॥] पायडियं सोहग्गं तंबाए

१W. ललिअंगुलीअ; २W; लाअण; ३W. बंधइ धवलव्वणवट्टअं व. ४W. उअह गोट्ठमज्झम्मि.

W461 ४६२) उय संभमविक्खित्तं रमियव्वयलेहडाएँ सुन्हाए ।
नवरंगयं कुडंगे धयं व दिन्नं अविणयस्स ॥६२॥

W462 ४६३) हत्थप्फंसेण जरग्गवी वि पॅन्हुयइ दोहयगुणेण ।
अवलोइयपन्हुइरिं पुत्तय दुक्खेहि पाविहिसि ॥६३॥

प्रकटीकृतं सौभाग्यं गवा । किं कुर्वत्या । दुट्ठवसहस्स सिंगे अच्छिउडं कंडुयंतीए दुष्टवृषभस्य शृङ्गे अक्षिपुटं कण्डूयमानया । क्व । सयलगुट्ठमज्झम्मि सकलगोष्ठमध्ये । एवं नाम सौभाग्यं यदसौ निरपेक्षम् अक्षिपुटं दुष्टवृषभविषाणकोटौ कण्डूयत इति । तथा गौः ॥४६१॥

४६२) वल्लभस्य । [पश्य संभ्रमनिक्षिप्तं रन्तव्यलम्पटया स्नुषया । नवरक्तकं निकुञ्जे ध्वजमिव दत्तम् अविनयस्य ॥] नवरंगयं कुडंगे उय नवरक्तकं कुटङ्गे पश्य । कीदृशम् । संभमविक्खित्तं संभ्रमविक्षिप्तम् । कया । सुन्हाए स्नुषया । कीदृश्या । रमियव्वयलेहडाएँ रन्तव्यलम्पटया । किंभूतम् । धयं व दिन्नं अविणयस्स ध्वजमिव दत्तम् अविनयस्य । संभ्रमस्त्वरा । नवरंगयं कौसुम्भं वासः । लेहडा लम्पटा । स्नुषा वधूः । कुटो (? कुटङ्गो) गृहम् (? लतागृहम्) । गमनम् (? गहनम्) इत्यन्ये । उत्प्रेक्षालंकारः ॥४६२॥

४६३) रोहायाः । [हस्तस्पर्शेन जरद्गवी अपि प्रस्नौति दोहकगुणेन । अवलोकितप्रस्नवनशीलां पुत्रक दुःखैः प्राप्स्यसि ॥] हे पुत्तय पुत्रक, अवलोइयपन्हुइरिं अवलोकितमात्रेण प्रस्नवनशीलां गां दुक्खेण पाविहिसि कष्टेन लप्स्यसे । यतः हत्थप्फंसेण जरग्गवी वि पन्हुयइ हस्तस्पर्शेन जरद्गवी अपि प्रस्नौति क्षीरं क्षरयति । केन । दोहयगुणेण दोहकगुणेन । अन्यापदेशोऽलंकारः ॥४६३॥

---

१ W. रमिअव्वअलंपडाइ. २ W. पण्हअइ; ३ W. पुण्णेहि.

W463 ४६४) मसिणं चंकम्मंती पए पए कीण कुणइ मुहभंगं ।
नूणं से मेहेलया रमणगयं छिवइ नहपंतिं ॥६४॥
W464 ४६५) संवाहणसुहरसतोसिएण दिंतेण तुह करे लक्खं ।
चलणेण विक्कमाइच्चचरियमणुयत्तियं तिस्सा ॥६५॥
W465 ४६६) पायवडणाण मुद्धे रहसबलामोडिचुंबियव्वाणं ।
दंसणमित्तपसैन्ना चुक्कीं अन्नाण वि सुहाणं ॥६६॥

४६४) तस्या एव (रोड्डायाः) । [मसृणं चङ्क्रम्यमाणा पदे पदे कस्मात् करोति मुखभङ्गम् । नूनं तस्या मेखला रमणगतां स्पृशति नखपङ्क्तिम् ॥] सा नायिका मसिणं चंकम्मंतो मसृणं मन्दं चङ्क्रम्यमाणा कुटिलं क्रामन्ती, पए पए कोस कुणइ मुहभंग पदे पदे किमिति करोति मुखभङ्गम् इति स्वयमाशङ्क्य उत्तरं करोति । नूणं से मेहलया नूनमस्या मेखला रमणगयं छिवइ नहपंतिं रमणगतां नितम्बसङ्गिनीं स्पृशति नखपङ्क्तिम् । चङ्क्रमक्रमप्रसरान् मेखलास्पृष्टनखपङ्क्तिपीडया मसृणं संचरतीत्यर्थः । अनुमानालंकारः ॥४६४॥

४६५) संवरराजस्य । [संवाहनसुखरसतोषितेन ददता तव करे लाक्षाम् (लक्षम्) । चरणेन विक्रमादित्यचरितमनुवृत्तं तस्याः ॥] काचित् प्रियापादाग्रसंवाहनक्रमसंक्रान्तालक्तकरसरागरञ्जिताग्रकरं नायकं निरीक्ष्य सोत्प्रासमिदमाह । चरणेन विक्रमादित्यचरितमनुवर्तितं तस्याः । कीदृशेन चरणेन । तुह करे लक्खं दिंतेण तव करे लाक्षां ददता यावकं संक्रामयता । संवाहणसुहरसतोसिएण संवाहनजनितो यो सुखरसस्तेन तोषितेन । किल विक्रमादित्यो लक्षं प्रयच्छति । श्लेषच्छायया तेन सार्धं साधर्म्यं पादस्येति प्रत्ययोपमालंकारः ॥४६५॥

४६६) हालस्य । [पादपतनानां मुग्धे रभसहठचुम्बितानाम् । दर्शनमात्रप्रसन्ना च्युता अन्येषामपि सुखानाम् ॥] हे मुद्धे मुग्धे, दंसण-

१W. मेहलिआ जहणगअं; २W०चरिअमणुसिक्खिअं. ३W. ०पसण्णे; ४W. चुक्का सि सुहाण बहुआणं.

W466 ४६७) दे सुयणु पसिय इर्न्हि पुणो वि सुलहाइँ रूसियव्वाइं ।
एसा मयच्छि मयलंछणुज्जला गळइ छणराई ॥६७॥

W467 ४६८) आवण्णाइँ कुलाइं दु च्चिय जाणंति उन्नइं नेउं ।
गोरीएँ हिययदइओ अहवा सालाहणणरिंदो ॥६८॥

W468 ४६९) [1]निट्टंकदुरारोहं पुत्तय मा पाडलिं समारुहसु ।
आरूढणिवडिया के इमीएँ न कया [2]इहं गामे ॥६९॥

मित्तपसन्ना सती पायवडणाण रहसबलामोडिचुंबियव्वाणं चुक्का पादपतनेभ्यः, रभसहठचुम्बनेभ्यः च्युता । किमेतावदेव । नेत्याह । अन्नाण वि सुहाणं अन्येभ्योऽपि सुखेभ्यः आलिङ्गनप्रभृतिभ्यश्च्युता, इत्यर्थः । अत एव मुग्धेत्युक्तम् । बलामोडी बलात्कारः । चुक्कं स्खलितम् । पञ्चम्यर्थे षष्ठी ॥४६६॥

४६७) तस्यैव (i. e. हालस्य) । [प्रार्थये सुतनु, प्रसीद इदानीं पुनरपि सुलभानि रोषितव्यानि । एषा मृगाक्षि मृगलाञ्छनोज्ज्वला गलति क्षणरात्रिः ॥] निगदव्याख्यातेयं गाथा ॥४६७॥

४६८) पोट्टिसस्य । [आपन्नानि (आपर्णानि) कुलानि द्वावेव जानीत उन्नतिं नेतुम् । गौर्या हृदयदयितोऽथवा सातवाहननरेन्द्रः ॥] कश्चित् सातवाहनमुपगाथयितुमिदमाह । दो च्चिय जाणंति उन्नइं नेउं द्वावेव जानीत उन्नतिं नेतुम् । कानि । कुलाइं कुलाणि । कौ तावित्याह । गोरीएँ हिययदइओ गौर्या हृदयदयितः शङ्करः । अहवा सालाहणणरिंदो अथवा सातवाहननरेन्द्रः । कथंभूतानि कुलानि । आवण्णाइँ । शिवस्तावद् आपर्णानि गौरीसंबन्धीनि कुलानि उन्नतिं नयति । सातवाहनः पुनरापन्नानि आपदं प्राप्तानि कुलानि उन्नतिं नयतीति । श्लेषोऽलंकारः । अपर्णा गौरी ॥४६८॥

४६९) पृथ्वीनरस्य । [निराधारदुरारोहां पुत्रक मा पाटलां समारोह । आरूढनिपतिताः के अनया न कृता इह ग्रामे ॥] हे पुत्तय पुत्रक,

१W. णिक्खंभ०; २W. हयासाए.

W469 ४७०) गामणिघरम्मि अत्ता इक्क च्चिय पाडला इह ग्गामे ।
बहुपाडलं च सीसं दियरस्स न सुंदरं एयं ॥७०॥

W470 ४७१) अन्नाण वि अत्थि मुहे पम्हलधवलाइँ दीहकसणाइं[१] ।
नयणाइँ सुंदरीणं तह वि हु दट्ठुं न याणंति ॥७१॥

निट्टंकदुरारोहं मा पाडलिं समारुहसु, निराधारतया दुरारोहां मा पाटलां समारोह । किं कारणमित्याह । आरूढाणवडिया के इमीएँ न कया इह ग्गामे आरूढनिपतिताः के अनया न कृता इह ग्रामे । केनचित् कस्यचिद् भङ्ग्या अभिधीयते यथा इयमिति । कुटिलतया नायिका अनुगन्तुं नेतुं (? रन्तुं) न शक्यते । अथ कथंचित् कलाकौशलेनाभिगम्यते तदा कालसहा न भवति । प्रेमप्रकोटिमारोप्य निपातयत्येव । तदुपसर्पग-निषेधपरेयमुक्तिः । आक्षेपापदेशाभ्यां संसृष्टिरलंकारः । निट्टंकं टङ्कच्छिन्नं विषमं च ॥४६९॥

४७०) तस्यैव (पृथ्वीनरस्य) । [ग्रामणीगृहे पितृष्वसर् एकैव पाटला इह ग्रामे । बहुपाटलं च शीर्षं देवरस्य, न सुन्दरमेतत् ॥] काचिद् भ्रातृजायादेवरयोः घुयंतो (?) तमत्तामुखेन विचारयितुम् इदमाह । हे अत्ता पितृष्वसः, गामणिहरम्मि ग्रामनायकनिलये इक्क च्चिय पाडला इह ग्गामे एकैव पाटला इह ग्रामे । बहुपाडलं च सीसं दियरस्स न सुंदरं एयं बहुपाटलं च शीर्षं देवरस्य न सुन्दरमेतत् । एतदुक्तं भवति । अयं हि प्रचुरपाटलीपुष्पशीर्षदर्शनानुमानेन ग्रामणीसुताऽऽसक्त इति केनचिन्नूनं ज्ञास्यते । तन्निवार्यतामिति भावः ॥४७० ॥

४७१) मवलस्य (! धवलस्य) । [अन्यासामपि सन्ति मुखे पक्ष्मलधवलानि दीर्घकृष्णानि । नयनानि सुन्दरीणां तथापि खलु द्रष्टुं न जानन्ति ॥] अन्नाण वि सुंदरीणं नयणाइं मुहे अत्थि अन्यासामपि सुन्दरीणां नयनानि मुखे सन्ति । किंभूतानि । पम्हलधवलाइँ पक्ष्मलधवलानि

१ W. होंति.

W471 ४७२) हंसेहि व मणहरजलयसमयभयचलियविहलवक्खेहिं ।
परिसेसियपउमासेहिं[1] माणसं गम्मइ रिऊहिं ॥७२॥

W472 ४७३) दुग्गयहरम्मि घरिणी रक्खंती आउलत्तणं पइणो ।
पुच्छियदोहलसद्धा पुणो वि उययं चिय कहेइ ॥७३॥

दीहकसणाइं दीर्घकृष्णानि। तह वि हु दट्ठुं न याणंति तथापि खलु द्रष्टुं न जानन्ति। तस्या एव नायिकाया नयने निरीक्षितुं जानीत इति तत्कटाक्षपातप्रशंसापरेयमुक्तिः। पर्यायोक्तिरलंकारः ॥४७१॥

४७२) चुल्लोडकस्य। [हंसैरिव मनोहरजलदसमयभयचलितविह्वलपक्षैः। परिशेषितपद्माशैर्मानसं गम्यते रिपुभिः॥] कश्चिन्नृपतिमुपगाथयितुमिदमाह। रिऊहिं माणसं गम्मइ रिपुभिर्मानसं गम्यते। कीदृशैः। मणहरजलयसमयभयचलियविहलवक्खेहिं मनोहरो योऽसौ जलधरसमयः, तस्य भयेन चलितो विह्वलः पक्षो येषां तैस्तथोक्तैः। भूयश्च कीदृशैः। परिसेसियपउमासेहिं परिशेषिता त्यक्ता पद्माया आशा यैः, तैस्तथोक्तैः। कैरिव। हंसेहि व। हंसैहिं मनोहरजलदसमयभयचलितविह्वलपक्षैः परित्यक्तकमलाशैः, मानसं नाम सरो गम्यत इति। 'दुक्खं हयपोमासेहिं माणसं गम्मइ रिऊहिं' इति पाठः। अत्र पक्षे मानसं दुःखं रिपुभिर्गम्यत इति व्याख्येयम्। श्लेषोऽलंकारः ॥४७२॥

४७३) हालस्य। [दुर्गतगृहे गृहिणी रक्षन्ती आकुलत्वं पत्युः। पृष्टदोहदश्रद्धा पुनरपि उदकमेव कथयति॥] घरिणी गृहिणी पुच्छियदोहलसद्धा उययं चिय कहेइ, तुभ्यं किं रोचत इति पृष्टा सती उदकमेव कथयति। इदं मे रोचत इत्यर्थः। क्व। दुग्गयहरम्मि दरिद्रगृहे। किं कुर्वती। रक्खंती आउलत्तणं पइणो रक्षन्ती आकुलत्वं पत्युः। दुर्लभाभिलाषेण मा खलु अस्मत्पतिराकुलो भूदिति सुलभमेव सलिलं प्रार्थयत इत्यर्थः। स्वीया नायिका ॥४७३॥

---

1 W. ०पोम्मासेहि.

W474 ४७४) के उद्धरिया के इह न खंडिया के न लुत्तगुरुविहवा।
नक्खाइँ कामिणीओ गणणारेहाओ व वहंति ॥७४॥
W473 ४७५) आयंबलोयणाणं उल्लंसुयपायडोरुजहणाणं।
अवरण्हमज्जिरीणं कएण कामो वहइ चावं ॥७५॥
W475 ४७६) विरहेण मंदरेण व हिययं दुद्धोयहिं व महिऊण।
उम्मूलियाइँ अव्वो अम्हं रयणाइँ व सुहाइं ॥७६॥

४७४) इन्द्रस्य। [क उद्धृताः क इह न खण्डिताः के न लुप्तगुरुविभवाः। नखानि कामिन्यो गणनारेखा इव वहन्ति ॥] गतार्था गाथा। उत्प्रेक्षाऽलंकारः ॥४७४॥

४७५) गणमुग्धायाः (? गुणमुग्धायाः)। [आताम्रलोचनानाम् आर्द्रांशुकप्रकटोरुजघनानाम्। अपराह्णस्नानशीलानां कृतेन कामो वहति चापम् ॥] अवरण्हमज्जिरीणं अपराह्णमज्जनशीलानां सीमन्तिनीनां कएण कामो वहइ चावं मन्मथो धनुर्धत्ते तदर्थे। कीदृशीनाम्। आयंबलोयणाणं आताम्रलोचनानाम्। पुनरपि कीदृशीनाम्। उल्लंसुयपायडोरुजहणाणं आर्द्रांशुकप्रकटोरुजघनानाम्। अपराह्णस्नानोन्मीलच्छोभातिशयमनोरमा रामा रमयितुं कामः कार्मुकं करेण कलयति, तासां साहाय्यं कर्तुम्। कामो वहइ चावं इति वा योज्यम्। अत्र पक्षे तद्दर्शनेन सकामाः कामिनो भवन्तीत्यर्थः। जातिरलंकारः ॥४७५॥

४७६) अनङ्गदेवस्य। [विरहेण मन्दरेणेव हृदयं दुग्धोदधिमिव मथित्वा। उन्मूलितान्यहो अस्माकं रत्नानीव सुखानि ॥] अव्वो अम्हं सुहाइं उम्मूलियाइँ अहो अस्माकं सुखान्युन्मूलितानि। कानीव। रयणाइँ व रत्नानीव। केन। विरहेण वियोगेन। केनेव। मंदरेण व मन्दरेणेव। किं कृत्वा। हिययं महिऊण हृदयं मथित्वा। कमिव। दुद्धोयहिं व दुग्धो-

१W. उव्वरिआ; २W. णहराइ; ३W. वेसिणीओ.

W476 ४७७) उज्जुयरएण रूसइ वंकम्मि विडागमं वियप्पेइ।
इत्थ अहव्वाइ मए पिए पियं कह नु कायव्वं ॥७७॥
W754 ४७८) हा हा किं तेण कयं मालइविरहम्मि पुत्ति भसलेण।
कंकिल्लिकुसुममज्झे जलणु त्ति समप्पिओ अप्पा ॥७८॥

दधिमिव। मां प्रियविरहो दुःखाकरोतीति भावः। अनेकेवशब्दा वाक्यार्थोपमाऽलंकारः। वाक्यार्थेनैव वाक्यार्थः कोऽपि यद्युपमीयते। एकानेकेवशब्दत्वात् सा वाक्यार्थोपमा द्विधा॥ (काव्यादर्श, २,४३). विरहिणी नायिका। वागनुभावव्यङ्ग्यो विषादो व्यभिचारी भावः। अव्वो इति दुःखसूचनायां निपातः॥४७६॥

४७७) अन्ध्रलक्ष्म्याः। [ऋजुकरतेन रुष्यति वक्रे विटागमं विकल्पयति। अत्राभव्यया मया प्रिये प्रियं कथं नु कर्तव्यम्॥] इत्थ अहव्वाइ मए अत्राभव्यया मया पिए पियं कह नु कायव्वं प्रिये प्रियं कथं नु कर्तव्यम्। किं कारणमित्याह। उज्जुयरएण रूसइ ऋजुरतेन रुष्यति। विदग्धः खल्वसौ नाविकृतरतेन परितोषमायाति। वंकम्मि विडागमं वियप्पेइ वक्रे विटागमं विकल्पयति। आलिङ्गनचुम्बनादिसकलकलाकलापदर्शने तु विटस्य कस्यचित् संगमं शङ्कते। न चोपायान्तरमस्ति। अत एव कथं मया प्रिये प्रियं कर्तव्यमिति चिन्ता॥४७७॥

४७८) एतस्याः एव (अन्ध्रलक्ष्म्याः)। [हा हा किं तेन कृतं मालतीविरहे पुत्रि भ्रमरेण। अशोककुसुममध्ये ज्वलन इति समर्पित आत्मा॥] मालईविरहम्मि मालतीविरहे पुत्ति तेण भसलेण पुत्रि तेन भ्रमरेण हा हा किं कयं किं कृतम्। किं तद् इत्याह। कंकिल्लिकुसुममज्झे अशोककुसुममध्ये जलणु त्ति समप्पिओ अप्पा ज्वलनोऽयमिति कृत्वा समर्पित आत्मा। मालतीवियोगदुःखार्दितेन द्विरेफेण अशोकस्तबके विभावसुभ्रान्त्या आत्मा निक्षिप्त इत्यर्थः। भ्रान्तिनामाऽलंकारः। मालती जातिः। कंकिल्ली अशोकः॥४७८॥

१W. उज्जुअरए ण तूसइ; २W. वि आगमं.

W477 ४७९) बहुविहविलासभरिए[1] सुरए महिलाण को उवज्झाओ ।
सिक्खइ असिक्खियाइं[2] सव्वो नेहाणुबंधेण ॥७९॥
W478 ४८०) वण्णवसिए विअच्छसि[3] सच्चं चिय सो न सच्चविओ[4] ।
न हु हुंति तम्मि दिट्ठे सत्थावत्थाइँ[5] अंगाइं ॥८०॥

४७९) वामनस्य । [बहुविधविलासभृते सुरते महिलानां क उपाध्यायः । शिक्षतेऽशिक्षितान्यपि सर्वः स्नेहानुबन्धेन ॥] बहुविहविलासभरिए बहुविधैर्विलासैरालिङ्गनचुम्बनादिसकलकलाकलापेन संकुले सुरए महिलाण को उवज्झाओ सुरते महिलानां क उपाध्यायः । न कोऽपीत्यर्थः । कथं तर्हि तज्जानन्तीत्याह । सिक्खइ असिक्खियाइं शिक्षतेऽशिक्षितान्यपि सव्वो नेहाणुबंधेण सर्वः स्नेहानुबन्धेन । नोपदेशमपेक्षत इत्यर्थः । तदुक्तम् । उपदेशं विनाऽप्यर्थकामौ प्रतिजनं मतौ । न धर्मस्तु विना शास्त्रमिति तत्रादृतो भवेत् । अर्थान्तरन्यासोऽलंकारः ॥४७९॥

४८०) सीहालस्य (? सीहलस्य) । [स्वदेशवासिनि विलोक्यसे सत्यमेव स त्वया न दृष्टः । न खलु भवन्ति तस्मिन् दृष्टे स्वस्थावस्थानि अङ्गानि ॥] वण्णवसिए विअच्छसि स्वदेशवासिनि विलोक्यसे यन् मया स दृष्ट इति । सच्चं चिय सो तए न सच्चविओ सत्यमेव स त्वया न दृष्टः । कथं जानासीत्याह । न हु हुंति तम्मि दिट्ठे न खलु भवन्ति तस्मिन् दृष्टे सत्थावत्थाइँ अंगाइ स्वस्थावस्थानि अङ्गानि । तस्मिन्नवलोकिते खलु सस्वेदकम्पपुलकोद्गमजृम्भादिभाञ्जि भवन्ति अङ्गानि । न च त्वं तथा दृश्यसे । तस्मादनुमीयते नासौ त्वया दृष्ट इति । सौभाग्यभङ्ग्याऽभिहितं भवतीति (?) । वण्णवसिया स्वदेशवासिनी । उत्तरानुमानाक्षेपपर्यायोक्तिभिः संकरोऽलंकारः ॥४८०॥

१W. ० रसिए; २W. असिक्खिआइ वि; ३W. विअत्थसि. ४W. संभविओ; ५W. सुत्थावत्थाइ.

W527 ४८१) धूलिमइलो वि पंकंकिओ वि तणरइयसयणदेहो वि ।
नैवर गइंदु च्चिय गरुइमाइ ढक्कं समुव्वहइ ॥८१॥

W528 ४८२) करमरि कीस न गम्मइ, को थामो जेण मसिणगमणा सि ।
अदिट्ठदंतहसिरीएँ जंपियं "चोर जाणिहिसि" ॥८२॥

W529 ४८३) थोरंसुएहिँ रुन्नं सवत्तिवग्गेण पुप्फवइयाए ।
भुयसिहरं पइणो पिच्छिऊण सिरमँग्गतुप्पइयं ॥८३॥

४८१) वराहस्य । [धूलिमलिनोऽपि पङ्काङ्कितोऽपि तृणरचितशयनदेहोऽपि । केवलं गजेन्द्र एव गरिम्णा ढक्कां समुद्वहति ॥] केवलं गजेन्द्र एव गरिम्णा ढक्कां डिण्डिममुद्वहति । कीदृशः । धूलिमइलो वि धूलिमलिनोऽपि, पंकंकिओ वि पङ्काङ्कितोऽपि, तणरइयसयणदेहो वि तृणरचितशयनोऽपि । स एव गरिम्णा ढक्कां समुद्वहति, नान्य इत्यर्थः । तस्यैव ढक्काशोभनभाव इति । अन्यापदेशोऽलंकारः ॥४८१॥

४८२) [बन्दि कस्मान्न गम्यते, किं बलं येन मसृणगमनाऽसि । अदृष्टदन्तहसनशीलया जल्पितं, "चोर ज्ञास्यसि" ॥] हे करमरि बन्दि, कीस न गम्मइ कस्मान्न गम्यते । को थामो जेण मंदगमना सि किं बलं येन मन्दगमनाऽसि । अदिट्ठदंतहसिरीएँ अदृष्टदन्तहसनशीलया जंपियं चोर जणिहिसि जाल्पितं चोर ज्ञास्यसि । मन्दं मन्दं पदन्यासे स्वस्वामिसामर्थ्यं कारणमिति भावः । गर्वो व्यभिचारी भावः । किंचिद्विकसितैर्गण्डैः कटाक्षैः सौष्ठवान्वितैः । अलक्षितद्विजं धीरम् उदात्तानां स्मितं भवेत् ॥(नाट्यशास्त्र, ६,६५) । करमरी बन्दी । थामो बलम् ॥४८२॥

४८३) हर्षस्य । [स्थूलाश्रुभी रुदितं सपत्नीवर्गेण पुष्पवत्याः । भुजशिखरं पत्युः प्रेक्ष्य शिरोमार्गस्निग्धम् ॥] थोरंसुएहिँ रुन्नं स्थूलाश्रुभिः रुदितम् । केन । सवत्तिवग्गेण सपत्नीवर्गेण । किं कृत्वा । पइणो

१W. तणरइयदेहभरणो वि; २W. तह वि गइंदो गरुअत्तणेण; ३W. गव्वो; ४W. अदिट्ठदंतं हसिरीअ; ५W. लग्ग.

W530 ४८४) लोओ जूरइ जूरउ, वयणिज्जं होइ होउ किं नाम ।
एहि नुमज्जसु पासे पुप्फवइ न एइ मे निद्दा ॥८४॥

W531 ४८५) जं जं पुलएमि दिसं पुरओ लिहिउ व्व दीससे तत्तो[1] ।
तुह पडिमापरिवाडिं व वहइ सयलं दिसावलयं[3] ॥८५॥

W727 ४८६) दिट्ठीएँ जाव पसरो ताव तुमं सुहय निव्वुइं कुणसि ।
वोलीणदंसणो तह तवेसि जह होउ दिट्ठेण ॥८६॥

भुयसिहरं पिच्छिऊण पत्युर्भुजशिखरम् अंसस्थलं वीक्ष्य । कीदृशम् । सिरमग्गतुप्पइयं शिरोमार्गस्निग्धम् । कस्याः । पुप्फवइयाए पुष्पवत्याः । संभोगानुमितसौभाग्यातिशयः सपत्नीनां स्थूलाश्रुपातहेतुः । हेतुरलंकारः । तुप्पइयं स्निग्धम् ॥४८३॥

४८४ [लोकः क्रुध्यति क्रुध्यतु, वचनीयं भवति भवतु किं नाम । एहि निषीद पार्श्वे पुष्पवति नैति मे निद्रा ॥] निगदव्याख्यातेयं गाथा । निमज्जसु निषीद । नुमज्जसु इति नेः सदो मज्जादेशः । तदुज्झोर्बहुलम् (!) इति उत्वे च सति रूपम् (हेमचन्द्र ८,४,१२३;८,१,९४) ॥४८४॥

४८५) तस्या (?) एव (हर्षस्य) [यां यां प्रलोकयामि दिशं पुरतो लिखित इव दृश्यसे ततः । तव प्रतिमापरिपाटीमिव वहति सकलं दिशावलयम् ॥] जं जं पुलएमि दिसं यां यां प्रलोकयामि दिशां, पुरओ लिहिउ व्व दीससे तत्तो पुरतो लिखित इव दृश्यसे तस्याम् । हि यतः तुह पडिमापरिवाडिं व वहइ सयलं दिसावलयं तव प्रतिमानां परिपाटीं पङ्क्तिमिव वहति सकलं दिग्वलयम् । सर्वत्र ध्यानपारमिताबलेन त्वामेव पश्यामीति भावः । स्मृतिरत्र व्यभिचारी भावः । तस्य नायकगतकुलशीलसौन्दर्यादिकम् आलम्बन वेभावः । सर्वत्र तद्दर्शनमनुभावः । उत्प्रेक्षालंकारः ॥४८५॥

४८६) शिवस्य । [दृष्टेर्यावत् प्रसरस्तावत् त्वं सुभग निर्वृतिं करोषि । अतिक्रान्तदर्शनस्तथा तापयसि यथा भवतु पुनर्दृष्टेन ॥] दिट्ठीएँ

१W तं. २W तत्तो. ३W. दिसाचक्कं.

W532 ४८७) ओसरइ धुणइ साहं हुप्पामुहलो पुणो समल्लियइ ।
जंबूफलं न गिण्हइ भमरु त्ति कई पढमडक्को ॥८७॥

W533 ४८८) न छिवइ हत्थेण कई कंडुयणभएण पत्तलणिउंजे ।
दरलंबियगुच्छकविच्छुसच्छहं वाणरीहत्थं ॥८८॥

जाव पसरो दृष्टेर्यावत् प्रसरः ताव तुमं सुहय निव्वुइं कुणसि तावत् त्वं सुभग निर्वृतिं करोषि । वोलीणदंसणो तह तवेसि अतिक्रान्तदर्शनस्तथा तापयसि जह होउ दिट्ठेण यथा भवतु पुनर्दृष्टेन । दृश्यमानःसुसुखं जनयसि, अदृश्यमानस्तु महते दुःखाय जायस इति मूलादेव वरमदर्शनमित्यर्थः । निव्वुई सुखम् । वोलीणं अतिक्रान्तम् ॥४८६॥

४८७) [अपसरति धुनोति शाखां गलगर्जितमुखरः पुनः समालीयते । जम्बूफलं न गृह्णाति भ्रमर इति कपिः प्रथमदष्टः ॥] भमरु त्ति कई जंबूफलं न गिण्हइ कपिर्भ्रमरभ्रान्त्या जम्बूफलं न गृह्णाति । कीदृशः । पढमडक्को प्रथमदष्टः । किं तर्हि करोतीत्याह । ओसरइ धुणइ साहं हुप्पामुहलो पुणो समल्लियइ अपसरति धुनोति शाखां गलगर्जितमुखरः पुनरपि समालीयते । कपिर्द्विरेफदष्टः स्वजात्यनुरूपं सर्वमेवैमत्करोतीति । जातिभ्रान्तिमदलंकाराभ्यां संसृष्टिरलंकारः । हुप्पा गलगर्जितम् ॥४८७॥

४८८) गङ्गटस्य ।[न स्पृशति हस्तेन कपिः कण्डूयनभयेन पत्रप्रचुरनिकुञ्जे । दरलम्बितकपिकच्छूगुच्छसदृक्षं वानरीहस्तम् ॥] कई वाणरीहत्थं न छिवइ कपिर्वानरीहस्तं न स्पृशति । कीदृशम् । दरलंबियगुच्छकविच्छुसच्छहं दरलम्बितकपिकच्छूगुच्छसदृक्षम् । केन न स्पृशति । कंडूयणभएण कण्डूयनभयेन । क्व । पत्तलणिउंजे पत्तले पत्रसहिते निकुञ्जे । कपिकच्छूगुच्छभ्रमेण वानरीकरं न स्पृशतीत्यर्थः । भ्रान्तिमानलंकारः । प्राकृते पूर्वनिपातस्यानियमात् गुच्छशब्दस्य पूर्वनिपातः ॥४८८॥

१W खोक्खामुहलो; २W समुल्लिहइ; ३W. कंडुइभएण; ४W. दरलंबिगोच्छकइकच्छु.

W609 ४८९) गम्मिहिसि तस्स पासं सुंदरि मा तुवर वड्ढउ मियंको ।
दुद्धे दुद्धं पिव चंदिमाइ को पिच्छइ मुहं ते ॥८९॥[1]

W534 ४९०) सरसा वि सूसइ च्चिय जाणइ दुक्खाइँ मूढहियया वि ।
रत्ता वि पंडुर च्चिय जाया बरई तुह वियोए ॥९०॥

४८९) जयन्तकुमारस्य । [गमिष्यसि तस्य पार्श्वं, सुन्दरि मा त्वरस्व वर्धतां मृगाङ्कः । दुग्धे दुग्धमिव चन्द्रिकायां कः प्रेक्षते मुखं ते ॥] काचित् कांचित् स्वमुखेन्दुद्योतितदिङ्मुखीं प्रियमभिसरन्तीमिदमाह । गमिष्यसि तस्य पार्श्वं सुन्दरि मा त्वरस्व मा उत्सुका भव । वर्धतां नभोभागमाक्रमतां तावन्मृगाङ्कः । ततः किमित्याह । दुद्धे दुद्धं पिव चंदिमाइ को पिच्छइ मुहं ते दुग्धे दुग्धमिव चन्द्रिकायां कः प्रेक्षते मुखं ते । न कश्चिदित्यर्थः । यथा दुग्धे दुग्धं निक्षिप्तं तथा चन्द्रिकायां वर्णसावर्ण्यात् त्वन्मुखमपि न लक्ष्यते, इति प्रियाभिसरणकारणं कौमुदी भविष्यतीति भावः । तन्मुखेन्दुकान्तिकीर्तनपरेयमुक्तिः । आक्षेपोऽयमलंकारः ॥४८९॥

४९०) जीवदेवस्य । [सरसाऽपि शुष्यत्येव, जानाति दुःखानि मूढहृदयाऽपि । रक्ताऽपि पाण्डुरैव जाता वराकी तव वियोगे ॥] काचित् कस्यािश्चन्नायके रागातिशयं प्रकाशयितुमिदमाह । सा वरई वराकी तुह वियोए तव वियोगे सरसा वि सूसइ च्चिय सरसाऽपि शुष्यत्येव । या किल रसार्द्रा भवति सा न शुष्यतीति । जाणइ दुक्खाइँ मूढहियया वि जानाति दुःखानि मूढहृदयाऽपि । या किल मूढहृदया सा दुःखं न जानाति । रत्ता वि पंडुर च्चिय रक्ताऽपि पाण्डुरैव । या किल रक्तवर्णा सा पाण्डुरा न भवतीति विरोधः । तत्त्वतस्तु अविरोधः । सा त्वद्विरहे सरसा सानुरागा शुष्यति । मूढहृदया मोहान्वितचित्ता त्वद्विरहवेदनां वेत्ति । रक्ता अनुरक्ता पाण्डिम्ना गृहीता । इति तदवस्थानिवेदनपरेयमुक्तिः । विरोधोऽलंकारः ॥४९०॥

1w. चंदिआइ.

W535 ४९१) नीलुप्पलपरिमलवासियस्स सरयस्स सो दोसो ।
आरुहइ जुण्णयं अंद्दयं च जं उयह वल्लरी तउसी ॥९१॥
W536 ४९२) उप्पहपहावियजणो पवियंभियकलयलो पहयतूरो ।
उव्वेयँणु म्ह उ छणो तेण विणा गामँपडहु व्व ॥९२॥
W537 ४९३) उल्लावंतेण न होइ कस्स पासट्ठिएण थड्ढेण ।
संका मसाणपायवलंबियचोरेण व खलेण ॥९३॥

४९१) बहुकस्य (? बाहुकस्य)। [नीलोत्पलपरिमलवासितायाः शरदः स दोषः। आरोहति जीर्णकम् आर्द्रकं च यत् पश्यत वल्लरी त्रपुषी ॥] वल्लरी तउसी त्रपुषवल्ली जं यत् अद्दयं जुण्णयं च आरुहइ आर्द्रं जीर्णं चारोहति स दोषः शरदः। किंभूतायाः शरदः। नीलुप्पलपरिमलवासियस्स नीलोत्पलपरिमलवासितायाः। शरदि किल त्रपुषवल्ली विसर्पन्ती यदेव पुरतो भवति तदेवारोहतीत्यर्थः। द्वितीयस्तु वल्लरीशब्दो नायिकां विवक्षते। यदसौ युवानं स्थविरं च भजते स नीलोत्पलवासितस्य सरकस्य दोषः। मदिरामत्तो हि गम्यागम्यं न गणयति। समासोक्तिरलंकारः ॥४९१॥

४९२) हालस्य। [उत्पथप्रधावितजनः प्रविजृम्भितकलकलः प्रहततूर्यः। उद्वेजनोऽस्माकं खलु क्षणस्तेन विना ग्रामपटह इव ॥] गतार्था गाथा। ग्रामे किल चोरशङ्कया पटहस्ताड्यत इति ॥४९२॥

४९३) तुट्ठ (तुष्ट) राजस्य। [उल्लपता न भवति कस्य पार्श्वस्थितेन (पाशस्थितेन) स्तब्धेन। शङ्का श्मशानपादपलम्बितचोरेणेव खलेन ॥] कस्स खलेण न संका होइ कस्य न खलेन शङ्का भवति। कीदृशेन। पासट्ठिएण पार्श्वस्थितेन। भूयश्च कीदृशेन। थड्ढेण स्तब्धेन।

1w. The two halves stand transposed; 2w. खुज्जअं; 3w. अन्नो सो च्चेव छणो; 4w. गामडाहो व्व.

W538 ४९४) असमत्तगरुयकज्जे[1] इंते पहिए घरं निएऊण ।
नवपाउसो पिउच्छा हसइ व कुडअट्टहासेहिं ॥९४॥
W755 ४९५) ढंखरसेसो वि हु महुयरेहि[2] मुक्को न मालईविडवो ।
दरवियसियकलियामोयबहलिमं संभरंतेहिं[3] ॥९५॥

पुनश्च कीदृशेन । उल्लावंतेण उल्लापयमानेन, अभिभवता । उल्लाविरयम् अभिभवेऽपि वर्तते। केनेव खलेन शङ्का न जन्यते । मसाणपायवलंबियचोरेण व श्मशानपादपलम्बितचोरेणेव। यथा अनेन (चोरेण) पाशस्थितेन कण्ठार्पितपाशेन स्तब्धेन उल्लपता च शङ्का जन्यते तथा खलेनापि । .... अद्यास्माकमपकारं करिष्यतीति भावः । श्लेषोपमाऽलंकारः ॥४९३॥

४९४) अर्जुनस्य । [असमाप्तगुरुकार्यान् आयतः पथिकान् गृहं दृष्ट्वा। नवप्रावृट् पितृष्वसर्हसतीव कुटजाट्टहासैः ॥] हे पिउच्छा पितृष्वसः नवपाउसो हसइ व नवप्रावृड् हसतीव किं कृत्वा । घरं इंते पहिए निएऊण गृहं समागच्छतः पथिकान् दृष्ट्वा । कीदृशान् । असमत्तगरुयकज्जे असमाप्तगुरुकार्यान् । कैर्हसतीव । कुडयट्टहासेहिं कुटजाट्टहासैः । यो अकृतकार्यः अशोकेन निवर्तते स उपहासास्पदं भवतीति । स्वगृहिणीनां संभोगसुखलाभाशयेति या अकृतकार्याणां पथिकानां प्रत्यावृत्तिः सा हास्यहेतुः । उत्प्रेक्षालंकारः ॥४९४॥

४९५) अनङ्गस्य । [पत्रपुष्परहितशाखाशेषोऽपि खलु मधुकरैर्मुक्तो न मालतीविटपः । ईषद्विकसितकलिकाऽऽमोदबहलिमानं संस्मरद्भिः ॥] दरवियसियकलियामोयबहलिमं संभरंतेहिं दरविकसितकलिकाऽऽमोदबहलिमानं संस्मरद्भिर्मधुकरैर्मालतीविटपो न मुक्तः । विभवभ्रंशेऽपि अनुभूतसुखानि स्मरन्तः (ये) स्वस्वामिनं न परिहरन्ति त एवं भङ्गीभणित्याऽभिधीयन्त इति । अन्यापदेशोऽलंकारः ॥४९५॥

1w. एण्हिं पहिए घरं णिअट्टंते; 2w. महुअरेण; 3w. संभरंतेण.

W539 ४९६) दट्ठूण उन्नमंते मेहे आमुक्कजीवियासाए ।
पहियग्घरिणीएँ पई ओरुन्नमुहीएँ सच्चविओ ॥९६॥

W540 ४९७) अविहवलक्खणवलयं ठाणं निंतो पुणो पुणो गलियं ।
सहिसत्थु च्चिय माणंसिणीएँ वलयारओ जाओ ॥९७॥

W711 ४९८) जं मुच्छियाएँ नै सुयं कलंबगंधेण, तं गुणे पडियं ।
इहरा गज्जियसद्दो जीएण विणा न वोलंतो ॥९८॥

४९६) बन्धुदत्तस्य । [दृष्ट्वोन्नमतो मेघान् आमुक्तजीविताशया । पथिकगृहिण्या पतिरवरुदितमुख्या दृष्टः ॥] पहियग्घरिणीएँ पान्थगृहिण्या पतिर्दृष्टः । कथंभूतया । आमुक्कजीवियासाए त्यक्तजीविताशया । किं कृत्वा । दट्ठूण उन्नमंते मेहे दृष्ट्वोन्नमतो मेघान् । किंभूतया पतिरवलोकितः । ओरुन्नमुहीएँ अवरुदितवक्त्रया । एतदुक्तं भवति । प्राप्तायामपि प्रावृषि अप्रत्यावर्तमाने प्रिये सा अश्रुपयःपूरितेक्षणा जाता । पहियघरिणीएँ डिंभो इति तु क्वचित् पाठः स एव श्रेयान् । सच्चविओ दृष्टः । हेतुरलंकारः ॥४९६॥

४९७) अनुद्धटस्य । [अविधवालक्षणं वलयं स्थानं नयन् पुनः पुनर्गलितम् । सखीसार्थ एव मनास्विन्याः (मानवत्याः) वलयकारो जातः ॥] माणंसिणीएँ मानवत्याः सहिसत्थु च्चिय वलयारओ जाओ सखीसार्थ एव वलयवणिग् जातः । किं कुर्वन् । अविहवलक्खणवलयं पुणो पुणो ठाणं निंतो अविधवालक्षणवलयं पुनः पुनः स्थानं नयन् करमूले निवेशयन् । किंभूतम् । गलियं कायकार्श्यवशेन विस्रस्तम् । हेतुरलंकारः ॥४९७॥

४९८) तस्यैव (अनुद्धटस्य) । [यन्मूर्छितया न श्रुतं कदम्बगन्धेन, तद्गुणे पतितम् । इतरथा गर्जितशब्दो जीवेन विना नागमिष्यत् ॥] जं मुच्छियाएँ न सुयं तं गुणे पडियं यन् मूर्छितया

१W. पहिअघरिणीअ डिंभो; २W. ण सुओ.

W541 ४९९) पहियवहू णिव्वंतरगलियजलुल्ले घरे अणुल्लं पि ।
उद्देसं अविरयवाहसलिलणिवहेण उल्लेइ ॥९९॥

W542 ५००) जीहाएँ कुणंति सुहं तरंति हिययस्स णिव्वुइं काउं ।
पीडिज्जंता वि रसं मुयंति उच्छू कुलीणा य ॥१००॥

घनगर्जितं न श्रुतं तद् गुणे पतितम् । केन मूर्छितया । कलंबगंधेण कदम्बगन्धेन । कथं गुणे पतितमित्याह । इहरा गज्जियसद्दो जोएण विणा न वोलंतो इतरथा गर्जितशब्दो जीवेन (जीवितेन) विना नागमिष्यत् । कदम्बपरिमलोत्पन्ना मूर्छा गुणाय जायते स्म । इतरथा यदीयं गर्जितशब्दमश्रोष्यत् तन्नाजीविष्यद इति । ....रुद्रटमते तु स लेशोऽलंकारः । दोषीभावो यस्मिन् गुणस्य दोषस्य वा गुणीभावः । अभिधयते तथाविधकर्मनिमित्तः स लेशः स्यात् (रुद्रट,७,१००) ॥४९८॥

४९९) साहसस्य । [पथिकवधूर्नीवान्तरगलितजलार्द्रे गृहेऽनार्द्रमपि । उद्देशमविरतबाष्पसलिलनिवहेनार्द्रयति ॥] पहियवहू पथिकवधूः अणुल्लं पि उद्देसं उल्लेइ अनार्द्रमप्युद्देशमार्द्रयति । केन । अविरयबाहसलिलणिवहेण अविरलबाष्पसलिलनिवहेन । क्व । घरे गृहे । कीदृशे । णिव्वंतरगलियजलुल्ले नीव्रान्तरगलितजलप्लुते । यत्र च पटलान्तरेण न नीरं निपतितं तत्प्रदेशमाश्रयन्तो बाष्पाम्बुपातेन प्लावयतीत्यर्थः । णिव्वं पटलम् । उल्लं आर्द्रम् । विरहिणो नायिका । तस्या लक्षणम् । त्यक्त्वा गत इत्यादि । निःश्वासरुदितचिन्तादैवोपालम्भदैन्यवचनैश्च । अतिमलिनं वा वेषं प्रोषितपतिका निबध्नीयात् ॥ जातिरलंकारः ॥४९९॥

५००) स्यन्दनस्य । [जिह्वायाः (जिह्वया) कुर्वन्ति सुखं शक्नुवन्ति हृदयस्य निर्वृतिं कर्तुम् । पीड्यमाना अपि रसं मुञ्चन्ति इक्षवः कुलीनाश्च ॥] उच्छू कुलीणा य इक्षवः कुलीनाश्च जीहाएँ कुणंति सुहं ।

१W. विवरंतर; २W. पिअं; ३W होंति अ; ४W. जणेंति

छट्टं सयं

W543 ५०१) दीसइ न चूअमउलं अत्ता न य वाइ मलयगंधवहो ।
पत्तं वसंतमासं साहइ उक्कंठिय च्चेय ॥१॥

W544 ५०२) अंबवणे भमरउलं न विणा कज्जेण ऊसुयं भमइ ।
कत्तो जलणेण विणा धूमस्स सिहाउ दीसंति ॥२॥

इक्षवस्तावत् जिह्वायां सुखं कुर्वन्ति मधुरत्वात् । कुलीनास्तु जिह्वया कारणभूतया सुखं कुर्वन्ति प्रियंवदत्वात् । तरंति हियथस्स निव्वुइं काउं शक्नुवन्ति हृदयस्य निर्वृतिं सुखं कर्तुम् । पीडिज्जंता वि रसं मुयंति । तत्रेक्षवो यन्त्रयोगेन पीड्यमाना अपि रसं मुञ्चन्ति । कुलीनाः पुनर्दुर्वचनेनापि पीड्यमाना रसम् अनुरागमेव क्षरन्ति, न विरज्यन्त इत्यर्थः । समुच्चयः श्लेषोऽलंकारः ॥५००॥

इति हालविरचिते गाथाकोशे श्रीभुवनपालवृत्तौ छेकोक्तिविचारलीलायां पञ्चममेतच्छतं समाप्तम् ।

५०१) [दृश्यते न चूतमुकुलं सखि न च वाति मलयगन्धवहः । प्राप्तं वसन्तसमयं कथयत्युत्कण्ठिका एव ॥] ओं नमो जिनाय । श्रीगौतमाय नमः । हे अत्ता सखि, दीसइ न चूअमउलं दृश्यते न चूतमुकुलं, न य वाइ मलयगंधवहो न च वाति वहति मलयानिलः । पत्तं वसंतमासं साहइ उक्कंठिय च्चेय आयान्तं सन्तं वसन्तमासम् उत्कण्ठिकैव कथयति अनुद्भूतचूतमञ्जर्या बाह्यचिह्नमन्तरेण । उत्तर एवोत्कण्ठाभरोऽवतरन्तं वसन्तसमयं शंसतीत्यर्थः । अनुमानालंकारः । तस्य लक्षणम् । वस्तु परोक्षं यस्मिन् साध्यमुपन्यस्य साधकं तस्य । पुनरन्यदुपन्यस्येद् विपरीतं चैतदनुमानम् ॥ (रुद्रट, ७, ५६). आचार्यदण्डिनस्तु मते ज्ञापको हेतुरयम् । अत्ता पितृष्वसा, श्वश्रूः, सखी च ॥५०१॥

५०२) आदित्यसेनस्य । [आम्रवने भ्रमरकुलं न विना कार्येण उत्सुकं भ्रमति । कुतो ज्वलनेन विना धूमस्य शिखा दृश्यन्ते ॥]अंबवणे

१ W उक्कंठिअं चेअ.

W545 ५०३) दइयकरग्गहलुलिओ धम्मिल्लो सीहुगंधियं वयणं।
सेयणम्मि इत्तियं चिय पसाहणं होइ तरुणीणं ॥३॥
W546 ५०४) गामतरुणीओ हिययं हरंति पोढाण थणहरुल्लीओ।
मयणे लसंतकोसुंभकंचुआहरणमित्ताओ ॥४॥
W547 ५०५) अवलोयंत दिसाओ ससंत जंभंत गंत रोवंत।
पुच्छंत पडंत हसंत पहिय किं ते पउत्थेण ॥५॥

भमरउलं आम्रवने भ्रमरकुलं न विणा कज्जेण ऊसुयं भमइ न विना कार्येण उत्सुकं भ्राम्यति। अत्र मञ्जर्युद्गमेन भवितव्यमिति भावः। अमुमेवार्थं समर्थयन्नाह। कत्तो जलणेण विणा धूमस्स सिहाउ दीसंति कुतो ज्वलनेन विना धूमस्य शिखा दृश्यन्ते। अर्थान्तरन्यासोऽलंकारः। अनेन च अर्थान्तरभूतोपमार्थेन अर्थान्तरेण ममायं मुकुलितमाकन्दमञ्जर्युद्गमो वह्निरिव संतापाय भवतीति सूचितं भवति ॥५०२॥

५०३) तस्यैव (आदित्यसेनस्य)। [दयितकरग्रहलुलितो धम्मिल्लः सीधुगन्धितं वदनम्। शयनीय एतावदेव प्रसाधनं भवति तरुणीनाम् ॥] गतार्था गाथा। समुच्चयोऽलंकारः ॥५०३॥

५०४) अचलस्य। [ग्रामतरुण्यो हृदयं हरन्ति प्रौढानां स्तनभारवत्यः। मदनोत्सवे लसत्कौसुम्भकञ्चुकाभरणमात्राः ॥] निगदव्याख्यातेयं गाथा ॥५०४॥

५०५) पालित्तकस्य। [अवलोकयन् दिशः, श्वसन्, जृम्भमाण, गायन्, रुदन्। पृच्छन्, पतन्, हसन् पथिक किं ते प्रोषितेन ॥] अवलोयंत दिसाओ अवलोकयन् दिशः, ससंत श्वसन्, जंभंत जृम्भमाण, गंत गायन्, रोवंत रुदन्, पुच्छंत पृच्छन्, पडंत पतन्, हसंत हसन्, पहिय पथिक, किं ते पउत्थेण किं ते प्रोषितेन। येनेमाम् उन्म-

---

१W. मअणम्मि एत्तिअं चिअ; २W. हरइ. ३W. छेआण; ४W. कुसुंभराइल्ल० ५W. आलोअंत; ६W मुच्छंत; ७W. खलंत.

W410 ५०६) इत्ताहि च्चिय मोहं जणेइ बालत्तणे वि तरुणाणं ।
विसकंदलि व्व मुद्धा वड्ढंती काहिइ अणत्थं ॥६॥
W479 ५०७) आसन्नविवाहदिणेसु नववहूपिम्मऊसुयमणस्स ।
पढमघरिणीएँ सुरयं वरस्स हियए न संठाइ ॥७॥
W480 ५०८) जइ लोयणिंदियं जइ अमंगलं जइ वि भिन्नमज्जायं ।
पुप्फवइदंसणं तह वि देइ हिययस्स निव्वाणं ॥८॥

त्तदशां दर्शितोऽसि स तं प्रवासं मा कार्षीरिति भावः । जन्न (?) इति । आक्षेपोऽलंकारः ॥५०५॥

५०६) सिरिसत्ताए (? सिरिसत्तीए, श्रीशक्तेः) । [इदानीमेव मोहं जनयति बालत्वेऽ पि तरुणानाम् । विषकन्दलीव मुग्धा वर्धमाना करिष्यत्यनर्थम् ॥] इत्ताहि च्चिय मुद्धा इदानीमेव मुग्धा बालत्तणे वि मोहं जणेइ बालत्वेऽपि मोहं जनयति तरुणानां यथा चैषा, तथाऽनुमिमीमहे वड्ढंती काहिइ अणत्थं वर्धमानाऽनर्थं करिष्यति । केव । विसकंदलि व्व विषकन्दलीव । यथा हि विषवल्ली वर्धमानाऽनर्थं करोति तथैवेयं प्राप्तयौवना (तरुणानां) मनःसु दुरुत्सहं मन्मथोन्माथस्वरूपमनर्थं वितरिष्यतीति भावः । उपमाऽलंकारः ॥५०६॥

५०७) पृथ्वीनन्दनस्य । [आसन्नविवाहदिनेषु नववधूप्रेमोत्सुकमनसः । प्रथमगृहिण्याः सुरतं वरस्य हृदये न संतिष्ठते ॥] वरस्स हियए सुरयं न संठाइ जामातुर्हृदये सुरतं न संतिष्ठते । कस्याः । पढमघरिणीए प्रथमगृहिण्याः । कथंभूतस्य वरस्य । नववहूपिम्मऊसुयमणस्स नववधूप्रेमोत्सुकमनसः । केषु । आसन्नविवाहदिणेसु आसन्नेषु विवाहदिनेषु । औत्सुक्यं व्यभिचारी भावः । जातिरलंकारः ।५०७॥

५०८) कुम्भभोगिनः । [यदि लोकनिन्दितं यद्यमङ्गलं यद्यपि भिन्नमर्यादम् । पुष्पवतीदर्शनं तथाऽपि ददाति हृदयस्य निर्वाणम् ॥] पुप्फ-

१W.० दिणे; २W. अहिणववहूसंगमुस्सुअमणस्स. ३W. मुक्कमज्जाअं.

W483 ५०९) न वि तह अइगरुएण वि खिज्जइ हिययं भरेण गब्भस्स।
जह विवरीयणिहुयणं पियम्मि सुन्हा अपावंती ॥९॥
W608 ५१०) वीसत्थहसियपरिसक्कियाण उँययंजली पढम दिन्नो।
पच्छा वहूएँ गहिओ कुडुंबभारो निमज्जंतो ॥१०॥

वइदंसणं पुष्पवतीदर्शनं जइ लोयणिंदियं यदि लोकनिन्दितं, जइ अमंगलं यद्यमङ्गलं, जइ वि भिन्नमज्जायं यद्यपि भिन्नमर्यादं शास्त्रविरोधात्, तह वि देइ हिययस्स निव्वाणं तथाऽपि ददाति हृदयस्य निर्वाणं निर्वृतिम्। यद्यपि लोकविरुद्धम् ऋतुमत्या दर्शनं, तथाऽपि निर्वाणाय मुक्तये जायत इति विरोधः ॥५०८॥

५०९) निषद्धस्य (? निषिद्धस्स)। [नापि तथा अतिगुरुणाऽपि खिद्यते हृदयं भरेण गर्भस्य। यथा विपरीतनिधुवनं प्रिये वधूरप्राप्नुवती ॥] निगदव्याख्यातेयं गाथा ॥५०९॥

५१०) [विश्वस्तहसितपरिष्वक्कितानाम् उदकाञ्जलिः प्रथमं दत्तः। पश्चाद् वध्वा गृहीतः कुटुम्बभारो निमज्जन् ॥] वहूएँ वध्वा पढमं वीसत्थहसियपरिसक्किय़ाण उययंजली दिन्नो प्रथमं विश्वस्तहसितपरिष्वक्कितेभ्यो जलाञ्जलिर्दत्तः। पच्छा कुडुंबभारो गहिओ पश्चात्कुटुम्बभारो गृहीतः। कीदृशः सः। निमज्जंतो निमज्जन्। कुटुम्बचिन्तादिकं शृङ्गाराङ्गं न भवतीति भावः। चित्रहेतुरलंकारः। तदुक्तम् आचार्येण—"दूरकार्यस्तत्सहजः कार्यानन्तरजस्तथा। अयुक्तयुक्तकार्यौ चेत्यनन्ताश्चित्रहेतवः ॥ (काव्यादर्श २, २५३)। अमीषां मध्ये कार्यानन्तरजोऽयम्। रुद्रटस्य तु मतेन अतिशयविशेषः पूर्वोऽयम्। यत्रातिप्रबलतया विवक्ष्यते पूर्वमेव जन्यस्य। प्रादुर्भावः पश्चाज् जनकस्य तु तद् भवेत् पूर्वम् ॥ रुद्रट, ९, ३) ॥५१०॥

१W. तम्भइ हिअए; २W. सोण्हा; ३W. पढमं जलंजली दिण्णो.

W610 ५११) जइ जूरइ जूरउ नाम मामि परलोयवसणिओ लोओ ।
तह वि बला गामणिउत्तवयणकमले वलइ दिट्ठी ॥११॥

W611 ५१२) धोयं[2] व चित्तयम्मं उज्झर[3]कुहरं व सलिलसुन्नइयं ।
गोहणरहियं गुट्ठं व तीएँ वयणं तुइ विओए ॥१२॥

५११) विन्ध्याधिपस्य । [यदि खिद्यते खिद्यतां नाम सखि परलोकव्यसनो लोकः । तथाऽपि बलाद् ग्रामणीपुत्रवदनकमले वलते दृष्टिः ॥] हे मामि मातः (? मातुलानि), लोओ जइ जूरइ जूरउ नाम लोको यदि खिद्यते खिद्यतां नाम । कीदृशः । परलोयवसणिओ धार्मिकः । तह वि बला गामणिउत्तवयणकमले वलइ दिट्ठी तथाऽपि बलाद् ग्रामणीपुत्रवदनकमले वलते दृष्टिः । तदेव दृष्टिवृत्तिहेतुश्चित्तोल्लासो हेला, सा च पुंसोऽपि भवति । हेला भावश्च हावश्च व्याजो विस्रम्भभाषणम् । चाटु प्रेमानुसन्धानं परीहासः कुतूहलम् । चकितं चेति निर्दिष्टाश्चेष्टाः काश्चिद् विलासिनाम् ॥ मामि इति मातुलानि, सखि च । जूरइ इति खिदेर्जूर इति जुरादेशे रूपम् ॥५११॥

५१२) अरदेवस्य । [धौतमिव चित्रकर्म निर्झरकुहरमिव सलिलशून्यम् । गोधनरहितं गोष्ठमिव तस्या वदनं तव वियोगे ॥] काचित् कस्याश्चिद् विरहदुरवस्थां प्रतिपादयितुमाह । तीए वयणं तस्या वदनं तुह विओए तव वियोगे धोयं व चित्तयम्मं धौतमिव चित्रकर्मकार्यम्, अञ्जनपत्रलेखाऽधररागादिरहितमित्यर्थः । धौतं हि चित्रकर्म व्यपेतवर्णकं भवति । पुनरपि कीदृशम् । उज्झरकुहरं व सलिलसुन्नइयं निर्झरकुहरमिव सलिलशून्यम् । विच्छायमित्यर्थः । शुष्कौष्ठगलकतालुकमित्यपरे । भूयश्च कीदृशम् । गोहणरहियं गुट्ठं व गोधनरहितं गोष्ठमिव । निःशब्दमित्यर्थः । सशब्दं हि अनेकगोधनध्वनिमनोहरम् । अन्ये तु शोभनशून्यत्वमात्रमेव प्रतीयमानं सामान्यधर्ममाश्रित्य उपमा अत्र इयमित्याहुः ॥५१२॥

१W. गामणिणंदणस्स वअणे; २W. गेहं व वित्तरहियं; ३W. णिज्झर०.

W756 ५१३) समुहागयवोलीणे वि सा तुमे अपडियंगसंठाणा।
रुंदं पि गामरच्छं निंदइ तणुयं च अप्पाणं ॥१३॥
W757 ५१४) समइच्छंति नियत्तंति पसरिया रणरणंति तद्दियहं।
चलचित्त तुज्झ लग्गा मणोरहा तीइ हिययम्मि ॥१४॥
W484 ५१५) अगणियजणाववायं अवहीरियगुरुयणं वराईए।
तुह गलियदंसणासाएँ तीएँ दीहं चिरं रुन्नं ॥१५॥
W481 ५१६) हिययं हिययणिहित्तं चित्तालिहिय व्व तुह मुहे दिट्ठी।
आलिंगणदुहियाइं नवँरोलुग्गाइँ अंगाइं ॥१६॥

५१३) अपराजितस्य। [संमुखागतातिक्रान्तेऽपि सा त्वय्यपतिताङ्गसंस्थाना। विस्तीर्णामपि ग्रामरथ्यां निन्दति तनुं चात्मानम् ॥] गतार्था गाथा। वोलीणं अतिक्रान्तम्। रुंदं विस्तीर्णम् ॥५१३॥

५१४) स्कन्ददासस्य। [समतिक्रामन्ति, निवर्तन्ते, प्रसृता रणरणकं कुर्वन्ति अनुदिवसम्। चलचित्त तव (=त्वयि) लग्ना मनोरथास्तस्या हृदये ॥] गतार्था गाथा। समइच्छंति अतिक्रामन्ति ॥५१४॥

५१५) नागबलस्य। [अगणितजनापवादम् अवधीरितगुरुजनं वराक्या। तव गलितदर्शनाशया तया दीर्घं चिरं रुदितम् ॥] काचित् कस्याश्चिद् दुरवस्थां प्रकाशयितुम् इदमाह। तएँ वराईए दीहं चिरं रुन्नं तया वराक्या दीर्घं चिरं रुदितम्। कथंभूतया। तुह गलियदंसणासाएँ तव गलितदर्शनाशया। कथं रुदितम्। अगणियजणाववायं अगणितजनापवादम्, अवहीरियगुरुयणं अवधीरितगुरुजनम्। तया त्वद्दर्शनमनासादयन्त्या अविगणय्य निजकुलकलङ्कम् (रुदितम्) ॥५१५॥

५१६) हरिराजस्य। [हृदयं हृदयनिहितं चित्रालिखितेव तव मुखे दृष्टिः। आलिङ्गनदुःखितानि केवलमवरुग्णानि अङ्गानि ॥] हिययं

१W .समुहागयवोलंतम्मि सा तुमे अघडियंगसंठाणा. २W. सममच्छंति; ३W. अवहरिथअ; ४W. तीअ वलिउं चिरं रुण्णं; ५W. हिअए णिहिअं; ६W. आलिंगणदुहिआइं; ७W. णवरं झिज्जंति अंगाइं.

W486 ५१७) अइयं विओयतणुई, दुसहो विरहाणलो, चलं जीयं ।
अप्पाहिज्जइ[1] किं सहि जाणसि तं चेय जं जुत्तं ॥१७॥

W487 ५१८) तुह विरहे[2] जग्गिरओ सिविणे[3] वि न देइ दंसणसुहाइं ।
बाहेण पहालोयणविलोयणं मे हियं[4] तं पि ॥१८॥

हिययणिहित्तं तस्या हृदयं तव हृदये निहितम् । चित्तालिहिय व्व तुह मुहे दिट्ठी चित्रालिखितेव निर्निमेषतया तव मुखे दृष्टिः । आलिंगणदुहियाइं आलिङ्गनदुःस्थितानि नवरोलुग्गाइँ अंगाइं केवलं विच्छायान्यङ्गानि । मतिविस्मयौ भावौ स्थापितौ । उलुग्गं विच्छायं दुर्बलं वा । दुहियं दुःस्थितम् । णिहित्तं इति निहितशब्दस्य सेवादिपाठात् (वररुचि, ३,५८) द्वित्वे सति रूपम् । नवरं केवलार्थे निपातः ॥५१६॥

५१७) ध्रुवभट्टस्य । [अहं वियोगतन्वी दुस्सहो विरहानलश्चलं जीवितम् । संदिश्यते किं सखि जानासि त्वमेव यद् युक्तम् ।।] काचिद् दूतीं संदिशन्तीदमाह । अइयं विओयतणुई अहं वियोगतन्वी, दुसहो विरहाणलो दुस्सहो विरहानलः, चलं जीयं चलं जीवितम् । अप्पाहिज्जइ किं सहि जाणसि तं चेय जं जुत्तं संदिश्यते किं सखि जातो (? यतो) जानासि त्वमेव यद् युक्तम् । कालोचितं संचिन्त्य चेतसि त्वमेव सर्वं कुर्वीथाः । सर्वथा हृदयदयितम् इहानेष्यसीति भावः । अनुनयाग्रहणाद् रोषमुषिता प्रिये गतवति सानुशया कलहान्तरिता नायिका । अप्पाहियं संदिष्टम् ॥५१७॥

५१८) शूद्रकस्य । [तव विरहे जागरकः स्वप्नेऽपि न ददाति दर्शनसुखानि । बाष्पेण पथालोकनविलोकनं मे हृतं तदपि ।।] काचित् प्रवासिनं प्रियं प्रति सोत्प्रासं संदिशन्ती उपालम्भमिममाह । तुह विरहे जग्गिरओ तव विरहे उज्जागरकः सिविणे वि न देइ दंसणसुहाइं स्वप्नेऽपि न ददाति दर्शनसुखानि । सुप्तया किल स्वप्नो लभ्यत इति । किमेताव-

१W. अप्पाहिज्जउ; २W. विरहुज्जागरओ; ३W. ०विणोअणं; ४W. हअं.

W339 ५१९) उप्पिक्खागय तुह मुहदंसणपडिरुद्धजीवियासाए ।
दुहियाएँ मए कालो किच्चिरमित्तु व्व नेयव्वो ॥१९॥

W627 ५२०) तह[2] तेणं सा दिट्ठा तीएँ[3] तह तस्स पेसिया दिट्ठी ।
जइ दुँन्नि[4] वि समयं चिय निव्वत्तरयाइँ जायाइं ॥२०॥

देव । नेत्याह । बाहेण पहालोयणविलोयणं मे हियं तं पि बाष्पेण पथालोक.नेक्षणं मम हृतं तदपि इति । त्वद्वियोगेऽइम् ईदृशीं दशां प्राप्ता, त्वं पुनः सुष्ठु निष्ठुरो यदेतां प्रवासवासनां न विजहासीति भङ्ग्याऽभिहितं भवति । जग्गिरओ इति जागुः कृति असंतृड्वरं ति जद्भावनिषेधात् गधाभावे (?) (वृद्ध्यभावे) घञि गुण एव । सिविण इति स्वप्नशब्दस्य ईषत्पक्वस्वप्नेत्यादिना (वररुचि, १,३) अत इत्वम् । विरहिणी नायिका । निःश्वसितरुदितचिन्तादैवोपालम्भदैन्यवचनैश्च । हृद्दाहदेहदौर्बल्यखेदनिर्वेदजागरणैः । त्यक्ताङ्गुलीयवलयां लम्बालकवेणिकासमायुक्ताम् । प्रतिमलिनाम्बरवेषां प्रोषितपतिकां निबध्नीयात् ॥५१८॥

५१९) विरञ्चाचार्यस्य । [उत्प्रेक्षागत तव मुखदर्शनप्रतिरुद्धजीविताशया । दुःखितया मया कालः कियच्चिरमात्र इव नेतव्यः ॥] काचित् प्रवासिनं प्रिय प्रति संदिशन्तीदमाह । कालो दुहियाएँ मए कालो दुःखितया मया किच्चिरमित्तु व्व नेयव्वो कियन्मात्र इव नेतव्यः । कथंभूतया मया । उप्पिक्खागय तुह मुहदंसणपडिरुद्धजीवियासाए उत्प्रेक्षागतं यत् त्वन्मुखदर्शनं तेन प्रतिरुद्धजीविताशया । एतदुक्तं भवति । यदहं त्वद्विरहे जीवामि तत्र ध्यानपारमितया त्वन्मुखकमलावलोकनं हेतुरिति । विरहिणी नायिका ॥५१९॥

५२०) हालस्य । [तथा तेन सा दृष्टा तया तथा तस्य प्रेषिता दृष्टिः । यथा द्वावपि सममेव निर्वृत्तरतौ जातौ ॥] तह तेणं सा दट्ठा तथा तेन विधिना स्नेहार्द्रया दृशा सा कृशाङ्गी तेन दृष्टा, तीए तह तस्स

१W. केत्तिअमेत्तो; २W. तह तेण वि; ३W. तीअ वि; ४W. दोण्ह वि.

W498 ५२१) मुहपिच्छओ पई से सा वि हु सविसेसदंसणुम्मइया ।
दो वि कयत्था पुहईएँ पुरिसमहिल त्ति भणंति ॥२१॥
W488 ५२२) अन्नावराहकुविओ जह तह कालेण वच्चसि पसायं ।
वेसत्तणावराहेण कुविय, कह तं पसाएमि ॥२२॥

पेसिया दिट्ठी तयाऽपि तथा सललितवलितापाङ्गपातिनी दृष्टिरिष्टजनस्य तस्य प्रेषिता, जह दुन्नि वि समयं चिय यथा द्वावपि तौ स्त्रीपुरुषौ समयं चिय सममेव तुल्यमेव निव्वत्तरयाइँ जायाइं निवर्तित (? निर्वृत्त) रतौ जातौ । पूर्वानुरागे अन्योन्यं साक्षाद्दर्शने गाथेयम् । रतिस्तु स्थायी भावः ॥५२०॥

५२१) पवनस्य । [मुखप्रेक्षकः पतिस्तस्याः साऽपि खलु सविशेषदर्शनोन्मत्ता । द्वावपि कृतार्थौ पृथिव्यां पुरुषमहिले इति भण्येते ॥] काचित् कयोश्चिद् दंपत्योरितरेतरानुरागं वर्णयितुमिदमाह । मुहपिच्छओ पई से मुखप्रेक्षिता पतिस्तस्याः । किमेतावदेव । नेत्याह । सा वि हु-सविसेसदंसणुम्मइया साऽपि खलु सविशेषदर्शनोन्मत्ता । अतश्च दो वि कयत्था पुहईएँ पुरिसमहिल त्ति भणंति द्वावपि कृतार्थौ पृथिव्यां पुरुष-महिले इति भण्येते, न पुनरन्य इत्यर्थः । स्वाधीनभर्तृका नायिका । तस्या लक्षणम्–यस्याश्चित्ररतक्रीडासुखाऽऽस्वादनलालसः । न मुञ्चति पतिः पार्श्वं सा तु स्वाधीनभर्तृका ॥ अनुकूलो नायकः । तस्य लक्षणम्–अतिरक्ततया नार्यां करोति नान्याप्रसङ्गं यः । स्यान्नायकोऽनुकूलः स रामवज्जनकतनयायाम् ॥५२१॥

५२२) सहदेवस्य । [अन्यापराधकुपितो यथा तथा कालेन व्रजसि प्रसादम् । द्वेष्यत्वापराधेन कुपित, कथं त्वां प्रसादयामि ॥] काचित् कान्तकृतानुनयेऽपि यदा न प्रसीदति तदा तदीयद्वेषदोषमुद्भाव्येदमाह ।

१W. पुहइं अमहिलपुरिसं व मण्णंति. २W. गच्छइ; ३W. वेसत्तणावराहे कुविअं.

W489 ५२३) दीससि पियाइँ जंपसि सब्भावो सुहय इत्तिउ च्चेय ।
फाले¹ऊण य हिययं साहसु को दावए कस्स ॥२३॥

W491 ५२४) भग्गपियसंगमं कित्तियं व जुन्हाजलं नहसरम्मि ।
जं² चंदपणालोज्झरणिवहपडंतं न निट्ठाइ ॥२४॥

अन्नावराहकुविओ अन्येनापराधेन वाक्पारुष्यादिना कुपितस्त्वं जह तह कालेण वच्चसि पसायं यथा तथा कालेन व्रजसि प्रसादम् । वेसत्तणावराहेण कुविय द्वेष्यत्वापराधेन कुपित कह तं पसाएमि कथं त्वां प्रसादयामि । न कथंचिदित्यर्थः ॥५२२॥

५२३) वनदेवस्य । [दृश्यसे प्रियाणि जल्पसि सद्भावः सुभगैतावानेव । पाटयित्वा हृदयं कथय को दर्शयति कस्य ॥] दीससि पियाइँ जंपसि दृश्यसे प्रियाणि जल्पसि,सब्भावो सुहय इत्तिउ च्चेय सद्भावः सुभग एतावन्मात्र एव । यतः फालेऊण य हिययं पाटयित्वा हृदयं साहसु को दावए कस्स कथय को दर्शयति कस्य । न कश्चित् कस्यापि दर्शयतीत्यर्थः । दक्षिणो नायकः ॥५२३॥

५२४) राघवस्य । [भग्नप्रियसंगमं कियत्प्रमाणमिव ज्योत्स्नाजलं नभःसरसि । यच्चन्द्रप्रणालनिर्झरनिवहपतन्न निस्तिष्ठति ॥] काचित् पूर्णेन्दुद्युतिद्योतितदिङ्मुखायां निशायां प्रियतमसङ्गमलभमाना स्वगतमिदमाह । कित्तियं व जुन्हाजलं नहसरम्भि कियत्प्रमाणमिव ज्योत्स्नासलिलं नभःसरसि । कीदृशम् । भग्गपियसंगमं भग्नप्रियसंगमम् । किं तु (?) जं चंदपणालोज्झरणिवहपडंतं यच्चन्द्रप्रणालनिर्झरनिवहेन पतत्, न निट्ठाइ न निरवशेषं भवति । संतुडन्तेनापि समासः (?) प्राकृते दृश्यत इति । रूपकम् अलंकारः । कित्तियं व इत्युपमेयशब्दो (?) वाक्यालंकारमात्रे, यथा—किमिव हि मधुराणां मण्डनं नाकृतीनाम् (शाकुन्तल, १,१९) ॥५२४॥

१W. फालेइऊण हिअअं २W. चंदअरपणालणिज्झरणिवह०.

W492 ५२५) सुंदरजुवाणजणसंकुले वि तुह दंसणं विमग्गंती।
रण्णे[1]म्मि व भमइ वराइयाएँ दिट्ठी अणुव्वाया ॥२५॥
W481 ५२६) जइ न छिवसि पुप्फवइं पुरओ ता कीस वारिओ ठासि।
छिक्को[2] सि चुलुचुलंतेहिँ पसरिएहिँ अम्ह हत्थेहिं ॥२६॥
W482 ५२७) उज्जग्गिरयकसाइयगरुयच्छी[3] मोहमंडणविलक्खा।
गामणि[4]सुया विवज्जइ अवेज्जए कस्स साहेमो ॥२७॥

५२५) दुरामर्षस्य। [सुन्दरयुवजनसंकुलेऽपि तव दर्शनं विमार्गयन्ती। अरण्य इव भ्राम्यति वराक्या दृष्टिर्बाष्पाप्लुता ॥] काचित् कस्याश्चिद् अनुरागातिशयं प्रकाशयितुमिदमाह। वराइयाएँ दिट्ठी भमइ वराकिकाया दृष्टिर्भ्राम्यति। किं कुर्वती। तुह दंसणं विमग्गंती तव दर्शनं विमार्गयन्ती। कीदृशी दृष्टिः। अणुव्वाया सरसा बाष्पाप्लुतेति यावत्। कदाचिदन्यो मनोहरमूर्तिर्न भवतीत्याह। सुंदरजुवाणजणसंकुले वि सुन्दरयुवजननिरन्तरेऽपि स्थाने। कस्मिन्निव भ्राम्यति। रण्णम्मि व अरण्य इव शून्ये, त्वदालोकनोत्कण्ठा दृष्टिः ससंभ्रमं भ्राम्यति। एतदुक्तं भवति। सा त्वयि रक्ता, त्वं तत्प्रेम प्रति शिथिल इति। उपमाऽलंकारः। आवेगो नाम व्यभिचारी भावः ॥५२५॥

५२६) [यदि न स्पृशसि पुष्पवतीं पुरतस्तत् कस्माद् वारितस्तिष्ठसि। स्पृष्टोऽसि कण्डूलाभ्यां प्रसारिताभ्यामस्माकं हस्ताभ्याम् ॥] गतार्था गाथा। चुलुचुलंतेहिँ कण्डूलैः। चपलता व्यभिचारी, रतिः स्थायी भावः। लीला चेष्टालंकारः। लक्ष्मभ्यः सूचितं निह्नवश्च विक्रीडितं मृगादीनाम् (? मृगाक्षीणाम् ?)। सुरतस्पर्शनमिथ्याभियोगसंशल्यसंरोधाः (?) ॥ लीला विरोधी इति (?) ॥५२६॥

५२७) परमेश्वरस्य। [उज्जागरकषायितगुर्वक्षी मोघमण्डनविलक्षा। ग्रामणीसुता विपद्यतेऽवैद्यके कस्य कथयामः] ॥५२७॥

१W. रण्णे व भमइ दिट्ठी वराइआए समुव्विग्गा; २W. छित्तो सि चुलचुलंतेहि धाविऊण म्ह हत्थेहिं; ३W. उज्जागरअ; ४W. लज्जइ लज्जालुइणी सा सुहअ सहीण वि वराई.

W493 ५२८) अइकोवणा वि सासू रुयाविया गयवईएँ सुन्हाए ।
पायवडणोणयाए दोसु वि गलिएसु वलएसु ॥२८॥
W501 ५२९) आउच्छणणित्थामं जायाएँ मुहं नियच्छमाणेण ।
पहिएण सोयणियलिएण गंतुं चिय न तिण्णं ॥२९॥
W502 ५३०) सूईवेहे मुसलं विच्छुहमाणेण दड्ढलोएण ।
इक्कग्गामे वि पिओ समेहिँ अच्छीहिँ वि न दिट्ठो ॥३०॥

५२८) दुर्लभराजस्य । [अतिकोपनाऽपि श्वश्रू रोदिता गतपतिकया स्नुषया । पाददपतनावनतया द्वयोरपि गलितयोर्वलययोः ॥] अइकोवणा वि सासू रुयाविया अतिकोपनाऽपि श्वश्रूरश्रुमुखी कृता, पायवडियाए पाददपतितया सुन्हाए स्नुषया पुत्रपत्न्या । कथंभूतया । गयवईएँ गतपतिकया । क्व सति रोदिता । दोसु वि गलिएसु द्वयोरपि गलितयोर्वलयोः । कायकार्श्यवशविस्रस्तवलयदर्शनेन "अहो ईदृशीं दशामियं मत्पुत्रस्यार्थे प्राप्ता वर्तते वराकी" इति श्वश्रूरुदश्रुमुखी जातेति तात्पर्यार्थः । लक्ष्यक्रमोद्द्योतितध्वनिप्रभेदे अर्थशक्त्यनुरणनव्यापारव्यङ्ग्यो ध्वनिरलंकारः । पर्यायोक्तिरित्यन्ये ॥५२८॥

५२९) दुघस्य । [आपृच्छननिःस्थामं जायाया मुखं पश्यता । पथिकेन शोकनिगडितेन गन्तुमेव न शक्तम् ॥] जायाएँ मुहं नियच्छमाणेण जायाया मुखं निरीक्षमाणेन, गंतुं चिय न तिण्णं गन्तुमेव न शक्तम् । कीदृशम् । आउच्छणणित्थामं पुनर्दर्शनप्रश्नेन निःस्थामं निःसहम् । कीदृशेन पथिकेन । सोयणियलिएण शोकनिगडकलितेन । अत एव गन्तुं न पारितम् । आउच्छणं पुनर्दर्शनप्रश्नः । थामं बलम् । नियच्छणं दर्शनम् । तरति शक्नोति । हेतुरलंकारः ॥५२९॥

५३०) बुद्धभट्टस्य । [सूचीवेधे मुशलं विक्षिपता दग्धलोकेन । एकग्रामेऽपि प्रियः समाभ्यामक्षिभ्यामपि न दृष्टः ॥] इक्कग्गामे वि पिओ

---

१ W. विच्छाअं; २ W. सोअणिअलाविएण; ३ W. ण इट्ठं.

W503 ५३१) अज्जं पि ताव इक्कं मा मं वारेहि पियसहि रुयंतिं ।
कल्लं पुण तम्मि गए जइ न मरिस्सं न रोइस्सं[1] ॥३१॥
W504 ५३२) "ए एहि"[2] वाहरंतम्मि पिययमे उँदुमदीएँ[3] इत्ताहे ।
ओणँयमुहोएँ[4] दिन्नो विउणो वेढो नियंबस्स ॥३२॥

एकग्रामेऽपि प्रियः समेहिँ अच्छीहिँ वि न दिट्ठो समाभ्यामक्षिभ्यां न दृष्टः । केन कारणेन । सूईवेहे मुशलं विक्षिपमाणेन दग्धलोकेन । एतदुक्तं भवति । अयं दग्धलोकः सूक्ष्मसूचोसुषिरेण मुशलं प्रवेशयन्, छिद्रलवं लब्ध्वा, असंभाव्यमपि भावयतोति एकग्रामेऽपि स समया दृशाऽभीष्टो न दृष्ट इति । अन्याय (?) प्रगल्भा स्त्री । हेतुरलंकारः ॥५३०॥

५३१) विक्रान्तभानोः । [अद्यापि तावदेकं मा मां वारय प्रियसखि रुदतीम् । कल्यं पुनस्तस्मिन्गते यदि न मरिष्यामि न रोदिष्यामि ॥] काचित् प्रातः प्रियो व्रजिष्यतीत्याकर्ण्य सखीभिर्निवार्यमाणा इदमाह । अज्जं पि ताव इक्कं अद्यैव तावदेकं मा मं वारेहि पियसहि रुयंतिं मा मां वारय प्रियसखि रुदतीम् । कल्लं पुण तम्मि गए कल्यदिने पुनस्तस्मिन् प्रिये प्रोषिते जइ न मरिस्सं न रोइस्सं यदि न मरिष्यामि तदा न रोदिष्यामि । मरिष्याम्येवेति भावः ॥५३१॥

५३२) शिवराजस्य । ["अयि एहि" व्याहरति प्रियतम ऋतुमत्या "इदानीम्" । अवनतमुख्या दत्तो द्विगुणो वेष्टो नितम्बस्य ॥] उदुमईएँ विउणो वेढो नियंबस्स दिन्नो ऋतुमत्या नायिकया द्विगुणावेष्टितं नितम्बस्य दत्तम् । कथंभूतया तया । ओणयमुहीएँ अवनतवक्त्रया । क्व सति । "इत्ताहे ए एहि" पिययमे वाहरंतम्मि इदैहोति प्रियतमे व्याहरति सति । द्विगुणावेष्टितवस्त्रनितम्बतया रजस्वलाऽस्मीति ज्ञापितं भवति । उदुमई इति ऋत्वादेरुत्वे (वररुचि, १,२९) रूपम् । ज्ञापकहेतुसूक्ष्माभ्यां संकरालंकारः ॥५३२॥

---

१ W. जइ ण मुआ ता ण रोइस्सं; २ W. एहि त्ति वाहरंतम्मि; ३ W. दूमिआइ इत्ताहे ४ W. विउणावेढिअजहणत्थलाइ लज्जोणअं हसिअं.

W505 ५३३) मारेसि कं न मुद्धे इमेण रत्तंततिक्खविसमेण।
भुमेयलयाचावविणिग्गएण नयणद्धभल्लेण ॥३३॥
W720 ५३४) दिट्ठीऍ जं न दिट्ठो सरलसहवाऍ जं न आलत्तो।
उवयारो जं न कओ तं चिय कलियं छइल्लेहिं ॥३४॥

५३३) सलवणस्य। [मारयसि कं न मुग्धे अनेन रक्तान्ततीक्ष्णविषमेण। भ्रूलताचापविनिर्गतेन नयनार्धभल्लेन।] हे मुद्धे मुग्धे, इमेण नयणद्धभल्लेण कं न मारेसि अनेन नयनार्धभल्लेन कं न मारयसि। कीदृशेन। भुमयलयाचावविणिग्गएण भ्रूलताचापविनिर्गतेन। भूयश्च कीदृशेन। रत्तंततिक्खविसमेण रक्तान्ततीक्ष्णविषमेण। एवंभूतेन नयनार्धबाणेन कं न मारयसि, सर्वमेव मारयसीति। तीक्ष्णपक्ष्मलकटाक्षविक्षेपास्तव दुस्सहा इति भल्लतुल्यत्वं तेषाम्। त्वया (अहं सर्वो वा) हत इत्यर्थः। रूपकमलंकारः। उपमैव तिरोभूतभेदा रूपकमिष्यते (काव्यादर्श, २,६६) ॥५३३॥

५३४) महिषासुरस्य। [दृष्ट्या यन्न दृष्टः सरलस्वभावया, यन्नालपितः। उपचारो यन्न कृतस्तदेव कलितं छेकैः॥] दिट्ठीऍ जं न दिट्ठो दृष्ट्या यन्न दृष्टः। कीदृश्या। सरलसहावाऍ सरलस्वभावया। जं न आलत्तो यन्नालपितः संभाषितः। उवयारो जं न कओ उपचारो गृहगमनगौरवम् आसनदानादिकं यन्न कृतं, तं चिय कलियं छइल्लेहिं तदेव कलितं ज्ञातं प्राज्ञैः। इयमस्मिन्ननुरक्तेति मा कश्चिदज्ञो जानात्विति, य एव स्वाभिप्रायगोपनोपायस्तस्याः, स एव च्छेकलोकस्य तदीयाशयोन्नयनं जातम्। आकृतिरन्यथाभावाद अन्यथात्वं सूचयति। यत्खलु दर्शनयोग्यस्य यूनोऽदर्शनं, यच्च आलाप्यस्यानालपनं, यदुपचार्यस्याप्यनुपचारः, तेन ज्ञातम् इयमस्मिन्ननुरक्तेति। ज्ञापकहेत्वनुमानयोः क्षीरनीरन्यायेन संकरोऽलंकारः ॥५३४॥

१W. भुलआचावविणिग्गअतिक्खअरद्धच्छिभल्लेण; २W. दिट्ठाइ; ३W. जं च णालविओ.

W506 ५३५) तुह दंसणसत्तण्हा सद्दं सोऊण निग्गया जाइं ।
ताइं तइ वोलीणे पयाइँ वोढव्वया जाया ॥३५॥

W743 ५३६) भिउडीएं पुलोइस्सं निब्भच्छिस्सं परंमुही हुस्सं ।
जं भणह तं करिस्सं सहीओ जइ तं न पिच्छिस्सं॥३६॥

५३५) प्रवरसेनस्य । [तव दर्शनसतृष्णा शब्दं श्रुत्वा निर्गता यानि । तानि त्वय्यतिक्रान्ते पदानि बोढव्या जाता ॥] काचित् कस्याश्चिन्नायकस्यानुरागं युक्त्या वक्तुमिदमाह । तुह सद्दं सोऊण तव शब्दं श्रुत्वा दंसणसत्तण्हा दर्शनसतृष्णा सतो जाइं पयाइं निग्गया यानि पदानि वेश्मनो बहिर्निर्गता ताइं तइ वोलीणे तानि पदानि त्वयि गते सति वोढव्वया जाया वोढव्या वहनीया जाता । तानि पदानि साऽन्येनानीयतेति भावः । जडता व्यभिचारी भावः । सत्तण्हा इति सेवादिगणपाठाद् द्वित्वम् ॥५३५॥

५३६) अन्धलक्ष्म्याः । [भ्रुकुट्या प्रलोकयिष्यामि निर्भर्त्सयिष्यामि पराङ्मुखी भविष्यामि । यद् भणथ तत्करिष्यामि सख्यो यदि तं न द्रक्ष्यामि ॥] काचित् कृतापराधे प्रिये 'त्वया एवमेवं कर्तव्यम्' इति स्वसख्याऽभिहिता सती इदमाह । हे सहीओ सख्यः, जं भणह तं करिस्सं यद् भणथ तत् करिष्यामि जइ तं न पिच्छिस्सं यदि तं न प्रेक्षिष्ये । किं तद् यत् करिष्यसीत्याह । भिउडीएं पुलोइस्सं भ्रुकुट्या प्रलोकयिष्यामि, निब्भच्छिस्सं निर्भर्त्सयिष्यामि, परंमुही हुस्सं पराङ्मुखी भविष्यामि । तस्मिन् पुनरवलोकिते तद्दर्शनहृतहृदया भ्रूभङ्गनिर्भर्त्सनपृष्ठदानादिकं कर्तुं न शक्नोमीति । उत्तरालंकारः । तस्य लक्षणम्—उत्तरवचनश्रवणाद् इत्यादि (रुद्रट, ७, ९३) ॥५३६॥

१W. दंसणे सतण्हा; २W. तइ वोलीणे ताइं.

W507 ५३७) ईसामच्छररहिएहिँ निव्वियारेहिँ मामि अच्छीहिं ।
इन्हि जणो जणं पिव नियच्छए केह न झिज्जामो ॥३७॥
W612 ५३८) तुह दंसणसंजणिओ ईमीएँ लज्जालुआएँ अणुराओ ।
दुग्गयमणोरहो इवँ हियय च्चिय जाइ परिणामं ॥३८॥
W607 ५३९) वाउव्विल्लियसाहुलि थएसु फुडदंतमंडले ऊरू ।
चडुयारयं पइं मा हु पुत्ति जणहासियं कुणसु ॥३९॥

५३७) [ईर्ष्यामत्सररहिताभ्यां निर्विकाराभ्यां सखि अक्षिभ्याम् । इदानीं जनो जनमिव पश्यति कथं न क्षीयामहे ॥] इन्हि जणो जणं पिव जनः प्रियो जनमिव सामान्यजनमिव नियच्छए मां पश्यति । काभ्याम् । अच्छीहिं अक्षिभ्याम् । कीदृशाभ्याम् । ईसामच्छररहिएहिँ ईर्ष्यया योऽसौ मत्सरः, तेन रहिताभ्याम् । तथा निव्वियारेहिँ निर्विकाराभ्यां निरभिलाषत्वात् । इति कृत्वा कइ न झिज्जामो (कथं न) क्षीयामहे इति ॥५३७॥

५३८) वनकेसरिणः । [तव दर्शनसंजनितोऽस्या लज्जावत्या अनुरागः । दुर्गतमनोरथ इव हृदय एव याति परिणामम् ॥] इमीएँ अणुराओ अस्या अनुरागः हियय च्चिय जाइ परिणामं हृदय एव जरां याति । कथंभूतः । तुह दंसणसंजणिओ तव दर्शनेन जनितः । किंभूतायास्तस्याः । लज्जालुआएँ लज्जावत्याः । यत एवेयं सलज्जा अत एव न प्रकाशयति । क इव । दुग्गयमणोरहो इव । यथा दुर्गतमनोरथो हृदय एव जरां याति तथा तदनुरागः । प्रथमानुरागे साक्षाद्दर्शने गाथेयम् । कन्या नायिका । सा नायकमभियुङ्क्ते स्वयं न विदिताशया सखी त्वस्याः । स्वयंभूतां तदभिलिखितं तां च सलज्जेति धिकुर्यात् (?) ॥ उपमालंकारः ॥५३८॥

५३९) चुल्लोडकस्य । [वातोद्वेल्लितवस्त्रे स्थगय स्फुटदन्तमण्डलावूरू । चटुकारकं पतिं मा खलु पुत्रि जनहसितं कुरु ॥] गतार्था

१W. कुह. २W. दंसणेण जणिओ; ३W इमीअ; ४W. विअ;
५ W. फुडदंतनमंडलं जहणं.

W508 ५४०) वाउद्धयसिययविहाविओरुदिट्ठेण दंतमग्गेण ।
वहुमाया तोसिज्जइ निहाणकलसस्स व मुहेण ॥४०॥
W758 ५४१) डहिऊण सयलरण्णं अग्गी समविसमलंघणुव्वाओ ।
तडलंबंततणेहिं तिसिउ व्व नइं समोयरइ ॥४१॥
W510 ५४२) अन्नं पि किं पि पाविहिसि मूढ मा तम्म दुक्खमित्तेण ।
हियय पराहीणजणं महंत तुह कित्तियं एयं ॥४२॥

गाथा । साहुल्लो वस्त्रम् । द्व (?) वाहु (? चाटु) कारकम् इति कृत्वा द्वित्वादि नाटद्वेष्ययोधकर्मणि णन्तात्स्वार्थे....त्यये (?) रूपम् ॥५३९॥

५४०) रेहायाः (? रोहायाः) । [वातोद्धूतसिचयविभावितोरुदष्टेन दन्तमार्गेण । वधूमाता तोष्यते निधानकलशस्येव मुखेन ॥] वहुमाया तोसिज्जइ वधूमाता तोष्यते । केन । दंतमग्गेण दन्तमार्गेण, दशनाङ्केनेति यावत् । कथंभूतेन वाउद्धुयसिययविहाविओरुदिट्ठेण वातोद्धूतसिचयविभावितोरुदष्टेन । केनेव । निहाणकलसस्स व मुहेण निधानकलशस्येव मुखेन । यथा हि निधानकुम्भमुखावेक्षणे सुखं संपद्यते, तथा वध्वा ऊरुदण्डदत्तदन्तव्रणदर्शनेनेत्यर्थः । उपमालंकारः ॥५४०॥

५४१) संभ्रमस्य । [दग्ध्वा सकलारण्यम् अग्निः समविषमलङ्घनोद्वानः । तटलम्बमानतृणैस्तृषित इव नदीं समवतरति ॥] अग्गी नइं समोयरइ[1] अग्निर्नदीं समवतरति । कैः । तडलंबंततणेहिं तटलम्बमानतृणैः । किं कृत्वा । डहिऊण सयलरण्णं दग्ध्वा सकलमरण्यम् । कीदृशोऽग्निः । समविसमलंघणुव्वाओ समविषमलङ्घनखिन्नः । ततश्च क इव । तिसिउ व्व तृषित इव । यः खलु विकटाटवीमटति स समविषमदेशसंचरणक्लमक्लान्तकायतया तृषितः पानाय तटिनीतटमवतरति । संभावनानुमानेनोत्प्रेक्षालंकारः (वक्रोक्तिजीवित ३,२५-२७) ॥ ५४१ ॥

५४२) केशवस्य । [अन्यदपि किमपि प्राप्स्यसि मूढ मा ताम्य दुःखमात्रेण । हृदय पराधीनजनं वाञ्छत्, तव कियदेतत् ॥] हे मूढ

---

१ W. समोसरइ.

W511 ५४३) जीसे वेसो पंसुल अहिययरं सा वि वल्लहा होइ ।
इय भाविऊण असई वीससइ न दुट्ठहिययस्स ॥४३॥

W512 ५४४) सा आम सुहय गुणरूवसोहिरी आम निग्गुणा अम्हे ।
जइ तीए न सरिच्छो ता किं सव्वो जणो मरउ ॥४४॥

हियय मूढ हृदय, पराहीणजणं महंत मा तम्म पराधीनं जनमभिलषत्, मा ताम्य । केन । दुक्खमित्तेण अमुना दुःखमात्रेण । अन्नं पि किं पि पाविहिसि अन्यदपि किमपि प्राप्स्यसि । अतः तुह कित्तियं एयं तव कियदेतत् । अतोऽप्यधिकतरं दुःखं लप्स्यस इत्यर्थः । एतदुक्तं भवति । दुर्लभजनानुरागं मा कुर्वीथाः । आक्षेपोऽलंकारः । ध्वनिकारमते तु विवक्षितान्यपरवाच्यस्य लक्ष्यक्रमोद्द्योतस्य अर्थशक्त्यनुरणनरूपव्यङ्ग्यो ध्वनेः प्रभेदः । पर्याय इत्यन्ये । प्रध्वस्तो (?) विप्रलम्भशृङ्गारः ॥५४२ ॥

५४३) जयदासस्य । [यस्याः द्वेष्यः पांसुल, अधिकतरं साऽपि वल्लभा भवति । इति भावयित्वाऽसती विश्वसिति न दुष्टहृदयस्य ॥] इय भाविऊण असई इति ज्ञात्वा असती वीससइ न दुट्ठहिययस्स विश्वसिति न दुष्टहृदयस्य । किं तदित्याह । जीसे वेसो पंसुल हे पांसुल यस्यास्त्वं द्वेष्यः अहिययरं सा वि वल्लहा होइ अधिकतरं साऽपि वल्लभा भवति । अहं पुनरनुरागिणीति प्रिया न भविष्यामि । न चेति (?) त्वामनुधावतः स्वहृदयस्यापि न विश्वसितीति । सा त्वय्यनुरक्ता, त्वं पुनरन्यस्यां सा त्वन्यस्मिन्ननुरक्तेति तात्पर्यार्थः । वेसो द्वेष्यः । पंसुलो पुंश्चलः । इय इति । इतेस्तेः इति इतेः इतो अत्वे रूपम् । (वररुचि , १,१४) ॥ ५४३ ॥

५४४) जयदेवस्य । [सा कामं सुभग गुणरूपशोभिनी, कामं निर्गुणा वयम् । यदि तस्या न सदृक्षस्तत् किं सर्वो जनो म्रियताम् ॥] गतार्था गाथा । आम इति संप्रतिपत्तौ । शब्दालंकारः काकुवक्रोक्तिः ॥५४४॥

---

१ W. वेसो सि जीअ पंसुल; २ W. सा हु वल्लहा तुज्झ; ३ W. जाणिऊण वि मए ण ईसियं दड्ढपेम्मस्स; ४ W. अहअं; ५ W. भण तीअ जो ण सरिसो किं सो सव्वो.

W513 ५४५) संतमसंतं दुक्खं सुहं च जाओ घरस्स जाणंति ।
ताउ च्चिय महिलाओ सेसाउ जरा मणुस्साणं ॥४५॥

W514 ५४६) हसिएहिँ उवालंभा पेच्चुवयारेहिँ खिज्जियव्वाइं ।
अंसूहिँ भंडणाइं एसो मग्गो सुमहिलाणं ॥४६॥

W515 ५४७) उल्लावो मा दिज्जउ लोअविरुद्ध त्ति नवर काऊण ।
समुहावडिए को वेरिए वि दिट्ठिं न पाडेइ ॥४७॥

५४५) जयसिंहस्य । [सदसद् दुःखं सुखं च या गृहस्य जानन्ति ता एव महिलाः शेषा जरा मनुष्याणाम् ॥] निगदव्याख्यातेयं गाथा ॥ ५४५ ॥

५४६) साधुवलितस्य । [हसितैरुपालम्भाः प्रत्युपकारैः खेदितव्यानि । अश्रुभिः कलहा एष मार्गः सुमहिलानाम् ॥] एष मार्गः सुमहिलानाम् । कोऽसावित्याह । हसिएहिँ उवालंभा हसितैरुपालम्भाः, पच्चुवयारेहिँ खिज्जियव्वाइं प्रत्युपकारैः खेदितव्यानि, अंसूहिँ भंडणाइं अश्रुभिः युद्धानि (?कलहाः) । एसो मग्गो सुमहिलाणं एषा एव स्थितिः सुमहिलानाम् ॥ ५४६ ॥

५४७) सुमतेः । [उल्लापो मा दीयतां लोकविरुद्ध इति केवलं कृत्वा । संमुखापतिते को वैरिण्यपि दृष्टिं न पातयति ॥] काचिद् हृदयदयितम् अवधीर्य व्रजन्तम् इदमाह । लोकविरुद्ध इति परललनालोको लोकविरुद्ध इति कृत्वा केवलम् उल्लापो मा दीयताम् । समुहावडिए को वेरिए वि दिट्ठिं न पाडेइ संमुखापतिते को वैरिण्यपि दृष्टिं न पातयति, अपि तु पातयतीत्यर्थः । अन्योढा नायिका । अन्योढाऽपि हि कन्या कर्तव्यं सर्वम् उद्धतं कुरुते । दुरवस्था दयितं तु स्वयमभियुङ्क्ते स्मरावेशात् ॥५४७॥

१W. अच्चुवयारेहि; २W. लोअविरुद्धं ति णाम काऊण, ३W. को उण बेसे;

W516 ५४८) जा तणुयाअइ सा तुह कएण किं, जेण पुच्छसि हसंतो ।
अह गिम्हे मह पँयइ त्ति एयँ भणिउं चिय परुन्ना ॥४८॥
W516 ५४९) साहीणपिययमो दुग्गओ वि मन्नइ कयत्थमप्पाणं ।
पियरहिओ उँण पुहईवई वि अकयत्थओ चेव ॥४९॥
W517 ५५०) कि रुयसि किँ किसायसि किं कुप्पसि सुयणु इक्कमिक्कस्स ।
पिँम्मं विसंवयंतं साहसु को रुंभिउं तरइ ॥५०॥

५४८) ब्रह्मभट्टस्य । [या तनूयते सा तव कृतेन किं, येन पृच्छसि हसन् । असौ ग्रीष्मे मम प्रकृतिरित्येवं भणित्वैव प्ररुदिता ॥] काचित् केनचित् सोपहासं किमिति कृशाङ्गी त्वम् इति पृष्टा सती इदमाह । जा तणुयाअइ सा तुह कएण किं, या तनूयते सा तव कृते किं, जेण पुच्छसि हसंतो येन पृच्छसि हसन् । किमर्थं तर्हि तनूयस इत्याह । अह गिम्हे मह पयइ त्ति असौ ग्रीष्मे मम प्रकृतिरिति एवं भणिउं चिय परुन्ना एवं भणित्वैव प्ररुदिता रोदितुं प्रवृत्तेति । तदप्राप्तिरेव रुदितस्य हेतुः ॥५४८॥

५४९) गणपतेः । [स्वाधीनप्रियतमो दुर्गतोऽपि मन्यते कृतार्थमात्मानम् । प्रियारहितः पुनः पृथिवीपतिरप्यकृतार्थ एव ॥] गतार्था गाथा ॥५४९॥

५५०) गिरिसुतायाः । [किं रोदिषि किं कृशायसे किं कुप्यसि सुतनु एकैकस्य । प्रेम विसंवदत् कथय को रोद्धुं शक्नोति ॥] काचित् स्नेहानुबन्धबुद्धिं विधुरयति प्रिये दुरवस्थां स्वसखीं शिक्षयित्वा (? शिक्षयितुम्) इदमाह । किं रुयसि किं किसायसि किं रोदिषि किं कृशायसे, किं कुप्पसि सुयणु इक्कमिक्कस्स किं कुप्यसि सुतनु एकैकस्य । यतः पिम्मं विसंवयंतं प्रेम विसंवदत् साहसु को रुंभिउं तरइ साधय कथय को वा रोद्धुं शक्नोति । न कोऽपीति । स........चैतत् । प्रेम्णो यदुत मृणालतन्तुपुच्छगच्छिदुरंतकालान्तरमवति । इत इति (?) । आक्षेपोऽलंकारः ॥५५०॥

१W. जं; २W. पयई एव्वं भणिऊण ओरुण्णा; ३W पुण. पुहविं पि पाविउं दुग्गओ च्चेअ; ४W. किं व सोअसि; ५W. पेम्मं विसं व विसमं;

W518 ५५१) ते य जुवाणा सा गामसंपया तं च अम्ह तारुण्णं ।
अक्खाणयं विय जणो कहेइ अम्हे वि तं सुणिमो ॥५१॥

W519 ५५२) बाहुल्लफुरियगंडाहराऍ भणियं विलक्खहसिरीए ।
अज्ज वि किं रूसिज्जइ सवहावत्थं गॅए पिम्मे ॥५२॥

W520 ५५३) वण्णग्घयतुप्पमुहिं विँ जो ममं आयरेण चुंबंतो ।
सो इन्हिं भूसणभूसियं पि अलसायइ छिवंतो ॥५३॥

W551 ५५४) सा निविडपाउयंगि त्ति माउया मा हु परिहरिज्जासु ।
पँच्छाणवत्थजुयलं रयम्मि अवणिज्जइ च्चेय ॥५४॥

५५१) श्रीअभिमानस्य । [ते च युवानः सा ग्रामसंपत् तच्चास्माकं तारुण्यम् । आख्यानकमिव जनः कथयति, वयमपि तच्छृणुमः ॥] गतार्था गाथा । अक्खाणयं वृत्तान्तः ॥५५१॥

५५२) हालस्य । [बाष्पार्द्रस्फुरितगण्डाधरया भणितं विलक्षहसनशीलया । अद्यापि किं रुष्यते शपथावस्थां गते प्रेम्णि ।] कयाचित् बाहुल्लफुरियगंडाहराए भणियं बाष्पार्द्रकपोलया स्फुरिताधरया च भणितम् । किंभूतया । विलक्खहसिरीए विलक्षहसनशीलया । किं भणितमित्याह । अज्ज वि किं रूसिज्जइ अद्यापि किं रुष्यते । क्व सति । सवहावत्थं गए पिम्मे शपथावस्थां गते प्रेम्णि । स हि मां सद्दुज्झितस्नेहो मिथ्याशपथैः प्रत्याययति अतः कृतं मानेनेति भावः । उल्लं आर्द्रम् । आक्षेपोऽलंकारः ॥५५२॥

५५३) रथवाहनस्य । [वर्णघृतलिप्तमुखीमपि यो मामादरेण चुम्बन् (आसीत्) । स इदानीं भूषणभूषितामप्यलसायते स्पृशन् ॥] गतार्था गाथा ॥ ५५३ ॥

५५४) पन्नाविल्लिकस्य । [सा निबिडप्रावृताङ्गीति मातर्मा खलु परिहरेः । प्रच्छादनवस्त्रयुगलं रतेऽपनीयत एव ॥] ॥५५४॥

१W. अक्खाणअं व लोओ; २W. बाहोहभरिअगंडाहराइ; ३W. गअं पेम्मं; ४W. जो मं अइआअरेण; ५W. एण्हिं सो; ६W. णीलवडपाउअंगि त्ति मा हु णं परिहरिज्जासु; ७W. पट्टंसुअं पि णद्धं.

W522 ५५५) सच्चं कलहे कलहे सुरयारंभा पुणो नवा हुंति ।
माणो उण माणंसिणि गेरुयं पिम्मं विणासेइ ॥५५॥

W523 ५५६) माणुम्मत्ताएँ मए कैलहं निक्कारणं कुणंतीए ।
अद्दंसणेण पिम्मं विहाडियं पोढवाएण ॥५६॥

W524 ५५७) अणुऊलं वत्तुं जे दाउं अइवल्लहं पि वेसे वि ।
कुवियं य पसाएउं सिक्खउ लोओ तुमाहिंतो ॥५७॥

५५५) सरस्वत्याः । [सत्य कलहे कलहे सुरतारम्भाः पुनर्नवा भवन्ति । मानः पुनर्मनस्विनि गुरुकं प्रेम विनाशयति ॥] काचित् प्रयतमानां सखीं शिक्षयितुमिदमाह । सत्यं कलहे कलहे सुरतारम्भाः पुनर्नवा भवन्ति, मानः पुनर्मनस्विनि गुरुकं प्रेम प्रणाशयति । तस्मात् केलिकलहे कामचारः, मानं तु मा कार्षीरिति । माणंसिणो इति समृद्ध्यादित्वाद् दीर्घत्वम् (वररुचि, १,२) । पिम्म इतिप्रेमशब्दस्य सेवादित्वाद् द्वित्वम् (वररुचि, ३,५८) । आक्षेपपर्यायोक्तिभ्यां संसृष्टिरलंकारः । सखीकर्म शिक्षा ॥५५५॥

५५६) कालदेवस्य । [मानोन्मत्तया मया कलहं निष्कारणं कुर्वत्या । अदर्शनेन प्रेम विघटितं प्रौढवादेन ॥] गतार्था गाथा ॥५५६॥

५५७) अनुरागस्य । [अनुकूलं वक्तुं वै दर्शयितुमतिवाल्लभ्यमपि द्वेष्येऽपि । कुपितां च प्रसादयितुं शिक्षतां लोकस्त्वत्तः ॥] काचिन्मानवती स्वबुद्धिवैदग्ध्यबलेन प्रसादयितुमुद्यतं दयितनभिनन्दन्तीदमाह । सिक्खउ लोओ तुमाहिंतो शिक्षतां लोकस्त्वत्तः । किं तदित्याह । अणुऊलं वत्तुं अनुकूलं वक्तुम् । दाउं अइवल्लहं पि वेसे वि दर्शयितुमातिवाल्लभ्यं द्वेष्येऽपि । कुवियं य पसाएउं कुपितां च प्रसादयितुम् । अत एव शिक्षतां लोकः ।

१W. गरुओ पेम्मं; २W. अकारणं कारणं कुणंतीए; ३W. विणासिअं; ४W. अणुऊलं चिअ वोत्तुं; ५W. बहुवल्लह वल्लहे वि वेसे वि; ६W. सिक्खइ.

W759 ५५८) स च्चिय रामेउ तुमं पंडियेइत्तं, अलं म्ह रमिएण।
सब्भावबाहिराइं जा जाणइ अट्टमट्टाइं ॥५८॥

W525 ५५९) लज्जा चत्ता सीलं च खंडियं अयसघोसणा दिन्ना।
जस्स कएणं पियसहि स च्चेय जणो जणो जाओ ॥५९॥

त्वमेव केवलम् एतज्जानासीत्यर्थः। जे इति इजेराः पादपूरणे (हेमचन्द्र, ८,२,२१७)। तुमाहिंतो इति पञ्चम्येकवचनस्यापि दृश्यत इति केचित् ॥५५७॥

५५८) कलितसिंहस्य। [सैव रमयतु त्वां पण्डितंमन्यम् अलमस्माकं रमितेन। सद्भावबाह्यानि या जानाति नानाविज्ञानानि॥] स च्चिय रामेउ तुमं सैव रामयतु त्वाम्। कथंभूतम्। पंडियइत्तं पण्डितंमन्यम्। अलं म्ह रमिएण अलमस्माकं रमितेन। काऽपावित्याह। जा जाणइ अट्टमट्टाइं या जानाति नानाविज्ञानानि। कथंभूतानि। सब्भावबाहिराइं सद्भावबाह्यानि कृत्रिमाणीत्यर्थः। पंडियइत्तं इति उल्लुण्ठायाम्। अकृत्यं, यत् खलु कृतकरतिशिल्पकल्पनया तुष्यसि, न तु सुरतेन स्वाभाविकेनेति भावः। वागनुभावो व्यङ्ग्यः (?)। ईर्ष्यामर्षौ संचारिणौ भावौ। रतिः स्थायी भावः। मानो विप्रलम्भभेदः। मध्या नायिका। अट्टमट्टाइं लोकोक्तिः ॥५५८॥

५५९) नीलमेघस्य। [लज्जा त्यक्ता शीलं च खण्डितमयशोघोषणा दत्ता। यस्य कृते प्रियसखि स एव जनो जनो जातः॥] हे पियसहि प्रियसखि, स च्चेय जणो जणो जाओ स एव जनो जनो जातः। कोऽसावित्याह। जस्स कएणं यस्यार्थे लज्जा चत्ता त्रपा त्यक्ता अयसघोसणा दिन्ना अयशःपटहो दत्तः। सोऽपि सामान्यजन इव मयि परायत्तो (? परावृत्तो) जात इत्यर्थः ॥५५९॥

---

१ W. पंडिय णिच्चं.

W582 ५६०) कित्तियमित्तं होहिइ सोहग्गं पिययमस्स भमिरस्स ।
महिलामयणछुहाउरकडक्खपच्चक्खघिप्पंतं ॥६०॥

W583 ५६१) धणियमुवऊहयम्हे कुक्कुडसद्देण झत्ति पडिउद्धो ।
परघरवसइं सुमरिय निययम्मि घरम्मि मा भाहि ॥६१॥

५६०) नारीगणस्य (?) [कियन्मात्रं भविष्यति सौभाग्यं प्रियतमस्य भ्रमणशीलस्य । महिलामदनक्षुधातुरकटाक्षप्रत्यक्षगृह्यमाणम् ॥] काचित् स्वभर्तुः सौभाग्यं भङ्ग्याभिधातुमिदमाह । कित्तियमित्तं होहिइ सोहग्गं कियन्मात्रं भविष्यति सौभाग्यम् । कस्य । पिययमस्स प्रेयसः । कीदृशस्य । भमिरस्स भ्रमणशीलस्य । किंभूतं सौभाग्यम् । मयणछुहाउरकडक्खपच्चक्खघिप्पंतं मदनरूपा या क्षुधा तया आतुरा या महिलास्तासां कटाक्षैः प्रत्यक्षं गृह्यमाणम् । तत् कियन्मात्रं भविष्यति । अयमस्मद्भर्ता भ्राम्यन् सकलकटाक्षपातैः पीयत इति रूपातिशयवर्णनपरेयमुक्तिः । पर्यायोक्तिरलंकारः । ध्वनिकारमतेन तु विवक्षितान्यपरवाच्यो अलक्ष्यक्रमोद्द्योतो ध्वनिप्रभेदः ॥५६०॥

५६१) काढिल्लकस्य । [गाढमुपगूहस्वास्मान् कुक्कुटशब्देन झटिति प्रतिबुद्धः । परगृहवसतिं स्मृत्वा निजकेऽपि गृहे मा भैषीः ॥]धणियमुवऊहयम्हे गाढमवगूहयस्वास्मान् । कुक्कुडसद्देण झत्ति पडिउद्धो कुक्कुटशब्देन झगिति प्रतिबुद्धः । परघरवसइं सुमरिय निययम्मि घरम्मि मा भाहि परगृहवसतिरात्रेति च स्मृत्वा निजकेऽपि गृहे परभवनभ्रान्त्या मा भैषीरिति पारजारिकत्वं युक्त्या पत्युरुक्तं भवतीति । धणियं गाढम् ॥५६१॥

१W. छुहाउल; २.W०विक्खेव; ३W.णिअघणिअं उवऊहसु; ४.W.परवसहिवाससंकिर निअए वि घरम्मि मा भासु.

W550 ५६२) वोडसुणयं विवन्नं अत्तं मत्तं पहेणयसुराए।
फलियं च मोडियं महिसएण को तस्स साहिज्ज ॥६२॥
W577 ५६३) चोरा सभयसयण्हा पुणो पुणो पेसयंति दिट्ठीओ।
अहिरक्खियणिहिकलस व्व पोंक्कवइयाथणुच्छंगे ॥६३॥

५६२) अन्ध्रलक्ष्म्याः। [दुष्टश्वानं विपन्नं श्वश्रूं मत्ताम् उत्सवसुरया। द्वारपिधानं च मोटितं महिषेण कस्तस्य कथयेत्॥] को तस्स साहिज्ज कस्तस्य कथयेत्। किं तदित्याह। वोडसुणयं विवन्नं वोडाभिधानं श्वानं विपन्नम्। किमेतावदेव। नेत्याह। अत्तं मत्तं पहेणयसुराए अत्तां (श्वश्रूं) मत्तामुत्सवसुरया। फलियं च मोडिअं महिसएण फलिहकं (? परिघं) च मर्दितं महिषेणेति कस्तस्य कथयेत्। एतदुक्तं भवति। प्रतिबन्धवन्ध्यं मद्गृहं वर्तते, तदागम्यतामिति। अत्ता मत्ता (? अत्ता श्वश्रूः)। पहेणयं यदुत्सवदिने गृहे गृहे दीयते। फलियं द्वारे दारुमयं पिधानम्। भावोलंकारो रुद्रटमतेन (रुद्रट,७,३७)। ध्वनिकारमतेन तु विवक्षितान्यपरवाच्यप्रभेदस्यालक्ष्यक्रमस्य अर्थशक्त्यनुरणनरूपव्यापारव्यङ्ग्यो ध्वनिप्रभेदः। असती अन्योढा नायिका ॥५६२॥

५६३) कलिङ्गस्य। [चोराः सभयसतृष्णाः पुनः पुनः प्रेषयन्ति दृष्टीः। अहिरक्षितनिधिकलश इव समर्थपतिकास्तनोत्सङ्गे॥] चोरा पुणो पुणो दिट्ठीओ पेसयन्ति चोराः पुनः पुनर्दृष्टीः प्रेषयन्ति। क्व। पक्कवइयाथणुच्छंगे समर्थपतिकास्तनोत्सङ्गे। कीदृशोर्दृष्टीः। सभयसयण्हा सभयसतृष्णाः। कस्मिन्निव। अहिरक्खियणिहिकलस व्व अहिना सर्पेण रक्षिते निधिकलश इव। यथा हि भुजङ्गरक्षिते निधिकलशे सभयसाभिलाषा दृष्टिर्निपतति तथा समर्थपतिकापयोधरोत्सङ्गे दस्यूनां दृष्टिर्निपततीत्यर्थः। पक्को समर्थः। रतिभययोः स्थायिभावयोः संकरोऽत्र। उपमाऽलंकारः ॥५६३॥

---

१ W.वोडसुणओ विवण्णो अत्ता मत्ता पई वि अण्णत्थो। फडई वि मोडिया महिसएण को कस्स साहेउ. २W. सभअसतण्हं; ३W. पोढवइआ.

W551 ५६४) सकयग्गहरहसुत्ताणियाणणा पियइ पियमुहविइण्णं ।
थोयत्थोयं[1] रोसोसढं व[2] माणंसिणी मइरं ॥६४॥

W578 ५६५) उव्वहइ नवतणंकुररोमंचपसाहियाइँ अंगाइं ।
पाउसलच्छीए पउहरेहि पडिपिल्लिओ विंझो ॥६५॥

५६४) अमर्षस्य । [सकचग्रहरभसोत्तानिताननना पिबति प्रियमुखवितीर्णम् । स्तोकस्तोकं रोषौषधमिव मनस्विनी मदिराम् ॥] माणंसिणो मइरं पियइ मनस्विनी मदिरां पिबति । कथंभूतां मदिराम् । पियमुहविइण्णं प्रियमुखवितीर्णाम् । कीदृशी सा पिबति । सकयग्गहरहसुत्ताणियाणणा सकचग्रहरभसोत्तानिताननना । कथं पिबति । थोयत्थोयं स्तोकस्तोकम् इति क्रियाविशेषणम् । किमिव । रोसोसढं व रोषौषधमिव पिबतीत्यर्थः । उत्प्रेक्षाऽलंकारः । परस्परं प्रियाणां गण्डूषसुरापानमिति वृद्धाचारः । कामिनी नायिका । समानप्रसादनोपायः ॥५६४॥

५६५) हालस्य । [उद्वहति नवतृणाङ्कुररोमाञ्चप्रसाधितान्यङ्गानि । प्रावृड्लक्ष्म्याः पयोधरैः प्रतिप्रेरितो विन्ध्यः ॥] विंझो अंगाइं उव्वहइ विन्ध्योऽङ्गान्युद्वहति । कीदृशानि । नवतणंकुररोमंचपसाहियाइँ नवतृणाङ्कुरा एव रोमाञ्चाः, तैः प्रसाधितानि । कीदृशः । पाउसलच्छीए पउहरेहि पडिपिल्लिओ प्रावृड्लक्ष्म्याः पयोधरैर्मेघैः प्रतिप्रेरितः । यः प्रमदायाः पयोधरैः (! पयोधराभ्याम्) अभ्याहन्यते सोऽनुरागयोगात् पुलकाङ्कुरं वहतीति । अवयवरूपकमलंकारः । ध्वनिकारमतेन पुनरयमेव रूपकध्वनिः । उत्प्रेक्षावयव इत्यन्ये । शृङ्गाराभासोऽयम् । स्थावरत्वाद्विन्ध्याचलस्य । तदुक्तम्– एकानुरागतिर्यक्स्थावरनिर्जीवकाश्रयो यः स्यात् । सोऽपि रसान्तरमिश्रः शृङ्गाराभास एवासौ ॥ ५६५ ॥

१ W. थाअं थोअं; २ W. व उअ मणिणी मइरं.

W579 ५६६) आम बहला वणाली, मुहला जलरंकुणो, जलं सिसिरं ।
अन्नेण[1]ईसु वि, रेवाएँ तह वि अन्ने गुणा के वि ॥६६॥

W760 ५६७) रयणायरस्स साहेमि नम्मए अज्ज मुक्कदक्खिण्णा ।
वेडिस[2]लयाहरंतिल्लमइलिया जं सि पूरेण ॥६७॥

W580 ५६८) एह इमीएँ नियच्छह परिणयमालूरसच्छहे थणए ।
तुंगे सप्पुरिसमणोरह व्व हियए न[3] मायंति ॥६८॥

५६६) इन्द्रकरस्य । [कामं बहला वनाली, मुखराः जलपक्षिणो, जलं शीतम् । अन्यनदीष्वपि, रेवायास्तथाऽपि अन्ये गुणाः केऽपि ॥] गतार्था गाथा । आम इति संप्रतिपत्तौ निपातः । जलरङ्कुर्जलकाकः । रेवा नर्मदा । अन्यापदेशोऽलंकारः ॥ ५६६ ॥

५६७) पालित्तकस्य । [रत्नाकरस्य कथयामि नर्मदेऽद्य मुक्तदाक्षिण्या । मलिनितान्तिकवेतसलतागृहा यदसि पूरेण ॥] काचिदसती निजपय·पूरपङ्कपङ्कितसैकतं संकेतलतागृहं दृष्ट्वा रेवां तरङ्गिणीं तर्जयन्तीदमाह । हे नम्मए नर्मदे, रयणायरस्स साहेमि रत्नाकरस्य कथयामि । किं तदित्याह । अज्ज मुक्कदक्खिण्णा अद्य मुक्तदाक्षिण्या सती पूरेण पयःप्रवाहेण वेडिसलयाहरंतिल्लमइलिया जं सि मलिनीकृतान्तिकवर्तिवेतसलतागृहा त्वमसि । तमेतं तवाविनयं त्वद्भर्तुरम्भोधेः कथयामीति उन्मत्तोक्तिः । इह हि लोके छेकाहीकोन्मत्तापाठमत्तोक्तिभेदतः यदुक्तयो भवन्ति (?) । वेतसशब्दस्य इदीषत्पकस्वप्न इत्यादिना (वररुचि, १,३) अत इत्वे, प्रतिसरवेतसपताकासु डः (वररुचि, २,८) इति तस्य इत्वे च रूपम् । पूर्वनिपातानियमात् मलिनितान्तिकवेतसलतागृहेति मन्तव्यम् । अंतिल्लं अन्तिकम् । वेडिसो वृक्षविशेषः ॥ ५६७ ॥

५६८) स्वामिनः । [एतस्याः प्रेक्षध्वं परिणतबिल्वसदृशौ स्तनौ । तुङ्गौ सत्पुरुषमनोरथा इव हृदये न मातः ॥] एह इमीएँ

१ W. अण्णगईण वि. २ W. वेडिसलयाहरंतेण मिलिया जं सि पूरेण; ३ W. हिअए अमाअंते.

W584 ५६९) खरपवणगलत्थल्लणगिरिकूडावडणभिन्नदेहस्स ।
धुक्कुद्धुएइ हिययं विज्जुलया कालमेहस्स ॥६९ ॥

W585 ५७०) मेहमहिसस्स पिच्छह उयरे सुरचावकोडिभिन्नस्स ।
कंदंतस्स सविंयणं अंत वँ पलंबिया विज्जू ॥७०॥

नियच्छह एत आगच्छत, अस्याः स्तनौ पश्यत यूयम् । कथंभूतौ । परिणयमाउरसच्छहे परिणतबिल्वसदृशौ । गौरववृत्तत्वोक्तिः । पुनश्च कीदृशौ । तुंगे तुङ्गौ । हियए न मायंति हृदये न मातः, पृथुलत्वात् । के इव । सप्पुरिसमणोरह व्व सत्पुरुषमनोरथा इव । तेऽपि हृदये न मान्तीत्यर्थः । परिणतः पक्वः । माउरं बिल्वम् । सच्छहो सदृशः । पिच्छह पश्यत । थणए इति द्वयोरप्यर्थयोः प्राकृते बहुवचनस्य स एवेति एत्वे कृते रूपम् । उत्प्रेक्षालंकारः ॥ ५६८ ॥

५६९) पालित्तकस्य । [खरपवनप्रेरणगिरिकूटापतनभिन्नदेहस्य । धुकधुकायते हृदयं विद्युता कालमेघस्य ॥] धुक्कुद्धुएइ हिययं विज्जुलया धुकधुकायते हृदयमिव विद्युता । कस्य । कालमेहस्स कालमेघस्स । कीदृशस्य । खरपवणगलत्थल्लणगिरिकूडावडणभिन्नदेहस्स खरपवनेन यत् प्रेरणं तेन यद् गिरिकूटे आपतनं गिरिशिखरापातः, तेन भिन्नदेहस्य विदारितवपुषः । यः किल भिन्नदेहो भवति तस्य हृदयं धुकधुकायते । इवेन विना उत्प्रेक्षा । तदुक्तम् । तदिवेति तदेवेति तामुत्प्रेक्षां प्रचक्षते (वक्रोक्तिजीवित, ३, २६) । ध्वनिकारमतेन पुनरयमुत्प्रेक्षाध्वनिः । कूटं शिखरम् ॥ ५६९ ॥

५७०) जीवदेवस्य । [मेघमहिषस्य प्रेक्षध्वम् उदरे सुरचापकोटिभिन्नस्य । क्रन्दतः सवेदनम् अन्त्रमिव प्रलम्बिता विद्युत् ॥] मेहमहिसस्स पिच्छह अंतं व पलंबिया विज्जू मेघमहिषस्य प्रेक्षध्वम् अन्त्रमिव प्रलम्बिता

१W. खरपवणरअगलत्थिअगिरिऊडावडण०; २W. धुक्काधुक्कइ जीअं व विज्जुआ काहमेहस्स; ३W. णज्जइ; ४W. व पलंबए.

W586 ५७१) नवपल्लवं विउल्ला पहिया पिच्छंति चूयसिहरम्मि।
कामस्स लोहिउप्पंकराबियं हत्थभल्लि व ॥७१॥
W587 ५७२) महिलाणं चिस दोसो जेणेयँ पवासगव्विया पुरिसा।
दो तिन्नि जाव न मरंति ता न विरहा समप्पंति ॥७२॥
W588 ५७३) बालय दे वच्च लहुं मरइ वराई य माँ विलंबेण।
सा तुज्झ दंसणेणं जीवेइ न इत्थ संदेहो ॥७३॥

विद्युत्। किंभूतस्य। उयरे सुरचावकोडिभिन्नस्स उदरमध्ये सुरचापकोटिभिन्नस्य। अत एव सवियणं कंदंतस्स सवेदनं क्रन्दनशब्दं कुर्वतः। यः किल कार्मुकाग्रभागभिन्नो भवति तस्यान्त्राणि प्रलम्बन्ते। रूपकमलंकारः। उपमैव तिरोभूतभेदा रूपकमिष्यते। (काव्यादर्श, २, ६६) ॥ ५७० ॥

५७१) ज्येष्ठायाः। [नवपल्लवमाविग्नाः पथिकाः प्रेक्षन्ते चूतशिखरे। कामस्य लोहितसमूहरञ्जितां हस्तभल्लीमिव ॥] पहिया नवपल्लवं पिच्छंति पथिका नवपल्लवं प्रेक्षन्ते। क्व। चूयसिहरम्मि चूतशिखरे। कीदृशाः पथिकाः। विउल्ला आविग्नाः। कामिव। कामस्स हत्थभल्लि व कामस्य हस्तभल्लीमिव। कीदृशीम्। लोहिउप्पंकराबियं लोहितौघरञ्जिताम्। त्वत्कार्यकारणावमिव (? तत्कार्यकरणात्) पश्यन्तीव। उप्पंको समूहः। रावियं रञ्जितम्। विउल्लो आविग्नः। उपमालंकारः ॥५७१॥

५७२) गेल (? रोल) देवस्य। [महिलानामेव दोषो येनैव प्रवासगर्विताः पुरुषाः। द्वे तिस्रो यावन्न म्रियन्ते तावन्न विरहाः समाप्यन्ते ॥] गतार्था गाथा ॥५७२॥

५७३) श्वेतपट्टस्य (? श्वेतपटस्य)। [बालक प्रार्थये व्रज लघु म्रियते वराकी च मा विलम्बेन। सा तव दर्शनेन जीवति नात्र संदेहः ॥]

---

१ W. विसण्णा; २ W. चूअरुक्खस्स; ३ W. जेण पवासम्मि गव्विआ पुरिसा; ४ W. अलं; ५ W. दंसणेण वि जीवेज्ज.

W614 ५७४) वण्णक्कमरहियस्स वि एस गेंई नवर चित्तयम्मस्स ।
निमिसं पि जं नं मुच्चइ पिओ जणो गाढमवऊढो ॥७४॥

W615 ५७५) अविहत्तसंधिबंधं पढमरसुब्भेयपाणलोहिल्लो ।
उव्विल्लिउं न याणइ खंडइ कलियामुहं भमरो ॥७५॥

सा तव दर्शनेन जीवति नात्र संदेहः । त्वदप्राप्तिजनितोऽयं तस्या रोगोद्भव इति भावः । अप्राप्तौ हि दश दशा भवन्ति, तन्मध्याद् व्याधिरयम् ॥५७३॥

५७४) वप्पकस्य । [वर्णक्रमरहितस्याप्येषा गतिः केवलं चित्तजन्मनः (चित्रकर्मणः) । निमिषमपि यन्न मुच्यते प्रियो जनो गाढमवगूढः ॥] एस गई नवर चित्तयम्मस्स एषा गतिः केवलं चित्तजन्मनो मनोभवस्य । काऽसावित्याह । निमिसं पि जं न मुच्चइ पिओ जणो गाढमवऊढो निमिषमपि यन्न मुच्यते आलेख्यलिखितोऽपि कृतालिङ्गनः कान्तः कान्ताभिः । इह हि वर्णक्रमरहितस्यापि अस्य एषा गतिरिति । स्वजातिव्यतिरेकालंकारः । ब्राह्मणादयो वर्णाः, शुक्लादयश्च ॥५७४॥

५७५) विन्ध्यस्य । [अविभक्तसन्धिबन्धं प्रथमरसोद्भेदपानलोभवान् । उद्वेष्टयितुं न जानाति खण्डयति कलिकामुखं भ्रमरः ॥] भमरो कलियामुहं उव्विल्लिउं न याणइ भ्रमरः कलिकामुखम् उद्वर्तयितुं न जानाति । कीदृशम् । अविहत्तसंधिबंधं अविभक्तसन्धिबन्धम् इति तत्त्वोक्तिः । किं तर्हि करोतीत्याह । खंडइ खण्डयति । कीदृशः । पढमरसुब्भेयपाणलोहिल्लो प्रथमोद्गतरसपानलोभवान् । यः खलु अनवतीर्णतारुण्यामपि रामां रमयितुमजानानो रतिसुखलाभरसेन विसूत्रयति (?) स एवमुच्यते । लोहिल्लो लोभवान् । अन्योक्तिरलंकारः ॥५७५॥

१W. गुणो; २W. ण मुंचइ.

W422 ५७६) जे लीणभमरभरभग्गगुच्छया आसि नइयडुच्छंगे ।
काळेण वंजुला पियवयंसि ते खण्णुया जाया ॥७६॥
W589 ५७७) अविरयपसरियहुयवहजालालिपलीविए वणाहोए ।
किंसुयवणं ति कलिऊण मुद्धहरिणो न निक्कमइ ॥७७॥
W590 ५७८) निहुयणसिप्पं तह सारियाएँ उल्लावियं म्ह गुरुपुरओ ।
जहँ तं वेल्लं माऊ न याणिमो कत्थ वच्चामो ॥७८॥

५७६) रविराजस्य । [ये लीनभ्रमरभरभग्नगुच्छका आसन्नदीतटोत्सङ्गे । कालेन वेतसाः प्रियवयस्ये ते स्थाणवो जाताः ॥] हे पियवयंसि प्रियवयस्ये ते वंजुला काळेण खण्णुया जाया ते वेतसाः कालेन स्थाणुका जाताः । के त इत्याह । जे लीणभमरभरभग्गगुच्छया आसि ये लीनभ्रमरभरभग्नगुच्छका आसन् । क्व । नइयडुच्छंगे नदीतटोत्सङ्गे । कालमाहात्म्यवर्णनपरेयमुक्तिः । वंजुला वेतसाः । स्थाणुः पत्रफलशाखाशून्यस्तरुः ॥५७६॥

५७७) मुग्धहरिणस्य । [अविरतप्रसृतहुतवहज्वालालिप्रदीपिते वनाभोगे । किंशुकवनमिति कलयित्वा मुग्धहरिणो न निष्क्रामति ॥] मुद्धहरिणो न निक्कमइ मुग्धहरिणो न निष्क्रामति । क्व । वणाहोए वनाभोगे । कीदृशे । अविरयपसरियहुयवहजालालिपलीविए अविरतप्रसृतहुतवहज्वालावलीप्रदीपिते । किं कृत्वा । किंसुयवणं ति कलिऊण किंशुकवनमिति मनसि मन्यमानो न निष्क्रामतीत्यर्थः । भ्रान्तिमानलंकारः ॥५७७॥

५७८) सारस्य । [निधुवनशिल्पं तथा सारिकयोल्लापितमस्माकं गुरुपुरतः । यथा तां वेलां मातर्न जानीमः कुत्र व्रजामः ॥] अम्ह निहुयणसिप्पं अस्माकं निधुवनशिल्पं तह सारियाएँ गुरुपुरओ उल्लावियं तथा तेन प्रकारेण सारिकया गुरूणां पुरत उल्लपितं जह तं वेलं न याणिमो

१W. पिअवअस्स; २W. तम्मिरपसरिअ; ३W. ०जालोलि; ४W जह तं वेलं माए.

W553 ५७९) पंजरयसारियं माऊया अवणेह रइहराहिंतो ।
वीसंभजंपियाइं एसा लोयंम्मि पयडेइ ॥७९॥

W761 ५८०) रक्खइ अणन्नहियओ जीयं[3] पिव महुयरो पयत्तेण ।
दरणिंतदीविदाढग्गसच्छहं मालईमउलं ॥८०॥

W591 ५८१) पच्चग्गुव्विल्लदलुल्लसंतमयरंदपरिमलसुहाए ।
तं नत्थि कुंदलइयाएँ जं न भमरो महइ काउं ॥८१॥

यथा तद्वेलं न जानीमः कत्थ वच्चामो क्व व्रजामः । संजातलज्जतया तत्र स्थातुं नाशक्यतेत्यर्थः ॥१७८॥

५७९) शकटस्य । [पञ्जरकसारिकां मातरपनय रतिगृहात् । विस्रम्भजल्पितानि एषा लोके प्रकटयति ॥] गतार्था गाथा ॥५७९॥

५८०) हालस्य । [रक्षत्यनन्यहृदयो जीवितमिव मधुकरः प्रयत्नेन । ईषन्निर्गच्छद्द्वीपिदंष्ट्राग्रसदृशं मालतीमुकुलम् ॥] मालईमउलं भमरो रक्खइ मालतीमुकुलं भ्रमरो रक्षति । कीदृशः । अणन्नहियओ अनन्यहृदयः, तद्रक्षणैकतानमानसः । कीदृशं तत् । दरणिंतदीविदाढग्गसच्छहं दरनिर्यद्द्वीपिदंष्ट्राग्रसदृशम् । किमिव रक्षति । जीयं पिव जीवितमिव । यथा हि जीवितं प्रयत्नेन रक्ष्यते तथाऽवधीरितेतरकुसुमसमृद्धिर्मधुकरो मालतीकुसुमं रक्षतीत्यर्थः । तत्प्रियताऽस्योक्ता भवतीति । दरं ईषत् । दीवी चित्रकः । सच्छहं सदृशम् । उपमालंकारः ॥५८०॥

५८१) वसन्तस्य । [प्रत्यग्रोद्वेल्लद्दलोल्लसन्मकरन्दपरिमलसुखायाः । तन्नास्ति कुन्दलतिकाया यन्न भ्रमरो वाञ्छति कर्तुम् ॥] तं नत्थि जं न भमरो काउं महइ तन्नास्ति यन्न भ्रमरः कर्तुं वाञ्छति, आलिङ्गनचुम्बनादिकम् । कस्याः । कुंदलइयाए कुन्दलतिकायाः । कथंभूतायाः । पच्चग्गुव्विल्लदलुल्लसंतमयरंदपरिमलसुहाए प्रत्यग्रोत्फुल्लदलोल्लसन्मकरन्दपरिमलसुखायाः । यः किल प्रथमावतीर्णतारुण्याम् आलिङ्गनचुम्बनादिनाऽ-

१W. पंजरसारिअमत्ता ण णेसि किं एत्थ रइ०; २W. लोआण; ३W. जीवं पिव.

W592 ५८२) सो को वि गुणाइसओ न याणिमो मामि कुंदलइयाए ।
अच्छीहिं चिय पाउं अहिलिय्यइ जेण भमरेहिं ॥८२॥

W616 ५८३) दरवेविरोरुजुयलासु मउलियच्छीसु लुलियचिहुरासु ।
पुरिसाइरीसु कामो पियासु सज्जाउहो वसइ ॥८३॥

W617 ५८४) जं जं ते न सुहायइ तं तं न करेमि जं ममायत्तं ।
अहयं उण जं न सुहामि सुहय तं किं ममायत्तं ॥८४॥

भिप्रपद्यते स एवमुच्यत इति । अन्योक्तिरलंकारः ॥५८१॥

५८२) गुणानुरागस्य । [स कोऽपि गुणातिशयो न जानीमः सखि कुन्दलतिकायाः । अक्षिभिरेव पातुमभिलीयते येन भ्रमरैः ॥] सो को वि गुणाइसओ स कश्चिद् गुणातिशयः न याणियो मामि कुंदलइयाए न जानीमः सखि कुन्दलतिकायाः । कोऽसावित्याह । अच्छीहिं चिय पाउं अक्षिभिरेव पातुम् अहिलिय्यइ अभिलिप्यते (?) येन भमरैः । ये हि नायिकां निरतिशयसौभाग्यवतीं पश्यन्तस्तरुणा न तृप्यन्ति त एवमभिधीयन्त इति । अन्योक्तिरलंकारः ॥५८२॥

५८३) माधवप्रियस्य । [ईषद्वेपमानोरुयुगलासु मुकुलिताक्षीषु लुलितविकुरासु । पुरुषायमाणासु कामः प्रियासु सज्जायुधो वसति ॥] पुरिसाइरीसु पियासु सज्जाउहो कामो वसइ पुरुषायितरतासु प्रियासु सज्जायुधः कामो वसति । कीदृशीषु । दरवेविरोरुजुयलासु लुलियचिहुरासु ईषत्कम्पोरुयुगलासु लुलितकेशासु । पुनरपि कीदृशीषु । मउलियच्छीसु मुकुलिताक्षीषु । इत्थंभूतासु कान्तासु कुण्डलितकोदण्डः कामो वसति । तद्दर्शनेन कामिनां कामो भवतीति भावः ॥५८३॥

५८४) कोगदेवस्य । [यद् यत् ते न सुखयति तत् तन्न करोमि यत् ममायत्तम् । अहं पुनर्यन् न सुखयामि सुभग तत् किं

१W. अहिलस्सइ; २W. होइ; ३W. अहअं चिअ.

W594 ५८५) मन्ने साउ च्चिय जं न पाविओ पिययमाहररसस्स ।
तियसेहिँ तेण रयणायराहि अमयं समुद्धरियं ॥८५॥
W593 ५८६) इक्क च्चिय धूया गहवइस्स महिलत्तणं समुव्वहउ ।
अणिमिसणयणो सयलो वि जीएँ देवीकओ गामो ॥८६॥

ममायत्तम् ॥] जं जं ते न सुहायइ यद्यत् तव न सुखायते तत्तन्न करोमीति । कस्मात् । जं ममायत्तं यद् यस्मात् कारणान् ममायत्तं मदधीनम् । अहयं उण जं न सुहामि सुहय अहं पुनर्यत न सुखयामि सुभग तं किं ममायत्तं तत् किं ममायत्तं, तत्त्वायत्तमित्यर्थः । अहं त्वदीयहृदयेच्छानुवर्तिन्यपि दुर्भगेति भावः ।,५८४।।

५८५) सुरभिवृक्षस्य । [मन्ये स्वाद एव यन्न प्राप्तः प्रियतमाधररसस्य । त्रिदशैः, तेन रत्नाकरादमृतं समुद्धृतम् ॥] मन्ने साउ च्चिय तियसेहिँ जं न पाविओ पिययमाहररसस्स मन्ये स्वाद एव त्रिदशैर्यन्न प्राप्तः प्रियतमाधररसस्स । तेण अमयं समुद्धरियं तेनामृतं समुद्धृतम् । कुतः । रयणायराहि रत्नाकरात् । यदि तु प्रियाधररसास्वादनम् अलप्स्यन्त नामृतम् अम्भोधेरुदधरिष्यन् इत्यर्थः । अनुमानमलंकारः ॥५८५॥

५८६) देवस्य । [एकैव दुहिता गृहपतेर्महिलात्वं समुद्वहतु । अनिमिषनयनः सकलोऽपि यया देवीकृतो लोकः ॥] इक्क च्चिय धूया गहवइस्स महिलत्तणं समुव्वहउ एकैव दुहिता गृहपतेर्महिलात्वं समुद्वहतु, जीएँ सयलो वि गामो देवीकओ यया सकलोऽपि ग्रामो देवीकृतः । कीदृशः । अणिमिसणयणो अनिमिषनयनः । देवा हि अनिमिषनयना भवन्ति । रूपाद्भुतहृताः सर्वं एव तामनिमिषं प्रेक्षन्त इति भावः । विस्मयोऽत्र स्थायी भावः । ग्रामरामारूपातिशयदर्शनम् आलम्बनविभावः । अनिमिषप्रेक्षणम् अनुभावः । तदुक्तम् स्याद विस्मयोऽपि नामानुश्र (?) मायेन्द्र-

१W. आसाओ च्चिअ ण पाविओ; २W.तिअसेहि जेण; ३W.रूअगुणं गामणिधूआ समुव्वहइ; ४W. जीए देवीकओ.

W762 ५८७) तह नेहलालियाण वि अबाहरिल्लाण सव्वकज्जेसु।[1]
जं कसणं होइ मुहं तं भण्णइ किं पईवाणं ॥८७॥[2]

W619 ५८९) किं[3] भणह सहीओ मा मर त्ति दीसिहिइ सो जियंतेहिं।
कज्जालावो एसो सिणेहमग्गु च्चिय न होइ ॥८९॥

जालकुहकाद्यैः। निरतिशयशिल्पचित्रादिकर्मनिर्माणनिर्वर्त्यैः॥ तस्य च मञ्जूत्क्षेपैः अनिमिषप्रेक्षणैः सरोमाञ्चैः। कार्योऽभिनयो लोचनविस्तारैः साधुवादैश्च इति ॥५८६॥

५८७) सीइलस्य। [तथा स्नेहलालितानाम् अपि अबाह्यानां सर्वकार्येषु। यत् कृष्णं भवति मुखं तद् भण्यते किं प्रदीपानाम् (प्रतीपानाम)॥] जं कसणं होइ मुहं यत् कृष्णं भवति मुखं, तं भण्णइ किं पईवाणं तद् भण्यते किं प्रदीपानाम्। कीदृशानाम्। तह नेहलालियाण वि तथा तेन प्रकारेण स्नेहलालितानामपि। भूयः कीदृशानाम्। अबाहरिल्लाण सव्वकज्जेसु अबहिर्भूतानां सर्वकार्येषु। एवंभूतानामपि प्रदीपानां मलिनमेव मुखं प्रभावो भवति सकज्जलत्वात्। अथ च ये प्रतीपा भवन्ति तेषामेषैव गतिः। यदुत स्नेहपालिताः सकलकार्यान्तर्भाविताश्च ते मुखं मलिनयन्ति म्लेच्छतया (?)। सहृदये चमत्कारकारिणो काप्युक्तिवैचित्री परिस्फुरतीति श्लेषोऽलंकारः ॥५८७॥

५८९) शालिकस्य। [किं भणथ सख्यो मा म्रियस्वेति द्रक्ष्यते स जीवद्भिः। कार्यालाप एष स्नेहमार्ग एव न भवति ॥] किं भणह सहीओ किं किमर्थं (भणथ) सख्यः। किं तदित्याह। मा मर त्ति दीसिहिइ सो जियंतेहिं मा म्रियतां (? म्रियस्व) द्रक्ष्यते स हृदयवल्लभो जीवद्भिरिति हेतोः, मा म्रियस्वेति कारणम् (?कार्यम्)। कज्जालावो एसो कार्यालाप एषः, सिणेहमग्गु च्चिय न होइ स्नेहमार्ग एव न भवति यत् तेन विना जीव्यत इति ॥५८९॥

---

१ W. अबाहिरिल्लाण सयलकज्जेसु; २. St. 588 is missing in both the BORI and Ahmedabad Mss. ३ W. किं भणह मं सहीओ मा मर दीसिहइ सो जिअंतीए...सिणेहमग्गो उण ण होइ.

W620 ५९०) एक्कल्लमओ दीवियमईएँ तह लालिओ सयण्हाए ।
पियजायस्स जह धणुं पडियं वाहस्स हत्थाओ ॥९०॥

W763 ५९१) तिसिओ मयउ त्ति मई मओ वि तिसियं मई कलेऊण ।
इय मयमिहुणं तिसियं पियइ न सलिलं सिणेहेण ॥९१॥

W554 ५९२) इदहमित्ते गामे नँ वडइ भिक्ख त्ति कीस रे भणसि ।
धम्मिय करंजभंजय जं जीवसि तँ महच्छरियं ॥९२॥

५९०) जक्कुरङ्गचाः (?) । [एकाकिमृगः क्रीडामृग्या तथा लालितः सतृष्णया । प्रियजायस्य यथा धनुः पतितं व्याधस्य हस्तात् ॥] एक्कल्लमओ दीवियमईएँ एकाकिमृगः दीवितमृग्या तह लालिओ सयण्हाए तथा तेन प्रकारेण लालितो रमितः सतृष्णया साभिलाषया । जह वाहस्स यथा व्याधस्य हत्थाओ धणुं पडियं हस्ताद् धनुः पतितम् । कथंभूतस्य व्याधस्य । पियजायस्स प्रिया जाया यस्येति स तथोक्तस्तस्य । यत एवासौ प्रियजायो, अत एव तस्य स्वकान्तानुगतमृगीदर्शनेन तत्स्मरणाद् धनुर्हस्तात् स्रस्तम् । दीवियमई क्रीडामृगी । हेतुरलंकारः ॥५९०॥

५९१) तस्या एव (जक्कुरङ्गचाः) । तृषितो मृग इति मृगी, मृगोऽपि तृषितां मृगीं कलयित्वा । इति मृगमिथुनं तृषितं पिबति न सलिलं स्नेहेन ॥] निगदव्याख्यातेयं गाथा ॥५९१॥

५९२) हस्तिन्याः । [एतावन्मात्रे ग्रामे न पतति भिक्षेति कस्माद् रे भणसि । धार्मिक करञ्जभञ्जक यज्जीवसि तन्ममाश्चर्यम् ॥] धम्मिय धार्मिक करंजभंजय करञ्जभञ्जक । इददहमित्ते गामे न पडइ भिक्ख त्ति कीस रे भणसि एतावन्मात्रे महति ग्रामे न पतति भिक्षेति किं भणसि । यतः जं जीवसि तं महच्छरियं यज्जीवसि तन् ममाश्चर्यम् । असतीसंकेतानां करञ्जानां भञ्जनत्वान् न त्वामिह ग्रामे कोऽपि वसन्तं वाञ्छतीति भावः । धार्मिकेति उल्लुण्ठनायाम् । धार्मिकस्त्वम् अथ च

१W एकल्लमओ दिट्ठीअ मईअ तह पुलइओ सअण्हाए; २W. तिसिया पियउ त्ति मओ, मओ वि तिसिओ मई करेऊण. ३W. ण पडइ; ४W. मं. ५W तं पि दे बहुअं.

W764 ५९३) तुह सामलि धवलवेंलंततरलतिक्खग्गलोयणबलेण ।[1]
मयणो पुणो वि इच्छइ हरेण सह विग्गहं[2] काउं ॥९३॥

W556 ५९४) पत्तणियंबप्फंसा न्हाउत्तिण्णाएँ[3] सामलंगीए ।
जलबिंदुएहि चिहुरा रो[4]वंति व बंधणभएण ॥९४॥

W555 ५९५) जंतिय गुलं पेंमग्गसि[5] न य मे इच्छाएँ वाहसे जंतं ।
अरसन्न[6] किं न[7] याणसि न रसेण विणा गुलो होइ ॥९५॥[8]

परापकारकरणे प्रवृत्त इति । रे इति निपातो निन्दायाम् । रे हरे अरे संभाषणरतिकलहाक्षेपेषु (वररुचि, ९,१५) ॥५९२॥

५९३) बाणेसुरस्य (? बाणासुरस्य) । [तव श्यामलि धवलवलमानतरलतीक्ष्णाग्रलोचनबलेन । मदनः पुनरपीच्छति हरेण सह विग्रहं कर्तुम् ॥] निगदव्याख्यातेयं गाथा ॥५९३॥

५९४) । हालस्य । [प्राप्तनितम्बस्पर्शाः स्नातोत्तीर्णायाः श्यामलाङ्ग्याः । जलबिन्दुभिश्चिकुरा रुदन्तीव बन्धनभयेन ॥] सामलंगीए चिहुरा रोवंति व श्यामलाङ्ग्याः केशा रुदन्तीव । कैः । जलबिंदुएहि जलबिन्दुभिः । किंभूतायाः । न्हाउत्तिण्णाएँ स्नातोत्तीर्णाया इति । पूर्वकालेत्यादिना (पाणिनि, २,१,४९) कर्मधारयः । कीदृशाः । पत्तणियंबप्फंसा प्राप्तनितम्बस्पर्शाः । केन हेतुना रुदन्तीव । बंधणभएण बन्धनस्येव भयेन । सापराधः किल बन्धनं लभते । अपराधस्तु नितम्बस्पर्शः । अतोऽसावुत्प्रेक्षालंकारः ॥५९४॥

५९५) विद्धस्य । [यान्त्रिक गुडं प्रमार्गयसि न च म इच्छया वाहयसि यन्त्रम् । अरसज्ञ किं न जानासि न रसेन विना गुडो भवति ॥] जंतिय गुलं पमग्गसि यान्त्रिक गुडं मार्गयसि, न य मे इच्छाएँ वाहसे

[1] W. चलंत; [2] W. विग्गहारंभं; [3] W. ण्हाणुत्तिण्णाइ; [4] W. रुअंति बंधस्स व भएण; [5] W. विमग्गसि; [6] W. अणरसिय; [7] W. ण आणसि.

[8] St. 596 and 597 are missing in both the BORI and Ahmedabad Mss.

W621 ५९८) [1]कमले य भमइ परिमलइ सत्तलिं मालइं पि नो मुयइ ।
तरलत्तणं पि हयमहुयरस्स जइ पाडला हरइ ॥९८॥
W622 ५९९) दो[2]अंगुलयकवाडयपिणद्धसविसेसणीलकंचुइया ।
दावेइ थणत्थलिवण्णियं व तरुणी जुवाणाणं[3] ॥९९॥

जंतं न च ममेच्छया यन्त्रं वाहयसि । अरसन्न किं न याणसि न रसेण विणा गुलो होइ अरसज्ञ किं न जानासि न रसेन विना गुडो भवति । यो निधुवनविधिवैदग्ध्येन समीहितं न संपादयति, अथ च सुखमभिलषति सोऽयम् अरसज्ञेति सप्रणयकोपं कयाचिदेवमभिधीयत इत्यन्योक्तिरलंकारः । भाविकोऽयमित्यन्ये । स्वाभिप्रायस्य कथनं यदि वाऽप्यन्यभावना । अन्यापदेशो वा यस्तु त्रिविधं भाविकं विदुः ॥ (सरस्वतीकण्ठाभरण, ४,८६) । इदमन्यभावनाभिधानं भाविकम् ॥५९५॥

५९८) गोतरस्य (? गोभटस्य) । [कमले च भ्राम्यति परिमृद्नाति नवमालिकां मालतीमपि नो मुञ्चति । तरलत्वम् अपि हतमधुकरस्य यदि पाटला हरति ॥] तरलत्तणं पि हयमहुयरस्स तरलत्वमपि- हतमधुकरस्य जइ पाडला हरइ (यदि पाटला हरति) ।........तरलत्वमेवाह । (कमले य भमइ) कमले च भ्राम्यति, परिमलइ सत्तलिं (परिमृद्नाति नवमालिकां) मालइं पि नो मुयइ मालतीमपि न मुञ्चति । एवमहं संभावयामि, अस्य अनेककुसुमरसलोभलम्पटस्य पाटला यदि मकरन्दोत्तरा तरलत्वं हरति, नान्यकुसुमजातिरित्यर्थः । अपिः संभावनायाम् । सत्तली नवमालिका । अन्यापदेशोऽलंकारः ॥५९८॥

५९९) तस्यैव (गोतरस्य) । [द्व्यङ्गुलककपाटकपिनद्धसविशेषनीलकञ्चुकिका । दर्शयति स्तनस्थलीवर्णिकामिव तरुणी यूनाम् ॥] तरुणी जुवाणाणं थणत्थलिवण्णियं दावेइ युवतिर्यूनां स्तनस्थलीवाणकामिव

१ W.णलिणीसु भमसि परिमलसि सत्तलं मालइं पि णो मुअसि । तरलत्तणं तुहअहो महुअर जइ; २ W; दोअंगुलअकवालअ०; ३ W. जुवजणाणं.

W557 ६००) गामंगणणियल्लियकण्हवक्ख वड तुज्झ दूरमणुलग्गो ।
तत्तिल्लवडिक्खरभोइओ वि गामो न उव्वियइ ॥१००॥

दर्शयति । कीदृशी । दोअंगुलयकवाडयपिणद्धसविसेसणीलकंचुइया द्व्यङ्गुलककपाटकपिनद्धा स्तनोन्नतिगुणेन सविशेषा अधिकदृश्यमानान्तरा नीलकञ्चुकिका यस्याः सा तथोक्ता । अतश्च कीदृशी । दृश्यमानैकदेशतया स्तनवर्णिकामिव दर्शयन्ती इति । वर्णिका एकदेशः । दृश्यदर्शनेन एकदेशिनो ज्ञानम् । उत्प्रेक्षालंकारः ॥५९९॥

६००) [ग्रामाङ्गणनिगडितकृष्णपक्ष वट तव दूरमनुलग्नः । चिन्तापरप्रतिस्वरभोगिकोऽपि ग्रामो नोद्विजते ॥] हे गामंगणणियल्लियकण्हवक्ख वड ग्रामाङ्गणनिगडितकृष्णपक्ष वट, तुज्झ दूरमणुलग्गो तव दूरमनुलग्नः गामो न उव्वियइ ग्रामो नोद्विजते । कदाचिदुदासीनमृदुस्वामिको भवतीत्याह– तत्तिल्लवडिक्खरभोइओ वि चिन्तापरतीव्रतरभोगिकोऽपि । एवंभूतोऽपि ग्रामो नोद्विजते, तत् तव संतमसतिरस्कृतसकललोकलोचनालोकतया प्रच्छन्नकामितोपकरणस्य वटविटपिनो विलसितमिति भावः । तत्तिल्लो चिन्तातत्परः ।पडिक्खरो अमर्षणः । हेतुरलंकारः ॥६००॥

इति हालविरचिते गाथाकोशे भुवनपालदेवविरचितायां छेकोक्तिविचारलीलायां षष्ठमेतच्छतं समाप्तम् । श्रीगौतमाय नमः ।

APPENDIX

[Both the BORI and Ahmedabad Mss. contain only the first six centos of Hāla's Gāthakośa and Bhuvanapāla's commentary on them. In this appendix are given stanzas 1–37 from the seventh cento of the Gāthakośa as found in the BORI Ms. (No. 385 of 1887–91), with Ájada's commentary, and stanzas 641 to 700 (actually 701) as found in the Baroda Ms. (No. 12681 of the Orien-

१W. तत्तिल्लपडिक्खअभोइओ; २W. ण उव्विग्गो.

W436,R609, ६०१) अ¹विरयपडंतरयजलधाराभरघडियरज्जुबंधेहिं ।
असमत्थो उक्खिविउं रसइ व मेहो महिं उयह ॥१॥

W561,R610, ६०२) महिसक्खंधवि²लग्गं घोलइ सिंगाहयं सिमिसिमंतं ।
आहयवीणाझंकारसद्दमुहलं मस³यवंदं ॥२॥

tal Institute, Baroda)with what is very probably Bhuvanapāla's commentary. Stanzas 638,639 and 640 are found neither in the BORI Ms. with Ájada's commentary nor in the Baroda Ms. as the relevant folios are missing in both the Mss. The BORI Ms. with Âjada's commentary contains towards the end of cento VI four stanzas (597 600) which are not found in the BORI and the Ahmedabad Mss. with Bhuvanapāla's commentary. These four stanzas are given with Ajada's commentary at the end of this appendix. In the case of all these stanzas their serial numbers as given in Weber's 1881 edition and as found in Ms. R used by Weber are shown in the left hand margin with the letters W and R.]

६०१) कलिङ्गस्य । [अविरतपतद्रयजलधाराघटितरज्जुबन्धैः । असमर्थ उत्क्षेप्तुं रसतीव मेघो महीं पश्यत ॥ पुनवर्षावर्णनगाथाष्टकम् । अविरतं पतन्तो रयेण वेगेनोपलक्षिता ये जलधाराभराः, तैर्घटिता ये रज्जुबन्धाः, तैः करणभूतैः महीम् उत्क्षेप्तुम् असमर्थो मेघो रसतीव । उय पश्य । प्राकृतत्वाद् रयशब्दस्य प्राग्भावाभावः (?) ॥६०१ ॥

६०२) पालित्तयस्स । [महिषस्कन्धावलग्नं घूर्णति शृङ्गाहतं सिमसिमायमानम् । आहतवीणाझङ्कारशब्दमुखरं मशकवृन्दम् ॥] महिषस्य स्कन्धलग्नं शृङ्गाहतं सिमिसिमायमानम् आहतवीणाझङ्कारशब्दमुखरं घूर्णति मशकवृन्दं समूहः ॥ ६०२ ॥

---

१ W अविरलपडंतणवजलधारारज्जुघडिअं पअत्तेण । अपहुत्तो......... ॥
२ W. ०विलग्गं: ३ W. मसअवुंदं;

W765,R612,६०३) सुंयइ सुहं चिय कुंडलियपेहुणो निग्गयस्स वडुयस्स ।
जणरंजणग्गिहुत्ते घरम्मि सुणओ अईमंतो ॥३॥
W725,R611, ६०४) मा बंधंसु वीसंभं पुत्तय चडुयारओ इमो लोओ ।
सूइवेहो कण्णम्मि पिच्छ किं नज्जइ पमाणं ॥४॥
W564,R613, ६०५) धाराधुव्वंतमुहा लंबियपक्खा निउंचियग्गीवा ।
वइवेढएसु काया सूलाभिन्न व्व दीसंति ॥५॥
W623,R614, ६०६) रक्खेइ पुत्तयं मत्थएण उँच्छोवयं पडिच्छंती ।
अंसूहिँ पहियजाया उल्लिज्जंतं न लक्खेइ ॥६॥

६०३) [स्वपिति सुखमेव कुण्डलितपुच्छो निर्गतस्य बटुकस्य । जनरञ्जनाग्निहोत्रे गृहे शुनको अतिम्यमानः ॥] प्रावृड्वर्णनम् । जनरञ्जनार्थम् अग्निहोत्रं यत्र तत् तथा । गृहे कुण्डलितपुच्छो जलधाराभिरतिम्यमानो बहिर्गतस्य बटुकस्य श्वा सुखं स्वपिति । पेहुणं पुच्छम् । जातिरलंकारः ॥६०३॥

६०४) माहवरायस्स । [मा बधान विस्रम्भं पुत्रक चाटुकारको अयं लोकः । सूचीवेधः कर्णे पश्य किं ज्ञायते प्रमाणम् ॥] कश्चित्पुत्रं शिक्षयति । मा विस्रम्भं बधान हे पुत्रक, चाटुकारकोऽयं लोकः । आमन (?) कर्णे कृतः सूचीवेधः पश्य किं प्रमाणं प्रथते । तस्मान्मा विश्वसेदित्यर्थः ॥ ६०४ ॥

६०५) अंगरायस्स । [धाराधाव्यमानमुखा लम्बितचरणा निकुञ्चितग्रीवाः । वृतिवेष्टकेषु काकाः शूलाभिन्ना इव दृश्यन्ते ॥] धाराक्षाल्यमानमुखाः लम्बितपक्षा नितरां कुञ्चितग्रीवाः काका वृतिवेष्टकेषु वृत्यन्तर्गतकीलेषु स्थिताः सन्तः शूलाभिन्ना इव भान्तीत्युत्प्रेक्षा ॥६०५॥

६०६) पालित्तयस्स । [रक्षति पुत्रकं मस्तकेन पटलोदकं प्रतीच्छन्ती । अश्रुभिः पथिकजाया आर्द्रीक्रियमाणं न लक्षयति ॥] यत्र यत्र गृहं

---

१ W. सुहय सुहं चिय कुडलि व्व पेहुणो णिग्गअस्स चडुवस्स । जणरंजणिग्गहो ते घरम्मि सुणहो अतिहिवंतो ॥; २ W. वच्चसु; ३W. वइवेढणेसु; ४W. ओच्छोअअं; ५W. पहिअघरिणी.

W766,R615, ६०७) निवंडिहिसि सुन्नहियए जलहरजलपंकिलम्मि पंथम्मि।
उप्पिक्खागयपिययमहत्थे हत्थं पसारिंती ॥७॥
W667,R616, ६०८) उच्छंगियाएँ पइणा अहिसारणपंकमलिणपेरंते ।
आसन्नपरियणो विय सेउ च्चिय धुयइ से पाए ॥८॥
W562,R617, ६०९) रेहंति कुमुयदलणिच्चलट्ठिया मत्तमहुयरणिहाया ।
ससियरणीसेसपणासियस्स गंठि व्व तिमिरस्स ॥९॥

श्चोतति तत्र तत्र शिरो न्यस्यन्तो पथिकपत्नी रक्षति जलबिन्दुभ्यः पुत्रम् । अथ च स्वाश्रुभिरार्द्रीक्रियमाणम् एनं न लक्षयति । पथिकभार्यात्वाद् रोदनसंभवः । उच्छोवओ बिन्दुः । दैवशब्दः (!) उत्पूर्वोऽयम् ॥६०६॥

६०७) राघवस्य । [निपतिष्यसि शून्यहृदये जलधरजलपङ्किले पथि । उत्प्रेक्षागतप्रियतमहस्ते हस्तं प्रसारयन्तो ॥] हे शून्यहृदये जलधरजलपङ्किले पथि चिन्तानीतप्रियतमहस्ते हस्तं प्रसारयन्तो निपतिष्यसि । उत्प्रेक्षा । स्वयंकृता चिन्ता ॥ ६०७ ॥

६०८) पोट्टिसस्स । [उत्सङ्गितायाः पत्या अभिसारणपङ्कमलिनपर्यन्तो । आसन्नपरिजन इव स्वेद एव धावयति तस्याः पादौ ॥] तस्याः पत्न्याः कान्तोत्सङ्गितायाः सत्या अभिसारणपङ्कमलिनप्रान्तो पादावासन्नपरिजन इव स्वेद एव क्षालयति । सोपानध.....चारणायाः (!) (सोपानत्कत्वे चरणयोः ?) पर्यन्तावेव मलिनितौ ॥ ६०८ ॥

६०९) [शोभन्ते कुमुददलनिश्चलस्थिता मत्तमधुकरसंघाताः । शशिकरनिःशेषप्रणाशितस्य ग्रन्थय इव तिमिरस्य ।] चन्द्रोदयसमयवर्णनम् । कुमुददलेषु निश्चलस्थिता मत्तमधुकरनिकराः शशिकरैः निःशेषप्रणाशितस्य तिमिरस्य ग्रन्थय इव राजन्ते । कस्यचिद् दार्वादेस्तक्ष्यमाणस्य दुर्भेद्या ग्रन्थयस्तथैवावशिष्यन्ते, तथा तिमिरस्यापीत्यर्थः । निहाया संघाताः ॥६०९॥

१R. निवडिहिसि, २W. मग्गम्मि, ३W. सेअ च्चिय, ४W. धुवइ.

W434,R618, ६१०)वासारत्ते उन्नयपयोहरे जुव्वणि व्व वोलीणे।
पढमिक्ककासकुसुमं दीसइ पलियं व धरणीए ॥१०॥

W563,R620,६११) उयं कोडराउ तुरियं पहाविथं पूसयाण रिंछोलिं।
सरए जरिउ व्व दुमो पित्तं व सलोहियं वमइ ॥११॥

W.624,R619, ६१२)सरए सरम्मि पहिया जलाइँ कंदुट्टसुरहिगंधाइं।
धवलच्छाइँ सयण्हा पियंति दइयाण व मुहाइं ॥१२॥

६१०) आढ्यराजस्य। [वर्षारात्र उन्नतपयोधरे यौवन इवातिक्रान्ते। प्रथमैककाशकुसुमं दृश्यते पलितमिव धरण्याः।] गाथासप्तकेन शरद्वर्णनम्। उन्नतपयोधरे वर्षारात्रे यौवन इवातिक्रान्ते सति प्रथमैककाशकुसुमं धरण्याः पलितम् इव दृश्यते। उत्प्रेक्षालंकारः। पयोधरा मेघाः स्तनाश्च ॥६१०॥

६११) पोट्टिसस्स। [पश्य कोटरात् त्वरितं प्रधावितां कीराणां पङ्क्तिम्। शरदि ज्वरित इव द्रुमः पित्तमिव सलोहितं वमति।] कीराणां पङ्क्तिम् वृक्षस्य कोटरात् तूर्णं प्रधावितां पश्य। शरदि ज्वरित इव द्रुमः सशोणितं पित्तमिव वमति, इति उत्प्रेक्षा। कीराणां तुण्डस्य रक्तत्वात् पक्षाणां नीलत्वाद् रक्तपित्तौपम्यम्। पूसा शुकाः। रिंछोली पङ्क्तिः ॥६११॥

६१२) माननरेन्द्रस्य। [शरदि सरसि पथिका जलानि कमलसुरभिगन्धानि। धवलाच्छानि (धवलाक्षाणि) सतृष्णाः पिबन्ति दयितानामिव मुखानि।] शरत्काले तडागसमृद्धया पथिकाः कमलैः सुगन्धानि कमलवत् सुगन्धीनि च धवलाच्छानि धवलाक्षाणि च जलानि दयितामुखानीव पिबन्ति। कंदोट्टं पद्मम् ॥६१२॥

---

१ W. उअह तरुकोडराओ णिक्कंतं पूसुआण रिंछोलिं.

W625,R621, ६१३) अब्भिंतरसरसाओ उवरिं पव्वायबद्धपंकाओ ।
चंकंमतम्मि जणे समूससंति व्व रच्छाओ ॥१३॥

W681,R622, ६१४) सिंयसिंधवपव्वयसच्छहाइँ धुयतूलपुंजसरिसाइं ।
वसुआयंति व मुक्कोअयाइँ सरए सियब्भाइं ॥१४॥

W684,R623,६१५) मज्झे पयणुयपंकं अवहोवासेसु सरसचिक्खल्लं ।
गामस्स सीससीमंतयं व रच्छामुहं जायं ॥१५।

६१३) सज्जनस्य । [अभ्यन्तरसरसा उपरि शुष्कबद्धपङ्काः । चङ्क्रम्यमाणे जने समुच्छ्वसन्तीव रथ्याः ।] अभ्यन्तरे सरसाः सार्द्राः, ऊपरिष्टाद् बद्धशुष्कपङ्काः सत्यो रथ्याश्चङ्क्रम्यमाणे जने सति समुच्छ्वसन्तीव । अतः सानुरागाणां वियोगे सोच्छ्वासता युक्तैव । पव्वायं शुष्कम् । उतो मुकुलादिष्वत (हेमचन्द्र,८,१,१०७) इति अत्वम् । उत्प्रेक्षालंकारः ॥६१३॥

६१४) सज्जनस्य । [सितसैन्धवपर्वतसच्छायानि धौततूलपुञ्जसदृशानि । शुष्यन्तीव मुक्तोदकानि शरदि सिताभ्राणि ।] सितसैन्धवपर्वतसदृक्षाणि धुतधूलो (? तूल) पटलरूपाणि मुक्तोदकानि सन्ति शरत्काले सिताभ्राणि शुष्यन्तीव । वस्त्रादिकमपि मुक्तोदकं सत् सद्यः शुष्यति इति । वसुआयंति इति शुष्यन्ति ॥६१४॥

६१५) [मध्ये प्रतनुकपङ्कम् उभयपार्श्वयोः सरसकर्दमम् । ग्रामस्य शीर्षसीमन्त इव रथ्यामुखं जातम् ।] मध्ये मध्यभागे जनैः क्षोदितत्वात् प्रतनुकपङ्कं पतितदण्डकमित्यर्थः । दण्डरेखाया उभयोः पार्श्वयोः सरसकर्दमं सद् ग्रामस्य रथ्यामुखं शिरःसीमन्तस्य सदृशं जातम् । सीमन्तस्यापि पार्श्वयोः केशकालिका मध्ये च रेखा स्याद् अतः सदुत्प्रेक्षा (?तदुत्प्रेक्षा) । अवहो इति मुकुलादित्वात् । चिक्खल्लो कर्दमः । सीमन्तः केशविन्यास एव ॥६१५।

१ W. अब्भंतर; २ W. उअ सिंधवग्गव्वअसच्छहाइ; ३ W. सोहंति सुअणु; ४ W. साणचिक्खिल्लं.

W768,R624,६१६) जइ लंघेसि परवइं निययवइं भरसहं पि मोत्तूण ।
तह मन्ने कोहलिए अज्जं कल्लं व फुट्टिहिसि ॥१६॥

W682,R625,६१७) आउच्छंति व वेढिक्कएहि कालेयएहि निज्जंता ।
निप्पच्छिमवलियपुलोइएहि महिसा कुंडुंबाइं ॥१७॥

W680,R626, ६१८) मुद्धे अपत्तियंती पवालयंकुरवण्णलोहियए ।
निद्धोयधाउराए वि कीस हत्थे पुणो धुयसि ॥१८॥

६१६) पालित्तयस्स । [यथा लङ्घयसि परवृतिं (परपतिं) निजवृतिं भरसहाम् (निजपतिं भरसहम्) अपि मुक्त्वा । तथा मन्ये कूष्माण्डि (कुतूहलिनि) अद्य श्वो वा विकसिष्यसि (प्रकटीभविष्यसि) ।] हे कोहलिए कूष्माण्डलते यथा त्वं भरसहामपि निजकवृतिं मुक्त्वा परवृतिमारोहसि तथा मन्ये अद्य श्वो वा विकसिष्यसि । अथ च श्लेषस्य व्याख्यानाद् हे कोहलिए कौतुकिनि यथा त्वं भरसहमपि निजकपतिं मुक्त्वा परपतिं भजसि, तथा मन्ये अद्य श्वो वा प्रकटीभविष्यसीति । लोकापवादभाग् भविष्यसीत्यर्थः ॥६१६॥

६१७) हालस्स । [आपृच्छन्त इव गलगर्जितैर्घातकैर्नीयमानाः । निष्पश्चिमवलितप्रेक्षितैर्महिषाः कुटुम्बानि ॥] (महिषाः) कालेयकैर्घातकैर्नीयमानाः सन्तो निष्पश्चिमवलितावलोकितैः करणभूतैः कुटुम्बानि पुनर्दर्शनार्थं पृच्छन्ति (इव) । वेढिक्कं गवादिगर्जितम् । वेइंतिहिक्कं वेढिक्कं (?) वक्कारः (?) ॥६१७॥

६१८) केल्लिवस्स । [मुग्धेऽप्रतियती प्रवालकाङ्कुरवर्णलोहितौ । निर्धौतधातुरागावपि कस्माद् हस्तौ पुनर्धावयसि ॥] स्वभावरक्तौ हस्तौ धातुविभक्ताविति क्षालयन्ती काचित् केनाप्यभिधीयते । हे मुग्धे, अप्रतियती निर्धौतधातुरागावपि विद्रुमाङ्कुरशोणौ करौ किं पुनः क्षालयसि । भ्रान्तिमानलंकारः ॥६१८॥

---

१ W. मोत्तूणं; २ W. कुडंगाइ; ३ W. पवालअंकुरअणिद्धलोहिअए.

W683,R627,६१९) पुसस्सु मुहं ता पुत्तिइ वाहोअरणं विसेसरमणिज्जं ।
मैंए मन्नु च्चिय मंडणं ति मा काहिइ पुणो वि ।१९॥

W677,R628, ६२०)अत्थक्करूसणं खणपसज्जणं अलियवयणणिब्बंधो ।
उम्मच्छरसंतावो पुत्तय पयैई सिणेहस्स ॥२०॥

W605,R629,६२१)भोइगिदिन्नपहेणयचक्खियदुस्सिक्खिओ हलियउत्तो
इत्ताहे अन्नपहेणयाण [4]छिब्बोल्लियं देइ ॥२१॥

६१९) मृगेन्द्रस्य । [मार्जय मुखं तावत् पुत्रिके बाष्पावतरणं विशेषरमणीयम् । मातर्मन्युरेव मण्डनम् इति मा करिष्यति पुनरपि ।] काचित् पुत्रवतीं प्रति वक्ति । हे पुत्रि तावत् प्रमार्जय मुखम् । यतो बाष्पावतारेण सविशेषमिदं रम्यं वर्तते । अपरं च सैव पुत्री प्रत्याह । हे मातर्, मन्युरेव मण्डनमिति कृत्वा पुनरपि सत्वरं वल्लभो मा मन्युं कारयिष्यति, मा अचीकरदित्यर्थः । बाष्पे एव मुखमण्डनलोभेन स यदि पुनर्मन्युं कारयति तदा तव हानिर्मम च दुःखमिति भावः ॥६१९॥

६२०) [अकाण्डरोषणं क्षणप्रसत्तिरलीकवचननिर्बन्धः । निरर्गलश्च संतापः पुत्रक प्रकृतिः स्नेहस्य ॥] काचित् कंचित् प्रबोधयति । अप्रस्तुतरोषणं, क्षणेन प्रसत्तिः, असत्यवचननिर्बन्धः, निरर्गलश्च संतापः इति हे पुत्रक स्नेहस्य प्रकृतिरेषेति । अत्थक्कं अप्रस्तावः ॥६२०॥

६२१) पोट्टिसस्य । [भोगिनीदत्तप्रहेणकभक्षणदुःशिक्षितो हालिकपुत्रः । इदानीमन्यप्रहेणकानां धिग्वचनं ददाति ॥] योग्यताधिकसंपन्नफलः पुमान् अन्योक्त्या भण्यते । स्वामिभार्यया यद् दत्तं भोज्योपायनं.... । निछतीति (?) वचनं दत्ते, निन्दतीत्यर्थः । भोइणी स्वामिभार्या । पहेणयं भोज्योपायनम् । लाहणकमिति प्रसिद्धम् । छिब्बोल्लियं छी इति संयुक्तं वचनम् ॥६२१॥

---

१ W. पुत्ति अ(=पुत्रि च); २W. मा एअं चिअ मुहमंडणं ति सो काहिइ पुणो वि. ३ W. पअवी (=पदवी); ४ W. छीबोल्लअं.

W685,R630, ६२२) अवरण्हागयजामाउयस्स विउणेइ मोहणुक्कंठं ।
वहुयाएँ घेरपरोहडमज्जणमुहलो वलयसद्दो ॥२२॥

W626,R631,६२३) मुहपुंडरीयछायाएँ संठिए वेहइ रायहंसि व्व ।
छणपिट्ठकुट्टणुच्छलियधूलिधवले थणे तंणुई ।२३॥

W686,R632, ६२४) जुज्झँचवेडामोडणमोडियमल्लस्स जुण्णमल्लस्स ।
कच्छाबंधु च्चिय भज्जँमल्लहिययाइँ उक्खणइ ॥२४॥

W687,633,६२५) आँणिज्जंतीएँ तुमं पइणो हयपडहजयपडायाए ।
मल्लि न लज्जसि नच्चसि दोहग्गे पायडिज्जंते ॥२५॥

६२२) अंधपरमस्स । [अपराह्णागतजामातुर्द्विगुणयति मोहनोत्कण्ठाम् । वध्वा गृहपश्चाद्भागमज्जनमुखरो वलयशब्दः ।।] वध्वाः सबन्धी गृहपश्चाद्भागमज्जनमुखरो वलयशब्दो अपराह्णागतस्य जामातृकस्य सुरतोत्कण्ठां द्विगुणयति । बाह्यान्तरसंतापशमकत्वात्(?)मदर्थोऽयं मज्जनारम्भ इत्याशयाद्वा । परोहड गृहपश्चाद्भागः ॥६२२॥

६२३) दामोदरस्स । [मुखपुण्डरीकच्छायायां संस्थितौ वहति राजहंसाविव । क्षणपिष्टकुट्टनोच्छलितधूलिधवलौ स्तनौ तन्वी ।।] कापि कस्याश्चित् कुचौ वर्णयति । उत्सवे यत् पिष्टकुट्टनं तेन उच्छलिता या धूलिः,तया धवलौ सितौ स्तनौ,मुखपुण्डरीकच्छायायाम् उपविष्टौ राजहंसाविव तन्वी वहति । कमलच्छायायां हि राजहंसोपवेशनं युक्तमेवेति ।६२३॥

६२४) [युद्धचपेटामोटनमोटितमल्लस्य जीर्णमल्लस्य । कक्षाबन्ध एव भीरुमल्लहृदयान्युत्खनति ।।] कश्चित् कृतकर्म (!) वर्णयति । युद्धार्थं या चपेटा तया यत् प्रमर्दनं तेन मोटितान्यमल्लस्य निर्व्यूढमल्लस्य कक्षाबन्ध एव भीरुमल्लहृदयान्युत्खनति । ऊरुकरस्फोटनादिकमित्यर्थः । जुण्णो दृष्टकर्मा । भज्जो भीरुः ॥६२४॥

६२५) ईश्वरराजस्य । [आनीयमानया त्वं पत्युर्हतपटहजयपताकया । मल्लि न लज्जसे नृत्यसि, दौर्भाग्ये प्रकट्यमाने ।] जितप्रतिमल्लस्य

---

१ W. घरपलोहरमज्जणविसुणो; २ W. उअह; ३ W. वहइ.

४ W. जुज्झचवेडामोडिअजज्जरकण्णस्स; ५ W. भीरुमल्लहिअअं; ६ W. समुक्खणइ; ७ W. आणंदंतेण तुमं पइणो पहएण पडइसद्देण.

W. 688,R-,६२६) मा वच्चह वीसंभं इमाण बहुचाडुयम्मणिरयाणं ।
निव्वट्टियकज्जपरंमुहाण सुणयाण व खलाणं ॥२६॥

W.689,R634, ६२७) अन्नग्गामपउत्था कड्ढंती मंडलाण रिंछोलिं ।
अक्खंडियसोहग्गा वाससयं जियउ मे सुणिया ॥२७॥

W690,R635, ६२८) सच्चं साहसु देवर तं तह चडुयारएण सुणएण ।
निव्वट्टियकज्जपरंमुहत्तणं सिक्खियं कत्तो ॥२८॥

मल्लस्य हृष्टां वधूं कश्चिदिदमाह । प्रत्याहतपटहं यथा भवति, एवमानीयमानया पत्युर्जयपताकया तव दौर्भाग्ये प्रकट्यमाने सति हे मल्लि न लज्जसे, किंतु नृत्यसि । यतस्त्वदनासक्त्या अयं प्रतिमल्लजयीति । मल्लानां च युद्धकाले स्त्रीपरिहार इति स्थितिः ॥६२५॥

६२६) तस्यैव (ईश्वरराजस्य) । [मा व्रजत विश्रम्भम् एषां बहुचाटुकर्मनिरतानाम् । निर्वर्तितकार्यपराङ्मुखानां शुनामिव खलानाम् ।] एतेषां बहुचाटुकर्मनिरतानां समर्थितस्वकार्यपराङ्मुखाणां शुनामिव खलानां विश्वासं व्रजसि (? मा व्रजत) ॥६२६॥

६२७) हालस्स । [अन्यग्रामप्रोषिता कर्षन्ती शुनां पङ्क्तिम् । अखण्डितसौभाग्या वर्षशतं जीवतु मे शुनी ॥] काचिदसती स्वां शुनीमाशीर्वादयति । अन्यस्मिन् ग्रामे प्रोषिता प्रवस्तुमारब्धा आत्मना मण्डलानां शुनां पङ्क्तिम् आकर्षन्ती, अखण्डितसौभाग्या मे शुनी वर्षशतं जीवतात् । कौलेयकशब्दशून्ये ग्रामे सुखं मम तद्गृहगमनं तस्य च मे गृहागमनमिति भावः । मंडलो श्वा । रिंछोली पङ्क्तिः ॥६२७॥

६२८) अनुकूटस्य । [सत्यं कथय देवर तत् तथा चाटुकारकेण शुना । निर्वर्तितकार्यपराङ्मुखत्वं शिक्षितं कुतः ॥] काचिद् भ्रातृजाया देवरं पृच्छति । तत् प्रसिद्धं तेन प्रकारेण निर्वर्तितकार्यपराङ्-

१ W. ० णिउणाणं; २ W. णिव्वत्तिअ; ३ W. वरिसहयं.

W691,R636,६२९) निप्पंन्नसस्सरिद्धीएँ गव्विओ गाइ पामरो सरए ।
दलियणवसालितंडुलधवलमियंकासु राईसु ॥२९॥

W692,R637, ६३०)अँहिलिज्जइ पउमालेहडालिवलएण कलमगोवीए।
केयारसुत्तरुंभणतंसट्ठियणिच्चलो चलणो ॥३०॥

W. 693,R638,६३१) दियहे दियहे सूसइ संकेययभंगवड्ढियासंका ।
आवंडुरोणयमुही कलमेण समं कलमगोवो ॥३१॥

मुखत्वं चटुकारकेण शुना कुतः शिक्षितम् इति हे देवर सत्यं कथय । त्वत्तो निश्चितं शिक्षितमिति । त्वमेव ईदृग्, नान्य इत्यर्थः ॥६२८॥

६२९) अवटङ्कस्य । [निष्पन्नसस्यऋद्ध्या गर्वितो गायति पामरः शरदि । दलितनवशालितण्डुलधवलमृगाङ्कासु रात्रिषु ॥] पामरस्य सुखासिकाकथनेन पूर्णाशः पुमान् वर्ण्यते । दलितनव – शालितण्डुलधवलमृगाङ्कासु रात्रिषु पामरः सुखं गायति ॥६२९॥

६३०) केरलस्य । [अभिलीयते पद्मलोलुपालिवलयेन कलम-गोप्याः । केदारस्रोतोरोधनतिर्यक्स्थितनिश्चलश्चरणः ॥] केदारकुल्या-रोधनाय त्र्यस्रस्थितो निश्चलः कलमगोप्याश्चरणः पद्मलम्पटालिवलयेन अभिलीयते । पद्मसदृश इत्यर्थः । लेहडो लम्पटः ॥६३०॥

३३१)विषमशीलस्य। [दिवसे दिवसे शुष्यति सङ्केतकभङ्गवर्धिता-शङ्का । आपाण्डुरावनतमुखी कलमेन समं कलमगोपी ॥] शरद्वर्णनगाथा-त्रयम् । निष्पन्नकणत्वाल्लवनाभिमुखे क्षेत्रे संकेतभङ्गवर्धिताशङ्का आपा-ण्डुरावनतमुखी सती कलमेन समं कलमगोपी शुष्यति । कलमोऽपि पाकपाण्डुरावनतमुखः शुष्यति । सहोक्तिलंकारः ॥६३१॥

१W. णिप्पण्णसस्सरिद्धी सच्छंदं; २W. अलिहिज्जइ पंकअले हलालिचलणेण कलमगोवीए । केआरसोअरुंभणतंसट्ठिअकोमलो चलणो.

W 695,R639,६३२) दट्ठूण हरियदीहं गोसे वंठाण[1] झूरए[2] हलिओ ।
सरैए सहस्समग्गं[3] तुसारधवले तिलच्छित्ते ॥३२॥

W769,R640,६३३) अणुसोयइ हलियवहू रविकिरणोलुग्गपंडुरच्छायं ।
रण्णुंदुरदंतुक्खुत्तविसमवलियं तिलत्तंबं ॥३३॥

W770,R641, ६३४) ओहार[4]यसंघासालुयाण वइमूलमल्लियंताणं ।
डिंभाण किलिंचयवावडाण सुन्नो सिही जलइ ॥३४॥

६३२) महेन्द्रस्य । [दृष्ट्वा हरितदीर्घं प्रभाते वृषभाणां खिद्यते हालिकः । शरदि सहस्रमार्गं तुषारधवले तिलक्षेत्रे ॥] शरत्काल-प्रातः, तुषारधवले तिलक्षेत्रे आरकवृषरभय (?) हरितं दीर्घं च मार्गसहस्रं दृष्ट्वा हालिको रक्षपालने (?) (क्षेत्रपालने ?) खिद्यते । मशक-त्रस्यमानाः पशवः शालीतिलवाटेषु प्रविशन्ति । देहलग्नांश्च दंशांस्तिलैः सह वर्षन्ति । तद्वर्षणादवश्यायबिन्दवः पतन्ति । ततो हरितः प्रतिभाति । शाखाद्युपमर्दाच्च दीर्घसरलोऽनेकदण्डको मार्गः स्यादित्यर्थः ॥६३२॥

६३३)[अनुशोचति हालिकवधू रविकिरणावरुग्णपाण्डुरच्छायम् । अरण्यमूषकदन्तोत्कृत्तविषमपतितं तिलस्तम्बम् ॥] अरण्यमूषकदन्तोत्कृत्तम अत एव रविकिरणैर्निःस्थामं पाण्डुरच्छायं विषमपतितं तिलस्तम्बं हालिकवधूरनुशोचति । एकस्य तिलस्तम्बस्य विनाशम् आशङ्क्य (? आलोक्य) अन्येषामपि शङ्कत इत्यर्थः ॥६३३॥

६३४) तरलस्य । [उपहारकसंघर्षवतां वृतिमूलमालीयमानानाम् । डिम्भानां लघुकाष्ठव्यापृतानां शून्यो ज्वलत्यग्निः ॥] गथाद्वादशकेन हेमन्तशिशिरवर्णनम् । उपहारकः प्रस्तावात् तृणकाष्ठादिमूलः (?), तस्यान-यनविषये अन्योन्यस्पर्धावताम् अत एव वृतिमूलमालीयमानानां लघु-काष्ठादिषु व्यापृतानां डिम्भानां शून्यः शिखी ज्वलति । तेषां कष्टमेवे-त्यर्थः । संघासो स्पर्धा । किलिंचं लघुदारु ।६३४॥

१W. संढाण; २W. जूरए; ३W. असईरहस्समग्गं; ४W. ओवालअग्गि सीआलुआण वइमूलमुल्लिहंताणं । डिंभाण कलिंचयवावडाण सुण्णो जलइ अग्गी ॥

W771,R642, ६३५) मा मा मुय परिहासं देअर अणहोरणा वराईयं ।
सीयम्मि वि पासिज्जइ पुणो वि तीसे कुणसु छाहिं ॥३५॥

W772,R643,६३६) किं तस्स पारएणं[1] किमग्गिणा किं च वासभवणेणं ।
जस्स[2] उरम्मि निसम्मइ उम्हायंतत्थणी[3] जाया ॥३६॥

W773,R644,६३७) कमलायराण उण्हो हेमंतो सीयलो जणवयाणं ।
[4]को इह भिन्नसहावं जाणइ (परमंत्थओ)[5] लोए ॥३७॥

६३५) वटुकस्य । [मा मा,मुञ्च परिहासं, देवर अनावरणा वराकीयम् । शीतेऽपि प्रस्विद्यति पुनरपि तस्याः कुरु च्छायाम् ॥] घर्मोपविष्टाया भ्रातृजायायाश्छायां कुर्वतो देवरस्य, द्वयोः स्वेदोद्गमं वीक्ष्य काचिद् विदग्धा वदति । हे देवर, मा मा । मुञ्च परिहासं, कुरु च्छायाम् । यतः शीतेऽपि प्रस्विद्यते, यत एव (? अत एव) निरावरणेयं वराकी ततोऽस्याः प्रियां छायां पुनः कुरु । आहारणं (? आहोरणं) उत्तरीयम् ॥६३५॥

६३६) महिषासुरस्य । [किं तस्य प्रावारकेण, किमग्निना किं च वासभवनेन । यस्योरसि निश्राम्यति ऊष्मायमाणस्तनी जाया ॥] किं तस्य प्रावारकेण वस्त्रेण, किमग्निना, किं वा वासगृहेण, यस्योरसि ऊष्मायमाणस्तनी नायिका लुठति । पारयं प्रावारकम् । निसम्मइ निपतति ॥६३६॥

६३७) ईशानस्य । [कमलाकराणामुष्णो हेमन्तः शीतलो जनपदानाम् । क इह भिन्नस्वभावं जानाति (परमार्थतो) लोके ।] उष्णः कमलाकराणां हेमन्तो दाहकत्वात ।.... ॥६३७॥[6]

१W. गब्भहरएण; २W. जस्स णिसम्मइ उअरे; ३W. उण्हायंतत्थणी; ४W. को किर; ५W. परमत्थयं.

६ Stanzas 638–640 are missing in both the BORI ms. with Ajada's commentary and the Baroda ms. with presumably Bhuvanapāla's commentary.

W730, R645, ६४१) चेरिएहिँ नज्जइ जणो संगोवंतो पि अप्पाणं।
उण्हु त्ति समत्थिज्जइ दाहेण सरोरुहाण हेमंतो॥४१॥

W745, R646, ६४२) कस्स न सद्धा गरुयत्तणस्स[1] पइणो पसायमइयस्स[2]।
जइ माणभंजणीओ न हुंति हेमंतराईओ ॥४२॥

W 774, R647, ६४३) हेमंते हिमरयधूसरस्स असरणस्स[3] पहियस्स।
सुमरियजायामुहसिज्जिरस्स सीयं चिय पणट्ठं ॥४३॥

६४१) [चरितैर्ज्ञायते जनः संगोपयन्नप्यात्मानम्। उष्ण इति समर्थ्यते दाहेन सरोरुहाणां हेमन्तः ॥] जणो चरिएहिँ नज्जइ लोकः सुचरितैर्ज्ञायते। किं कुर्वन्। संगोवंतो वि अप्पाणं संगोपयन्नप्यात्मानम्। अमुमेवार्थं समर्थयन्नाह। उण्हु त्ति समत्थिज्जइ उष्ण इति समर्थ्यते दाहेण सरोरुहाण हेमंतो दाहेन सरोरुहाणां हेमन्त इति। अर्थान्तरन्यासोऽलंकारः ॥६४१॥

६४२ कस्स वि (!)। [कस्य न श्रद्धा गुरुत्वस्य (निजगुरुत्वे) पत्युः प्रसादमयस्य। यदि मानभञ्जन्यो न भवन्ति हेमन्तरात्रयः ॥] कस्स न सद्धा गरुयत्तणस्स कस्य न श्रद्धा गुरुत्वस्य। कीदृशस्य। पइणो पसायमइयस्स पत्युः प्रसादमयस्य। जइ हेमंतराईओ न हुंति यदि हेमन्तरात्रयो न भवन्ति। कथंभूताः। माणभंजणीओ मानभञ्जिन्यः। कामिनीषु हि हैमनीषु यामिनीषु निकामं कामः प्रभवतीति ॥६४२॥

६४३) उरोभट्टस्य। [हेमन्ते हिमरजोधूसरस्य अशरणस्य पथिकस्य। स्मृतजायामुखस्वेदनशीलस्य शीतमेव प्रणष्टम् ॥] हेमंते पहियस्स सीयं चिय पणट्ठं हेमन्ते पथिकस्य शीतमेव प्रणष्टम्। कदाचिद् भवनाभ्यन्तरगतो भवतीत्याह। असरणस्स गृहरहितस्य अत एव हिमरयधूसरस्स (हिमरजोधूसरस्य)।(अपरं च कीदृशस्य)। सुमरियजायामुहसिज्जिरस्स स्मृतं यत् कान्तामुखं तेन स्वेदनशीलस्य। तत्स्मरणैकतानमनाः सदपि शीतं न गणयतीत्यर्थः। जइ इति सूचायां निपातः (?)। हेतुरलंकारः ॥६४३॥

---

१ W. The two halves stand transposed; २W गरुअत्तणम्मि; ३W पसाअमाणस्स; ४W ओ असरणस्स.

W.732,R648,६४४) पज्जालिऊण अग्गिं पुत्तिय[1] किण्णो समोसरसि ।
थणयलसपडियपडिमा फुरंति न छिवंति ते जाला ॥४४॥

W734, R649,६४५)कह ए[2] धूमंधारे अब्भुत्तणमग्गिणो समप्पिहिइ[3] ।
मुहकमलचुंबणालेहडम्मि पासट्ठिए दियरे ॥४५॥

W733,R650,६४६) अग्गिं अब्भुत्तंतोएँ पुत्ति पडिमागया कवोलम्मि ।
कण्णलइयल्लपल्लवलल्लिं[4] बंधेइ ते जाला ॥४६॥

६४४) वैरसिंहस्य । [प्रज्वाल्याग्निं पुत्रि किं नु समपसरसि । स्तन-कलशपतितप्रतिमाः स्फुरन्ति, न स्पृशन्ति त्वां ज्वालाः॥] काचित् प्रदीप्तदहनं कुचकलशसंक्रान्तज्वालाशङ्कया परिहरन्ती कयाचिदेवमुच्यते । थणयल-सपडियपडिमा फुरंति न छिवंति ते जाला स्तनकलशपतिताः प्रतिमाः स्फुरन्ति, न स्पृशन्ति(त्वां)ज्वालाः । तस्मात्स्तनलग्नज्वलनज्वालाशङ्कया माऽपतिष्ठेति । ते इति कर्मणि षष्ठी । किण्णो इति किणोशब्दस्य एवादित्वात् (? सेवादित्वात्) द्वित्वे रूपम् । पृथुस्तनतावर्णनपरेयमुक्तिः ॥६४४॥

६४५)मनोभवस्य।[कथमयि धूमान्धकारे अभ्युत्तेजनमग्नेः समाप्स्यते । मुखकमलचुम्बनालम्पटे पार्श्वस्थिते देवरे ॥] पासट्ठिए दियरे पार्श्वस्थिते देवरे । कीदृशे । मुहकमलचुंबणालेहडम्मि मुखकमलचुम्बनलम्पटे । तस्मिन् हि वक्त्रेन्दुबिम्बचुम्बनचटुके अग्निसंधुक्षणफूत्कारमारुतमोहावसरः (?)तत्र भवतीति भावः ॥ अब्भुत्तणं संधुक्षणम् । लेहडो लम्पटः ॥६४५॥

६४६) तरङ्गमत्याः । [अग्निम् अभ्युत्तेजयन्त्याः पुत्रि प्रतिमागता कपोले ।कर्णगृहीतार्द्रपल्लवलीलां बध्नाति ते ज्वाला ॥] हे पुत्ति पुत्रि, ते कवोलम्मि तव कपोले कण्णलइयल्लपल्लवलल्लिं बंधेइ कर्णगृहीतार्द्रपल्लव-लीलां बध्नाति । का । जाला ज्वाली । कीदृशी । पडिमागया प्रतिमागता । कीदृश्यास्तव । अग्गिं अब्भुत्तंतीएँ अग्निं संधुक्षमाणायाः । उपमालंकारः। लल्ली लीला ॥६४६॥

१W मुहेण पुत्तिएँ किणो समोसरसि; २W. दे; ३W. समप्पिहइ; ४W. कण्णालंबिअ-पल्लवलच्छि संधेइ.

W 735,R651 ६४७) आयंबच्छं वियलंतबाहमाबद्धथणहरुक्कंपं।
असमत्तं चिय चिट्ठउ सिहिणो अब्भुत्तणमिणं ते ॥४७॥

W 740 R652,६४८) जो होइ रसासाओ सुविणट्ठाणं पि पल्लवच्छूणं।
(पुंडरिच्छूणं)।
कत्तो सो होइ रसो मोहासाणं भमासाणं ॥४८॥

W775,R653,६४९) उवइसइ लट्ठियम्मं कड्ढेइ रसं न देइ सोत्तुं जे।
जंतस्स जुव्वणस्स य नज्जइ इक्कु च्चिय सहावो॥४९॥

६४७) धारावर्षस्य। [आताम्राक्षं विगलद्बाष्पमाबद्धस्तनभरोत्कम्पम्। असमाप्तमेव तिष्ठतु शिखिनोऽभ्युत्तेजनमिदं ते ॥] सिहिणो अब्भुत्तणमिणं ते शिखिनः संधुक्षणमिदं ते। कीदृशम्। आयंबच्छं आताम्राक्षम्। वियलंतबाहं विगलद्बाष्पम्। आबद्धथणहरुक्कंपं आबद्धः स्तनभरस्योत्कम्पो यस्मिन, तत् तथोक्तम्। ईदृशम् अग्निसंधुक्षणम् असमाप्तमेव तिष्ठतु। अस्मिन् हि धूमाभिभवात् पाटलबाष्पाविलविलोललोचना समुन्मुक्तफूत्कारमरुत्कम्प्रकुचाभिमनोहरा भवती, इति भावः। प्रियप्ररोचनमिदमिति। जातिरलंकारः ॥६४७॥

६४८) पवनशक्तेः। [यो भवति रसास्वादः सुविनष्टानामपि पल्लवेक्षूणाम् (? पुण्ड्रेक्षूणाम्)। कुतः स भवति रसो मोघाशानां शरविशेषाणाम्।]सुगमा गाथा। भमासो शरविशेषः। अन्योक्तिरलंकारः॥६४८॥

६४९) अकालवर्षस्य। [उपदिशति यष्टिकर्म, कर्षति रसं न ददाति स्वप्तुं हि। यन्त्रस्य यौवनस्य च ज्ञायत एक एव स्वभावः॥] नज्जइ इक्कु च्चिय सहावो ज्ञायत एक एव स्वभावः। कस्य। जंतस्स जुव्वणस्स य यन्त्रस्य यौवनस्य च। कोऽसौ स्वभाव इत्याह। उवइसइ लट्ठियम्मं उपदिशति यष्टिकर्म। कड्ढेइ रसं कर्षति रसम्। न देइ सोत्तुं जे न ददाति स्वप्तुम्। एवं यौवनेऽपि योज्यम्। श्लेषोऽलंकारः ॥६४९॥

१W. पअलंतवाहं; २W. पुंडइच्छूणं; Ajada: पंडरच्छूणं; ३W अणिच्छूणं; ४W लडियाणं; ५W. ण होइ इच्छु चिय सहावो.

W 776, R654, ६५०) बहुएहि[१] जंतिएहि सिट्ठं अम्हं सवहकरणेण।
सद्दुच्चिय से भद्दो भोइणिजंते रसो नत्थि ॥५०॥

W736,R655,६५१) छणपाहुणिय[२] त्ति किणो अज्ज वि नं भणह संगयसहावं[३]।
जाया अम्हघरिल्लयगुणेण घरसामिणी चेय ॥५१॥

W737,R656,६५२) वण्णक्कमं न याणसि ठाणविसुद्धी वि नेयँ[४] निव्वडिया।
चित्तयर तह वि मग्गसि भोइणिकुड्डम्मि आलिहिउं ॥५२॥

६५०) गण्डराजस्य। [बहुभिर्यान्त्रिकैः कथितमस्माकं शपथकरणेन। शब्द एव तस्या भद्रो भोजिनी- (भोगिनी–) यन्त्रे रसो नास्ति ।] निगदव्याख्यातेयं गाथा ॥६५०॥

६५१) तस्यैव (गण्डराजस्य) । [क्षणप्राघुणिकेति किं नु अद्यापि एनां भणत संगतस्वभावाम्। जाता अस्मद्गृहपतिगुणेन गृहस्वामिन्येव॥] काचित् कांचित् क्षणप्राघुणिकेति व्याहरन्ती गृहिण्या सखेदमिदमुच्यते । छणपाहुणिय त्ति किणो क्षणप्राघुणिकेति कस्मात्, अज्ज वि नं भणह अद्याप्येतां भणत, संगयसहावं संगतमेव स्वभावो यस्याः सा तथोक्ता। यत एषा अम्ह घरिल्लियगुणेण घरसामिणी चेय जाया अस्मद्गृहपतिगुणेन गृहस्वामिन्येव जाता । अस्मत्स्वामी पराङ्गनालम्पटः, इयं च संगतशीला । तत् किमद्यापि मोहात् प्राघुणिकेत्यभिधीयत इति भावः । ईर्ष्या संचारी भावः । स्वीया नायिका । छणं उत्सवः । घरिल्लओ गृहस्वामी ॥ ६५१ ॥

६५२) पयवस्य (?) । [वर्णक्रमं न जानासि स्थानविशुद्धिरपि नैव निष्पन्ना । चित्रकर तथापि मार्गयसे भोजिनी-(भोगिनी)-कुड्य आलिखितुम् ॥] हे चित्तयर चित्रकर, वण्णक्कमं न याणसि वर्णानां सितादिकवर्णकविशेषाणां क्रमं परिपाटीं न जानासि। ठाणविसुद्धी वि

१W. जंपिएहिं सिट्ठं अम्ह सवहे करेऊण. २W. छणपाहुणिए त्ति; ३W. अंगसंतावं; ४W. दे ण णिव्वडिआ.

W777,R657 ६५३) पढमं चिय माहवपट्टयं व घित्तूण दाहिणो वाऊ[1]।
अंकुल्लपढमवत्तं पहिंडिओ गामरच्छासु ॥५३॥

W778,R658,६५४)सो माणो पियमुहयंददंसणे कह थिरो धरिज्जिहिइ।
अंकुल्लछारयाणं जो [2]फुट्टहिययाण बीहेइ ॥५४॥

नेय निव्वडिया स्थानानाम् ऊर्ध्व-अङ्कायत (? वक्रायत) अञ्जसा (?) विपराङ्मुखप्रभृतीनां या विशुद्धिः साऽपि तव न निष्पन्ना। तह वि मग्गसि भोइणिकुड्डम्मि आलिहिउं तथापि मार्गयसे भोगिन्याः कुड्यं भित्तिम् आलिखितुम् इत्येकोऽर्थः। अपरस्तु। वर्णानां प्रदेशानां विशुद्धिरपि तव नास्ति। तत् किमेवं भोगिन्या विलासवत्यास्तस्याः कुड्यम् आलिखितुं वाञ्छसि। वराङ्गतानां (? वराङ्गनां) रमयितुं वाञ्छसीति। ईश्वरस्य विदग्धस्य च तया सह संगमो भवतीत्यर्थः ॥६५२॥

६५३) अन्यशक्तेः। [प्रथममेव माधवपट्टकमिव गृहीत्वा दक्षिणो वायुः। अङ्कोठप्रथमपत्रं प्रहिण्डितो ग्रामरथ्यासु ॥] गामरच्छासु ग्रामरथ्यासु वाऊ पहिंडिओ वायुः प्राहिण्डितः। किं कृत्वा। घित्तूण गृहीत्वा। अंकुल्लपढमवत्तं अङ्कोठप्रथमपत्रम्। किमिव। माहवपट्टयं व माधवपट्टकमिव। उत्प्रेक्षालंकारः ॥६५३।

६५४) रिस्तोः (?)। [स मानः प्रियमुखच द्रदर्शने कथं स्थिरो धरिष्यते। अङ्कोठकोरकेभ्योऽपि यः स्फुटितहृदयेभ्यो बिभेति ॥] सो माणो कह थिरो धरिज्जिहिइ स मानः कथं स्थिरो धारयिष्यते। क्व सति। पियमुहयंददंसणे प्रियमुखचन्द्रदर्शने। कोऽसावित्याह। जो अंकुल्लछारयाणं बीहेइ योऽङ्कोठकोरकेभ्योऽपि बिभेति। कीदृशेभ्यः। फुट्टहिययाण स्फुटितहृदयेभ्यः। एतदुक्तं भवतिद। आस्तां तावद् बकुलचम्पककथा। प्रियमुखमृगाङ्कलोकनेन मनः स्थिरः छारयतीति (?) ॥६५४॥

[1] W. वाओ; [2] W फुट्टमुहाण.

W779R659), ६५५) कारणगहिओ वि मए माणो एमेव जं समोसरिओ।
अत्थक्कफुल्ल अंकुल्ल तुज्झ तं मत्थए पडउ ॥५५॥
W780R660,) ६५६) सेज्जेह देह तूरं रएह कुसुमाइँ कुणह विच्छित्तिं।
न वि तह पुहविवइस्स वि जह हलहलओ वसंतस्स ॥५६॥
W499R661) ६५७) खेमं कत्तो खेमं जो सो खुज्जंबओ इहँ गामे।
तस्सेय मत्थयाओ किं पि अणत्थं समुप्पन्नं ॥५७॥

६५५) रविविक्रमस्य। [कारणगृहीतोऽपि मया मान एवमेव यत् समपसारितः। अकालपुष्पिताङ्कोठ तव तन्मस्तके पततु ॥] काचित् कुड्मलिताङ्कोठविधूतमाना मानिनी प्रियानुनयसुखमनासादयन्ती इदमाह। कारणगहिओ वि मए कारणगृहीतोऽपि मया माणो एमेव मान एवमेव जं समोसरिओ यत् समपसारितः। अत्थक्कफुल्ल अंकुल्ल अकालकुसुमिताङ्कोठ, तुज्झ तं मत्थए पडउ तव तन्मस्तके पततात्, इत्याक्रोशनम् ॥६५५॥

६५४) [सज्जयत दत्त तूर्यं रचयत कुसुमानि कुरुत विच्छित्तिं। नैव तथा पृथिवीपतेरपि यथौत्सुक्यं वसन्तस्य ॥] गतार्था गाथा। विच्छित्तिर्मण्डनम्। हलहलओ औत्सुक्यम् ॥६५६॥

६५७) माधवस्य। [क्षेमं कुतः क्षेमं, योऽसौ कुब्जाम्रक इह ग्रामे। तस्यैव मस्तकात् कोऽप्यनर्थः समुत्पन्नः ॥] काचिद् विरहिणी चूतमञ्जरीं निरीक्ष्य ससंदेहा इदमाह। खेमं कत्तो खेमं क्षेमं कुतः क्षेमम्। जो सो खुज्जंबओ इह गामे, योऽसौ कुब्जाम्र इह ग्रामे तस्सेय मत्थयाओ तस्यैव मस्तकात् किं पि अणत्थं समुप्पन्नं कोऽप्यनर्थः समुत्पन्नः। मञ्जरी निर्यातेति भावः। खेमं कत्तो खेमं इति संभ्रमे द्विरुक्तिः। खुज्जंबओ कुब्जाम्रः ॥६५७॥

१W. रंजेह देहरूवं; २W. देह; ३W. हलहलओ जह, ४W घरद्दारे.

W781R662,६५८)सिसिरे वणदवदड्ढं वसंतमासम्मि पुणं वि संभूयं ।
मंकुसकण्णसरिच्छं दीसइ पत्तं पलासस्स ॥५८॥

W782R663, ६५९) दूरपइण्णपरिमलं सपल्लवं मुद्धपुप्फपंगुरणं ।
अंगच्छित्तं मिवं वम्महेण दिन्नं महुसिरीए ॥५९॥

W783 R664,६६०)कारणगहियं पि इमा माणं मोएइ माणिणिजणस्स ।
सहयारमंजरी पियसहि व्व कण्णे समल्लीणा ॥६०॥

६५८) सिद्धस्य । [शिशिरे वनदवदग्धं वसन्तमासे पुनरपि संभूतम् । नकुलकर्णसदृक्षं दृश्यते पत्रं पलाशस्य ।।] दीसइ पत्तं पलासस्स दृश्यते पत्रं पलाशस्य । कीदृशम् । सिसिरे वणदवदड्ढं शिशिरसमये दवाग्निना दग्धं, वसंतमासम्मि पुण वि संभूयं वसन्तमासे पुनरपि संभूतम् । किमिव । मंकुसकण्णसरिच्छं नकुलकर्णसदृक्षम् । लघिम्ना लोमशकपिलानां पलाशदलानां नकुलकर्णोपमावीनम् । मंकुसो नकुलः । उपमालंकारः ॥६५८॥

६५९) रविराजस्य । [दूरप्रकीर्णपरिमलं सपल्लवं मुग्धपुष्पप्रावरणम् । अङ्गस्पृष्टमिव मन्मथेन दत्तं मधुश्रियः ॥] अंगच्छित्तं मिव वम्महेण दिन्नं अङ्गस्पृष्टमिव मन्मथेन दत्तम् । कस्याः महुसिरीए मधुश्रियः । किं तत् । सपल्लवं मुद्धपुप्फपंगुरणं पल्लवसहितं मुग्धपुष्पाण्येव प्रावरणम् । कीदृशं तत् । दूरपइण्णपरिमलं दूरं प्रकीर्णः क्षिप्तः परिमलो येन तत् तथोक्तम् । यत् किल स्वामिनोऽङ्गस्पृष्टं तत्सङ्गं (? तत्सङ्गाद्) भवति प्रसादपारितोषिकं यदङ्गादुन्मोच्य दीयते । मधुसमये सपल्लवपुष्पा वनराजिः स्मरं दीपयतीत्यर्थः । उत्प्रेक्षालंकारः ॥६५९॥

६६०)[कारणगृहीतमपीयं मानं मोचयति मानिनीजनस्य । सहकारमञ्जरी प्रियसखीव कर्णे समालीना] इमा सहयारमंजरी माणं मोएइ इयं सहकारमञ्जरी मानं मोचयति । कस्य । माणिणिजणस्स मानिनीजनस्य ।

1w उअह; 2w पिव.

W784R665,६६१) अज्जं चिय घणदियेहे मा पुत्ति परुवसु एहिइ पिओ दे।
सुण्हं आसासंती पडियत्तमुही रुवइ सासू ॥६१॥

W785R666,६६२) दियहे दियहे निवडइ गहैवइधूयामिसेण माउच्छा।
संगहणइत्तवाउयत्रसुहारा खुज्जसहयारे ॥६२॥

W786R667, ६६३) आउच्छणोवऊहणकंठसमोसरियबाहुलइयाए।
वलयाइँ पहियचलणे वहूएँ निलयाइँ व पडंति ॥६३॥

कीदृशं मानम्। कारणगहियं पि कारणेन प्रियापराधेन गृहीतमपि। कीदृशी। कण्णे समल्लीणा कर्णे संलीना अन्तंसतां गता। केव। पियसहि व्व प्रियसखीव। यथा सा कर्णाभ्यर्णवर्तिनी उपदेशदानेन मानं मोचयति तथा सहकारमञ्जरी, उद्दीपनविभावत्वात् तस्याः। वसन्ते हि समयस्वभावान्मानिन्यो मानं मुञ्चन्ति। उपमालंकारः ॥६६०॥

६६१ जयराजस्य। [अद्यैव क्षणदिवसे मा पुत्रि प्ररोदिहि, एष्यति प्रियस्ते। स्नुषामाश्वासयन्ती परिवृत्तमुखी रोदिति श्वश्रूः ॥] गतार्था गाथा। जातिरलंकारः ॥६६१॥

६६२) स्नेहशक्तेः। [दिवसे दिवसे निपतति गृहपतिदुहितृमिषेण मातृष्वसः। संग्रहणप्रसिद्धव्यापृतवसुधारा कुब्जसहकारे ॥] हे माउच्छा मातृष्वसः, संगहणइत्तवाउयवसुहारा दियहे दियहे निवडइ। संग्रहणवित्तो धावति (?) (वाउओ) ग्रामोत्तमः। तस्य वसुधारा धनसंततिर्दिवसे दिवसे निपतति, प्रत्यहं धनमुत्पद्यत इत्यर्थः। क्व। खुज्जसहयारे कुब्जसहकारे। केन रूपेण। गहवइधूयामिसेण गृहपतिसुतापदेशेन। एतदुक्तं भवति। यो यस्तत्र संकेतकामः कामुको गृहपतिसुतया सह संगमं करोति तं तमसौ दण्डयतीत्यर्थः। वाउओ ग्रामो मतः (? ग्रामोत्तमः) ॥६६२॥

६६३) हरिराजस्य। [आपृच्छनोपगूहनकण्ठसमपसृतबाहुलतिकायाः। वलयानि पथिकचरणे वध्वा निगडानीव पतन्ति ॥] वहूएँ वलयाइँ पहिय-

१W छणदियहो; २W मा पुत्ति रुएहि एहइ पिंओ त्ति; ३W गिहवइधूयाणिहेण; ४W. संगहणइ त्ति वावड वसुहारा.

W787R668,६६४)उड्डियपासं तणछन्नकंदरं निहुयसंठियारक्खं।
जूहाहिव परिहर पमुहमित्तसुहयं कलमछित्तं ॥६४॥
W788R669,६६५)वणसालिणो वि करिणो होहिइ जूहाहिवत्तणं कत्तो।
नवसालिकवललोहिल्लयाए विंझं मुयंतस्स ॥६५॥

चलणे पडंति वध्वा वलयानि पथिकचरणयोर्निपतन्ति। कानीव निलयाइँ व निगडानीव। कीदृश्या वध्वाः। आउच्छणोवऊहणकंठसमोसरियबाहुलइयाए अप्राप्ते(? प्राप्ते) वियोगे पुनर्दर्शनोक्तौ यदवगूहनं, तत्र कण्ठात् समपसृते बाहुलते यस्याः सा तथोक्ता। कायकार्श्यवशविस्रस्तवलयाया भविष्यत्पथिकस्य पत्युः पादयोर्निगडानीव पतितानि। तदाकारत्वाद् गमननिषेधकत्वाच्च वलयानां निगडैरौपम्यम्। उत्प्रेक्षालंकारः ॥६६३॥

६६४) देवराजस्य। [प्रसारितपाशं तृणच्छन्नकन्दरं निभृतसंस्थितारक्षम्। यूथाधिप परिहर प्रमुखमात्रसुखदं कलमक्षेत्रम् ॥] हे जूहाहिव परिहर कलमछित्तं हे यूथाधिप परिहर कलमक्षेत्रम्। कीदृशम्। उड्डियपासं प्रसारितपाशं, तणछन्नकंदरं तृणच्छन्नकन्दरं, निहुयसंठियारक्खं निभृतं संस्थिता आरक्षका यत्र तत् तथोक्तम्। एवंविधमपि कदाचिन्महते गुणाय जायत इत्याह। पमुहमित्तसुहयं मुखमात्रसुन्दरम्। अत उक्तप्रकारेण उपापमतिपुण्यगुणं (?) कलमकेदारं यूथाधिप मावतरिष्यसीति। आक्षेपान्यापदेशाभ्यां संकरोऽलंकारः ॥६६४॥

६६५) सत्यधर्मस्य।[वनशालिनोऽपि करिणो भविष्यति यूथाधिपत्वं कुतः। नवशालिकवललोलुपतया विन्ध्यं मुञ्चतः ॥] करिणो जूहाहिवत्तणं कत्तो होहिइ दन्तिनो यूथाधिपत्वं कुतो भविष्यति। किंभूतस्य। वणसालिणो वनेन राजते शोभते तच्छीलं यस्य स तथोक्तः, तस्यापि। इह हि वनान्यष्टौ दन्तिनां भवन्ति। तद्यथा। लोहित्योदधि -(?) काननानि यमुनामन्दाकिनोसंगमः शम्भोर्मौलिभुजङ्गमस्तकमणिच्छायाकणा

१W. णिहुअसंठियावक्खं; २W. मुहमेत्तसरीयं; ३W. गुणसालिणो वि; ४. होहइ.

W789 R670, ६६६) विहिणा अणुज्जुएणं पुत्तय, जाओ कुलम्मि पढमम्मि ।
जाइविसुद्धो भद्दो वि बंधणं पावइ खणम्मि ॥६६॥

जाह्नवी । मन्दारोपवनोपविष्टविलसद्विन्ध्याधरारेः (?) शरहीतासारित (?) कन्दरश्च हिमवांश्चध्वंवरं (?) दन्तिनाम् ॥ इत्याप्राच्यगिरेस्तन्मध्योत्तमवनोद्भवस्यापि । कथं तर्हि यूथाधिपत्यं न भविष्यतीत्याह । विंझं मुयंतस्स विन्ध्याख्यं गिरिं परित्यजतः । कया । नवशालीनां कवलेषु या लोभिता, तया । यः खलु तुङ्गकुलप्रसूतोऽपि भूत्वा प्रथमे वयसि वर्तमानोऽपि प्रवर्तते (?) स एवं भङ्गीभणित्याऽभिधीयत इति । अन्यापदेशोऽलंकारः ॥६६५॥

६६६) तस्यैव (सत्यधर्मस्य) । [विधिनाऽनृजुना पुत्रक जातः कुले प्रथमे । जातिविशुद्धो भद्रोऽपि बन्धनं प्राप्नोति क्षणे ॥] हे पुत्तय पुत्रक, विहिणा अणुज्जुएणं वेधसाऽनृजुकेन बंधणं पावइ खणम्मि बन्धनं प्राप्नोति क्षणे । कदाचिद् विगुणः स्यादित्याह । जाओ कुलम्मि पढमम्मि जातः कुले प्रथमे, ऐरावतस्येत्यर्थः । अष्टौ हि कुलानि भवन्ति । ऐरावतः पुण्डरीको वामनः कुमुदोऽञ्जनः । पुष्पदन्तः सार्वभौमः सुप्रतीकश्च दिग्गजाः ॥ अन्यच्च कीदृशः । जाइविसुद्धो जात्या विशुद्धः । भद्दो वि भद्रोऽपि । भद्रमन्द्रमृगसंकीर्णभेदेन चतस्रो जातयो भवन्ति । तन्मध्याद् भद्रजातिर्विशुद्धापि (? विशुद्धाऽस्ति) । सन्ति हि संकीर्णानेकविधा एकद्वित्रिमनो (?) भेदाः पृथङ् नव नव त्रयः (?) । एकं देहाद् विदेहांश्चाङ्गत्रिद्वयेकक‍ल्पनादिति भवन्ति संकीर्णजातयः । एवंगुणविशिष्टो विविधैकर्येण (?) बन्धनं प्राप्नोति । तन्मार्धदिरिवप्रा (?) इति । दैवप्रभाववर्णनपरेयमुक्तिः । समासोक्तिरलंकारः ॥६६६॥

W790 R671, ६६७) चउवासदिन्नहुयवहविसमाहयपडहवेढणाविउलं।
निव्वाहेउं जाणइ जूहं जूहाहिवु च्चेय ॥६७॥

W791 R672, ६६८) ओलग्गकवोलेण वि विगयमएण पत्तदसावसाणम्मि।
अज्ज वि तए सणाहं गयवइ जूहं धरंतेण ॥६८॥

W792 R673, ६६९) न वि तह दूमेइ मणो गयस्स बंधो वि करिणिविरहो वि।
दाणविओयविमुहियं जह भमरउलं परिभमंतं ॥६९॥

६६७) प्रवरस्य । [चतुष्पार्श्वदत्तहुतवहविषमाहतपटहवेष्टनाविपुलम् । निर्वाहयितुं जानाति यूथं यूथाधिप एव ॥] चतुष्पार्श्वदत्तहुतवहविषमाहतपटहं यद्वेष्टनं तेन विउलं आविग्नम् । इत्थंभूतं यूथं यूथाधिप एव निर्वाहयितुं जानाति, नान्यः । स हि दह्यमानदेहोऽपि क्वचिद् दववह्निमह्वयन् (?), क्वचित् करसीकरोत्करेण शमयन, क्वचित् पादावपातेन मृद्नन्, एकैकं करिकुलम् अनाकुलं निष्क्रामयतीति । अन्योक्तिरलंकारः ॥ ६६७ ॥

६६८) तस्यैव (प्रवरस्य) । [अवलग्नकपोलेनापि विगतमदेन प्राप्तदशावसाने । अद्यापि त्वया सनाथं गजपते यूथं ध्रियमाणेन ।।] गयवइ गजपते, अज्ज वि तए मणाहं जूहं अद्यापि त्वया सनाथं यूथम् । कथंभूतेन । धरंतेण जीवतेत्यर्थः । कदाचित् समर्थः स्यादित्याह ।........ [आजड–हे गजपते, दशानामवसाने प्राप्ते, अन्तिमायां दशायां प्राप्तायां, क्षामकपोलेन विमदेनापि त्वया ध्रियमाणेन जीवता, अद्यापि कुलं सनाथमेव । त्वद्विक्रमस्मरणान्न कश्चिद् दुर्नयमाचरतीत्यर्थः । अन्त्यदशायां गजस्य क्षामकपोलता विमदता च भवति । ओलग्गं क्षामं विच्छायं च ।]६६८॥

६६९) सुरभिवत्सस्य । [नैव तथा दुनोति मनो गजस्य बन्धोऽपि करिणीविरहोऽपि । दानवियोगविमुखितं यथा भ्रमरकुलं परिभ्रमत् ॥]

---

१ w. पिउलं; २w. अल्लग्गकवोलेण वि; ३w.गयमइणा पत्तदसावसणम्मि; ४w. अज्ज वि माएँ सणाहं; ५w. गयवइजूहं; ६w. मणं; ७w. ०विमुहिएः ८w. भमरउले; ९w. भमंतम्मि.

W630,R674, ६७०) जह चिंतेइ परियणो आसंकइ जह य तस्स प-
डिवक्खो ।
बालेण वि गामणिणंदणेण तह रक्खिया पल्ली ॥७०॥

W631,R675, ६७१) अन्नेसु पहिय पुच्छसु वाहकुडुंबेसु पूसचम्माइं ।
अम्हं वाहजुवाणो हरिणेसु धणुं न संधेइ ॥७१॥

W632,R676, ६७२) गयवहुवेव्वहयरो मह पुत्तो इक्ककंडविणिवाई ।
हयसुन्हाए तह कओ जह कंडकरंडयं वहइ ॥७२॥

[आजड-विषमदशागतस्य सत्पुरुषस्य स्वदुःखात् परिजनस्य कष्टदर्शनं मह-दसुखम् इत्यर्थेऽन्योक्तिमाह । बन्धोऽपि करिणीविरहोऽपि नैव तथा गज-स्य मनो दुनोति, यथा दानविप्रयोगविमुखम् इतस्ततः परिभ्रमद् भ्रमर-कुलं दुनोतीति । बद्धानां यूथवियोगदुःखितानां च गजानां प्रायो मदोदयो न स्यादिति ॥] ॥६६९॥

६७०)[यथा चिन्तयति परिजन आशङ्कते यथा च तस्य प्रतिपक्षः। बालेनापि ग्रामणीनन्दनेन तथा रक्षिता पल्ली ॥] [आजड–परिपालकप्रशं-सायामन्योक्तिः । यथा चिन्तयति परिजनः, आशङ्कते भयं करोति यथा प्रतिपक्षः, तथा बालेनापि ग्रामणीनन्दनेन पल्ली रक्षिता । करसंकोचेन प्रजारञ्जनं कृतम् (?) सर्वत्र जागरूकतया च शत्रवो भीषिता इत्यर्थः ॥] ॥६७०॥

(६७१)[अन्येषु पथिक पृच्छ व्याधकुटुम्बेषु पृषच्चर्माणि । अस्मा-कं व्याधयुवा हरिणेषु धनुर्न संधत्ते ॥][आजड–हालस्य । सुकरकर्मपरि-हारेण दुष्करकर्माङ्गीकारेण च स्वपक्षोत्कर्षार्थम् अन्योक्तिः । हे पथिक, अन्येषु व्याधकुटुम्बेषु चित्रकचर्माणि पृच्छ । अस्माकं व्याधयुवा हरिणेषु धनुर्न संधत्ते । पूसो चित्रकः] ॥६७१॥

६७२)[गजवधूवैधव्यकरो मम पुत्र एककाण्डविनिपाती । हतस्नु-षया तथा कृतो यथा काण्डसमूहं वहति ॥] [आजड–संवरशक्तेः । यः

१W.वाहअपुत्तेसु; २W. पुसियचम्माइं; ३W.ण णामेइ; ४W. पुत्तो में; ५W. तह सोण्हाइ पुलइओ.

W793 R677, ६७३) गामम्मि गोहेणाइं [2]दिन्नंगक्खेवचोरदिट्ठाइं ।
गहवइणो नामेणंकियाइ अन्नेण वि जणेण ॥७३॥
W633R678, ६७४) विंझारुहणालावं [3]मा पल्ली कुणउ गामणी ससइ ।
प[4]च्चुज्जीवो जइ कह वि सुणइ ता जीवियं मुयइ ॥७४॥

परसंसर्गात् पतद्गुणो भवति तत्रार्थेऽन्योक्तिं दर्शयति ।मम पुत्रो गजवधू-वैधव्यकर एककाण्डविनिपाती, स तथा हतवध्वा कृतो यथा काण्डसमूहं वहति । पूर्वम् एकघातेन हस्तिनमपातयत् । असौ संप्रति तदासक्तत्वान् निःसारः सन्, काण्डशतेनापि हन्ति न वेत्यर्थः । वरंडः समूहः ॥] ॥६७२॥ [भुवनपाल– ....तथा कृतो यथा काण्डकदम्बकं वहति । कदाचिदसमर्थ एव स्यादित्याह । गजवहुवेहव्वयरो गजवधूनां वैधव्यकारः। तर्हि अतिवध्य कदाचिन् मा गगणेन गजथापादयतात्याह (? तर्हि अतिविध्य कदाचिन् मार्गणगणेन गजव्यापादयिता स्यादित्याह) । इक्ककंडविणिवाई एककाण्डेन विनिपातनशीलः । एवंभूतोऽपि मत्सुतो हतस्नुषायामासक्तः शक्तिक्षयाच्छरसमूहवाही वर्तत इत्यर्थः । वरंडः समूहः]॥६७२॥

६७३)भुवनपाल–अमरदेवस्य । [ग्रामे गोधनानि दत्ताङ्कक्षेपचोरदृष्टानि । गृहपतेर्नाम्नाऽङ्कितान्यन्येनापि जनेन ॥] गणंकियाइ (? नामेणं-कियाइ) । अन्येनापि जनेन गृहपतेर्नाम्ना अङ्कितानि चिह्नितानि । किंभूतानि । दिन्नंगक्खेवचोरदिट्ठाइं दत्ताङ्कक्षेपा ये चोरा स्तैर्दृष्टानि । ते हि गृहपति ....। तन्नाम्नाङ्कितानीत्यर्थः । गृहपतेः पौरुषप्रशंसापरेयमुक्तिः। ॥[आजड–माधवशक्तेः। जगदाकम्पकारिपुरुषप्रशंसायामन्योक्तिमाह । गोधनान्यपहरन्तश्चोरा गवादीनां पार्श्वद्वयमपि दत्ताङ्कक्षेपं यथा भवति, एवम् अङ्गं चालयित्वा निभालयन्ति । गृहपतिनामाङ्कितं परिहरन्तीति ज्ञात्वा जनैर्ग्रामगृहपतिनाम्ना गोधनान्यङ्कितानीत्यर्थः] ॥६७३॥

६७४) क्षुण्णभोगिनः । [विन्ध्यारोहणालापं मा पल्ली करोतु ग्रामणीः श्वसिति । प्रत्युज्जीवितो यदि कथमपि शृणोति तज्जीवितं मुञ्च-

१W. मोहणाइं; २W. दिण्णे खग्गे व्व चोरहित्थाइं ३W. पल्ली मा कुणउ; ४W. पच्चुज्जीविओ.

W634R679, ६७५) अप्पाहेइ मरंतो पुत्तं पल्लीवई पयत्तेण ।
मह नामेण जह तुमं न लज्जसे तह करिज्जासु ॥७५॥

W694 R680, ६७६) गहियाइँ अंगयाइं बाहिरलोएण मासलुद्धेण ।
हिययं हियएण विणा न देइ वाही भमइ हट्टं ॥७६॥

ति ।।] विंझारुहणालावं पल्ली मा कुणउ विन्ध्यारोहणालापं पल्ली मा करोतु यतः गामणी ससइ ग्रामणीः श्वसिति । यदि श्वसिति तत् किम् इत्याह । पच्चुज्जीवो जइ कह वि सुणइ ता जीवियं मुयइ प्रत्युज्जीवतो यदि कथंचिच्छृणोति तज्जीवितं मुञ्चति ।।६७४।।

६७५) [संदिशति म्रियमाणः पुत्रं पल्लीपतिः प्रयत्नेन ।। मम नाम्ना यथा त्वं न ज्ञायसे तथा कुर्याः ।।] पुत्तं पल्लीवई पयत्तेग अप्पाहेइ पल्लीपतिः पुत्रं प्रयत्नेन संदिशति । किं कुर्वन्। मरंतो म्रियमाणः । किं संदिशतीत्याह । मह नामेण जह तुमं न लज्जसे तह करिज्जासु मम नाम्ना यथा त्वं न ज्ञायसे तथा कुर्याः । शौर्यशौण्डोर्यशालिना भवता भवितव्यमिति भावः । अप्पाहियं संदिष्टम् ।।६७५।।

६७६) हालस्य । [गृहीतान्यङ्गकानि बाह्यलोकेन मांसलुब्धेन । हृदयं हृदयेन विना न ददाति व्याधी भ्राम्यत्यापणम् ।।] गहियाइँ अंगयाइं बाहिरलोएण मासलुद्धेण गृहीतान्यङ्गकानि बहिर्लोकेन मांसलुब्धेन । हियर्यं हियएण विणा न देइ वाही हृदयं हृदयेन विना न ददाति व्याधवधूः भमइ हट्टं भ्राम्यत्यापणम् इति बाह्योऽर्थः । आन्तरस्तु–गृहीतान्यङ्गकानि वदननयनस्तनादीनि बाह्यलोकेन अविदग्धजनेन । कीदृशेन । मांसलुब्धेन मांसस्पर्शलुब्धेन । हृदयं तु व्याधी हृदयेन चित्तेन विना न ददाति । सहृदय एव जने हृदयं ददातीत्यर्थः ।।६७६।।

१W ण लज्जसे; २W. मलिणाइं अंगाइं; ३W. मँसलुद्धेण.

W 636 R681, ६७७) महुमच्छियाएँ डक्कं दट्ठूण मुहं पइस्स सूणुट्ठं ।
ईसाइया पुलिंदी रुक्खच्छायं गया अन्नं ॥७७॥

W 635 R 682, ६७८) अणुमरणपत्थियाए पच्चागयजीविए पियय-
मम्मि ।
वेहव्वमंडणं कुलवहूएँ सोहग्गयं जायं ॥७८॥

W 637 R683, ६७९) धन्ना वसंति नीसंकमोहणे बहलपत्तलवईए ।
वायंदोलणहल्लंतवेणुगहणे गिरिग्गामे ॥७९॥

६७७) [मधुमक्षिकया दष्टं दृष्ट्वा मुखं पत्युः शूनोष्ठम् । ईर्ष्यायिता पुलिन्दी वृक्षच्छायां गताऽन्याम् ॥] पइस्स दट्ठूणं मुहं पत्युर्दृष्ट्वा मुखम् । कथंभूतं मुखम् । महुमच्छियाएँ डक्कं मधुमक्षिकया दष्टम् । अत एव सूणुट्ठं शूनोष्ठम् । अन्याङ्गनादत्तदन्तव्रणम् । रुक्खच्छायं गया अन्नं वृक्षच्छायां गता अन्यां, वृक्षान्तरच्छायां पुलिन्दी गतेत्यर्थः । कथंभूता । ईसाइया ईर्ष्यन्ती । स्वीया नायिका ॥६७७॥

६७८) बप्पभट्टिस्स । [अनुमरणप्रस्थितताया अपमृत्युजीविते प्रियतमे । वैधव्यमण्डनं कुलवध्वाः सौभाग्यं जातम् ॥] गतार्था गाथा । पम्मारयं दीर्घमूर्छा । सती स्वीया नायिका ॥६७८॥

६७९) सातवाहनस्य । [धन्या वसन्ति निःशङ्कमोहने बहलपत्रवद्वृतिके । वातान्दोलनवेपमानवेणुगहने गिरिग्रामे ॥] धन्ना गिरिग्गामे वसंति धन्या गिरिग्रामे वसन्ति । कीदृशे । बहलपत्रैरुपचिता वृतयो यस्मिन् स तथोक्तः, तस्मिन् । अन्यच्च कीदृशे । वायंदोलणहल्लंतवेणुगहणे वातान्दोलनेन दोलायमानं वेणुगहनं यत्र । अत एव नीसंकमोहणे निःशङ्कं मोहनं यत्र तस्मिन् । ईदृशे गिरिग्रामे धन्या वसन्तीत्यर्थः । असतीजनोक्तिः ॥६७९॥

१ W.दट्ठुं; २ W.पिअस्स; ३ W.ईसाउई; ४ W.पच्चागअजीविए; ५ W.बहलपत्तलवइम्मि; ६ W.वाअंदोलणओणविअवेणुगहणे.

W 638 R684, ६८०) पप्फुल्लघरकलंबा निद्धोयसिलायला मुइयमोरा ।
पसरंतुज्झरकलयलमणोहरा इह गिरिग्गामा ॥८०॥

W 639 R685, ६८१) तह परिमलिया गोवेण तेण हत्थं पि जा न उल्लेइ ।
स च्चिय खडणा इण्हिं पिच्छह कुडदोहिणी जाया॥८१॥

W 640 R886 ६८२) धवलो जियइ तुह कए धवलस्स कए जियंति गिट्ठीओ ।
जिय तंबे अम्हं जीविएण गुट्ठं तुहाँयत्तं ॥८२॥

६८०) कर्कराजस्य । [विकसितगृहकदम्बा निर्धौतशिलातला मुदितमयूराः । प्रसरन्निर्झरकलकलमनोहरा इह गिरिग्रामाः ॥] इह प्रदेशे गिरिग्गामा गिरिग्रामाः पप्फुल्लघरकलंबा प्रफुल्लिता गृहकदम्बका येषु ते तथोक्ताः । निद्धोयशिलायला निर्धौतानि शिलातलानि येषु ते तथोक्ताः। मुइयमोरा मुदिता हृष्टा मयूराः येषु ते तथोक्ताः । पसरंतुज्झरकलयलमणोहरा प्रसरन् निर्झराणां यः कलकलस्तेन मनोहराः सुरम्याः । सुलभस्थान (? सुरतसुलभस्थानत्वम्, आजड) । आसन्ननयनमनोहराः, अलक्ष्यमाणसीत्कृतरवाः, संकेतार्थिकामिनीजनयोग्या इह गिरिग्रामा इत्यर्थः ॥६८०॥

६८१) वाक्पतिराजस्य । [तथा परिमृदिता गोपेन तेन हस्तमपि या नार्द्रयति । सैवादुग्धदेदानीं प्रेक्षध्वं घटदोहिनी जाता ॥] गतार्था गाथा । उल्लं आर्द्रम् । खडणा गौर्या दुग्धं न प्रयच्छति । कुडो कुटो घटः । अन्योक्तिरलंकारः ॥६८१॥

६८२) भगदत्तस्य । [धवलो जीवति तव कृते धवलस्य कृते जीवन्ति गृष्टयः । जीव गौरस्माकं जीवितेन गोष्ठं त्वदायत्तम् ॥] जिय तंबे

१ W. पप्फुल्लघणकलंबा; २ W. पसरंतोज्झरमुइला उच्छाहंते; ३ W. अम्ह वि जीविएण; ४ W. तुमाअत्तं.

W731 R687, ६८३) उवहारियाएँ समयं पिंडारे उय दवं कुणंतम्मि।
नववहुयाएँ सरोसं सव्व च्चिय वच्छया मुक्का ॥८३॥

W795 R587, ६८४) कढिणखुरवीढपिल्लणदलंतपत्थरविणिग्गयग्गिकणे।
धवलुज्जुआरियवहे कसरा वि सुहेण वच्चंति ॥८४॥

अम्हं जीविएण जीव गौरस्माकं जीवितेन, यतः गुट्ठं तुहायत्तं गोष्ठं तवायत्तम् । कथमित्याह । धवलो जियइ तुह कए धवलो जीवति तव कृते, धवलस्स कए जियंति गिट्ठीओ धवलस्यार्थे जीवन्ति गृष्टयः । अत एव गोष्ठं तवायत्तम् । त्वयि जीवति सर्वे जीवन्तीत्यर्थः । सौरभेयीसौभाग्यं भङ्ग्या भणितं भवति । तंवा गौः । गृष्टिः सकृत्प्रसूता गौः । पर्यायोक्तिरलंकारः ॥६८२॥

६८३) हालस्य । [दोहनकारिकया सार्धं गोपालके पश्य नर्म कुर्वति। नववध्वा सरोषं सर्वं एव तर्णका मुक्ताः ॥] नववहुयाएँ सरोसं सव्व च्चिय वच्छया मुक्का नववध्वा सरोषं सर्वं एव तर्णका मुक्ताः । क्व सति । पिंडारे उय दवं कुणंतम्मि गोपालके (पश्य) नर्म समाचरति कया सह । उवहारियाएँ समयं दोहनधारिकया समम् । अयमस्मत्पतिर्वत्समोक्षणे सति तद्बन्धनव्यग्रः सन् न मत्स्या (? मत्सपत्न्या) समं नर्म करिष्यतीति भावः । उवहारी दोहनधारिणी (? दोहनकारिणी) । प्रथमवधूरित्येका (? प्रथमवधूरित्येके) । पिंडारो गोपालकः । दवो नर्म । इङ्गितलक्ष्यः सूक्ष्मालंकारः ॥६८३॥

६८४) समरशक्तेः । [कठिनखुरपीठप्रेरण–(पीडन–) दलत्प्रस्तरविनिर्गताग्निकणे । धवलर्जुसेवितपथे निकृष्टवृषभा अपि सुखेन व्रजन्ति ॥] धवलुज्जुआरियवहे कसरा वि सुहेण वच्चंति धवलेन गोचरीकृते पथि निकृष्टवृषभा अपि सुखेन व्रजन्ति । कीदृशे । कढिणखुरवीढपिल्लणदलंतपत्थरविणिग्गयग्गिकणे कठिनेन खुरपीठेन यत् प्रेरणं, तेन दलन्तः शीर्यन्तो ये प्रस्तराः, तेभ्यो

W796R689,६८५) नक्खमऊहेसु खणं, कुसुमेसु खणं, खणं किसलएसु ।
हत्थेसु खणं कुसुमुच्चियाएँ डोलेविया भसला ॥८५॥

W641R690,६८६)अग्घाइ छिवइ चुंबइ ठवेइ हिययम्मि जणियरोमंचे ।
जायाकवोलसारिच्छयाएँ पहिओ महुयपुप्फं ॥८६॥

W642R691,६८७) उय उल्लिज्जइ मोहं भुजंगकित्तीएँ कडयलग्गाए ।
उज्झरधारासद्धालुएण सीसं वणगएण ॥८७॥

विनिर्गता अग्निकणा यस्मिन् स तथोक्तः, तस्मिन् । कसरो निकृष्टवृषभः । अन्योक्तिरलंकारः ॥६८४॥

६८५) चुल्लोडकस्य । [नखमयूखेषु क्षणं, कुसुमेषु क्षणं, क्षणं किसलयेषु । हस्तयोः क्षणं कुसुमोच्चायिकया दोलायिता भ्रमराः ॥] डोलाविया भसला दोलायिता भ्रमराः । (कया) कुसुमुच्चियाएँ कुसुमोच्चायिकया । (क्व।) नक्खमऊहेसु खणं नखमयूखेषु क्षणम् । कुसुमेसु खणं पुष्पेषु (क्षणम्) । हत्थेसु खणं (हस्तयोः क्षणम्) । खणं किसलएसु (क्षणं किसलयेषु) । नखमयूखानां कुसुमानां कराणां (? करयोः) किसलयानां च सादृश्यदर्शनेन द्विरेफा दोलायन्ते, इति भावः । संशयोऽलंकारः ॥६८५॥

६८६) शीलकस्य । [आजिघ्रति स्पृशति चुम्बति स्थापयति हृदये जनितरोमाञ्चे । जायाकपोलसदृक्षतया पथिको मधूकपुष्पम् ॥] गतार्था गाथा । सारिच्छया सदृक्षता ॥६८६॥

६८७) सर्वसेनस्य । [पश्यार्द्रीक्रियते मोघं भुजङ्गकृत्या कटकलग्नया । निर्झरधाराश्रद्धालुना शीर्षं वनगजेन ॥] उय पश्य । मोहं वणगएण भुयंगकित्तीएँ सीसं उल्लिज्जइ, मोघं वृथा बनगजेन भुजङ्गकृत्या शीर्षम् आर्द्रीक्रियते । कीदृश्या । कडयलग्गाए कटकं पर्वतैकदेशः, तत्र लग्नया । भ्रान्तिमान् अलंकारः ॥ ६८७॥

१ W. लोडाविया; २ W. जणियरोमंचो; ३ W. जायाकवोलसरिसं पेच्छइ.

W643,R693,६८८)कमलं मुयंत महुयर पिक्ककइत्थस्स गंधलोहेण ।
आलेक्खं उज्जुयपामरो व्व छिविऊण जाणिहिसि ॥८८॥

W644,R693,६८९)गिज्जंते मंगलगाइयाएँ वरगोत्तदिन्नयण्णाए ।
सोउं व निग्गओ उयह हुंतवहुयाएँ रोमंचो ॥८९॥

W797,R694,६९०)छित्तम्मि जेण रमिया ताओ किर तस्स मं देइ ।
जइ तेण इमं निसुयं फुट्टइ हिययं हरिसियाए ॥९०॥

६८८) मकरध्वजस्य । । [कमलं मुञ्चन् मधुकर पक्वकपित्थस्य गन्धलोभेन । आलेख्यम् ऋजुकपामर इव स्पृष्ट्वा ज्ञास्यसि ॥] स्पृष्ट्वा ज्ञास्यसि । कः कमिव । आलेक्खं उज्जुयपामरो व्व आलेख्यम् ऋजुकपामर इव । यथा सरलस्वभावो ग्राम्यः आलेख्ये निरीक्ष्य नायिकां पारमार्थिकीयमिति सोह्यान्यसि (?) मन्यमानः पाणिना परामृशमानः प्रत्येति यदुत चित्रपुत्रिकेयमिति, एवं त्वमपि कपित्थफलं स्पृष्ट्वा ज्ञास्यसि यदिदं चञ्चुपुटपाटितमपि तत्स्फटति (?) । उपमान्यापदेशाभ्यां संसृष्टिरलंकारः ॥६८८॥

६८९) धूर्तस्य । [गीयमाने मङ्गलगायिकया वरगोत्रदत्तकर्णायाः । श्रोतुमिव निर्गतः पश्यत भविष्यद्वध्वा रोमाञ्चः ॥] उयह पश्यत । हुंतवहुयाएँ रोमंचो निग्गओ भविष्यद्वध्वा रोमाञ्चो निर्गतः । कथंभूतायाः । वरगोत्तदिन्नयण्णाए वरगोत्रदत्तकर्णायाः । वरनामाङ्कितं हि मंगलं गीयत इति स्थितिः । किमिव कर्तुं निर्गतः । सोउं व श्रोतुमिव । वरो जामाता । रोमाञ्चः सात्त्विको भावः । गोत्रं नाम । उत्प्रेक्षालंकारः ॥६८९॥

६९०) पामराजस्य (? प्रेमराजस्य) । [क्षेत्रे येन रमिता तातः किल तस्यैव मां ददाति । यदि तेनेदं निश्रुतं स्फुटति हृदयं हर्षिकया ॥] छित्तम्मि जेण रमिया क्षेत्रे येनाहं रमिता, ताओ किर तस्स चेय मं देइ तातः किल तस्मै एव मां ददाति । जइ तेण इमं निसुयं यदि तेन मत्प्रियेण इदं निश्रुतं, फुट्टइ हिययं हरिसियाए स्फुटति हृदयं हर्षितायाः (? हर्षिकया) । हर्षनिर्भरं

१. W पिक्ककइत्थाण; २ W. आलेक्खलइडुअं पामरो व्व; ३ W. मंगलगाइआहि. ४ W. तीअ.

W 645, R695, ६९१) मन्ने आयण्णंता आसन्नविवाहमंगलग्गीयं[1] ।
तेहि जुवाणेहि समं हसंति मं वेडिसकुडंगा[2] ॥९१॥

W 646, R 696, ६९२) उवगयचउत्थिमंगलहोंतविओयसविसेसलग्गेहिं ।
तीए[3] वरस्स सेयंसुएहि रुण्णं व हत्थेहिं ॥९२॥

हृदयं स्फुटतीत्यर्थः । अणेमल्लो (?) इति पठन्ति । तत्र मन इति सेवादित्वाद् द्वित्वे रूपम् (?) । चेय इत्यवधारणे । इरकिरहिलस्य (?) निश्चित्याख्याते । अस्य संबन्धिनी कन्या नायिका । हेतुरलंकारः ॥६९०॥

६९१) गोपस्य । [मन्य आकर्णयन्त आसन्नविवाहमङ्गलगीतम् । तैर्युवभिः समं हसन्ति मां वेतसनिकुञ्जाः ॥] मन्ने वेडिसकुडंगा मं हसंति मन्ये वेतसकुडङ्गा मां हसन्ति । कथम् । तेहि जुवाणेहि समं तैर्युवभिः समम् । किं कुर्वन्तः । आसन्नविवाहमंगलग्गीयं आयण्णंता आसन्ने विवाहे यन्मङ्गलतूर्येषु गीतं, तदाकर्णयन्तः शृण्वन्तः । युवानो वेतसकुडङ्गानि च उन्नंतो आतत्वंति स्नति (?) प्रतिरवेण हसन्तीवेत्यर्थः । वेडिसो वेतसः । कुडंगकं गहनम् । अत्र च्युतचरित्राणां कुमारीणां विवाहारम्भो हास्यहेतुः ॥६९१॥

६९२) बाणस्य । [उपगतचतुर्थीमङ्गलभविष्यद्वियोगसविशेषलग्नैः । तस्या वरस्य स्वेदाश्रुभिः, रुदितमिव हस्ताभ्याम् ॥] तीए वरस्स रुण्णं व हत्थेहिं तस्या वध्वा वरस्य च जामातुः, रुदितमिव हस्ताभ्याम् । उवगयचउत्थिमंगलहोंतविओयसविसेसलग्गेहिं उपगतं यच्चतुर्थीमङ्गलं, तत्र यो भवति (? भविष्यन्) वियोगः, तेन सविशेषलग्नैः श्लिष्टैः (? सविशेषलग्नाभ्यां श्लिष्टाभ्याम्) । चतुर्थीमङ्गल उपगते सति वधूवराणां करवियोगविशेषो (?) भवतीति सतां समयः । स्वेदः सात्त्विको भावः ॥६९२॥

---

१ W. मंगलग्गीअं; २ W. ० कुडुंगा; ३ W. तीअ वरस्स अ.

W 647, R697, ६९३) न य दिट्ठिं देइ, मुहं न य छिविउं देइ, नालवइ किं पि ।
तह वि हु किं पि रहस्सं नववहुसत्थो पिओ होइ ॥९३॥

W 648, R698, ६९४)अलियपसुत्तवलंतम्मि नववरे नववहूए वेवंता ।
संवेल्लिओरुसंजमियवत्थगंठिं गया हत्था ॥९४॥

W649, R699, ६९५)पुच्छिज्जंती न भणइ, गहिया पप्फुरइ चुंबिया रुवइ ।
तुण्हिक्का नववहुया कयावराहेण उवगूढा ॥९५॥

६९३) आढ्यराजस्य । [न च दृष्टिं ददाति, मुखं न च स्प्रष्टुं ददाति, नालपति किमपि । तथापि किमपि रहस्यं नववधूसार्थः प्रियो भवति ॥] न य दिट्ठिं देइ न च दृष्टिं ददाति । नेय मुहं नैव मुखं (? न य मुहं न च मुखं) छिविउं देइ स्प्रष्टुं ददाति (इति) सर्वत्र योज्यम् । नालवइ कि पि नालपति किमपि । तह वि हु किं पि रहस्सं तथापि खलु किमपि रहस्यं नववहुसत्थो पिओ होइ नववधूसार्थः प्रियो भवति । कान्तानां मनांस्यावर्जयतीत्यर्थः । मुग्धा नायिका सस्पृहं प्रियेऽवलोकयति, अन्यतोऽवलोकयति । वक्त्रेन्दुबिम्बचुम्बनकामुके तु पराङ्मुखीभवतीत्यादि जातिरलंकारः ॥६९३॥

६९४) इन्द्रराजस्य । [अलीकप्रसुप्तवलमाने नववरे नववध्वा वेपमानौ । संवेल्लितोरुसंयतवस्त्रग्रन्थिं गतौ हस्तौ ॥] नववहूएँ नववध्वाः संवेल्लिओरुसंजमियवत्थगंठिं गया हत्था संवेल्लितोरुसंयतवस्त्रग्रन्थिं गतौ हस्तौ । कथंभूतौ । वेवंता वेपमानौ । क्व सति । अलियपसुत्तवलंतम्मि नववरे अलीकप्रसुप्ते वलमाने नववरे । संवेल्लियं संवलितम् । इयमपि मुग्धा सहिनो (?)। विमोचन....दुःक्षियव (?)पत्युः । कारणकलंकरपृच्छ्या-वयथामति संधत्ते पोत्तरं भर्तुः (?)॥ जातिरलंकारः ॥६९४॥

६९५) प्रलयमृगेन्द्रस्य । [पृच्छ्यमाना न भणति, गृहीता प्रस्फुरति, चुम्बिता रोदिति । तूष्णीका नववधूः कृतापराधेनोपगूढा ॥] पुच्छिज्जं-

१W. णेइ; २W. णववहुसंगो; ३W. वेयंता; ४W. गओ हत्थो.

W650,R700,६९६) तत्तो च्चिय निंति' कहा, वियसंति तहिं, तहिं समप्पंति ।
किं मन्ने माउच्छा, इक्कजुवाणो इमो गामो ॥९६॥

W.651,R704, ६९७) जाइँ वयणाइँ अम्हे वि जंपिमो ताइं जंपइ जणो वि ।
ताइं चिय तेण पयंपियाइँ हिययं सुहावेंति ॥९७॥

ती न भणइ पृच्छयमाना न भणति, गहिया पप्फुरइ गृहीता प्रस्फुरति, चुंबिया रुयइ चुम्बिता रोदिति । तुण्हिक्का नववहुया तूष्णीका नववधूः कयावराहेण उवऊढा कृतापराधेनोपगूढा । इयमपि मुग्धा । सा हि व्ययोपरिकृत्यास्ते(!) सर्वाङ्गालिङ्गनं परिहरति । रोदिति तूष्णीं तिष्ठति कृतापराधेन (उपगूढा) सा दयिता ॥ जातिरलंकारः ॥६९५॥

६९६) दुर्निवारस्य । [तत एव निर्यान्ति कथाः, विकसन्ति तस्मिन्, तस्मिन् समाप्यन्ते । किं मन्ये मातृष्वसरेकयुवकोऽयं ग्रामः ॥] हे माउच्छा मातृष्वसः । मन्ने किं इक्कजुवाणो इमो गामो मन्ये किम् एकयुवायं ग्रामः येन तत्तो च्चिय निंति कहा तत एव कथा निर्यान्ति, वियसंति तहिं विकसन्ति तत्र, तहिं समप्पंति तत्र समाप्यन्ते । तत् किम् एकयुवाऽयं ग्रामः । इति ज्ञात्वा स एवैकः सुन्दरयुवेति ॥६९६॥

६९७) विक्रमराजस्य । [यानि वचनानि वयमपि जल्पामस्तानि जल्पति जनोऽपि । तान्येव तेन प्रजल्पितानि हृदयं सुखयन्ति॥] ताइं चिय तेण पयंपियाइँ हिययं सुहावेंति तान्येव तेन प्रजल्पितानि हृदयं सुखयन्ति । जाइँ वयणाइँ अम्हे वि जंपिमो यान्येव वचनानि वयम् (अपि) जल्पामः, ताइँ जंपइ जणो वि तानि जल्पति जनोऽपि लोकोऽपि । नैव तानि सुखयन्ति । तान्येव तत्संबन्धात् सुखमुत्पादयन्तीति पत्यौ रागातिशयप्रकाशनपरेयमुक्तिः ॥९७॥

---

१ W. होंति २ TW (two of the Telinga recension MSS consulted by Weber) जाइ जंपइ जणो वि.

W652,R702, ६९८) सव्वायरेण मग्गइ पियं जणं जइ सुहेण वो कज्जं ।
जं जस्स हिययदइयं नेवे सुहं जं तहिं नत्थि ॥९८॥

W809, ६९९) सरहसविणिग्गयाएँ वि इच्छाएँ तुमं न तीएँ सच्चविओ ।
सीसाहयवलियभुयंगवंकरच्छे हयग्गामे ॥९९॥

W808, ७००) माणंसिणीएँ पइणा नयणकवोलाहरप्पहाभिन्ना ।
उज्जुयसुरचावणिहा वाहोआरा चिरं दिट्ठा ॥१००॥

६९८) रोहायाः । [सर्वादरेण मार्गयत प्रियं जनं यदि सुखेन वः कार्यम् । यद्यस्य हृदयदयितं, नैव सुखं यत् तत्र नास्ति ॥] सव्वायरेण मग्गइ पियं जणं सर्वादरेण मार्गयत प्रार्थयत प्रियं जनं, प्रियो जनो मे भूयादिति आशंसत । कुतश्चैत्यर्थः (? कुतश्चैतदित्याह) ॥९८॥

६९९) [सरभसविनिर्गतयाऽपि इच्छया त्वं न तया दृष्टः । शीर्षाहतवलितभुजङ्गवक्ररथ्ये हतग्रामे ॥] तीएँ तुमं इच्छाएँ न सच्चविओ तया त्वम् इच्छया न दृष्टः । कदाचित् गृहान्निर्गता न भवतीत्याह । सरहसविणिग्गयाएँ वि सरभसविनिर्गतयाऽपि । क्व । सीसाहयवलियभुयंगवंकरच्छे हयग्गामे शीर्षाहतवलितो योऽसौ भुजङ्गः, तद्वद् वक्रा रथ्या यस्मिंस्तत्र । तथाभूते हतग्रामे । वक्रवर्त्मवलनवशेन न दृष्टः । स्वेच्छया तया त्वं नावलोकित इत्यनुरागसूचकं सखीवचनम् । सच्चविओ दृष्टः । उपमालंकारः ॥९९॥

७००)हालस्य । [मनस्विन्याः पत्या नयनकपोलाधरप्रभाभिन्नाः । ऋजुसुरचापनिभा बाष्पावतारािश्चरं दृष्टाः ॥]१००॥

---

१ W. तं ण सुहं जं तहिं णत्थि.

The Ms. breaks off at the end of folio 13b. As folio 14 is missing, the commentary on st. 700 as also the colophon of the seventh cento and of the entire work are lost to us.

× – ×

Four additional stanzas appearing in the BORI Ms. with Ajada's commentary, at the end of the sixth cento:—

W558, R605, १) सुप्पं दड्ढं चणया न भुंजियो सो जुआ अइक्कंतो ।
अत्ता घरम्मि कुविया बहिराण व वाइओ वंसो ॥१॥

W559, R606, २) पिसुणंति कामिणीणं जलंलिक्कपियावगूहणसुहिल्लिं ।
कंडइयकवोलुप्फुल्लणिच्चलच्छीइँ वयणाइं ॥२॥

W726, R607, ३) अमेयमयं विय हिययं हत्था तण्हाहरा सयण्हाणं ।
चंदमुह कत्थ निवसइ अमित्तदहणो तुह पयावो ॥३॥

१) तस्सेय (गोभटस्य) । [शूर्पं दग्धं चणका न भृष्टाः स युवा अतिक्रान्तः । श्वश्रूर्गृहे कुपिता, बधिराणां वादितो वंशः ॥] व्यर्थकारितायामसतीवाक्यम् । काचित् शूर्पे चणकान् निक्षिप्य भर्जनाय परगृहे गत्वा साङ्गारं भस्म तन्मध्ये चिक्षेप । तदानीं तदभीष्टस्तेन पथाऽऽगतः । साऽपि शूर्पं तथागतं मुक्त्वा पृष्ठेन धाविता । स च शीघ्रत्वाद् गतः । सा च प्रतिनिवृत्ता यावदायाति, शूर्पं दग्धं च जातम् । तादृशं च गृहीत्वा गृहे गता । ततः श्वश्र्वा कलहिता । ततः सा भणति । शूर्पं दग्धं चणका न भृष्टाः, स युवाऽतिक्रान्तः, श्वश्रूर्गृहे कुपिता बधिराणां वादितो वंशो मयेति ॥१॥

२) भूसणस्स । [पिशुनयन्ति कामिनीनां जलनिलीनप्रियावगूहनसुखकेलिम् । कण्टकितकपोलोत्फुल्लनिश्चलाक्षीणि वदनानि ॥] जलक्रीडा वर्ण्यते । कण्टकितकपोलोत्फुल्लनिश्चलाक्षीणि कामिनीनां वक्त्राणि जलनिमग्नप्रियावगूहनसुखासिकां सूचयन्ति । अनुमानालंकारः । लिक्को निमग्नः ॥२॥

३) रवरस्स । [अमृतमयमिव हृदयं हस्तौ तृष्णाहरौ सतृष्णानाम् । चन्द्रमुख कुत्र निवसति अमित्रदहनस्तव प्रतापः॥] राजा वर्ण्यते ।

१W. भज्जिआ; २W. अत्ता वि घरे कुविआ; ३W. भूआण; ४W, जललुक्क; ५W. अमिअमअं; ६W. विअ; ७W. चंदमुहि.

W560,R608, ४)अहिणवपाउसरसिएसु [1]सहइ सामाइएसु दियहेसु ।
रहैसपरिग्गहियाणं व नच्चियं मोरैविंदाणं ॥४॥

हे राजन्, तव हृदयं तावदमृतमयम् । अमृतं जलं सुधा च । हस्तौ च सतृष्णानां तृष्णाहरौ । दानोदकप्लुतत्वात् । मुखस्य साक्षात् चन्द्रत्वाच्च त्रीण्यपि जलत्वकारणानि । मित्रो रविः, दहनो अग्निः । ततोऽमित्रदहनः सूर्याग्न्योरसंभवी, शत्रुदहनः वा (? च) क्व तव प्रतापस्तिष्ठतीति प्रश्नः । जलप्रतापयोर्विरुद्धत्वाद् विरोधोऽलंकारः ॥३॥

४) मकरन्दस्य । [अभिनवप्रावृड्रसितेषु शोभते श्यामायितेषु दिवसेषु । रभसपरिगृहीतानामिव नृत्तं मयूरवृन्दानाम् ॥] मेघो वर्ण्यते। अभिनवप्रावृड्रसितेषु श्यामायितेषु दिवसेषु रभसपरिगृहीतानामिव मयूरवृन्दानां नृत्तं शोभते । अथवा श्लेषच्छायोक्तिलेशे दिवसेषु सामाजिकेषु अभिनवप्रावृड्रसितेषु वादित्ररवायमाणेषु सत्सु रसपरिगृहीता मयूरा नटा इव नृत्यन्तीति ॥४॥

१w. सोहइ; २w. रहसपसारिअगीवाण; ३w. मोरवुंदाणं.

×—×